प्रपञ्चसारतन्त्रम्

श्रीशङ्कराचार्यविरचितम्

तच्छिष्यपद्मपादाचार्यविरचितविवरणोपेतम्
प्रयोगक्रमदीपिकाख्यविवरणविवृतिसमेतम्

श्री आर्थर एवेलनेन पर्यवेक्षितम्
श्रीअटलानन्दसरस्वतीमहोदयैः सम्पादितम्

मोतीलाल बनारसीदास
दिल्ली : वाराणसी : पटना

सूचीपत्रम्

* चिह्नितास्टीकोक्तविषयाः

विषयः	पृष्ठाङ्कः
मङ्गलाचरणम्	१
* तन्त्रावतारप्रयोजनम्	"
* ग्रन्थविषयस्य पाञ्चविध्यम्	२
* स्वरव्यञ्जनपारायणम्	३
* मन्त्रभेदेन पारायणक्रमभेदः	४
* शारदाशब्दव्युत्पत्तिः	५
* आणव-शाक्त-शाम्भवदीक्षाप्रकारः	"
ब्रह्मादीनामुत्पत्तिः	६
भगवतः मायिनः स्थानमूर्त्यादिः	७
भगवत्समीपे ब्रह्मणः प्रश्नः	९
तत्र प्रमिताक्षरोक्तिः	"
अक्षरस्वरूपम्	१०
हकारस्य सर्वात्मत्व-स्वरूप-व्याप्ति-कथनम्	११
लवादिप्रलयान्तकालभेदकथनम्	१२
ब्रह्मायुःपरिमाणम्	१३
* आणवादियोगः	१४
तत्त्वविकृतिक्रमः	१६
बिन्दोर्बिन्दुनादबीजोत्पत्तिः	"
प्रकृतेरिच्छासत्त्वादिरूपत्वम्	"
रवोत्पत्तिः	१७
शब्दब्रह्मस्वरूपम	"
महदादिधरान्ततत्त्वोत्पत्तिः	"
पञ्चभूतस्वरूपम्	१८
पञ्चभूतकलाः	"
* अपञ्चीकृतबीजोद्धारः	"
* पञ्चीकृतबीजोद्धारः	"
पञ्चीकरणम्	१९
पञ्चविंशतितत्त्वम्	१९
प्रकृतिविकृतिविभागः	"
प्रकृतेर्गुणत्रयात्मकत्वम्	२०
* ग्रन्थस्य सर्वागमसारत्वोक्तिः	"
* शैवशाक्तादितत्त्वसमन्वयोक्तिः	"
अर्थसृष्ट्युपसंहारः	२१
अर्थसृष्टेः प्रयोजनम्	"
शब्दब्रह्मोपदेशः	२२
चतुर्विधदेहोत्पत्तिः	२३
जरायुजोत्पत्तिः	"
मायीयादिमलत्रयम्	२४
जन्तोः स्त्रीपुंनपुंसकत्वे हेतुः	"
जन्तोरुत्पत्तिप्रकारः	"
सुषुम्नादिनाड़ीनामानि	"
देहेऽहोरात्रादिक्रमः	२६
चेतनाधातोरागतिः	"
तत्र मतभेदाः	"
तत्र स्वसिद्धान्तः	२७
मनोबुद्ध्यहङ्कारचित्तानां भेदाः	"
शब्दब्रह्मणोऽभिव्यक्तिः	२८

द्वितीयः पटलः

गर्भवासवर्णनम्	२९
देहे प्राणादिदशवायूनां क्रिया	३०
वाय्वग्निदोषदूष्यादि	"
प्राणादीनां धर्माः	३१
षडूर्मयः। षट्कोशाः	"
ओजोधातूत्पत्तिः	"

विषयः	पृष्ठाङ्कः
इन्द्रियाणामर्थविशेषनियमहेतुः	३१
ग्रहणीकथनम्	३२
मूलाधारनिर्णयः	»
षड्रसाः। अन्नपाकप्रकारः	»
वस्तिनिरूपणम्	३३
गर्भस्थजन्तूत्पत्तिः	»
परापश्यन्त्यादिभावकथनम्	»
* एषां विवृतिः	»
कुण्डलिनीव्याप्तिप्रकरणम्	
वर्णव्यक्तिः। अहङ्कारोत्पत्तिः	३४
जन्तोः संसारक्रमः	»
* भावानां सप्तविध्यकथनम्	»
कुण्डलिन्याः सर्वात्मत्वम्	३५
कुण्डलिनीविभूतिः	»
गुणनप्रकरणम्	३६
* त्रिगुणादिष्वाशयः	३७

तृतीयः पटलः

विषयः	पृष्ठाङ्कः
वर्णविभूतिप्रकरणम्	
वर्णानामग्नीषोमसूर्यात्मकत्वम्	३८
स्वरस्पर्शव्यापकवर्णनिरूपणम्	»
स्वराणां स्त्रीपुंनपुंसकत्वम्	३९
वर्णवीर्योद्भवकालः	»
बिन्दुसर्गयोः शशिसूर्यरूपत्वम्	४०
स्पर्शानां पाञ्चविध्यम्	»
व्यापकोदयक्रमः	»
कलानाम-कथनम्	४१
प्रणवकलाः	»
केशवादिमूर्त्तितच्छक्तिनामानि	४२
श्रीकण्ठादिमूर्त्तितच्छक्तिनामानि	४३
वर्णौषधिः	४४
वर्णानामीरणादिप्रकारः	»
वर्णस्वरूपनिष्पत्तिप्रकारः	४५
वर्णानां पुंप्रकृतिवाचकमन्त्रत्वम्	»
हंसस्वरूपसूचना	४६
हकारस्य सर्ववर्णादिकारणत्वम्	»
स्तम्भनादिप्रयोगप्रकारः	४७

चतुर्थः पटलः

हकारस्य विश्वयोनित्वम्	४८
षोड़शाङ्गन्यासः	"
हकारादीनां गुणाः	»
गुणचतुष्टयकथनम्। न्यासक्रमः	५०
* पिपासादिन्यासभेदाः	५१
षड़ध्वन्याससूचनम्	५२
लिङ्गशक्त्यादिन्यासः	»
स्वरपारायणन्यासः	५३
कुण्डलिनीन्यासस्थानकथनम्	»
हकारतो ब्रह्मादीनामुत्पत्तिः	५४
अजपादिन्यासः	»
हंसस्वरूपकथनम्	५५
परमात्ममन्त्रोद्धारः	»
तारविभूतिः	५६
ग्रहाणां सूर्यात्मकसंविद्व्याप्यत्वम्	५७
अहोरात्रादिन्यासः	»
राशिमण्डलम्	५८
राशीनां चरादिभेदः	५९
राशीनां ब्राह्मणादिवर्णोक्तिः	»

विषयः	पृष्ठाङ्कः
राश्यधिपतिन्यासः	५८
राशिवेधादिन्यासः	६०
नक्षत्रवेधन्यासः	६१
नक्षत्रवेधन्यासक्रमः	६२
नक्षत्रचक्रकथनम्	६३
नक्षत्रदेवतान्यासः	„
तिथ्यादिन्यासः	६४
करणन्यासः । हृल्लेखाव्याप्तिः	६५
हृल्लेखाज्ञानेन विष्णुप्राप्तिः	६६
* राशिनक्षत्रनामार्णानुकूल्यम्	„
* कुलाकुलर्णधनविभागः	६७
* मन्त्रशुद्धिक्रमः	„

पञ्चमः पटलः

दीक्षाप्रकरणम्	
दीक्षामन्त्रशब्दयोर्निर्वचनम्	६८
आचार्यनियमः	„
वास्तुमण्डलमानम्	६९
वास्तुदेवार्चनक्रमः	„
वास्तुबलिः । दीक्षामण्डपादि	७०
चतुरस्रकुण्डमेखलायोनि-मानादिकथनम्	७२

षष्ठः पटलः

ऋषिच्छन्दोदेवतानिरुक्तिः	७९
षड्ङ्गन्यासे हृदयादिशब्दार्थः	८०
पञ्चाङ्गन्यासपक्षे नेत्रत्यागः	८१
उपकरणस्थापननियमः	८२
देवतानां पूजानियमः	„
कुम्भस्थापनविधिः	८३
गन्धाष्टकत्रैविध्यम्	८३
अष्टत्रिंशत्कलाविनियोगः	„
ऋक्पञ्चकेन कुम्भपूरणम्	८४
प्राणप्रतिष्ठामन्त्रः । उपचारभेदाः	८५
* उपचारमन्त्राः	८७
त्रैलोक्यमोहनप्रयोगः	८९
षड्ङ्गदेवताध्यानम्	९०
लोकपालास्त्रवर्णादीनि	„
होमप्रकरणम्	९१
अग्निज्वालनमन्त्रः	„
अग्निजिह्वानां सात्त्विकादिभेदाः	९२
तन्त्रामानि	„
अग्नेरङ्गमूर्त्यादि	९३
अग्निमन्त्रः । अग्निध्यानम्	„
व्याहृतिपूर्वकमनुना होमः	९४
गर्भाधानादिकर्मसु प्रणवेन होमः	„
* होमद्रव्यपरिमाणविधिः	९५
ब्रह्मार्पणमन्त्रः	९६
नक्षत्रादिबलिः	९७
अष्टाङ्ग-पञ्चाङ्ग-प्रणामः	„
अभिषेकः	९९

सप्तमः पटलः

मातृकाप्रकरणम्	
मातृकाविधानम्	१०१
मातृकामन्त्रर्थादि	„
भारतीध्यानम्	१०२
पुरश्चरणादि । यन्त्रम्	„
नवशक्तिनामानि	१०३

विषयः	पृष्ठाङ्कः
अष्टमातरः । जपादिफलकथनम्	१०३
कवितासिद्धिकरब्राह्मीघृतम्	१०४
अभिषेकफलम्	„
* शुद्धादिन्यासभेदाः	१०५
तारकलान्यासविधिः	१०६
केशवादिन्यासविधिः	१०७
अर्द्धनारीश्वरध्यानादि	„
प्रपञ्चयागविधिः	„
सप्तग्रहन्यासस्थानम्	१०८
तत्र मन्त्रपञ्चकम्	१०९
* नवग्रहन्यासः	„
प्रपञ्चयागमन्त्रार्थादि	„
तारादिपञ्चमनूनां स्वरूपव्याप्ती	११०
स्वाहाशब्दनिरुक्तिः	„
परमात्ममन्त्रार्थः	„
शक्तिबीज-नेत्रास्त्रमन्त्रार्थः	१११
प्रपञ्चयागन्यासक्रमः	„
होमप्रकारः	११३
जपादावधिकारिनिर्णयः	„
दशविधन्यासफलकथनम्	११५
प्रपञ्चयागस्य भुक्तिमुक्तिहेतुता	„
होमद्रव्याणि	„
होमविधिः	११६
तिलकधारणफलम्	११७

अष्टमः पटलः

विषयः	पृष्ठाङ्कः
प्राणाग्निहोत्रप्रकरणम्	
प्राणाग्निहोत्रविधिः	११८
पञ्चकुण्डेषु वर्णहोमः	„
समन्त्रोद्धारनवग्रहहोमः	११९
भूतमन्त्रैर्होमः । भूतमन्त्रोद्धारः	„
हंसस्वरूपवर्णनम्	१२०
अशनकाले प्राणाग्निहोत्राधिकारः	„
* प्राणाग्निहोमक्रमः	„
होमफलम्	१२३
दशाक्षरसरस्वतीमन्त्रः	„
ध्यानम् । पुरश्चरणपूजाप्रयोगाः	१२४
मन्त्रान्तरम्	१२५
ध्यानम् । पुरश्चरणपूजाप्रयोगाः	„
वाग्देवीस्तोत्रम्	१२६

नवमः पटलः

विषयः	पृष्ठाङ्कः
त्रिपुराप्रकरणम्	
त्रिपुराशब्दनिर्वचनम्	१२८
त्रिपुरामन्त्रः	„
न्यासभेदाः	१२९
* पादुकासप्तकादिन्यासः	१३०
ध्यानम्	१३१
पुरश्चरणपूजाप्रयोगाः	१३२
वेधकप्राणायामः	„
नवयोनिचक्रम्	१३३
अष्टौ मातरः भैरवाश्च	१३४
वाग्भवसाधनक्रमः	„
जपादिनियमस्तत्फलञ्च	१३५
कामराजादिसाधनम्	१३७

दशमः पटलः

विषयः	पृष्ठाङ्कः
भुवनेश्वरीप्रकरणम्	
भुवनेश्वरीमन्त्रः	१३९

विषयः	पृष्ठाङ्कः
ऋष्यादिन्यासः	१३८
भूतशुद्धिक्रमः	१४०
दिव्यदेहसृष्टिक्रमः	१४१
* आवरणादिन्यासः	१४२
ध्यानम्	१४३
पाशाङ्कुशशब्दनिरुक्तिः	"
वराभयशब्दनिरुक्तिः	"
त्रिगुणितयन्त्रम्	"
हृल्लेखादीनां न्यासस्थानानि	१४४
ब्रह्माण्यादीनां न्यासस्थानानि	"
नवशक्तिनामानि	"
* पीठमन्त्रः। मूर्तिमन्त्रः	"
घटस्थापनपूरणक्रमः	१४५
कुम्भपूरणद्रव्याणि	"
गायत्र्यादीनां ध्यानम्	१४६
घटभेदे देवताभेदः	"
अभिषेकः। पुरश्चरणम्	"
व्यापिन्यादिध्यानम्	१४७
होमविधिः	"
योगिनामन्तःपूजायाः कर्त्तव्यता	"
अभिषेकादिफलम्	१४८
षड्गुणितयन्त्रनिर्माणप्रकारः	"
यन्त्रे पूजाप्रयोगः	१५०

एकादशः पटलः

विषयः	पृष्ठाङ्कः
द्वादशगुणितयन्त्रविधानम्	१५१
षोड़श-द्वात्रिंश-चतुःषष्टिशक्तयः	१५२
घटार्गलयन्त्रम्	१५४
पाशाङ्कुशबीजम्	१५५
शक्तिमन्त्रः। पूजाप्रयोगादि	१५५
* कलशशब्दनिर्वचनम्	"
पुरश्चरणम्	१५६
यन्त्रलेखनद्रव्याणि	"
भुवनेश्वरीस्तोत्रम्	"

द्वादशः पटलः

विषयः	पृष्ठाङ्कः
लक्ष्मीप्रकरणम्	
लक्ष्मीमन्त्रः। ऋष्यादिन्यासः	१६०
ध्यानम्। पुरश्चरणम्	"
होमद्रव्याणि	१६१
पीठशक्तयः। आवरणदेवताः	"
चतुर्व्यूहः। अष्टशक्तिनामानि	"
अलक्ष्मीनाशकरहोमः	१६२
मन्त्रान्तरम्	"
ध्यानम्। पुरश्चरणादि	१६३
महालक्ष्मीमन्त्रः	१६४
ध्यानम्। पुरश्चरणम्	"
श्रीसूक्तविनियोगविधिः	१६५
ध्यानम्। पूजा-पुरश्चरणादि	"
द्वात्रिंशन्मन्त्रदेवतानामानि	१६७
श्रीसाधकवर्जनीयानि	"
श्रीसाधककर्त्तव्यानि	१६८

त्रयोदशः पटलः

विषयः	पृष्ठाङ्कः
त्रिपुटाप्रकरणम्	
त्रिपुटामन्त्रः। तदङ्गर्ष्यादि	१६८
ध्यानम्। पुरश्चरणम्	"
होमद्रव्याणि। भुवनवश्ययोगः	१७०
धरणीमन्त्रः। ऋष्यादि	"

विषयः	पृष्ठाङ्कः
ध्यानम् । होमादिविधिः	१७१
त्वरिताप्रकरणम्	१७२
त्वरिताशब्दनिर्वचनम्	»
त्वरितामन्त्रः । अङ्गन्यासादि	»
ध्यानम् । पुरश्चरणपूजाप्रयोगाः	१७३
होमद्रव्याणि	१७४
द्वादशरेखा-दशरेखा-यन्त्रम्	१७५
यन्त्रलेख्यमन्त्राः	»
नवरेखायन्त्रम्	१७६
यन्त्रलेख्यमनुः	१७७
अस्य श्रीकरत्वम्	»
कुम्भयन्त्रम्	»
नित्यामन्त्रः	१७८
ध्यानम् । पुरश्चरणादि	»
नित्याशक्तिनामानि	»
नित्यक्लिन्नामन्त्रः	१७९
ध्यानम् । पुरश्चरणादि	»
यन्त्रम्	१८०

चतुर्दशः पटलः

दुर्गाप्रकरणम्	
दुर्गामन्त्रः । ध्यानम्	१८१
पुरश्चरणम् । शक्तिनामानि	»
महासिंहमन्त्रः	»
वनदुर्गामन्त्रः । ऋष्यादि	१८२
ध्यानम् । पुरश्चरणम्	१८३
शक्तिनामानि । पूजाप्रयोगादि	१८४
शूलिनीदुर्गामन्त्रः	१८७
ऋष्यादि । ध्यानम् । पुरश्चर्यादि	१८८
विषापहननादिप्रयोगाः	१८९

पञ्चदशः पटलः

सौरप्रकरणम्	
सूर्यमन्त्रः । ऋष्यादि	१९१
ध्यानम् । पुरश्चरणादि	»
नवशक्तिनामानि	१९२
पीठमन्त्रः । अर्घ्यदानप्रकारः	»
अजपामन्त्रः । ऋष्यादि	१९३
ध्यानम् । पुरश्चरणम् । योगभेदाः	१९४
प्रयोजनतिलकमन्त्रः	१९५
ध्यानम् । पुरश्चरणादि	१९६
अर्घ्यद्रव्याणि	१९७
ग्रहशान्तिविधानम्	»
होमे समिन्नियमः	»
सौराष्टाक्षरमन्त्रः	१९८
ध्यानम् । पुरश्चरणप्रयोगादि	»

षोडशः पटलः

चन्द्रप्रकरणम्	
चन्द्रमन्त्रः	२००
ध्यानम् । पुरश्चरणादि	»
विद्यामन्त्रः । अग्निमन्त्रः	२०२
ध्यानम् । पुरश्चरणादि	»
शक्त्यादिकथनम्	२०३
अग्न्यावाहनमन्त्रः । ऋष्यादि	»
पुरश्चरणादि	२०४
चतुर्विंशाक्षरमन्त्रः	»
ध्यानम् । पुरश्चरणादि	२०५

विषयः	पृष्ठाङ्कः
सप्तदशः पटलः	
महागणपतिप्रकरणम्	
महागणपतिमन्त्रः	२०८
ऋष्यादि	»
ध्यानम् । पूजाविधिः	२०९
पुरश्चरणादि	२१०
शक्तिनामानि	२११
आसनमन्त्रः । तर्पणभेदाः	»
गजार्थिनृपतिकर्त्तव्यम्	२१३
होमभेदाः	»
स्तम्भनकरभूबीजम्	२१४
मन्त्रान्तरम्	»
ध्यानम् । पुरश्चरणादि	»
क्षिप्रप्रसादनमन्त्रः । ऋष्यादि	२१६
ध्यानम् । पुरश्चरणादि	»
* गणेशगायत्री	»
तर्पणप्रकारः	२१७
अष्टादशः पटलः	
मन्मथप्रकरणम्	
मन्मथमन्त्रः । ऋष्यादि	२१८
ध्यानम् । पुरश्चरणादि	»
शक्तिनामानि । मन्मथयन्त्रम्	»
गायत्री । मालामन्त्रः	२१९
मदनविधानम्	२२०
ध्यानम् । शक्त्यावरणदेवतादि	»
प्रयोगयन्त्रम् । होमादि	२२१
अष्टादशाक्षरश्रीकृष्णमन्त्रः	२२२
ध्यानम् । पुरश्चरणादि	»
प्रातर्मध्याह्नादिभेदेन ध्यानभेदः	२२२
पूजाप्रयोगादि	२२३
एकोनविंशः पटलः	
प्रणवप्रकरणम्	
मोक्षप्रधानप्रणवमन्त्रः	२२४
विष्णुध्यानम् । पुरश्चरणादि	२२५
चतुर्व्यूहः । शक्तिनामानि	»
योगलक्षणम्	२२६
यमनियमादीनां लक्षणम्	»
* पद्मासनभद्रासनवज्रासन-लक्षणम्	»
प्राणायामे पक्षान्तरम्	२२७
सकलीकरणप्रकारः	»
पञ्चाशन्मात्राधारणे प्रतिपत्तिः	»
* वीरासनम्	»
शोषणदहनादिप्रकारः	२२८
योगप्रयोगेऽवस्थादेशादिनियमः	»
सुषुम्नामध्यगतप्रणवध्यानम्	»
प्रणवनामन्यासः	२२९
प्रणवस्य वेदादित्वोपपादनम्	»
* न्यासक्रमः । प्रणवनामानि	»
मोक्षप्रधानयोगः	२३०
मोक्षसाधनयोगभेदाः	»
योगिनामवस्थाभेदाः	२३१
जागरादिपञ्चावस्थालक्षणम्	»
जपकाले प्रतिपत्तव्ययोगः	२३२
योगक्रमः	»
योगसिद्धिसूचकावस्थाः	२३३

विषयः	पृष्ठाङ्कः
अणिमाद्यष्टैश्वर्याणि	२३२

विंशः पटलः

नारायणाष्टाक्षरमन्त्रः	२३४
अष्टाक्षरार्थः। ध्यानम्	"
मन्त्रवर्णन्यासक्रमः	२३५
अष्टाक्षरे द्वादशाक्षर-मन्त्रान्तर्भावः	२३६
अक्षरतत्त्व-मूर्त्तिपञ्जरन्यासौ	"
किरीटादिमन्त्राः	"
संक्षेपदीक्षाविधानम्	२३७
शङ्खचक्रादीनां नामानि	"
पञ्चावरणविष्णुविधानम्	२३८
पूजाप्रयोगादि	"

एकविंशः पटलः

मासयन्त्रप्रकरणम्	
मासयन्त्राणां सामान्यलक्षणम्	२४१
चरस्थिरोभयराशिकथनम्	"
त्रि-षड्-द्वादश-गुणितयन्त्रम्	"
द्वादशभानुनामानि	२४२
केशवादिपूजामन्त्रः	"
केशवादित्यादिगायत्रीकथनम्	२४३
द्वादशराशियन्त्रम्। तत्पूजा	२४४
श्रीहरिस्तोत्रम्	२५०

द्वाविंशः पटलः

वासुदेवप्रकरणम्	
वासुदेवमन्त्रः	२५३
न्यासक्रमेण संहारसृष्टिस्थितयः	"
ध्यानम्। पुरश्चरणादि	२५३
सुदर्शनमन्त्रः	२५४
दिग्बन्धमन्त्रः	"
अग्निप्राकारमन्त्रः। वर्णन्यासः	"
सुदर्शनध्यानम्। गायत्री	२५५
रक्षाकरमन्त्रः। चक्रयन्त्रम्	"
मन्त्रः। कुम्भपूरणम्	२५६
आयुधवर्णाः। शक्तिनामानि	"
प्रयोगविधिः। स्थाननिर्देशः	"
बलिमन्त्रः	२५७
* रक्षोघ्नमन्त्रः	"
रक्षाकरयन्त्रम्	२५८
रक्षोघ्नमन्त्रः	"
यन्त्ररचनाविधिः	२६०

त्रयोविंशः पटलः

श्रीपुरुषोत्तमप्रकरणम्	
श्रीपुरुषोत्तममन्त्रः	२६१
* द्वादशाङ्गमन्त्रप्रयोगक्रमः	२६३
* मारणादिप्रयोगमन्त्राः	"
ऋष्यादि। षड्ङ्गमन्त्रः	२६४
व्यापकमन्त्रः	"
चक्राद्यायुधाष्टकमन्त्राः	२६५
गरुडमन्त्रः	"
त्रैलोक्यमोहनगायत्री	"
श्रीमन्त्रः	"
शङ्खादीनां मन्त्राः	"
त्रैलोक्यमोहनध्यानम्	२६६
पुरश्चरणादि। होमः	२६७

विषयः	पृष्ठाङ्कः
चतुर्विंशः पटलः	
श्रीकरप्रकरणम्	
श्रीकरमन्त्रः । ऋष्यादि । ध्यानम्	२७०
पुरश्चरणम् । पूजाप्रयोगादि	२७१
महावराहमन्त्रः	"
ऋष्यादि । ध्यानभेदाः	२७२
पूजाप्रयोगः । पुरश्चरणादि	२७३
वराहयन्त्रम्	२७५
पञ्चविंशः पटलः	
नृसिंहप्रकरणम्	
नृसिंहानुष्टुब्मन्त्रः । ऋष्यादि	२७६
प्रसन्ना प्रतिपत्तिः	"
क्रूरा प्रतिपत्तिः	२७७
मानसपूजा	"
पुरश्चरणम् । प्रयोगादि	"
* गरुड़मन्त्रः । अनन्तमन्त्रः	"
नृसिंहबीजम् । ऋष्यादि	२७८
होमादिविधिः	२७९
षड़क्षरमन्त्रः । ध्यानम्	२८०
नृसिंहयन्त्रम् । रक्षायन्त्रम्	२८१
प्रयोगादि	"
षड्विंशः पटलः	
विष्णुपञ्जरविधिः	२८३
विष्णुपञ्जरयन्त्रम्	"
विश्वरूपमन्त्रः	"
षोड़शाक्षरसर्वार्थसाधकमन्त्रः	"
चक्रादिमन्त्रेषु षोडशाक्षरयोगः	"
चक्रादिमन्त्रकथनम्	२८४
विश्वरूपध्यानम् । प्रयोगादि	२८६
जपविधिः । प्रयोगक्रमः	२८८
चक्रमन्त्रः । प्रतिपत्तिः	२८९
गीतादिमन्त्रयोगविधिः	"
रक्षादिप्रयोगाः	२९०
* मन्त्रप्रयोगक्रमः	"
सप्तविंशः पटलः	
प्रासादप्रकरणम्	
प्रासादशब्दनिर्वचनम्	२९३
प्रासादमन्त्रः । ऋष्यादि	"
ध्यानम् । मन्त्रदेवतानामानि	"
मूर्तिन्यासः । पुरश्चरणम्	२९४
पीठार्चनविधिः	"
नवपीठशक्तिनामादि	"
सद्योजात-वामाघोरध्यानानि	"
तत्पुरुषेशानध्यानकथनम्	२९५
पञ्चब्रह्मविधानम्	"
षडङ्गमन्त्रः	२९६
अष्टत्रिंशत्कलान्यासः	"
* ईशानादीनां औतमन्त्राः	"
न्यासक्रमः । विनियोगविधिः	२९७
शैवपञ्चाक्षरमन्त्रः । ऋष्यादि	२९८
न्यासः । ध्यानम् । पुरश्चर्यादि	"
विधानान्तरम्	"
गोलकन्यासः । जप्यमन्त्राः	२९९
श्रीशिवस्तवः	"
शक्तिपञ्चाक्षरविधानम्	३००

विषयः	पृष्ठाङ्कः
ध्यानम्। पूजाप्रयोगादि	३०१
शैवाष्टाक्षरमन्त्रः	"
ध्यानम्। ऋष्यादि	"

अष्टाविंशः पटलः

दक्षिणामूर्तिमन्त्रः	३०२
ऋष्यादि। ध्यानम्	"
पुरश्चर्यादि। आग्नेयमन्त्रः	३०३
ऋष्यादि। अघोरध्यानम्	"
पूजायन्त्रम्। प्रयोगादि	३०४
ऊर्ध्ववक्त्रप्रधानमन्त्रः	३०५
ऋष्यादि। ध्यानम्	"
पुरश्चर्यादि। प्रणवप्रधानयोगः	३०६
बाह्यप्रयोगाङ्गयन्त्रम्	३०७
मध्यबीजप्रधानान्तरयोगः	"
तृतीयबीजप्रधानयोगादिकम्	३०८

एकोनत्रिंशः पटलः

चिन्तामणिमन्त्रः	३१०
उमेशदेवताध्यानम्	"
अर्धनारीश्वरध्यानम्	"
क्रूरप्रयोगे ध्यानम्। पुरश्चर्यादि	"
रोगाद्युपशान्तौ प्रयोगभेदाः	३११
रक्षाकरयन्त्रम्। चण्डेश्वरमन्त्रः	३१४
ध्यानम्। पुरश्चरणम्	३१५
चण्डगायत्री। पूजाप्रयोगादि	"

त्रिंशः पटलः

गायत्रीमन्त्रविधिकथनम्	३१७
जपाद्यधिकारनियमः	"
प्रणवस्य सानुभवसाधनकथनम्	३१८
व्याहृत्यर्थकथनम्	३१९
प्रणवव्याहृतिसम्बन्धः	"
अन्तःप्रणवव्याहृति-पक्षे प्रणवाद्यर्थकथनम्	३२०
ध्येयस्वरूपध्यानप्रकारौ	३२१
रसशब्दार्थः	३२२
गायत्रीजपविधिः	"
निराकारध्यानम्	३२४
बहिर्जपक्रमः	"
गायत्रीमन्त्रवर्णपदन्यासः	३२५
गायत्रीध्यानम्। प्रयोगादि	"

एकत्रिंशः पटलः

त्रिष्टुब्विद्याप्रकरणम्	
ऋष्यादि। ध्यानम्	३२७
प्रयोगादि। नवशक्तिनामानि	३२८
अक्षरशक्तिनामानि	"
अस्त्रमन्त्रः। पादविभागः	३२९
मन्त्रदेवताङ्गकल्पना	३३०
अतिदुर्गामन्त्रजपनियमः	"
प्रतिलोममन्त्रसाधनविधिः	३३१
मन्त्रवर्णदेवताव्याप्तिः	"
आवरणदेवताभेदाः	"
दिनास्त्रलक्षणम्	३३२
क्षत्यास्त्रलक्षणम्	३३३
प्रयोगप्रकारः	३३४
अनुलोमप्रतिलोम-ध्यानभेदकथनम्	३३५

विषयः	पृष्ठाङ्कः
स्तम्भनादिविधिः	३३६
मूर्तिवर्णकथनम्	"
विविधप्रयोगविधिः	३३७

द्वात्रिंशः पटलः

लवणमन्त्रः	३४१
* चिटिमन्त्रः	"
अग्निध्यानम् । यामवतीध्यानम्	३४२
कात्यायनीध्यानम्	"
भद्रकालीध्यानम् । पुरश्चर्यादि	"
पुत्तलीप्रयोगादि	"
उपस्थानमन्त्रा'	३४४
प्रयोगभेदाः	३४५
बलिमन्त्रः	३४६
बलिदानप्रकारः	३४७

त्रयस्त्रिंशः पटलः

अनुष्टुप्प्रकरणम्	
आयुःप्रदोऽनुष्टुब्मन्त्रः	३४८
ऋष्यादि । ध्यानम्	"
आवरणदेवताः	३४९
मन्त्रवर्णशक्तिदेवताः	"
पुरश्चर्यादि । होमादिविधिः	"
शताक्षरमन्त्रः । ऋष्यादि	३५०
ध्यानम् । पुरश्चर्यादि	३५१
संवादसूक्तविधानम्	३५२
ऋष्यादि । ध्यानम्	"
पुरश्चरणम् । होमादिविधिः	३५३
* अनुकूलमन्त्रः	"
* मन्त्रयोगक्रमः	३५४
ऋग्वारुणीविधानम्	३५६
ऋष्यादि । ध्यानम्	"
पुरश्चरणम् । होमादिविधिः	"
* नवशक्तिनामानि	"

चतुस्त्रिंशः पटलः

दीर्घायुःप्रदयन्त्रम्	३५८
ज्वरार्त्तिहरयन्त्रम्	"
वश्यकरयन्त्रम्	"
आकर्षकरयन्त्रम्	३५९
षड्गुणितप्रयोगः	"
द्वादशगुणितयन्त्रविशेषः	"
आकर्षकरघटार्गलयन्त्रम्	३६०
स्त्रीवश्यकृद्यन्त्रम्	३६१
यन्त्रान्तरम्	"
वश्यकृदपरयन्त्राणि	"
आकर्षकरयन्त्रम्	३६२
ब्रह्मस्त्रीमन्त्रः	"
ध्यानम् । पुरश्चरणम्	"
राजमुखीमन्त्रः	३६३
वश्यकरप्रयोगान्तरम्	"
अन्नाधिपतिमन्त्रः	"
मन्त्रमूर्तिः । अन्नपूर्णामन्त्रः	३६४
ध्यानम् । पूजाप्रयोगः	"
बृहस्पतिमन्त्रः	३६५
शुक्रमन्त्रः । व्यासमन्त्रः	"
ध्यानम्	३६६
शत्रुजयोपायमन्त्रः । ध्यानम्	३६६
अश्वारूढामन्त्रः	"

विषयः	पृष्ठाङ्कः
पुरश्चरणादि । ध्यानम्	३६६
अमठन्यासः	३६७

पञ्चविंशः पटलः

प्राणप्रतिष्ठाप्रकरणम्	
प्राणप्रतिष्ठामन्त्रः	३६८
न्यासभेदास्तत्स्थानानि	"
प्राणशक्तिध्यानम्	३६९
पुरश्चरणादि । प्रयोगमन्त्रः	"
दूतीमन्त्राः । प्राणप्रतिष्ठा	३७०
प्राणप्रतिष्ठाकालः	३७१
मृतादिदूतीनां स्थानम्	"
स्वहृदये विशेषप्रयोगः	३७२
मारणे विशेषप्रयोगः	"
सर्वाकृष्ट्यादिकरयोगः	३७३

षट्विंशः पटलः

पुत्रोत्पत्तिकरप्रयोगः	३७४
अपत्यहीननिन्दा	"
अपत्योत्पत्तिकरयागः	"
हुताहुतिसंख्या	३७६
सङ्कोचमन्त्रः । भूतमन्त्रः	"
गुरुलक्षणम्	३७७
ग्राह्यशिष्यलक्षणम्	३७८
वर्ज्यशिष्यलक्षणम्	"
दीक्षितशिष्यस्याचारः	३७९
तन्त्रस्य पाञ्चविध्यम्	३८०

प्रयोगक्रमदीपिकासूची

प्रथमः पटलः	३८१
द्वितीयः पटलः	४३०
तृतीयः पटलः	४४५
चतुर्थः पटलः	४६०
पञ्चमः पटलः	४८३
षष्ठः पटलः	५०४
सप्तमः पटलः	५३४
अष्टमः पटलः	५५६
नवमः पटलः	५६४

शिवपञ्चाक्षरीभाष्यम् ५९५

शुद्धिपत्रम्

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
५	२४	रूपाऽणवो	रूपाणवो
७	३	शङ्क	शङ्क
८	१३	वभासिन:	वाभासिन:
२३	३	औद्भिज:	औद्भिद:
२५	१६	स्त्रिय:	स्त्रिया:
३३	२८	वेखर्या	वैखर्या
३७	८	सोषुम्न	सौषुम्न
३८	२१	साममय	सोममय
४०	१४	सर्गश्लेषित	सर्ग: श्लेषित
४०	१७	भूतेन्दिय	भूतेन्द्रिय
४६	२८	छेदा:	छेद:
४७	५	ऊद्गदादि	ऊदद्गादि
४७	६	दृष्यैव	दृष्यै
६१	१६	मृगीर्षायै	मृगशीर्षायै
७३	२७	सूत्रद्विगुणितं	सूत्रं द्विगुणितं
८१	२१	क्षणैरव	क्षणैरेव
८३	१८	मरुणाप्ता	मरुणप्ता
८४	२०	संग्रन्थि	सग्रन्थि
८८	३	परमात्वने	परमत्माने
८८	२५	तत्राऽ	तत्राऽ
१०१	५	रन्तस्थिते:	रन्त:स्थिते
१०४	२१	जुंसं	जूंस:
११५	५	विपत्	वियत्
११९	२	पुष्य	पुष्य
१२१	३	स्तियगू	स्तिर्यगू
१२६	२७	वाक्सूत्रादि	वाक्सूक्तादि
१३१	६	वैशद्य	धीवैशद्य
१३७	२७	पुनर्वैश्य	पुनर्वश्य
१४०	२४	तद्दल	तद्दल
१५५	१८	करिरेनं	कविरेनं
२१२	२३	मूविनायक	भूविनायक
२४९	८	अर्चयितणा	अर्चयितृणा
२८४	१४	यात् ब्रू	ब्रूयात्
३१५	११	चेत्युक्त	चेत्युक्ता
३२०	१५	क्रमेते	क्रमते
३२१	२९	मितरेष	मितरेषां
३३१	२५	कस्या	कस्या:

पाठभेदाः

पृष्ठे	पङ्क्तौ	पाठः	पाठान्तरम्
८	२५	व्यक्तं मायित्वहेतुत्व	व्यक्तौ मायित्वं हेतु
११	९	नोपलभ्यते	तेनोपलभ्यते
१६	१२	तद्रूपत्वात्	तद्रूपत्वम्
१८	३	तेऽ-	ते
१८	१४	असिते	सिते
१९	१०	विंशतिस्तथा	विंशतिकस्तथा
२०	३	देवाश्च श्रुतयः	देवाः सश्रुतयः
२९	१३	तस्याः	तस्यां
३३	२९	अध्यात्म	अध्यात्मं
३७	६	सुषिरोदर	सुषिरोदित
४०	२७	मण्डलमन्त्रैः	मण्डलत्रयमन्त्रैः
४९	१३	संस्थितिः, संस्थिति	संस्थितेः, संस्थिते
५४	६	समुत्पन्या	समुद्भूत्या
५९	१२	बली	बलेः
६१	४	स्यादन्यो	स्यादतो
८२	११	प्रोक्ताः	शुक्ला
८२	१२	समानवर्णा	समाने
८३	१२	क्रमशो	कलशे
८३	२८	सवितृ	सवितुः
८५	६	मनसावुदीर्य	मनसो उदीर्य
८९	५	शिखया	शिखाथो
९०	२१	पक्षान्तरम्	पक्षद्वयम्
९०	२२	निवेद्य । पात्र	निवेद्यपात्र
९०	२३	निवेद्य । जातं	निवेद्यजातं
९२	१४	पादि	सादि
९३	१४	ततोऽग्निमनुना तेन	ततोऽग्निं मनुनाऽनेन

पृष्ठे	पङ्क्तौ	पाठः	पाठान्तरम्
१०१	४	मन्त्रेषु	तन्त्रेषु
१०२	८	जठरानलयो	जठराननयो
१०५	२	ध्यानेन	ध्यानैश्च
११०	१५	तेजस्त्वमह	तेजस्त्वह
११५	१४	ततोऽर्धं	तदर्धं
१२२	८	भुवनान्त	भुवनात्म
१३१	२२	ब्सूं स्त्रीं	ब्लूं स्त्रीं
१३२	१०	मिति परा	मिति परपरा
१३४	६	परपरा	परावरा
१३६	३	विल्वभव	बिल्वदल
१३८	३	मुखेनाऽनारत	मुखे नानारस
१५१	४	कोणात्तदुर्वी	कोणान्तर्दुर्वी
१७५	८	द्वादशा	वा दशा
२८५	६	वाराहे विष्णवभि	वराहविष्णवभि
३१८	२८	भक्तान्	भक्तात्
३१८	२८	सत्यादा	सेत्यादा
३२१	१८	रादित्यो	रादित्ये

मूलेऽपि क्वचित् क्वचित् पाठभेदा बन्धनीमध्यगता द्रष्टव्याः ।

ॐ

श्रीप्रपञ्चसारतन्त्रम्

श्रीश्रीगुरवे नमः ।

प्रथमः पटलः ।

अकचटतपयाद्यैः सप्तभिर्वर्णवर्गै-
र्विरचितमुखबाहापादमध्याख्यहृत्का ।
सकलजगदधीशा शाश्वता विश्वयोनि-
र्वितरतु परिशुद्धिं चेतसः शारदा वः ॥ १

प्रपञ्चसारविवरणम्

ॐ श्रीगुरुचरणारविन्दाभ्यां नमः ॥

ॐ श्रीगणेशाय नमः ॥

अवर्णविग्रहं देवं वर्णविग्रहवर्जितम् ।
वर्णविग्रहवेत्तारं नमामि स्तौमि संश्रये ॥

इह खलु लोकानुग्रहैकरसतया कृतशरीरपरिग्रहो भगवान् शङ्कराचार्यः अपरोक्षीकृतपरदेवतात्मतत्त्वः परमां विभूतिकाष्ठां प्राप्तः स्वयमेकाकिसम्पदा लज्जमानो दुःखीकृतजनकारुण्याक्रान्तमानसश्च सन् तदनुग्रहाय समस्तागमसारसंग्रहप्रपञ्चागमसारसंग्रहरूपं ग्रन्थं चिकीर्षुः अभिमतसकलप्रयोजनसिद्धये प्रथमतः परदेवतातत्त्वानुस्मरणलक्षणम् आशीर्लक्षणं च मङ्गलमाचरन् ग्रन्थारम्भौपयिकं विषयादिकमपि अर्थात् सूचयति—अकचटतपयाद्यैरित्यादिना ।

शारदा वः चेतसः परिशुद्धिं वितरत्वित्यन्वयः । चित्तादिसङ्घातव्यतिरिक्तायाः शारदायाः सत्त्वे सिद्धे सम्भवतीयमाशीः । तदेव कुत इति विश्वकार्यकारणत्वेनाऽनुमानादित्याह—विश्वयोनिरिति । अपूर्वपरिणामत्वाभ्युपगमात् विश्वस्य कर्मणोऽपि विश्वयोनित्वसम्भवान्न शारदासाधकमनुमानमिति चेन्न । कर्मणः कार्यत्वेनाऽनित्यत्वात् जगन्मूलकारणत्वानुपपत्तेः । अतो नित्यं किञ्चित् जगदुपादानं वक्तव्यम् । नित्यत्वञ्च सर्वसाक्षिण्याः शारदाया एव सम्भवतीत्यभि-

प्रेत्याह—शाश्वतेति। सांख्यराद्धान्तसिद्धप्रधानस्यापि नित्यत्वात् तदेवास्तु जगद्योनिरिति चेन्न। अचेतनस्य प्रधानादेश्चेतनानधिष्ठितस्य कारणत्वानुपपत्तेः। अतश्चिद्रूपिणी सर्वाधिष्ठानसमर्था शारदैव विश्वयोनिरित्यभिप्रेत्याह—सकलेति। सकलं कारणं कलाभिः शक्तिभिः सह वर्त्तत इति जगत् कार्यं तयोः सकल-जगतोरधीश्वरीत्यर्थः। अस्तु तर्हि शारदाधिष्ठितस्य परमार्थसत्त्वस्य प्रधानस्य जगदुपादानत्वं शारदायाः तन्निमित्तमात्रत्वमेवेति सेश्वरसांख्यादिपक्षमाशङ्क्य सर्ववर्णतदर्थसमष्ट्यात्मकस्य प्रधानस्य शारदारूपचैतन्येऽध्यस्तत्वेन तद्व्यतिरेकेणा-सत्त्वात् शारदैव तद्द्वारेण जगदुपादानं निमित्तं चेत्यभिप्रेत्य वर्णानां तद्विग्रहत्वेन तच्छेषत्वमाह अकचटतपयाद्यैरित्यादिना। शरीरवत्त्वेनाऽस्मदाद्यविशेषमाशङ्क्य शरीरग्रहणे स्वातन्त्र्यं विशेष उक्तो विरचितेति। स्वातन्त्र्ये हेतुमाह—सकल-जगदधीशेति। तद्ध्यधिष्ठातृत्वेन विकारित्वात् अनित्यत्वादिदोषप्रसक्तिरिति चेन्न इत्याह—शाश्वतेति। तर्हि नित्यैकरूपिण्याः शारदाया अधिष्ठातृत्वं कारणत्वं वा नास्तीत्याशङ्क्य परमार्थतः तदभावेऽपि मायाद्वारेणाऽस्या एव तदभ्युपगन्तव्यम्। पक्षान्तरेषु एवंविधकारणत्वस्यापि अनुपपत्तेरित्यभिप्रेत्याह—विश्वयोनिरिति। अतः चित्तादिसङ्घातव्यतिरिक्तायाः चिन्मात्रविग्रहायाः शार-दायाः सत्त्वं तस्याः चित्तशुद्धिवितरणसामर्थ्यं च सिद्धमिति मङ्गलाचारप्रकारः।

स्थूलसूक्ष्मकारणसामान्यसाचिलक्षणः पञ्चविधोऽस्य ग्रन्थस्य विषयः। तत्र वैखरीतदर्थात्मकं विराड्रूपं स्थूलं विषयमाह प्रथमार्धेन। आद्यैरिति पदम् आद्यैः कार्यैश्चाद्यैरित्यादिप्रकारेण प्रत्येकं सम्बध्यते। मातृकाक्षरन्यासस्थानं वदन् विराजोऽवयवकल्पनमाह—विरचितमुखबाहेत्यादिना। मध्यशब्दः पवर्ग-न्यासस्थानार्थः। आख्याशब्देन त्वगादिधातव उक्ताः। आख्यायन्त एभिरिति। हृच्छब्देन हृत्स्थबुद्धिवाचिना ज्ञानक्रियाशक्त्यात्मकः प्राणस्तत्कारणभूता माया-शक्तिश्चाऽभिहिता। कशब्देन सुखार्थेन परमात्मोक्त इति। यादिन्यासस्थानानि तेषां याथात्म्यं यादिन्यासस्थाने धात्वादियोगः सर्वमन्त्रजपादेः शेषतया न्यासश्च सूचितः।

ननु त्वगादिपरमात्मान्तस्य देवतात्मनो यादिन्यासेनैव साधकशरीरे सन्निधाने सति किमवशिष्टाक्षरन्यासेनेति। देवतावयवविशेषकल्पनार्थमिति ब्रूमः।

न च प्रथमं सामान्यकल्पना पुनः विशेषकल्पनेति नियमोऽस्ति। येन लिपि-न्यासस्य चकारादित्वं स्यात्। सर्वत्र नित्यमेव सामान्यविशेषरूपं हि देवता-शरीरम्। तस्य साधकशरीरे सन्निधिर्न्यासेनोत्पाद्यते। अतः प्रथममकारादि-

न्यासेनाऽवयवविशेषसन्निविस्मरणे न कश्चिद्दोषः ।

न च संहारक्रमेण मातृकान्यासे प्रथमं सामान्यसंहारः पश्चाद्विशेषसंहार इति क्रमकोपः । उभयोरप्यात्मन्येव संहारात् ।

न च सामान्यसंहारेणैव संहृतत्वाद्विशेषाणां पृथक्संहरणम् अनर्थकम् । विशेषसंहारक्रमचिन्तायाः कर्तव्यत्वात् ।

ननु वैखर्यात्मकस्थूलकथने प्रस्तुते प्राणादिरूपसूक्ष्मादिकथनमनुपपन्नम् । न । तेन विना स्थूलमात्रेण व्यवहारासिद्धेः विराजोऽपि सर्वात्मत्वात् । अथवा प्राणशक्त्यात्मशब्दैरपि प्राणबुद्धिजीवस्थितिकराः स्थूलांशा एव अन्ना[धात्वा]दिशब्द-वाच्याः कथिताः । अस्मिन् पक्षेऽक्षरगतबिन्दुनादादिभिः विराट्शरीरानुगत-सूक्ष्मादिकथनमित्यवगन्तव्यम् ।

ननु अकचटतपयाद्यैः विरचितमुखबाहेत्यादिनैवाऽभिहितस्थूलविषयसिद्धौ किमधिकोक्त्येति । नैष दोषः । सौस्थानिकौत्थानिकस्नानाद्यनुष्ठानेषु लिपिन्यास-भेदसूचनार्थत्वात् । सौस्थानिकानुष्ठान एकपञ्चाशद्वर्णानां प्रत्येकं न्यासः सूचितोऽकचटतपयाद्यैः विरचितमुखबाहेत्यादिना । औत्थानिके वर्गमात्रस्य मुखबाहुपादद्वयनाभिहृत्सु व्यापकत्वेन न्यासः सप्तभिः विरचितमुखबाहेत्यादिना । स्नानादौ अकचादिवर्गत्रयस्य मुखमध्यपादेषु वर्गैर्विरचितेति । भोजनकाले समस्तस्य मस्तकादिपादान्तन्यासः सूचितो वर्णैः विरचितेति । देशकालाद्य-पेक्षया सर्वे वा सर्वत्र प्रयोक्तव्या इत्यभिप्रायः ।

अथवा समस्तमन्त्रपारायणोद्धारार्थाधिकोक्तिः । तथाहि अकचटतपयाद्यैः अकचटतपयवर्गसम्बन्धिभिः अकाराद्यैः षोडशस्वरैः विरचितमुखबाहापाद-मध्याख्यहृत्केति पञ्चाशद्वर्णानां प्रत्येकं षोडशस्वरयोग उक्तः । लिपिन्यासस्थानेषु षोडशदलानि पद्मानि सञ्चिन्त्य कर्णिकासु तं तं प्रधानं वर्णं विन्यस्य दलेषु तत्तद्वर्णानुबन्धषोडशस्वरान् न्यसेत् न्यासप्रियो जपेच्च जपप्रियो ध्यायेच्च ध्यानप्रिय इत्यर्थः । ओं अं ओं नम इत्यकारात्मकर्णिकायां विन्यस्य ओं अं अं नमः । ओं अं आं नमः । ओं अं इं नम इत्यादिकं दलेषु विन्यस्य आकारपद्मकर्णिकायाम् ओं आं ओं नम इति न्यसित्वा ओं आं अं नमः । ओं आं आं नमः । ओं आं इं नम इत्यादिकं दलेषु विन्यस्याऽवशिष्टाक्षर-पद्मेष्वपि एवमेव न्यसेदिति स्वरपारायणन्यासादिमन्त्रक्रमः ।

अथ व्यञ्जनपारायणक्रमः । अकचटतपयाद्यैरुक्तैः विरचितमुखबाहापाद-मध्याख्यहृत्केति विविधरचनम् । ओं अं अं नमः । ओं अं कं नमः ।

ओं अं खं नम इत्यादि क्षान्तमूहयेत्। पूर्वोक्ताकारपद्मदलस्थाकारपरिवारत्वेन एषां न्यासः। आं अं नमः। आं कं नमः। आं खं नमः। इत्याद्याकार-परिवारत्वेन। इं अं नमः। इं कं नमः। इं खं नमः। इत्यादीकार-परिवारत्वेन। इत्यादि विसर्गान्तं समानम्। पुनः कां अं नमः। कं कं नमः। कं खं नमः। कं गं नमः। इत्यादि ककाराम्बुजदलस्थककारपरिवारत्वेन। पुनः कां अं नमः। कां कं नमः। कां खं नमः। कां गं नमः। इत्यादि काकारपरिवारत्वेन समानम्। पुनः खं अं नमः। खं कं नमः। खं खं नमः। खं गं नमः। इत्यादि खाम्बुजदलगतखकारपरिवारत्वेन सर्वमूह्यम्। इति ब्रह्मब्रह्मपारायणक्रमः। अं आं नमः। अं कां नमः। अं खां नमः। इत्यादिरूपो ब्रह्मविष्णुपारायणक्रमः। अं इं नमः। अं किं नमः। अं खिं नमः। इत्यादिरूपो ब्रह्मरुद्रपारायणक्रमः। अं ईं नमः। अं कीं नमः। इत्यादि विष्णुब्रह्मणः। अं उं नमः। अं कुं नमः इत्यादि विष्णुविष्णोः। अं ऊं नमः। अं कूं नमः। इत्यादि विष्णुरुद्रस्य। अं ऋं नमः। अं कृं नम इत्यादि रुद्रब्रह्मणः। अं ॠं नमः। अं कॄं नमः इत्यादि रुद्रविष्णोः। अं ऌं नमः। अं क्लृं नमः। इत्यादि रुद्ररुद्रस्य। अं ॡं नमः। अं क्लॄं नमः इत्यादि ब्रह्मसर्वेश्वरस्य। अं एं नमः। अं कें नमः। इत्यादि विष्णुसर्वेश्वरस्य। अं ऐं नमः। अं कैं नमः इत्यादि रुद्रसर्वेश्वरस्य। अं ओं नमः। अं कों नमः इत्यादि सर्वेश्वरस्य। अं औं नमः। अं कौं नमः इत्यादि चतुर्मूर्त्तेः। अं अं नमः। अं कं नमः इत्यादि साक्षिणः। अं अः नमः। अं कः नमः इत्यादि परब्रह्मण इति पारायणक्रमः। पारायण-क्रमवन्मन्त्रभेदानामपि अक्षरविरचनारूपत्वात् सोऽपि विरचितेत्यनेनैव सूचितः।

अथ तत्तन्मन्त्रभेदेन पारायणक्रमभेदमाह—अकचटतपयाद्यैरित्यादिना। अकचटतपयाद्यैरुक्तैः सप्तभिश्च वर्णवर्गैः मन्त्रवर्गैः विरचितमुखबाहुत्यादि समानम्। तत्र ब्रह्मसरस्वतीविष्णुश्रीरुद्रोमासर्वेश्वरसप्तमन्त्रवर्गाः। उक्तपारायण-मन्त्रान्ते तांस्तान्मन्त्रानुच्चार्य न्यासादिकं कर्त्तव्यम् इत्यलम् अनन्तवैखरीतदर्थ-रूपस्थूलप्रपञ्चनेन।

अथ मध्यमातदर्थहिरण्यगर्भबिन्दुरूपं सूक्ष्मं विषयमाह—सकलजगद-धीशेति। कलाभिरवयवैः तत्त्वभुवनकलावर्णपदमन्त्ररूपैः संहताः सन्तो जायन्त इति सकलजा जीवाः तेषां गदधियोः शेते इति सकलजगदधीशा। गदशब्देन वाग्वाचिना तन्निवर्तकः प्राणः क्रियाशक्तिमात्रात्मोच्यते। धीशब्देन ज्ञानशक्तिमात्रं

तयोः शयनं च तदनुगतस्वातन्त्र्यात्मकेच्छाशक्त्यात्मना ततश्चेच्छाक्रियाज्ञान-शक्त्यात्मको हिरण्यगर्भः प्रकाश्यप्रकाशकरूपाभ्यां मध्यमा वाक् तदर्थात्मा सूक्ष्मरूपो विषय इति उक्तं भवति। अत्र सकलशब्देनैव मध्यमान्तर्भूतानि शून्यस्पर्शनादध्वनिर्बिन्दुशक्तिबीजाक्षराणि उक्तानि। तानि मूलाधारलिङ्गमूल-नाभिहृत्कण्ठलम्बिकाभ्रूमध्यललाटेषु न्यस्तव्यानीति। इच्छादित्रितयं शिरोद-क्षिणवामस्तनेषु। शान्तिर्मूलाधारे वामा ज्येष्ठा रौद्र्यम्बिकाश्च तेष्वेवं न्यस्तव्याः। वैखरीन्यासात् पूर्वमेवेति मध्यमान्यासप्रकारः।

अथ पश्यन्तीतदर्थात्मकं तपउपचयादिशब्दवाच्यं कारणात्मनः सृष्ट्याद्युन्मुखं रूपं कारणशब्दोक्तं नादात्मकं प्रकाश्यप्रकाशकरूपेण वागर्थात्मकं विषयमाह— शाश्वतेति। आदिसर्गादिमहाप्रलयान्तमवस्थानात् सदादिरूपत्वाच्च शाश्वतत्व-मवगन्तव्यम्। महासत्तायै नमः। महासंविदे नमः। महानन्दायै नमः। महैश्वर्यै नमः। इति मूर्धस्तनहृदयमूलाधारेषु पश्यन्तीन्यासोऽनेन सूचितः।

अथ परातदर्थात्मकं सामान्यरूपम् आत्माविभक्तान्तर्मुखकारणात्मकं शक्तिरूपं विषयमाह—विश्वयोनिरिति। व्यापकत्वेनाऽस्या न्यासः। एवं वागर्थात्मक-चतुर्विधविषयकथनेनैवाऽवशिष्टमव्यवहार्यं विषयं लक्षणयोक्तम् अवगन्तव्यम्। भुक्तिमुक्तिलक्षणं प्रयोजनमाह—शारदेति। शीर्यत इति शारं स्थूलादिलक्षणं कर्मफलं तद्ददातीति शारदा। तत् तत्कारणं च ब्रह्मविद्याधिरूढा सती द्यति खण्डयतीति च शारदा इति। शारदेति पदं प्रयोजनद्वयपरतया व्याख्येयम्। प्रयोजनकथनेनैव सामान्यतस्तत्तत्कामिन्यधिकारिणि सिद्धे अधिकारिविशेषः सूचितः। वितरत्वित्यादिना शुद्धान्तःकरणो गुरुणा केनचिद्दीक्षाप्रकारेणाऽनु-गृहीतोऽधिकारीत्याशीर्लक्षणवाचिकदीक्षाकरणेनोक्तं भवति।

तत्र आणवी दीक्षा अणुभिः मन्त्रैः क्रियमाणा अनेकविधा। तत्रोक्त-चतुर्विधलिपिन्यासानामेकेन शिष्यशरीरमशुद्धं संहृत्य शुद्धं सृजेदिति न्यास-रूपाऽणवीदीक्षाप्रकारः। होमादिपूर्वकं तूत्तरत्र भविष्यति। स्वशक्तिसूत्रेण शिष्यदेहं प्रविश्य तत्त्वसंहारं कृत्वा तं परदेवतारूपं भावयेदिति शाक्तदीक्षा प्रकारः सकलजगदधीशेत्यादिपदत्रयेण सूचितः। सा च बहुप्रकारा चाक्षुषी स्पार्शी वाचिकी मानसीत्यादिद्वारभेदात्। शाम्भवदीक्षा केवलस्वरूपस्थिति-मात्रेण शिष्यसर्वदेहग्रसनरूपा शारदेत्यनेनोक्ता।

सम्बन्धस्तु विषयकथनेनैव विषयविषयिभावः सूचित इति ॥ १ ॥

अथाऽभवन् ब्रह्महरीश्वराख्याः पुरा प्रधानात् प्रलयावसाने ।
गुणप्रभिन्ना जगतोऽस्य सृष्टिस्थितिक्षयस्पष्टनिविष्टचेष्टाः ॥ २

विषयादिमत्त्वात् ग्रन्थस्यारम्भणीयत्वे सिद्धे अयमुत्तरश्लोकावतारः । शारदा जगद्योनिरित्युक्तम् तदनुपपन्नं । पुराणादिषु त्रिमूर्तीनां जगत्सृष्ट्यादिहेतुत्वावगमात् इत्याशङ्क्य पुराणादिष्वेव मूर्तीनां सृज्यत्वावगमात् परमकारणत्वानुपपत्तेः तद्व्यतिरिक्तया शारदया परमकारणभूतया भाव्यमिति मन्वानः त्रिमूर्तीनां ततः उत्पत्तिं वदन् विद्यासुत्यादिप्रयोजनया आख्यायिकया ग्रन्थमारभते—अथेति ।

सृष्टिहेतुकर्मौन्मुख्यानन्तर्यार्थकोऽयमथशब्दः । ब्रह्महरीश्वरास्तदाख्याश्चेति समासः । तेषामौपाधिकी उत्पत्तिः न पारमार्थिकीत्याह—पुराऽभवन्निति । शरीरेणेत्यर्थः । प्रथितमत्तीति प्रधानशब्देन प्रकृतिपुरुषकालाः तद्वाचको हकारश्चोक्तः । कदा सृष्ट्यौन्मुख्यं कर्मण इति तदाह—प्रलयावसाने इति । उत्पत्तिवद्भेदोऽपि औपाधिकस्तेषामित्याह—गुणेति । तेषामुत्पत्तिप्रयोजनमाह—जगत इति । अस्येति कार्यत्वेन सृष्ट्याद्यपेक्षत्वं सूचितम् । एकैकस्यापि त्रितयहेतुत्वश्रुतेः कथमेकैकहेतुत्वोक्तिरिति तत्राह—स्पष्टेति । प्राधान्येनेत्यर्थः ।

सृष्ट्यादौ विनियुक्ताः चतुर्मूर्तिवाचका मन्त्राश्चात्रोद्धृताः । तथाहि—ब्रह्महरीश्वराख्या इति ब्रह्मविष्णुसदाशिवसर्वेश्वरशब्दाः मूर्तिमन्त्रान्तर्गताः सूचिताः । पुरेति । स्थूलविराट्शरीराय विश्ववैश्वानरात्मने सूक्ष्महिरण्यगर्भशरीराय तैजससूत्रात्मने सौषुप्ताज्ञानशरीराय प्राज्ञेश्वरात्मने व्याकृताव्याकृतशरीराय प्रत्यग्ब्रह्मात्मने नम इति मन्त्रपदानि सूचितानि । अत्र पुरावचनेनैव पुराभिमानिनामपि ग्रहणं कृतम् । तयोः नित्यसम्बन्धत्वात् । प्रधानादिति मन्त्राणां शक्त्यानन्तर्यं सूचितम् । प्रलयावसान इति शक्तेः व्यस्तसमस्तप्रणवानन्तर्यम् । गुणप्रभिन्ना इति स्थूलादिपदात् पूर्वं रजउपाधये सत्त्वोपाधये तमउपाधये गुणसाम्योपाधये इति । मूर्तीनां पुरस्तात् सरस्वतीसहिताय सर्वज्ञाय सदात्मनेऽसङ्गाखण्डसंविदे परमात्मने नमः । लक्ष्मीसहिताय सर्वज्ञाय आनन्दात्मनेऽसङ्गाद्वयसंविदे परमात्मने नमः । उमासहिताय सर्वज्ञाय चिदात्मनेऽसङ्गापरोक्षसंविदे परमात्मने नमः । मूलप्रकृतिमायासहिताय सर्वज्ञाय सदानन्दचिदात्मनेऽसङ्गाखण्डाद्वयापरोक्षसंविदे परमात्मने नम इति च योगः सूचितः ।

अत्र परमात्मपदात् पूर्वमिष्टदेवतानाम योज्यम् । जगतोऽस्येति मूर्तीनां पूर्वभागे सर्वस्रष्ट्रे सर्वपालकाय सर्वसंहर्त्रे सर्वोत्पत्तिस्थितिसंहारकर्त्रे इति योगः

स्वनिष्पत्तिञ्च कृत्यञ्च ते विचिन्त्य समाविदन् ।
वक्तारमजमव्यक्तमरूपं मायिनं विभुम् ॥ ३
मूर्त्याभासेन दुग्धाब्धौ झषशङ्खसमाकुले ।
मरुत्संघट्टनोत्कीर्णलहरीकणशीतले ॥ ४

सूचितः । मूर्त्यपवादमन्त्रस्वारोपमात्रसूचनादेव सूचितः । ओं क्लीं ओं ओं ओं निरवद्यनिर्गुणायाऽशीर्याशरीरायाऽसङ्गप्रत्यगद्वयाय स्वाभासावभासितकृत्स्नायाऽसङ्गबोधायाऽखण्डाद्वयापरोक्षसदानन्दचिदात्मने स्वबोधध्वस्तानर्थाद्वैतायाऽनिरालम्बलब्धिविम्बायाऽहीनमहोदयाय परमात्मने नमः इत्यपवादमन्त्रः । प्रधानादभवन्नाख्या गुणप्रभिन्ना इति पदैः विशिष्टकुले प्रसूता गर्भाधानजातकर्मनामकरणादिसंस्कारविशिष्टा गुणिनो जगदुपकारका वक्ष्यमाणविद्यास्वधिकारिण इति विद्यास्तुतिः कृताऽवबोद्धव्या ॥ २ ॥

ते किमकुर्वन्नित्याकाङ्क्षायां तद्वृत्तान्तं वदन् अज्ञत्वादपि न तेषां परमकारणत्वमित्याह—स्वनिष्पत्तिमिति ।

निष्पद्यते तस्मादित्युपादानं निष्पत्तिः । निमित्तार्थश्चशब्दः । कृत्यं चेति चशब्दः स्वरूपार्थः । ते विचिन्त्याऽज्ञत्वेन स्वयं निर्णेतुमशक्ता गुणसाम्योपाधिं मायिनं वक्तारं समाविदन्नित्यर्थः । तस्य निर्णयसामर्थ्यं मूर्तिवैलक्षण्यं हेतुमाह—अजमिति । अजत्वे हेतुरव्यक्तमिति । अरूपत्वं तत्र । एवं निर्विशेषस्य तथा कथं वक्तृत्वमिति मायासम्बन्धात् कथञ्चित् सविशेषत्वं प्राप्येत्याह—मायिनमिति । तत्पारवश्यादज्ञत्वेन वक्तृत्वासामर्थ्यमाशङ्क्य निराचष्टे—विभुमिति । विचारक्षमा गुरूपसदनादियुक्ताश्चाऽधिकारिणः । गुरुश्च निग्रहानुग्रहादिशक्तिमानित्येतत् सूचितम् ॥ ३ ॥

अत्र मायिनोऽपि स्थानमूर्तिविशेषादिसम्बन्धाभावेऽवक्तृत्वमाशङ्क्य क्रमेण तत्सर्वं सम्पादयति—मूर्त्येत्यादिना । मूर्तिर्माया शक्तिबीजम् । आ समन्ताद्भासते इत्याभासः प्रणवः । तेन मन्त्रेण विग्रहभूतेन दुग्धाब्धौ अनन्तभोगे शयितमित्यन्वयः । सर्वेश्वरप्रणवोपाधिकमित्यर्थः । क्ष्वोमिति सर्वेश्वरप्रणवः । ते समाविदन्निति । त्रिमूर्तयोऽस्य मुनयः सूचिताः । छन्दश्च देवी गायत्री गायकत्राणकथनात् सूचितम् । स्वामिन् प्रसीद विश्वेशेति देवतां च सूचयिष्यति । मूर्त्याभासेनेत्यङ्गदेहन्यासौ सूचितौ । तथाहि मूर्तिसम्बन्धित्वेनाभासन्त इति मूर्त्याभासा क्ष्मादिकाः सप्रणवा अङ्गानीत्यङ्गसूचनाप्रकारः । मूर्तौ मूर्तिभूते मूलमन्त्रे अनुगततया भासन्त इति मूर्त्याभासा ब्रह्मसर्वेश्वरादि-

उद्यदादित्यकिरणप्रशान्तशिशिरोदये ।
पूर्णचन्द्रकरामर्शप्रतिक्षुब्धजलाशये ॥ ५
अनन्तभोगविमले फणायुतविराजिते ।
शयितं शार्ङ्गिणं शर्वशौरिपद्मभुवस्तदा ॥ ६
तुष्टुवुर्हृष्टमनसो विष्टरश्रवसं विभुम् ।
सूक्तिभिः स्तुतिभिः प्रीतः स्वमूर्त्तिं स व्यदर्शयत् ॥ ७
नीलोत्पलदलप्रख्यां नीलकुञ्चितमूर्द्धजाम् ।
अष्टमीचन्द्रबिम्बाभललाटामायतभ्रुवम् ॥ ८

मन्त्राः ह्रीं ह्रौं क्रोमित्येवंरूपाः । नाभिहृद्भ्रूमध्येष्वेषां न्यासः । मूलाधारमूर्ध्नोः मूलन्यासः । ध्यानप्रकारस्तु दुग्धाब्धावित्यादिनोक्तः । तस्य च यथाश्रुतोऽर्थः स्पष्टः ।

अथान्योऽर्थः । मूर्तिर्माया । आभासस्तदभिव्यक्तश्चैतन्याभासः । स्वच्छत्वगम्भीरत्वगुणयोगात् दुग्धाब्धिशब्दोदितत्रिमूर्तिबुद्धावभासिनः शयितम् । आभासस्य द्वारत्वं तृतीयार्थः । तस्य तद्बुद्धौ सद्भावे गमकमाह—ऋषेति । ऋषशङ्कशब्दाभ्यां क्रियाज्ञानशक्ती ब्रह्मोपलक्षणभूतेऽक्षोभकत्वसाम्येन लक्ष्येते । तस्य तत्र सद्भावे तत्स्वरूपलक्षणभूतसुखाद्यभिव्यक्तिं हेत्वन्तरमाह—मरुदिति । मरुतोऽन्तर्यामिणः प्रेरणेनोद्भूताः सुखव्यञ्जिताश्चित्तवृत्तयो लहर्यः तासु यक्तैः सुखलवैर्निस्ताप इत्यर्थः ॥ ४ ॥

बुद्धौ ईश्वरसद्भावमुपपाद्य तत्र तदभिव्यक्तिविशेषकारणमाह—उद्यदिति । उद्यतो विवेकादित्यस्य प्रचारप्रकाशैः प्रशान्तसंसारोदय इत्यर्थः । विवेकज्ञानबिलं संसारं मान्द्यमभिधाय तत्फलभूतामानन्दाभिव्यक्तिमाह—पूर्णेति । परमानन्दाकारसम्बन्धेन प्रतिक्षुब्धजलाशये प्रातिलोम्येन विषयापरित्यागेनाऽन्तर्मुखतया क्षुब्धाः प्रवृत्ता जलविषया आशया वृत्तयो यस्मिन् स तथोक्तः ॥ ५ ॥

अतएवाऽनन्तं ब्रह्म भुङ्क्ते इत्यनन्तभोगः । अनन्ताकारचित्तवृत्तयः पुनः पुनराविर्भवन्त्यः फणायुतशब्दार्थः । शयितमभिव्यक्तम् । तत्राभिव्यक्तं मायित्वहेतुत्वमाह—शार्ङ्गिणमिति । शरणाद्रमणाद्रमनाच्च माया शार्ङ्गं तद्वाञ्छार्ङ्गी ॥६॥

विष्टरश्रवसं विस्तरा वेदास्तेषु श्रवः श्रवणं यस्य स तथोक्तः । विस्तीर्णकीर्त्तिर्वा । स्तोतव्यत्वमाह—विभुमिति । सूक्तिभिरुक्तैर्मन्त्रैः स्तुतिभिश्च प्रीत इत्यर्थः ।
॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

रक्तारविन्दनयनामुन्नसीमरुणाधराम् ।
मन्दस्मिताधरमुखीं लसन्मकरकुण्डलाम् ॥ ९
कम्बुग्रीवां पृथुद्वंसविसरद्भुजमण्डलाम् ।
अनन्तरत्नप्रत्युप्तवलयाङ्गदमुद्रिकाम् ॥ १०
हारतारावलीराजत्पृथूरोव्योममण्डलाम् ।
कौस्तुभोद्भासितोरस्कां श्रीवत्सद्युतिदीपिताम् ॥ ११
लसदौदरिकाबन्धभास्वरां संवृतोदरीम् ।
गम्भीरनाभिं विपुलजघनां पीतवाससम् ॥ १२
पृथुवृत्तोरुमापूर्णजानुमण्डलबन्धुराम् ।
वृत्तजङ्घां गूढगुल्फां प्रपदाजितकच्छपाम् ॥ १३
तनुदीर्घाङ्गुलीभास्वन्नखराजिविराजिताम् ।
चक्रस्वस्तिकशङ्खाब्जध्वजाङ्कितपदद्वयाम् ॥ १४
तां दृष्ट्वा तरलात्मानो विध्यधोक्षजशङ्कराः ।
अतिष्ठन्नितिकर्तव्यमूढास्तवाऽब्रवीदजः ॥ १५
स्वामिन् प्रसीद विश्वेश के वयं केन भाविताः ।
किंमूलाः किंक्रियाः सर्वमस्मभ्यं वक्तुमर्हसि ॥ १६
इति पृष्टं परं ज्योतिरुवाच प्रमिताक्षरम् ।
यूयमक्षरसम्भूताः सृष्टिस्थित्यन्तहेतवः ॥ १७

तरलात्मानो भक्तिपरवशचित्ताः । अजोऽकारजः ॥ १५ ॥

स्वामिन्निति प्रसादकर्तव्यतासूचनम् । प्रसादे स्वातन्त्र्यं प्रसन्नस्याऽभीष्टदानसामर्थ्यं च सूचितम् विश्वेशेति । के वयमिति । किं नित्याः उताऽनित्याः इत्यर्थः । यदि नित्यास्तर्हि के वयं किं स्वरूपा इत्याद्यन्या योज्यम् । यद्यनित्यास्तर्हि केन निमित्तकारणेन भाविताः । किंमूलाः किमुपादानाः । किंक्रियाः किंव्यापाराः ॥ १६ ॥

स्वरूपेण नित्यानामप्यौपाधिकं कार्यत्वमस्तीति अनित्यत्वपक्षमाश्रित्य शार्ङ्गी निमित्तोपादानादिकं संग्रहेणोक्तवानित्याह—इति पृष्टमिति । प्रमिताक्षरमिति । प्रकर्षेण मीयते ज्ञायते मिनोति जानाति प्रमिनोति परिच्छिनत्तीति

तैरेव विकृतिं यातास्तेषु वो जायते लयः ।
इति तस्य वचः श्रुत्वा तमपृच्छत्सरोजभूः ॥ १८
अक्षरं नाम किं नाथ कुतो जातं किमात्मकम् ।
इति पृष्टो हरिस्तेन सरोजोदरयोनिना ॥ १९
मूलार्णमर्णविकृतीर्विकृतेर्विकृतीरपि ।
तत्प्रभिन्नानि मन्त्राणि प्रयोगांश्च पृथग्विधान् ॥ २०

क्रमेण प्रकृतिपुरुषकालाः प्रमिताः । प्रमितानां वाचकमक्षरं तदभिन्नं प्रमिताक्षरं परा वाक् । सतत्त्वहङ्कारमित्यर्थः । तस्य बीजबिन्दुनादरूपेण प्रकृत्यादिवाचकत्वं द्रष्टव्यम् । अहमेलनरूपेण वा । तत्र प्रकृतिः उपादानम् इतरौ निमित्तमिति शार्ङ्गिणोऽभिप्रायः । हेतिसंग्रहेणोक्तेऽपि उत्तरे तेषामप्रतिपत्तिमालक्ष्य शार्ङ्गी स्वाभिप्रायं विवृणोति—यूयमिति । उपादानप्रश्नोत्तरं यूयमिति । कार्यप्रश्नोत्तरं सृष्टीति । निमित्तप्रश्नोत्तरं तैरिति । एकैकस्य केवलस्योपादानत्वाद्यनुपपत्तेः मिलित्वैव तेषां कारणत्वमिति उक्तम् तैरेवेति । उपादानत्वमुपपादयति—तेष्विति । अत्र तैरेवेति बहुवचनप्रयोगात् यूयमक्षरेत्यत्रापि प्रकृतिपुरुषकालहङ्कारा उत्तरत्र वक्ष्यमाणा न क्षरन्ति इति व्युत्पत्त्या रूढ्या चाऽक्षरशब्देनोच्यन्त इति गम्यते ॥ १७ ॥ १८ ॥

अक्षरशब्दोक्तं सर्वमेकीकृत्य पृच्छति—अक्षरं नामेति । किं नित्यमुताऽनित्यमिति प्रश्नार्थः । अनित्यत्वे कुतो जातं नित्यत्वे किमात्मकमित्यर्थः ॥ १९ ॥

सर्वेषां नित्यत्वपक्षमाश्रित्य वाचकस्य तावन्नित्यसमस्तशब्दानुगतं स्वरूपमाह—मूलार्णमिति । अथवा वाचकप्राधान्यमाश्रित्य वाच्यवाचकाभेदमाश्रित्य वा सर्वेषामेव नित्यत्वं स्वरूपमाह संग्रहेण—मूलार्णमिति ।

प्रकृतमक्षरशब्दं परित्यज्याऽर्णशब्दप्रयोगादन्ते हकारप्रयोगाच्च वाचकसर्वात्मकत्वादिकमेवाऽत्रोच्यत इति गम्यते । वाच्यानामुत्तरत्र पृथक् सर्वात्मकत्वकथनाच्च । मूलार्णं शक्तिबीजं केवलमर्थसहितं वा । एवमुत्तरत्रापि । अर्णविकृतीर्हकाररेफमायार्णविकृतित्वेन वक्ष्यमाणाः स्वराः । विकृतीनां स्वराणां विकृतिः । कादिक्षान्ता विकृतेर्विकृतयः । तत्प्रभिन्नानि तेभ्यो वर्णेभ्यो निष्पन्नानि मन्त्राणि । तेषामङ्गत्वेन प्रयुज्यन्त इति प्रयोगाः । अङ्गन्यासादिपूजामन्त्राः षट्कर्मलक्षणा वा प्रयोगाः । तान् सर्वान् ह इतीत्यमाहेत्यन्वयः । हकारो हि अकारहकारात्मा । तयोश्चाद्यन्ताक्षरयोः प्रत्याहारग्रहणन्यायेन गृहीतेतर-

वैदिकांस्तान्त्रिकांश्चाऽपि सर्वानित्यमुवाच ह ।
प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तम ॥ २१
अणोरणीयसो स्थूलात् स्थूला व्याप्तचराचरा ।
आदित्येन्द्वग्नितेजोमद्द्यद्द्यत्तत्तन्मयी विभुः ॥ २२
न श्वेतरक्तपीतादिवर्णैर्निर्धार्य चोच्यते ।
न गुणेषु न भूतेषु विशेषेण व्यवस्थिता ॥ २३
अन्तरान्तर्बहिश्चैव देहिनां देहपूरणी ।
स्वसंवेद्यस्वरूपा सा दृश्या देशिकदर्शितैः ॥ २४
ययाकाशस्तमो वापि लब्धया नोपलभ्यते ।
पुंनपुंसकयोस्तुल्याऽप्यङ्गनासु विशिष्यते ॥ २५

वर्णयोः नादाकाररूपेण बुद्धिप्राणरूपेण ज्ञानक्रियाशक्तिरूपेण प्रकाशविमर्शरूपेण चिदानन्दरूपेण वा सर्ववर्णाद्यनुगमात् सर्वशब्दार्थसमष्ट्यात्मकपरावागात्मत्वेन सर्वात्मत्वात् प्रकृतिपुरुषकालात्मत्वं नित्यत्वं चाऽवगन्तव्यम् ।

एवं वाचकस्याऽक्षरस्य नित्यत्वं सर्वात्मत्वं स्वरूपं चाभिधाय वाच्याक्षराणामपि तत्क्रमेण प्रतिपादयति—प्रकृतिरित्यादिना । चकारौ पुरुषकालादिसम्बन्धभेद-समुच्चयार्थौ । कालस्य पृथक् ग्रहणं निमित्तत्वावद्योतनार्थम् । प्रकृतिपुरुषकाला द्विविधाः परापरभेदेन । 'विचिकीर्षुः' 'स्वसंवेद्यस्वरूपा' 'या युष्मानपि' 'बहुना किं परं पुंसः' 'सा तु कालात्मना' 'लवादिप्रलयान्त' इत्यादिवाक्यविशेषात् । सत्तमेति । नित्यत्वे उपपत्तिः । विपर्ययेऽनवस्थालक्षणा त्वयैव प्रतिपत्तव्येति उक्तम् ॥ २० ॥ २१ ॥

प्रकृतेः स्वरूपं व्याप्तिं चाह—अणोरित्यादिना । अण्वादिषु सामान्यतो व्याप्तिमाह—व्याप्तेति । अधिज्योतिषमधिविषयमधिगुणमधिभूतमध्यात्मं च क्रमेण व्याप्तिमाह—आदित्येत्यादिना ॥ २२ ॥ २३ ॥

अन्तरा मध्ये इन्द्रियरूपेण । अन्तः अन्तःकरणप्राणादिरूपेण । बहिः सप्तधातुरूपेण देहिनां देहपूरणीत्यर्थः । कथं तर्हि एवं निर्विशेषाया असाधारणं रूपमुपलब्धुं शक्यत इति देशिकेनाचार्येण दर्शितैः उपायैः अपरप्रकृतिरूपसाक्षि-स्वरूपेणेत्याह—स्वसंवेद्येति ॥ २४ ॥

सा लब्धेत्यत्र लब्धुः स्वात्मप्रत्यक्षो[यो]पपादकं गमकमाह—ययेति । आकाशं कार्यमात्रोपलक्षणम् । तमः कारणं जड़रूपा परा शक्तिः । वापीति सत्त्वादयः

प्रधानमिति यामाहुर्या शक्तिरिति कथ्यते ।
या युष्मानपि मां नित्यमवष्टभ्याऽतिवर्तते ॥ २६
साऽहं यूयं तथैवाऽन्यद् यद्वेद्यं तत्तु सा स्मृता ।
प्रलये व्याप्यते तस्यां चराचरमिदं जगत् ॥ २७
सैव स्वां वेत्ति परमा तस्या नान्योऽस्ति वेदिता ।
सा तु कालात्मना सम्यक् मयैव ज्ञायते सदा ॥ २८
लवादिप्रलयान्तोऽयं कालः प्रसूयते ह्यज ।
नलिनीपत्रसंहत्यां सूक्ष्मसूच्यभिभेदने ॥ २९
दले दले तु यः कालः स कालो लववाचकः ।
लवैस्त्रुटिः स्यात्त्रिंशद्भिः कलां तावत् त्रुटिं विदुः ॥ ३०

इच्छादयश्चोक्ताः । तस्याः त्रिलिङ्गव्याप्तिमाह—पुंनपुंसकयोरिति । त्रिषु तुल्याऽपीत्यर्थः । अङ्गनासु प्रसवधर्मित्वाद्विशेषः ॥ २५ ॥

गुणभूतादिरूपेण त्रिष्वपि तुल्यत्वम् । शब्दतोऽपि त्रयात्मकत्वं गम्यत इत्याह — प्रधानमिति । पुंलिङ्गवाचकानामपि उपलक्षणमेतत् । किं बहुना जगत्कारणभूतान् युष्मानपि मदवष्टम्भात् कवलीकरोति सेत्याह—या युष्मानपीति । मां नित्यमवष्टभ्य या युष्मानप्यतिवर्तत इत्यन्वयः ॥ २६ ॥

त्वदनतिक्रमे किं कारणमित्याशङ्क्य मयि कल्पितत्वेन तस्या मद्व्यतिरेकेणाभावादिति वदन् परं पुरुषमाह—साऽहमिति । अस्मदतिक्रमे किं कारणमित्याशङ्क्य युष्माकं विषयवत् प्रकृतिकार्यत्वेन तस्यां कल्पितत्वादित्याह—यूयमिति । तत्र गमकमाह—प्रलय इति ॥ २७ ॥

ननु प्रलयेऽपि तस्याः साधकं बुद्ध्यादिकमभ्युपगन्तव्यमिति नेत्याह—सैवेति । सैव परमा साक्षिलक्षणा परा प्रकृतिः पूर्वोक्ता स्वसंवेद्यस्वरूपेति । स्वां स्वसम्बन्धिनीमपरां शक्तिं वेत्ति । तस्या नान्यो बुद्ध्यादिलक्षणो वेदिताऽस्तीत्यर्थः । अथवा तस्याः पराया अन्यो वेदिता नास्तीत्यर्थः । अस्त्वेवं प्रलयकाले स्थितिकाले तु वैपरीत्येन तत्राऽपराया बुद्ध्यादिविशिष्टतया बोधशक्तिमत्त्वादिति नेत्याह—सा त्विति । तुशब्दोऽपराया जड़त्वलक्षणविशेषद्योतकः । कालात्मना ज्ञानात्मना । सम्यक् साक्षितयाऽव्यवधानेन ॥ २८ ॥

एवं परकालस्यापि स्वरूपमभिधायाऽपरं कालं प्रस्तौति—लवेति ॥ २९ ॥
॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

काष्ठा तावत् कला ज्ञेया तावत् काष्ठा निमेषकः ।
सोऽङ्गुलिस्फोटतुल्यः स्यान्मात्राऽष्टाभिस्तु तैः स्मृता ॥ ३१
कालेन यावता स्वीयो हस्तः स्वं जानुमण्डलम् ।
पर्येति मात्रा सा तुल्या स्वीयैकश्वासमात्रया ॥ ३२
षष्ट्युत्तरैस्तु त्रिशतैर्निश्वासैर्नाड़िका स्मृता ।
द्विनाड़िको मुहूर्तः स्यात् त्रिंशद्भिस्तैरहर्निशम् ॥ ३३
त्रिंशद्भिरप्यहोरात्रैर्मासो द्वादशभिस्तु तैः ।
संवत्सरो मानुषोऽयमहोरात्रं दिवौकसाम् ॥ ३४
तथा दिव्यैरहोरात्रैस्त्रिशतैः षष्टिसंयुतैः ।
दिव्यः संवत्सरो ज्ञेयो दिव्यैः संवत्सरैस्तु तैः ॥ ३५
भवेद्द्वादशसाहस्रैर्भिन्नैरेकं चतुर्युगम् ।
तैः सहस्रैः शतानन्द तवैकं दिनमिष्यते ॥ ३६
तावती तव रात्रिश्च कथिता कालवेदिभिः ।
तथाविधैरहोरात्रैस्त्रिंशद्भिर्मासमृच्छसि ॥ ३७
तथाविधैर्द्वादशभिर्मासैरब्दस्तव स्मृतः ।
तथाविधानामब्दानां शतं त्वमपि जीवसि ॥ ३८
त्वदायुर्मम निश्वासः कालेनैवं प्रचोद्यते ।
स जानाति विपाकांश्च तस्यां सम्यग्व्यवस्थितान् ॥ ३९
सोऽन्वीक्ष्य त्वादृशमायुः परिपाकं प्रयच्छति ।
प्रकृतेश्च क्वचित् कालो विकृतिं प्रतिपादयेत् ॥ ४०

भिन्नैरिति चतुस्त्रिद्व्येकसहस्रैः कृतादियुगकल्पना । तेषां सन्धिसन्ध्यंशौ तावच्छतैरित्यर्थः । त्वमपीति । एतौ हरिहरावपीत्यर्थः । तेषां जीवनकालस्य अल्पत्वमाह वैराग्यार्थकत्वम्—आयुरिति । निश्वासादिमतस्तवापि तर्हि उत्क्रमेण कालपरिच्छेदः स्यादिति न । कालस्य कालान्तरायोगादित्याह—कालेनेति । अथवा एवं विषममायुः कल्पयतः कालस्य वैषम्यनैर्घृण्ये स्यातामिति ।

न। पुरुषकर्मानुसारेण तस्य प्रेरकत्वादित्याह—कालेनेति। वक्ष्यमाण-प्रकारेण प्रचोद्यत इति वार्थः॥ ३५॥ ३६॥ ३७॥ ३८॥ ३९॥ ४०॥

प्रकृतिः पुरुषश्चेत्यादेरन्योऽर्थः। प्रकृतिपुरुषकाला अकारोकारमकाराः। हकाररेफमाया वा। ते नित्याः वक्ष्यमाणप्रयोगेषु नियमेन प्रयोज्या इत्यर्थः। सत्तमेति योगीचित्येन बिन्द्वादियोगः सूचितः॥ २१॥

आणवं योगमाह—अणोरणीयसीति। मूलाधारगतत्रिकोणमध्ये परमाणोरपि अणीयसी प्रकृतिः ध्येयाऽकाराकारेणेत्यर्थः। ततस्तस्याः प्रभारूपेण आकाशादेरपि व्यापक उकारश्चिन्त्य इत्याह—स्थूलादिति। ततः सर्वं जगत् मकाराकारेण तत्र मज्जनीयमित्याह—व्याप्तेति। धामक्रमयोगमाह—आदित्येति। चिदग्निव्याप्त-सौषुम्नमार्गमणिपूरकानाहताज्ञाब्रह्मरन्ध्रेषु अग्निसूर्यसोमब्रह्मधामानि सञ्चिन्त्य सर्वानुगतां कुण्डलिनीं ध्यायन् क्रमेण विलाप्य बिन्दुनादादिना व्यापिन्यादिद्वारेण विभुर्भवेदित्यर्थः॥ २२॥

गुणयोगं भूतयोगं चोत्तरस्मिन् श्लोके वदन् तयोः गुणभूतयोः वर्णानां नामनियममाह—न श्वेतेति। गुणादियोगमाह—न गुणेष्विति। पूर्वोक्तमण्डल-स्थानेषु सत्त्वादिगुणगणम् एकवर्णं ज्योतिर्लिङ्गवत् ध्यायन् पूर्ववत् स्वरूपस्थो भवेदिति गुणयोगः। हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रद्वादशान्तेषु मण्डलबीजा-धिष्ठात्रसहितान् पृथिव्यादिकारणान्तान् कुण्डलिनीप्रभावेन एकवर्णं ध्यात्वा संयोजयेत्। अयं भूतयोगः॥ २३॥

अस्यैव योगस्य स्वरूपपर्यन्तव्याप्तिक्रममाह—अन्तरेति। समस्तरन्ध्रद्वारेण सबाह्याभ्यन्तरं व्याप्य उन्मन्यन्तं गत्वा देहिनां देहसंहर्त्रीत्यर्थः। एवं देशिक-दर्शितैरुपायैः परमात्मस्वरूपेण स्वानुभवनीया न पृथक्त्वेनेत्याह—स्वसंवेद्येति॥२४॥

तदनुभवस्य परमपुरुषार्थत्वमाह—यथेति। अथ शक्तियोगमाह—पुंन-पुंसकयोरिति। पुंनपुंसकयोः प्राणमनसोः वाचि चेच्छादिशक्तिरूपेण तुल्याऽपि प्रणवोच्चारणसमये हि क्रमेण इच्छाक्रियाज्ञानशक्तिरूपाणां मनःप्राणवाचां निविड-तेजोध्वनिरूपमन्त्रात्मना एकत्वं तुल्यत्वं भवति। तस्मिन् साम्ये तेजसि स्थितासु अङ्गनासु अपरच[प]राच[प]रकुण्डलिनीषु विशिष्यते। सकलेच्छादिशक्तिरूपेण विशिष्टा भवतीत्यर्थः॥ २५॥

ततस्तासां संहारमाह—प्रधानमिति। प्रथितं त्रयमकारादित्रयेणाऽत्ति। ततो बिन्दु कला निरोधिका रूपमनआदिकं निविड़तेजोरूपमत्ति। ततो नाद-नादान्तरूपां प्रभामत्तीति प्रधानम्। ततः परं या स्पर्शव्यापिनीसमन्युन्मनीशक्तिरिति

कथ्यत इत्यर्थः। अथ चतुर्मूर्त्यादिचतुर्दशयोगान् क्रमेणाह—या युष्मानिति। युष्मान् मामपि ब्रह्मविष्णुरुद्रसर्वेश्वरान् नाभिहृद्भ्रूमध्यद्वादशान्तस्थितान् अमृतमयान् अवष्टभ्याऽतिवर्तत इत्यर्थः। इति चतुर्मूर्तियोगः सूचितः। ब्रह्म विष्णु रुद्रभेदाभेद लिङ्ग चिदवष्टम्भयोगा अपि अनेनैव सूचिताः। तत्र युष्मानतिवर्तत इति ब्रह्मादियोगत्रयं चतुर्ष्वपि स्थानेषु सपरिवारं ब्रह्माणं सञ्चिन्त्य संपूज्य तेजोरूपांस्तान् प्रणवेन एकीकृत्याऽमृतमास्रावयेदिति ब्रह्मयोगः। एवमेव विष्ण्वादियोगा द्रष्टव्याः। भेदयोगे स्थानेषु भिन्नशरीरमूर्त्तित्रयं ध्येयम्। अभेदयोगेऽभिन्नरूपम्। लिङ्गयोगे लिङ्गरूपम्। भेदादियोगत्रयं चापिशब्देन सूचितम्। अतिवर्तत इति चिदवष्टम्भयोगः। तेजसा बाह्यं स्थूलादिशरीरं व्याप्याऽतिक्रम्य वर्तनं ह्यतिवर्तनम्॥ २६॥

चिदवष्टम्भयोगानन्तरम् अध्यात्माधिदैवादिभेदं परित्यज्य स्थूलादिशरीरात्मकमेकमेव पिण्डं सर्वं ध्येयमित्याह—साऽहमिति। सा पूर्वमध्यात्मं कुण्डलिनीरूपेण स्थिता। अहं द्वादशान्ते स्थितः। यूयं नाभ्यादौ स्थिताः। अन्यच्च परिवारजातं वेद्यं बाह्यं च। तत् तु सा तत् सर्वं सैव। या हि नः स्थूलादिशरीररूपिणी स्मृता। विराट्हिरण्यगर्भकारणरूपेणेत्यर्थः।

इदानीं गुणसंहारोक्तानुज्ञात्रनुज्ञानिर्विकल्पयोगानाह—प्रलय इति। प्रलये प्रणवे वाचके। तस्यां च वाच्यात्मिकायां व्याप्यते संक्रियते चराचरमिदं जगत्। पूर्वं पूर्वं वाच्यवाचकरूपम् उत्तरो त्तरवाच्यवाचकरूपिण्यां तस्यां विलाप्यत इत्यर्थः। अकारोकार मकार बिन्दु नाद शक्ति शान्तानां विराट् हिरण्यगर्भ कारणगुण सामान्यगुणबीज गुणाभाव गुणसाक्षिणां च स्थूलत्व सूक्ष्मत्व कारणत्व समत्व बीजत्वनिर्विशेषत्व शान्तत्वगुणैः एकत्वचिन्तनं गुणयोगः। संहारयोगः तेषां क्रमेण संहारः। एवमधिष्ठानस्थस्य अतिसूक्ष्मस्य जगतः तत्सच्चिद्रूपव्याप्तिचिन्तनमोतयोगः। ततः स्वतः सत्ताद्यभावात् तस्य आत्माधीनत्वचिन्तनमनुज्ञात्वयोगः। आत्मव्यतिरेकेणाऽभावचिन्तनमनुज्ञायोगः। तत आत्मनो निर्विशेषत्वचिन्तनं निर्विकल्पयोगः॥ २७॥

ततो वाक्यार्थप्रतिपत्तिमाह—सैवेति। सा परापरशक्तिरविद्यया प्रपञ्चरूपतां प्राप्ता उक्तविवेकप्रकारेण स्वां वेत्ति। ब्रह्मात्मरूपतां वेदनफलमाह—परमेति। संसारनिवृत्तिं चाह—तस्या इति। वेद्यवेदितृवेदनादिकं नासीदस्ति भविष्यति इत्यर्थः। अथ कालयोगमाह—सा त्विति। कालस्याऽपरस्य पञ्चदशधा भिन्नस्यापि आत्मा कालात्मा। तेनोन्मनीरूपेण कालेन मया पञ्चदशकालाभिमानिनी

सा तत्त्वसंज्ञा चिन्मात्रा ज्योतिषः सन्निधेस्तदा ।
विचिकीर्षुर्घनीभूता क्वचिदभ्येति बिन्दुताम् ॥ ४१
कालेन भिद्यमानस्तु स बिन्दुर्भवति त्रिधा ।
स्थूलसूक्ष्मपरत्वेन तस्य त्रैविध्यमिष्यते ॥ ४२

सम्यगभेदेन ज्ञायत इत्यर्थः । लव त्रुटि कला काष्ठा निमेष मात्रा नाड़िका मुहूर्ताहोरात्र मास संवत्सर युग कल्प महाकल्प परार्ध कालपर्वाणि अकारोकार मकारबिन्दु कला निरोधिका नाद नादान्त शक्ति व्यापिनी व्योमरूपान्तनादान् आश्रिता समनीलक्षणप्रणवमात्रासु मूलाधारम् आरभ्याद्वादशान्तं व्यवस्थितासु सञ्चिन्त्य क्रमेण संहृत्य अकालकलिकायाम् उन्मन्यां व्यवतिष्ठेतेत्यर्थः ॥ २८ ॥

इदानीमुन्मन्यामवस्थितस्याऽप्रयत्नेनैव जपादनन्तं जपफलं दर्शयितुं लवादिकालपर्वकथनाय चोपक्रमते लवादीति । त्वदायुर्मम निश्वास इत्यहोरात्रपक्षसंवत्सरादियोगान् श्वासोच्छ्वासस्थान् दर्शयति । श्वासस्याऽऽयुषोऽपि तद्रूपत्वात् कालेनैवं प्रचोद्यत इति । अहोरात्रादियोगे साक्षितया सत्तामात्रेणात्मा प्रेरको ध्येयः । नतु कालमध्यवर्तितयेति उक्तम् ॥ २८ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ॥ ३५ ॥ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

कालः कर्मापेक्षया प्रेरक एव केवलमित्युक्तं पूर्वस्मिन् व्याख्याने तत् कथं प्रलये सर्वसंहारादित्याशङ्क्य प्रलयेऽपि सूक्ष्मरूपेण कर्मणामवस्थितिमीश्वरस्य सर्वज्ञतां चाह—स जानातीति । स अनन्तरोक्तः । सा तु कालात्मनेति व्यवहितत्वेन उक्तो वा । वाचकशब्दात् वा चेत्यर्थः । परिपक्वानि कर्माणि जात्यायुर्भोगांश्च विपाकांश्च सम्यगासां कार्येण सर्वदा प्रकृतौ कर्मणां सत्त्वे कथं कादाचित्की सृष्टिरित्याशङ्क्य ईश्वरापरकालादिवशादित्याह—प्रकृतेरिति ॥ ४० ॥

तत्त्वविकृतिक्रममाह—सा तत्त्वेति । सा प्रकृतिः तत्त्वस्य पारमार्थिकस्य संज्ञैव संज्ञा यस्याः तदविभक्तत्वात् सा तथोक्ता । सा तत्त्वात्मकताम् अन्तर्मुखताम् अपरित्यज्यैव क्वचिद्देशे बिन्दुतां किञ्चित् बहिर्मुखतया सृष्ट्युन्मुखकर्माविभक्ततया तरङ्गमूलभूतसूक्ष्मवायुव्याप्तसमुद्रवलनवत् किञ्चित् स्थौल्यं प्राप्नोतीत्यर्थः । परिपक्वकर्माभेदात् घनीभावस्तदर्थं व्यापारो विचिकीर्षा । बिन्दुः कर्माभिन्नं रूपम् ॥४१॥

एवं परस्मादुत्पन्नस्य प्रकृतितत्त्वस्योत्तरसृष्टिनिर्वाहार्थम् इच्छासत्त्वादिरूपतामाह—कालेनेति । भिद्यमानः सम्बध्यमानः विभज्यमानश्च । नहि चित्सम्बन्धं विनाऽचिद्रूपस्य ज्ञानादिरूपत्वं सम्भवति । इच्छादीनामेकैकस्य मायातच्छक्तितद्वत-

स बिन्दुनादबीजत्वभेदेन च निगद्यते ।
तद्विस्तारप्रकारोऽयं यथा वक्ष्यामि साम्प्रतम् ॥ ४३

बिन्दोस्तस्माद्विद्यमानाद्रवोऽव्यक्तात्मको भवेत् ।
स रवः श्रुतिसम्पन्नैः शब्दब्रह्मेति कथ्यते ॥ ४४

अव्यक्तादन्तरुदितत्रिभेदगहनात्मकम् ।
महन्नाम भवेत्तत्त्वं महतोऽहङ्कृतिस्तथा ॥ ४५

भूतादिकवैकारिकतैजसभेदक्रमादहङ्कारात् ।
कालप्रेरितया गुणघोषयुजा शब्दसृष्टिरथ शक्त्या ॥ ४६

शब्दाद् व्योम स्पर्शतस्तेन वायु-
स्ताभ्यां रूपाद्वह्निरेतै रसाच्च ।
अम्भांस्येतैर्गन्धतो भूर्धराद्या
भूताः पञ्च स्युर्गुणोनाः क्रमेण ॥ ४७

प्राणिकर्मविषयभेदेन त्रिरूपतामाह—स्थूलेति ॥ ४२ ॥

नवानामपि भेदानां तत्त्वमाह मन्त्रिहिताय—स बिन्दिति । बिन्दुरीश्वरः । नादस्तस्याः चिन्मिश्रं रूपं पुरुषाख्यम् । बीजमचिदंशः । एतन्मन्त्राद्वृत्तिसमये स्वानुभवेनाऽनुगन्तव्यम् । स्वरूपस्थेन वक्ष्यति हि शब्दावगम्यमर्थमिति ॥ ४३ ॥

एवमर्थरूपस्य प्रकृतितत्त्वस्य सृष्टिमभिधाय एतामेवाऽर्थसृष्टिं शब्दसृष्टित्वेनाऽप्याह अत्र शब्दार्थभेदाभावात्—बिन्दोरिति । बिन्दुरुक्तः परमपुरुष एव । तस्माद्बीजरूपयोक्तया प्रकृत्या सम्बध्यमानात् उभयाभेदलक्षणो देदीप्यमानः परापश्यन्त्यात्मको रवोऽभवत् । स एव च कुण्डल्यादिशब्दैरभिलप्यते ।

कोऽसौ रव इति तदाह—स रव इति ॥ ४४ ॥

त्रिभेदा इच्छासत्त्वादयः । अहङ्कृतिस्तथेति । इच्छासत्त्वादिरूपैवेत्यर्थः । अत्र महन् नाम ज्ञानसत्त्वप्रधानः परिणामः । सर्वजगदाश्रयभूत ईक्षणादिशब्दार्थः । ईक्षितुस्तदभिमानिनोऽहङ्कारस्तमःप्रधानः परिणामः ॥ ४५ ॥

कालप्रेरितयेति । कालो द्विविधः । गुणाः सत्त्वादयः । घोषः पूर्वोक्तो रवः शब्दब्रह्म । शक्तिस्तत्त्वसंज्ञेत्युक्ता । तस्माद्धराद्या भूता उत्पन्नाः शब्दादीनामेव काठिन्यावस्थारूपत्वाद् व्योमादीनां शब्दाद् व्योम इत्याद्यभिहितं त्रिभेदगहनात्मकम् ॥ ४६ ॥ ४७ ॥

खमपि सुषिरचिह्नमीरणः स्या-
च्चलनपरः परिपाकवान् कृशानुः ।
जलमपि रसवद् घना धरा तेऽ-
सितशितिपाटलशुभ्रपीतभासः ॥ ४८
वृत्तं व्योम्नो बिन्दुषट्कान्वितं त-
द्वायोरग्नेः स्वस्तिकोद्यत्त्रिकोणम् ।
अर्धोपेतार्धेन्दुमद्बिम्बमाप्यं
स्याद्वच्चोद्यच्चातुरस्रं धरायाः ॥ ४९
निवृत्तिसंज्ञा च तथा प्रतिष्ठा
विद्याह्वया शान्तिसशान्त्यतीते ।
स्युः शक्तयः पञ्च धरादिभूत-
प्रोत्थाः क्रमान्नादकलादिभूताः ॥ ५०

तथेति च महदहङ्कारयोः स्वरूपस्योक्तत्वादाकाशादेः स्वरूपमाह—खमपीति । न्यासप्रयोगादिशेषतया आकाशादीनां रूपमाह—असितेत्यादिना ॥ ४८ ॥

वृत्तं ठकारवद् व्योम्नो बिम्बम् । तदेव वृत्तं बिन्दुषट्कान्वितं वायोः । स्वस्तिकं चतुर्वक्त्रं परस्परसम्बद्धं रेखाद्वयं कोणत्रयगतम् । भूताभिमानिनी बिन्दुतत्त्वनिर्गता शक्तिः ॥ ४९ ॥

प्रयोगाद्यार्थमेवाह—निवृत्तीति । तासां स्थूलवाचकांशमाह—नादकलादिभूता इति । नादो हकारः कः अनुस्वारः । के ऊर्ध्वे येषां लादीनां ते तथोक्ताः । लस्यादी लादी रयौ लः आदिर्यस्य वकारस्य लस्यादिश्चेति त्रिधा योज्यम् । लवरयहा इत्यर्थः । कशब्देनैव बिन्दुयोगोऽप्येषां द्रष्टव्यः । इति तन्मात्राभिमानिनीबीजोद्धारः ।

अथ अपञ्चीकृतबीजोद्धारः । नादः हकारः के येषां लादीनां सर्वेषामादीनां च ते तथोक्ताः । लादिशब्दार्थः पूर्ववत् व्याख्येयः । अत्र ल आदिर्यस्येति व्युत्पत्त्या हकारोऽपि ग्राह्यः । नादशब्दोक्तस्य हकारस्य सर्वसम्बन्धात् । आदयः आं ईं ऊं ऐं औं इत्येते । ततः ह्लां ह्लीं ह्लूं ह्लैं ह्लौं इत्येतत् सिद्धं भवति ।

अथ पञ्चीकृतबीजानि उच्यन्ते । नादः के यस्य लकारस्य इत्यर्थः । स नादकलः ह्ल इत्यर्थः । नादकलाश्च आदिश्च नादकलादयः तेभ्यो भूताः तदात्मतयाऽभिव्यक्ताः निवृत्त्याद्या इत्यर्थः । ततश्च ह्लां ह्लीं ह्लूं ह्लैं ह्लौं इति सिद्धं

पुटयोरुभयोश्च दण्डसंस्था पृथिवी तोयमधः कृशानुरूर्ध्वम् ।
पवनस्त्वथ पार्श्वगोऽथ मध्ये गगनं भूतगतिस्तनूद्भवेयम् ॥ ५१
व्योम्नि मरुदत्र दहनस्तत्रापस्तासु संस्थिता पृथिवी ।
सचराचरात्मकानि तानि तस्यां जातानि सर्वभूतानि ॥ ५२
श्रोत्रत्वगक्षिजिह्वाघ्राणान्यपि चेन्द्रियाणि बुद्धेः स्युः ।
वाक्पाणिपादपायूपस्थानि च कर्मसंज्ञकानि तथा ॥ ५३
वचनादाने सगती सविसर्गानन्दकौ च संप्रोक्ताः ।
वागाद्यर्थाः समनो बुद्धिरहङ्कारश्चित्तमपि करणम् ॥ ५४
भूतेन्द्रियेन्द्रियार्थैरुद्दिष्टस्तत्त्वपञ्चविंशतिकः ।
व्यानन्दकैश्च तैरपि तत्त्वचतुर्विंशतिस्तथा प्रोक्ता ॥ ५५
करणोपेतैरेतैस्तत्त्वान्युक्तानि रहितवचनाद्यैः ।
भूतानीन्द्रियदशकं समनः प्रोक्तो विकारषोडशकः ॥ ५६
अव्यक्तमहदहङ्कृतिभूतानि प्रकृतयः स्युरष्टौ च ।
तन्मात्राहङ्काराः समहान्तः प्रकृतिविकृतयः सप्त ॥ ५७

भवति । भूतगतिकथनमपि प्रयोगाद्यर्थमेव ॥ ५० ॥ ५१ ॥

प्रासङ्गिकं पञ्चीकरणमाह—व्योम्नि मरुदिति । अत्रेति तत्रेति च आकाश इत्यर्थः । तास्विति तत्सम्बन्ध आकाश इत्यर्थः । मरुति व्योमाऽत्राऽग्निस्तत्रापः तासु संस्थिता पृथिवीत्याद्यपि द्रष्टव्यम् । अथवा सूक्ष्मभूतानामेव लयाद्युपयोगितया व्याप्यव्यापकतामाह—व्योम्नीति ॥ ५२ ॥

एवं भूतादिकाहङ्कारकार्यमभिधाय तैजसवैकारिकाहङ्कारयोः भूतानुगतयोः क्रमेण कार्यमाह—श्रोत्रेति ॥ ५३ ॥ ५४ ॥

तत्त्वपञ्चविंशतिक इति । अत्र तत्त्वकल्पनायाः कुत्सितत्वं सूचितम् । कुत्सितोऽपसिद्धान्त इत्यर्थः । तथा प्रोक्ता इति । अत्र तथाशब्देनापि कुत्सितत्वं सूचितम् । विरक्तंमन्यमानानामपि तत्त्वकल्पना कुत्सितैवेत्यर्थः ॥ ५५ ॥

तत्त्वानि उक्तानीति केवलमुक्तान्येव न तु तत्त्वानि तानि । यदि चित्तशब्देन प्रकृतिः नोच्यत इत्यर्थः । ततः प्रकृत्यन्तानि चतुर्विंशतितत्त्वानि पुरुषान्तानि पञ्चविंशतितत्त्वानि ईश्वरान्तानि षड्विंशतितत्त्वानीति सिद्धं भवति । उत्तरत्र व्यवहारशेषतया केषाञ्चिन्मन्त्राणां वर्णतत्त्वन्यासयोगादिशेषतया च षोडश-

सत्त्वं रजस्तम इति संप्रोक्ताश्च त्रयो गुणास्तस्याः ।
तत्सम्बन्धात् विकृतैर्भेदत्रितयैस्ततं जगत् सकलम् ॥ ५८
देवाश्च श्रुतयः स्वराः समरुतो लोकाः सवैश्वानराः
कालाः शक्तियुतत्रिवर्गसहितास्तिस्रस्तथा वृत्तयः ।
नाड्योऽन्यच्च जगत्त्रयेऽत्र नियतं यद्वस्तु सम्बध्य त-
द्विश्वेषां स्थितये चरन्त्यविरतं सूर्येन्दुवैश्वानराः ॥ ५९

विकारादि कथनमवगन्तव्यम् ॥ ५६ ॥ ५७ ॥

तस्या इति मूलकारणभूतायाः प्रकृतेरित्यर्थः । तस्याः त्रिगुणात्मकत्वे प्रमाणमाह—तत्सम्बन्धादिति । ततं व्याप्तम् ॥ ५८ ॥

तदेव प्रपञ्चयति न्यासयोगविशेषांश्च प्रणवादिषु कामनानुरूपेण दर्शयन्—देवा इति । वृत्तयो जाग्रदाद्या याजनाद्या वा । नाड्यो योगस्थानभूताः सुषुम्ना-चित्रावज्राख्याः प्रसिद्धा वा । न्यासयोगादिकं मण्डलत्रयोपेतमेव कार्यमित्याह—संबध्येत्यादिना । चरन्ति नाभ्यादिस्थिताः संभूय ऊर्ध्वं गच्छन्ति । परमानन्दं भक्षयन्ति चेत्यर्थः ॥ ५९ ॥

* ननु सर्वमन्त्रसमानत्वेन सर्वागमसारत्वादस्य ग्रन्थस्य शैवशाक्तादि तत्त्वान्यप्यत्र वक्तव्यानि । सत्यमुक्तानि तानि कथं शृणु । सा तत्त्वसंज्ञेत्यत्र चिन्मात्रज्योतिः-शब्दाभ्याम् अधिष्ठानसाक्षिलक्षणौ अनाहतशिवशक्ती अकारलक्षितार्थौ कथ्येते । तत्त्वसंज्ञेति आहतशिवोऽकारवाच्यार्थः । अभ्येति बिन्दुतामित्यन्तेन आहतशक्तिः चकारवाच्या । स बिन्दुर्भवति त्रिधेति । इच्छाक्रियाज्ञानलक्षणानि इह स-वाचकानि सदाशिवेश्वरशुद्धविद्यातत्त्वानि । एतच्छुद्धतत्त्वपञ्चकम् वैष्णवे तत्त्वे वासुदेवादिशब्दवाच्यमित्येव विशेषः । षोयरावलाश्च तत्र वर्णाः परमेष्ठिपुं-विश्वनिवृत्ति सर्वात्मसहिताश्च । विद्यातत्त्वानन्तरं शैवे मायातत्त्वं स्वरूपाच्छादन-विक्षेपात्मकम् । शुद्धपञ्चके त्वाच्छादनं नास्ति । तस्येश्वररूपत्वात् विद्यावत्त्वेन । मायादिकं तु जीवोपकरणभूतम् । एकैव शक्तिः अन्तर्मुखतया विकसन्ती विद्यादि-तत्त्वरूपिणी बहिर्मुखतया संकुचन्ती मायादितत्त्वरूपिणी । तदुपहितः शिव एव जीव इति हि तेषां सिद्धान्तः । माया विक्षेपे कालपरिच्छेदे हेतुः । कालतत्त्वं तत एव । देश काल कर्म फलादि नियतहेतुः ईश्वरेच्छा एव नियतितत्त्वम् । कला त्वेवं परिच्छिन्नस्य पशोः किञ्चित्कर्तृत्वशक्तिः । तस्यैव किञ्चिद्ज्ञत्वशक्तिः अशुद्धविद्या । तस्याः पूर्णंमन्यता रागतत्त्वम् । एतत्षट्कविशिष्टः परमशिवो

एष सर्गः समुत्पन्न इत्थं विश्वं प्रतीयते ।
विश्वप्रतीतौ हि यतः प्रपञ्चस्त्ववगम्यते ॥ ६०

जीवः । स पुरुषतत्त्वम् । अस्य च सप्तकस्य षादिमान्ता वर्णाः । वैष्णवे तु जीवतत्त्व एव एतत् सर्वमन्तर्भूतम् । पुरुषात्परं शैवे प्रकृतितत्त्वं पशोः सुखदुःखमोहलक्षणं भकारवाच्यम् । वैष्णवे प्राणतत्त्वेनैव गता प्रकृतिः । बिन्दोः तस्माद्भिद्यमानादित्यनेनैतत् तत्त्वगणमुक्तम् । बिन्दुः शिवः । तस्मात् आहतशिवशक्त्यादिरूपादेवमुक्तेन प्रकारेण मायादिरूपेण भिद्यमानात् परिणम्यमानात् अभिन्नो रवो वाचकांशः वाच्येन सह अव्यक्तात्मकः प्रकृतितत्त्वात्मकोऽभवत् । स रवः प्रकृतितत्त्वपर्यन्तः शब्दब्रह्मेति कथ्यत इति । महदादिकं तु सर्वत्र समानमिति । निवृत्तिसंज्ञा चेत्यत्र शाक्तमपि तत्त्वं निवृत्ति प्रतिष्ठा विद्या शान्तिशान्त्यतीत बिन्दु कला निरोधिका नाद नादान्त शक्ति व्यापिनीव्योमरूपानन्तानाथानाश्रिता समन्युन्मनीलक्षणं सूचितम् । स्युः पञ्च शक्तयः । नादकलादिभूताश्च त्रयोदश स्युरिति हि तस्यार्थः । नादो नाद एव कला बिन्दुः तावादिभूतौ येषामिति विग्रहः ॥ * ॥

एवं तत्त्वसृष्टिमभिधाय उपसंहरति—एष इति । सृज्यत इति सर्गः । तत्त्वगणः । इत्थमुक्तेन प्रकारेण समुत्पन्न इत्युपसंहारः । सृष्टेः व्यवहारलक्षणम् अवान्तरप्रयोजनमाह—इत्थमिति । इत्थमेवं सृष्टौ सत्यां विश्वं प्रतीयते । प्रतीतिः क्रियाया अप्युपलक्षणार्था । ज्ञानक्रियात्मको हि व्यवहारः ।

अर्थसृष्टेः परमप्रयोजनमाह—विश्वेति । विश्वस्य कार्यस्य प्रतीतौ शक्त्यां सत्यां हि यस्मात् यतः परब्रह्मण उक्तः प्रपञ्चः समुत्पन्नः तद्ब्रह्माऽवगम्यते । नान्यथा । तस्मात् सृष्टिरर्थवतीत्यर्थः ।

अथवा एषः सर्वप्रत्यक्षसिद्धः परमात्मा सर्गं सृजतीति स एव योऽसौ स्रष्टा परमात्मा स एव उक्ततत्त्वरूपेण समुत्पन्न इत्यर्थः । कुतः यत इत्थं परमात्मरूपेण घटः सन् घटः प्रकाशत इति च विश्वं सर्वं तन्मयं प्रतीयते । किमित्यसावेवमुत्पन्न इति स्वात्मप्रकाशनायेत्याह—विश्वेति । विश्वप्रतीतौ घटाद्याकारबुद्धिवृत्तौ तत्साक्षितया । हि यस्मादित्यादि समानम् ।

एतदेव पद्यं त्रैपुरतत्त्वपरत्वेन योज्यते । इत्थं समुत्पन्न एष शैवतत्त्वलक्षणः सर्गः । विश्वं प्रमेय प्रमाण प्रमातृरूपात्म विद्या शिवतत्त्वरूपं प्रतीयते । 'प्रमा प्रमाता प्रमितं च विश्वम्' इति हि लिङ्गसूक्तवाक्यम् । तत्र मायान्तं मेयरूपम् आत्मतत्त्वं सदाशिवान्तं ज्ञानरूपं विद्यातत्त्वम् आहतशिवान्तं प्रमातृरूपं

शब्दब्रह्मेति यत् प्रोक्तं तदुद्देशः प्रवर्त्यते ।
अतः परमवाच्यं हि स्वसंवेद्यस्वरूपतः ॥ ६१
शब्दब्रह्मेति शब्दावगम्यमर्थं विदुर्बुधाः ।
स्वतोऽर्थानवबोधत्वात् प्रोक्तो नैतादृशो रवः ॥ ६२
स तु सर्वत्र संस्यूतो जाते भूताकरे पुनः ।
आविर्भवति देहेषु प्राणिनामर्थविस्तृतः ॥ ६३

शिवतत्त्वम् इति द्रष्टव्यम् ।

अवशिष्टं सर्वतत्त्वमाह—विश्वेति । विश्वस्य तत्त्वत्रयात्मकस्य वेद्यस्य प्रतीतौ साक्षिणि सति यतः यस्मादधिष्ठानात् अनाहतशिवात् प्रपञ्च उक्तो भवति । सः परमशिवः सर्वतत्त्वरूपोऽवगम्यत इति ॥ ६० ॥

एवमर्थसृष्टिं शब्दसृष्टिं च मध्यमान्तामभिधाय वैखरीसृष्टिकथनार्थम् उक्तानुवादपूर्वकमुपक्रमते—शब्दब्रह्मेति । तत्र तत्त्वसंज्ञा परावाक्तदर्थरूपिणी प्रकृतितत्त्वान्तं पश्यन्ती तदर्थात्मकम् इन्द्रियान्तं मध्यमा तदर्थात्मकं पञ्चीकृतं वैखरी तदर्थात्मकमिति अवगन्तव्यम् । शब्दब्रह्मेति यत् प्रोक्तं स रवः श्रुतिसंपन्नैरित्यत्र तदुद्देशः । तस्य क्रमेण वैखरीरूपेणोद्देशः उपदेशः प्रवर्त्यते ।

ननु बैन्दवतत्त्वरूपशब्दब्रह्मणोऽपि ऊर्ध्वं परावाग्रूपायाः तत्त्वसंज्ञायाः तत्साक्षिणः तत्त्वस्य चोद्देशनं याथार्थ्योपदेशनमकृत्वा किमिति शब्दब्रह्मोद्देशः क्रियत इति तयोरुद्देष्टुमशक्तत्वादित्याह—अतः परमिति । अवाच्यत्वे हेतुः—स्वसंवेद्येति । आत्मा स्वसंवेद्यत्वेन अवाच्यः । शक्तेरपि तदभिन्नत्वात् तद्व्यतिरेकेणाऽभावाद्वा अवाच्यत्वमेव । स्वयंप्रकाशत्वेन वचनापेक्षाभावादिति वार्थः ॥ ६१ ॥

ननु शब्दब्रह्मेति श्रोत्रग्राह्य एव सूक्ष्मो व्यापी शब्दः न बैन्दवं तत्त्वमिति केचिदिति न इत्याह—शब्दब्रह्मेति । शब्दोच्चारणकाले तत्साक्षितयाऽन्तरत्वेन अवगम्यमर्थं बिन्द्वात्मकमित्यर्थः ।

इतरस्य न प्रकाशकशब्दरहस्यत्वं ब्रह्मत्वं चेत्याह—स्वत इति । बिन्द्वात्मकप्रकाशात्मत्वं विनाऽनवबोधकत्वात् तत्रोक्तो रवो न शब्दब्रह्मेत्यर्थः ॥ ६२ ॥

स्वाभिप्रेतस्य शब्दस्य ब्रह्मत्वं प्रकाशकत्वं चास्तीत्याह—स त्विति । सः शब्दावगम्योऽर्थः पूर्वोक्तः सर्वत्र संस्यूतः कारणत्वात् । तुशब्दो विशेषावधारणार्थः । अतस्तस्य ब्रह्मत्वं प्रकाशकत्वं च युक्तमित्याह—जाते इति । प्राणिनां देहेषु वैखर्या तदभिमतया विनापि यावदर्थः व्याप्तः सङ्कल्पविकल्प-

प्रकृतौ कालनुन्नायां गुणान्तःकरणात्मनि ।
देहश्चतुर्विधो ज्ञेयो जन्तोरुत्पत्तिभेदतः ॥ ६४
औद्भिजः स्वेदजोऽण्डोत्थश्चतुर्थस्तु जरायुजः ।
उद्भिद्य भूमिं निर्गच्छत्यौद्भिदः स्थावरस्तु सः ॥ ६५
निर्दिष्टः स्कन्धविटपपत्रपुष्पफलादिभिः ।
पञ्चभूतात्मकः सर्वः क्ष्मामधिष्ठाय जायते ॥ ६६
अम्बुयोन्यग्नि[भूवारितेजः]पवननभसां समवायतः ।
स्वेदजः स्विद्यमानाभ्यो भूवङ्गाद्वाः प्रजायते ॥ ६७
यूकमत्कुणकीटाणुचियाद्याः क्षणभङ्गुराः ।
अण्डजो वर्त्तुलीभूताच्छुक्रशोणितसंपुटात् ॥ ६८
कालेन भिन्नात् पूर्णात्मा निर्गच्छन् प्रक्रमिष्यति ।
अहिगोधावयोमेक[द]शिशुमारादिकश्च सः ॥ ६९
जरायुजस्तु ग्राम्यातः क्रियातः स्रुतिसम्भवः ।
स जायते चतुर्विंशत्तत्त्वसंयुक्तदेहवान् ॥ ७०
स्वस्थानतश्च्युताच्छुक्राद्बिन्दुमादाय मारुतः ।
गर्भाशयं प्रविशति यदा तुल्यं तदापरः ॥ ७१

निश्चयविमर्शनात्मना आविर्भवतीत्यर्थः ॥ ६३ ॥

तस्याविर्भावप्रकारप्रदर्शनार्थं देहोत्पत्तिप्रकारं दर्शयन् तत्रेदं तावदाह—प्रकृताविति । गुणान्तःकरणात्मनीति सर्वतत्त्वात्मत्वोपलक्षणार्थम् । उत्पत्तिप्रकारभेदादेव देहानां भेदः न पञ्चभूतात्मकत्वेन इति उक्तमुत्पत्तिभेदत इति ॥ ६४ ॥

उत्पत्तिभेदमाह—उद्भिद्येति । उद्भिज्जमपि अप्राणिदेहं पाषाणादिकं व्यावर्त्तयन् उद्भिज्जस्य रूपमाह—स्थावर इति ।

स्थावरत्वमपि तेषामस्तीति अतो विशिनष्टि—स्कन्धेति । तेषां पृथिव्याश्रयत्वेन केवलपृथिव्यात्मत्वशङ्कां व्यावर्तयति—पञ्चेति । यद्यपि क्ष्मामधिष्ठाय जायते तथापि रसादिदर्शनात् पञ्चभूतात्मकत्वमेवेत्यर्थः ॥ ६५ ॥ ६६ ॥

अम्बुवादीनामेकैकाभावेऽदर्शनादप्रधानेभ्यो भूतेभ्य एव स्वेदजोत्पत्तिरित्याह अम्बुवति । चतुर्विंशदित्युपलक्षणम् । सर्वतत्त्वानाम् ।

संभवशब्दार्थमाह—स इति ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥

आर्त्तवात् परमं बीजमादायाऽस्याश्च मूलतः ।
यदा गर्भाशयं नेष्यत्यथ संमिश्रयेन्मरुत् ॥ ७२
मायीयं नाम योषोत्थं पौरुषं कार्मकं मलम् ।
आणवं नाम संयुक्तं मिलितं तन्मलद्वयम् ॥ ७३
सूक्ष्मरूपाणि तत्त्वानि चतुर्विंशं मलद्वये ।
तत्र युक्तिं व्रजन्त्याशु ततस्तद्गर्भमारुतः ॥ ७४
संक्षोभ्य संवर्धयति तन्मलं शोणिताधिकम् ।
स्त्री स्याच्छुक्राधिकं ना स्यात् समवद्वं नपुंसकम् ॥ ७५
स्वगतैर्मरुदग्न्यद्भिः स्विद्यते क्वाथ्यते च तत् ।
मिश्रीभूतं तदङ्गैव मातुरङ्गुष्ठसम्मितम् ॥ ७६
आयामि बुद्बुदाकारं परेऽहनि विजृम्भते ।
पक्षेण चतुरस्रं स्यान्मातुर्भुक्तरसात्मवत् ॥ ७७
मिलितादपि तस्मात्तु पृथगेव मलद्वयात् ।
किट्टीभूतं द्वयं पूर्वं बीजयुग्मं समुन्नमेत् ॥ ७८
ऊर्ध्वं तु मरुता नुन्नं तस्मादपि मलद्वयात् ।
उभयात्मिक्यधोवृत्ता नाड़ी दीर्घा भवेदृजुः ॥ ७९
अवाङ्मुखी सा तस्याश्च भवेत् पक्षद्वये द्वयम् ।
नाड्योस्तत्सन्निबद्धाः स्युः सप्तान्या नाड़िका मताः ॥ ८०

योषोत्थं रक्तं त्वगस्थ्यांसकारणत्वेन निःसारेऽपि शरीरे सारबुद्धिजनकत्वान्मायीयम् । पौरुषं शुक्रम् । अस्थ्यादिकारणत्वेन दार्ढ्यहेतुत्वात् देहस्य व्यापारक्षमत्वकरमिति कार्मकं कर्मसंस्कृतत्वाद्वा कार्मकम् । मिलितमनुशय्यणुत्वहेतुत्वादाणवम् । संयुक्तयोरपि परस्परम् एकत्वम् अप्राप्तयोः नानुशय्यणुत्वहेतुत्वमिति संयुक्तमिलितमित्युक्तम् ॥ ७१ ॥ ७२ ॥ ७३ ॥

तस्य पूयत्वाप्राप्तौ हेतुमाह—सूक्ष्मरूपाणीति । अनेन सर्वेषां सर्वोपाधित्वमुक्तं भवति । आशु पूयभावात् प्राग्येव लब्धवृत्तीनि भवन्तीत्यर्थः ॥ ७४॥७५॥७६॥७७ ॥

किं तद्द्वयमुद्गतमित्याह -बीजयुग्ममिति ॥ ७८ ॥

उभयात्मिकीति । अग्नीषोमात्मिकी प्रकृतिपुरुषात्मिकी चेत्यर्थः ॥ ७९ ॥

अवाङ्मुखत्वमपि अस्तीत्यवाङ्मुखीत्युक्तम् ॥ ८० ॥ ८१ ॥

तत्र या प्रथमा नाड़ी सा सुषुम्नेति कथ्यते ।
या वामेड़ेति सा ज्ञेया दक्षिणा पिङ्गला स्मृता ॥ ८१
या वाममुष्कसम्बद्धा सा श्लिष्यन्ती सुषुम्नया ।
दक्षिणं जत्रुमाश्रित्य धनुर्वक्रा हृदि स्थिता ॥ ८२
वामांसजत्रुन्तरगा दक्षिणां नासिकामियात् ।
तथा दक्षिणमुष्कोत्था नाड़ी या वामरन्ध्रगा ॥ ८३
अन्या धमन्यो याः प्रोक्ता गान्धारी हस्तिजिह्विका ।
सपुषाऽलम्बुषा चैव यशस्विन्यपि शङ्खिनी ॥ ८४
कुहूरिति च विद्वद्भिः प्रधाना व्यापिकास्तनौ ।
काचिन्नाड़ी बहिर्वक्रा या मातुर्हृदि बध्यते ॥ ८५
यया तत्पुष्टिमाप्नोति केदार इव कुल्यया ।
मातुराहाररसजैर्धातुभिः पुष्यते क्रमात् ॥ ८६
क्रमवृद्धौ परंज्योतिष्कला चेत्रज्ञतामियात् ।
सत्त्वेत्रज्ञं मलं तत् तु संभूतं सगुणं पुनः ॥ ८७
सदोषदूष्यसम्पन्नं जन्तुरित्यभिधीयते ।
फलकोशद्वयं तत् तु व्यक्तं पुंसो न तु स्त्रियः ॥ ८८
नपुंसकस्य किञ्चित् तु व्यक्तिरत्रोपलक्ष्यते ।
मध्यस्थायाः सुषुम्नायाः पर्वपञ्चकसम्भवाः ॥ ८९
शाखोपशाखतां प्राप्ताः शिरालक्षणयात् परम् ।
अङ्गलक्षमिति प्राहुः शारीरार्थविशारदाः ॥ ९०

वाममुष्केति छेदे अदक्षिणामिति छेदः । दक्षिणमुष्कोत्थेति छेदे अवामरन्ध्रगेति छेदः ॥ ८२ ॥ ८३ ॥ ८४ ॥

मातुर्भुक्तरसात्मवदित्युक्तम् । तत्कथमिति । तदाह—काचिदिति ॥ ८५॥८६ ॥

वैराग्यार्थमाह—सत्त्वेत्रज्ञमिति । बीजयुग्मं ससुत्रमेदित्युक्तम् । न तत् सार्वत्रिकमित्याशङ्क्याह—फलेति ॥ ८७ ॥ ८८ ॥ ८९ ॥

अवशिष्टं नाड़ीचक्रं योगियोगाभिवृद्धये दर्शयति—मध्यस्थाया इति । मूलाधारनाभि हृदय गलमूल भ्रूमध्यानुसारीणि पञ्चपर्वाणि ॥ ८९ ॥ ९० ॥

तद्भेदांश्च बहूनाहुस्ताभिः सर्वाभिरेव च ।
व्याप्नोति सर्वतो वायुर्येन देहः प्रवर्त्यते ॥ ९१
देहेऽपि मूलाधारे तु समुदेति समीरणः ।
नासाभ्यामस्तमभ्येति घ्राणतो द्विषड्ङ्गुले ॥ ९२
अहोरात्रमिनेन्दुभ्यामूर्ध्वाधोवृत्तिरिष्यते ।
वामदक्षिणनाड़ीभ्यां स्यादुदग्दक्षिणायनम् ॥ ९३
अत्रापि चेतनाधातोरागतिं बहुधा विदुः ।
रेतःशोणितजं प्राहुरेकेऽन्ये मातुराहृतात् ॥ ९४
आहाराद्रसजं प्राहुः केचित् कर्मफलं विदुः ।
केचिदस्य परं धाम्नो व्याप्तिमेव प्रचक्षते ॥ ९५
कश्चित् कर्मप्रकारज्ञः पितुर्देहात्मना सकृत् ।
सम्बध्य मथ[द्]नोद्रेकविलीनाच्छुक्रधातुतः ॥ ९६
तत्परं धाम सौजस्कं संक्रान्तं मारुतेन तु ।
ब्रूते रक्तव्यतिकृताद्दीपाद्दीपान्तरं यथा ॥ ९७

वायुव्याप्तिफलमाह—येनेति ॥ ९१ ॥

ज्ञानयोगक्रियानिष्ठानां हिताय देहे अहोरात्रादिक्रममाह—देहेऽपीति । अपिशब्दोऽग्नुदयसमुच्चयार्थो बाह्योदयसमुच्चयार्थो वा । इनरूपेणोर्ध्वप्राणवृत्तिरहः । इन्दुरूपेणेतरत् ॥ ९२ ॥ ९३ ॥

सचेतनं मलमिति उक्तम् । तत्कथं चेतनप्रवेश इति । तत्र मतभेदं दर्शयति—अत्रापीति । चेतनाधातुश्चिदेकरसः पुरुषः । अपिशब्देन विरोधार्थेन पक्षाणामनुपपत्तिः दर्शिता । नहि चिदेकरसस्य पुरुषस्य एवंविधाः प्रवेशा उपपद्यन्त इत्यर्थः । रेतःशोणितजमिति । पञ्चाधिकरणानां पक्षः । मातुराहृतात् आहाराद्यो रसः पाकजः तद्द्वारेण गर्भशरीरं विशतीति वार्षगणाः । कर्मफलमिति अपत्यार्थिनां यथोक्ताहारविहारश्रद्धाद्यतिशयात् गर्भं प्रविशतीत्यापथा[त्रेया]दयः । परं धाम्नो व्याप्तिमिति विन्ध्यवासिपक्षः । सर्वगस्येन्द्रियाभिव्यक्तिनिमित्तं परिच्छेद इत्यर्थः । दीपात् दीपान्तरमिति पतञ्जलिधन्वन्तर्यादिपक्षः ।

तत्परं धाम तस्य पितुरात्मा कश्चिदेवं ब्रूत इत्युत्तरत्रान्वयः । रक्तव्यतिकृतादिति स्वात्मनोऽपि संक्रान्तिः दर्शिता ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥

कश्चित्तु भौतिकव्याप्ते जन्मकाले वपुष्यथ ।
कुतश्चिदेत्य जीवात्मा निष्पन्न इति शंसति ॥ ९८
बहुना किं परं पुंसः सान्निध्यात्प्रविजृम्भिता ।
प्रकृतिर्गुणभिन्ना सा त्रिदोषात्मा महीयसी ॥ ९९
पञ्चभूतमयी सप्तधातुभिन्ना च भौतिकैः ।
पञ्चभिश्च गुणैर्युक्ता पञ्चेन्द्रियविचारिणी ॥ १००
पञ्चेन्द्रियार्थगा भूयः पञ्चबुद्धिप्रभाविनी ।
पञ्चकर्मेन्द्रियगता पञ्चत्वादाप्रवर्त्तते ॥ १०१

परेण धाम्ना समनुप्रबद्धा
मनस्तदा सा तु महाप्रभावा ।
यदा तु सङ्कल्पविकल्पकृत्या
यदा पुनर्निश्चिनुते तदा सा ॥ १०२
स्याद्बुद्धिसंज्ञा च यदा प्रवेत्ति
ज्ञातारमात्मानमहङ्कृतिः स्यात् ।
तदा यदा सा त्वभिलीयतेऽन्त-
श्चित्तञ्च निर्धारितमर्थमेषा ॥ १०३

भौतिकव्याप्त इति वार्हस्पत्यः पक्षः । कुतश्चिदित्यनिमित्तमेवेत्यर्थः ॥ ९८ ॥

स्वसिद्धान्तमाह—बहुनेति । सान्निध्यं नाम चैतन्याभासोदयः । तेन प्रकृतेः प्रकर्षेण विविधजृम्भणप्रकारमाह—गुणभिन्नेति । गुणसाम्यावस्थातोऽपि विषमदशां प्राप्ता इत्यादिना उक्तसंक्षेपः क्रियते । सैव महीयसी महत्त्वं प्राप्ता शरीरावस्थायां वातादिरूपदोषरूपेण वर्तत इत्याह—त्रिदोषेति ।

महत्त्वमेव दर्शयति—पञ्चभूतमयीति । श्रोत्रादिपञ्चेन्द्रियरूपेण विचारिणी । पञ्चकर्मेन्द्रियार्थरूपेण गच्छतीति तथोक्ता । श्रोत्रादिजन्य पञ्चबुद्धिरूपेण प्रभवति इति तथोक्ता । पञ्चकर्मेन्द्रियरूपेण गच्छति इति तथोक्ता । आ पञ्चत्वादा-मोक्षत्वादित्यर्थः ॥ ९९ ॥ १०० ॥ १०१ ॥

सैवान्तःकरणरूपेत्याह—परेणेति । साक्षितया कारणतयाऽन्तर्यामितया च सम्बन्धः । समनुप्रोपसर्गाणामर्थः । महाप्रभावेति परिणामसामर्थ्यमुक्तम् । अह-मेव ज्ञातेत्यविवेकतया ज्ञातुः स्वात्मत्वमात्रवेदनमहङ्कारः । अन्तः साक्षिणीत्यर्थः ।

यदा स्वयं व्यञ्जयितुं यतेत
महीयसी सा करणैः क्रमेण ।
तदा तु बिन्दुस्फुटनोद्भवस्य
रवस्य सम्यक् प्रविजृम्भितं स्यात् ॥ १०४

इति श्रीप्रपञ्चसारे प्रथमः पटलः ।

एवं प्रकृतेः शरीरान्तं परिणामकदम्बं संग्रहेणाऽभिधाय शरीरे पूर्वोक्तस्य शब्दब्रह्मणो वैखरीरूपेणाऽभिव्यक्तिमपि संक्षेपेणाह—निर्धारितमर्थमित्यादिना । करणैः प्रयत्नविशेषैरितरैश्च । क्रमेणेति । पश्यन्त्यादिक्रमेणेत्यर्थः । प्रविजृम्भणं वैखरीपर्यन्तः स्थूलभावः ॥ १०२ ॥ १०३ ॥ १०४ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
प्रथमः पटलः ।

द्वितीयः पटलः ।

अथ व्यवस्थिते त्वेवं मासात् पक्षाद्दिनादपि ।
मुहूर्त्तान्नाड़िकायाश्च क्षणादपि च वर्धते ॥ १
जन्तुः षड़ङ्गी पूर्वं स्याच्छिरः पादौ करावपि ।
अन्तराधि[दि]श्चेति पुनः षड़ङ्गेषु प्रवर्तते ॥ २
अक्षिनासास्यकर्णभ्रूकपोलचिबुकादिकम् ।
प्रकोष्ठकूर्परांसाद्यं कट्यूरुप्रपदादिकम् ॥ ३
उरःकुक्षिस्तनाद्यञ्च ततः सर्वाङ्गवान् विभुः ।
कालेन जन्तुर्भवति दोषास्त्वनुगुणा यदि ॥ ४
प्रसूतिसमये सोऽथ जननीं क्लेशयन् मुहुः ।
संवृतास्यसुषुम्नाख्योऽवाङ्मुखोऽनिलचोदितः ॥ ५
तस्या ग्रहण्यां शकृति मग्नवक्त्राक्षिनासिकः ।
पुरा कृतानां पापानामयुतं संस्मरन् मुहुः ॥ ६
तस्याः कायाग्निना दग्धः क्लेदैः क्लिन्नाङ्गबन्धनः ।
पू[प्र]त्युद्गारपरीतश्च तत्पायुद्वारगोचरः ॥ ७
तदा प्रक्षुभितैः स्वीयवायुभिर्दशधा गतैः ।
सम्पिण्डितशरीरस्तु मोक्षमेव किलेच्छति ॥ ८

उक्तमपि गर्भवासं सविशेषं विस्तरेण वैराग्यार्थं प्रपञ्चयितुं द्वितीयपटलारम्भः ।
अथेति—एवं चेत्रक्षप्रवेशे व्यवस्थिते गर्भो वर्धत इत्यर्थः ॥ १ ॥
षड़ङ्गान्याह—शिर इति । विभुः वपुश्चलनादौ समर्थः ।
क्लेदो गर्भजलम् । किलेति । परोक्षत्वात् इदानीं तदनुगुणप्रवृत्तिदर्शनाच्चोक्तम् ।
॥ २॥३॥४॥५॥६॥७॥८ ॥

प्राणाद्या वायवस्तस्मिन् पूर्वमेव कृतास्पदाः ।
परस्परमपानश्च प्राणश्च प्रतिबध्यते ॥ ९

प्रयात्यूर्ध्वं यदा प्राणस्तदाऽपानो नयत्यधः ।
यदा समानः कायाग्निं संधुक्षयति पाचितुम् ॥ १०

तदा तत्पक्वमुक्तन्तु रसमादाय धावति ।
व्यानो जन्तोस्तु तं देहमापादतलमस्तकम् ॥ ११

उदानः प्राणसहगो निमेषोन्मेषकारकः ।
उद्गारकारको नाग उन्मीलयति कूर्मकः ॥ १२

क्षुत्कृत् कृकरको देवदत्तो जृम्भणकर्मकृत् ।
धनञ्जयाख्यो देहेऽस्मिन् कुर्याद्बहुविधान् रवान् ॥ १३

स च लौकिकवायुत्वान्मृतश्च न विमुञ्चति ।
इत्यमी मारुताः प्रोक्ता दश देहाधिगामिनः ॥ १४

वह्नयश्च दशाऽन्ये स्युस्तेषां सप्त तु धातुगाः ।
त्रयस्त्रिदोषगाः प्रोक्ताः स्वेदक्लेदान्वगाश्च ते ॥ १५

त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः ।
ते दूष्याः कफपित्तेन दोषास्तत्प्रेरको मरुत् ॥ १६

समवायी स विश्वात्मा विश्वगो विश्वकर्मकृत् ।
स दोषो वा स दूष्यो वा क्रियातः संप्रधार्यते ॥ १७

स्वीयवायुप्रक्षोभं दर्शयति—परस्परमिति ॥ ९॥१०॥११॥१२॥१३॥१४ ॥

भ्राजक रञ्जक क्लेदक स्नेहक धारक बन्धक द्रावका धातुगा वह्नयः । व्यापक-पाचक श्लेषका वातादिदोषगाः । पित्त श्लेष्म वात विकार विशेषाः स्वेदादयः । ॥ १५ ॥ १६ ॥

मरुतो दोषदूष्यसंयोजनस्वभावत्वे कथमदुष्टं जीवनमिति । तत्राह—समवायीति । समं वयत इति समवायी । तत्र हेतुर्विश्वात्मेति । तत्र हेतुद्वयं विश्वग इत्यादि । वायोः समवयनस्वभावत्वे कथं रोगाद्युद्भव इति । विषम-वयनादित्याह—स दोष इति । तत् कथं ज्ञातं शक्यत इति । कार्यत इत्याह—क्रियात इति ॥ १७ ॥

बुभुक्षा च पिपासा च शोकमोहौ जरामृती ।
षड्ऊर्मयः प्राणबुद्धिदेहधर्मेषु संस्थिताः ॥ १८
मज्जास्थिस्नायवः शुक्राद्रक्तात्त्वङ्मांसशोणितम् ।
इति षाट्कौशिकं नाम देहे भवति देहिनाम् ॥ १९
रसादितः क्रमात् पाकः शुक्रान्तेषु तु धातुषु ।
शुक्रपाकात् स्वयं भिद्येदोजो नामाऽष्टमी दशा ॥ २०
चेतनस्य तदोजस्तु केवलाश्रयमिष्यते ।
यथा स्नेहः प्रदीपस्य यथाऽभ्रमशनिर्त्विषः ॥ २१
बहुद्वारेण कुम्भेन संवृतस्य हविर्भुजः ।
यथा तेजः प्रसरति समीपालोकशक्तिमत् ॥ २२
तथा देहावृतस्यापि चेतनस्य महात्विषः ।
इन्द्रियैः सम्प्रवर्त्तन्ते स्वं स्वमर्थग्रहं प्रति ॥ २३
नभः श्रोत्रेऽनिलश्चर्मण्यग्निश्चक्षुष्यथोदकम् ।
जिह्वायामवनिर्घ्राण इत्यमर्थप्रवर्त्तनम् ॥ २४
यदा पित्तं मरुन्नुन्नम् विलीनं प्रविलापयेत् ।
धातूंस्तदा क्रमाद्रक्तं लसीकां द्रावयेत् क्षणात् ॥ २५
द्रुता सा तु लसीकाख्या रोमकूपैः प्रवर्त्तते ।
बहिः सर्वत्र कणशस्तदा स्वेदः प्रतीयते ॥ २६
यदा कफो मरुत्पित्तनुन्नो लीनः प्रवर्त्तते ।
ऊर्ध्वं द्रुतो द्रुतं वाष्पं प्रसेकञ्च प्रवर्त्तयेत् ॥ २७

वायुप्रसङ्गेन प्राणादिधर्मानाह—बुभुक्षेति । धर्मेषु धर्मत्वेनेत्यर्थः ॥ १८ ॥

ऊर्मिप्रसङ्गेन कोशानाह—मज्जेति ॥ १९ ॥

धातुगत्वेन उक्तानाम् अग्नीनां प्रयोजनमाह—रसादित इति । स्वयमिति प्रधानमित्यर्थः । प्राधान्यमाह—चेतनस्येति ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

इन्द्रियाणाम् अर्थविशेषनियमहेतुमाह—नभ इति । इत्यमिति । एतत्सम्बन्धानुसारेणेत्यर्थः ॥ २४ ॥

कार्यतः सम्प्रधार्यत इत्युक्तम् । तदाह—यदेति । विलीनं द्रवीभावं प्राप्तं धातून् प्रविलापयेत् व्यापयेत् । लसीकां रक्तत्वचोरन्तरालस्थाम् । प्रसेकं लालाम् ।

कफात्मिकास्तु विकृतीः कर्णशष्कुलिपूर्वकान् ।
गण्डमालादिकान् वापि कुर्याज्जन्तोस्तु कर्मजान् ॥ २८
ग्रहणी नाम सा पात्री प्रसृताञ्जलिसन्निभा ।
अधस्तस्याः प्रधानाग्निः स समानेन नुद्यते ॥ २९
तस्याऽधस्तात्त्रिकोणाभं ज्योतिराधारमुत्तमम् ।
विद्यते स्थानमेतद्धि मूलाधारं विदुर्बुधाः ॥ ३०
अथाहृतं षड्रसं वाऽप्याहारं कण्ठमार्गगम् ।
श्लेष्मणाऽनुगतं तस्य प्रभावान्मधुरीभवेत् ॥ ३१
तत्र स्वाद्वम्ललवण तिक्तोषण कषायकाः ।
षड्रसाः कथिता भूतविकृत्या द्रव्यमाश्रिताः ॥ ३२
तथैवामाशयगतं पश्चात्पित्ताशयं व्रजेत् ।
तदा तस्याऽनुगमनात् कटुकत्वं प्रपद्यते ॥ ३३
तत्रान्त्रान्तरसंश्लिष्टं पच्यते पित्तवारिणा ।
पच्यमानाद्रसं भिन्नं वायू रक्तादिकं नयेत् ॥ ३४
तत्र किट्टमसृग्भिन्नं ग्रहण्यां चिनुतेऽनिलः ।
तच्चीयमानं विणाम ग्रहणीं पूरयेन्मुहुः ॥ ३५
सा तया शकृता पूर्णा वलिता प्रतिमुञ्चति ।
पुरीषं पायुमार्गेण तत्पाकेऽच्छाम्भसस्ततः ॥ ३६
अङ्गस्वेदवदभ्यन्तर्व्याप्तैः सूक्ष्मैः शिरामुखैः ।
वस्तिमापूरयेद्वायुः पूर्णो मुञ्चति धारया ॥ ३७

॥ २५॥२६॥२७॥२८ ॥

तस्यां ग्रहण्यां शकृतीत्युक्तम् । का सेति । तत्राह—ग्रहणीति । प्रधानाग्निः जाठराग्निः ।

तत्कारणमाह—तस्याऽधस्तादिति ॥ २९ ॥ ३० ॥

दोषत्रयं क्रमेण युक्त्या साधयति—अथाहृतमिति । अबाधिक्ये माधुर्यं वायुधिक्ये अम्लः भूवायुधिक्ये लवणः । वायुग्न्याधिक्ये तिक्तः । अग्न्याधिक्ये उष्णः । वायुखाधिक्ये कषायः । 'क्ष्माम्भोऽग्नि क्ष्माम्बुतेजः खवायुग्न्यनिलगोऽनिलैः' इत्युक्तक्रमेण वा रसनिष्पत्तिः ॥ ३१॥३२॥३३॥३४॥३५॥३६॥३७॥३८॥३९ ॥

मूत्राशया धनुर्वक्रो वस्तिरित्यभिधीयते ।
मूत्रमित्याहुरुदकं वस्तेर्मेहननिर्गतम् ॥ ३८
अपथ्यभाजामनयोर्मार्गयोर्दोषदुष्टयोः ।
प्रमेहमूत्रकृच्छ्रादेर्ग्रहण्यादेश्च सम्भवः ॥ ३९
इत्थम्भूतः स जन्तुस्तु जरायुच्छन्नगात्रवान् ।
अपत्यवर्त्म संगम्य सज्यते वायुना मुहुः ॥ ४०
अथ पापकृतां शरीरभाजामुदरान्निष्क्रमितुं महान् प्रयासः ।
नलिनोद्भव हे विचित्रवृत्ता नितरां कर्मगतिस्तु मानुषाणाम् ॥ ४१
जायतेऽधिकसंविग्नो जृम्भतेऽङ्गैः प्रकम्पितैः ।
जूर्त्योल्बणं निःश्वसिति भीत्या च परिरोदिति ॥ ४२
मूलाधारात् प्रथममुदितो यस्तु भावः पराख्यः
पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः ।
वक्त्रे वैखर्यथ रुरुदिषोरस्य जन्तोः सुषुम्ना-
वङ्गस्तस्माद्भवति पवनप्रेरितो वर्णसङ्घः ॥ ४३

जूर्तिः ज्वरः ॥ ४०॥४१॥४२ ॥

यदर्थो महान् प्रयासः तद्दर्शयति – मूलाधारादिति । मूलं जगन्मूलभूता परिणामिनी मायाशक्तिः । तस्या आधारभूतश्चिदात्मा मूलाधारः । सर्वगस्यापि तस्याऽभिव्यक्तिस्थानत्वात् गुदमेढमध्योऽपि मूलाधारः । तस्मात् प्रथममुदितः चैतन्याभासः भावश्च यः जगज्जावयतीति मायाशक्तिर्भावः स पराख्यः । चैतन्याभासविशिष्टतया प्रकाशिका माया निष्यन्दा परा वागित्यर्थः । सस्यन्दावस्थाः पश्यन्त्याद्याः । तत्र सामान्यस्यन्दप्रकाशरूपिणीं नादतत्त्वात्मिकाम् अध्यात्ममूलाधारादिनाभ्यन्तम् अभिव्यज्यमानां पश्यन्तीमाह—पश्चात् पश्यन्तीति । सामान्यज्ञानात्मकत्वात् पश्यन्ती सा । अथ बाह्यान्तःकरणाद्यात्मिकां हिरण्यगर्भरूपिणीं बिन्दुतत्त्वमयीं नाभ्यादिहृदयान्ताभिव्यक्तिस्थानां विशेषस्यन्दसङ्कल्पादिसतत्त्वात् मध्यमां वाचमाह --अथ हृदयग इति । मध्ये मा बुद्धिर्यस्याः सा मध्यमा । भाव एव विशेषः । अथ विराड्रूपिणीं बीजात्मिकां हृदयादास्यान्तम् अभिव्यज्यमानां शब्दसामान्यात्मिकां वैखरीमाह वक्त्र इति । विशेषेण खरत्वाद्वैखरी ।

सामान्यशब्दात् विशेषशब्दनिष्पत्तिमाह—तस्मादिति । तस्मात् वैखर्यात्मकात्

स्रोतोमार्गस्याऽविभक्तत्वहेतोस्तत्राऽर्णानां जायते न प्रकाशः ।
तावत् यावत् कण्ठमूर्धादिभेदो वर्णव्यक्तिः स्थानसंस्था यतोऽतः ॥ ४४

ज्ञाताऽस्मीति यदा भावो मनोऽहङ्कारबुद्धिमान् ।
जातश्चित्पूर्वको जन्तोः स भावः क्रमवर्धितः ॥ ४५

बध्नाति मातापित्रोस्तु ततो बन्धुषु च क्रमात् ।
स पीत्वा बहुशः स्तन्यं मातरं स्तन्यदायिनीम् ॥ ४६

इच्छन् रोदिति तां वीक्ष्य तत्र स्यादितरेतरम् ।
बन्धस्तदाऽधिकर्त्तारमतिस्निग्धमनन्यगम् ॥ ४७

पितरं वीक्ष्य तत्रापि तथा भ्रातरमेव च ।
पितृव्यमातुलादींश्च समुद्वीक्ष्य प्रमोदते ॥ ४८

एवं संबद्धसंसारबान्धवो विस्मरिष्यति ।
पूर्वकर्म च गर्भस्थमुद्भूतिक्लेशमेव च ॥ ४९

अथ स्वमुत्तारयितुमाह्वयेज्जननीं मुहुः ।
अवैशद्यान्मुखस्रोतोमार्गस्याऽविशदाक्षरम् ॥ ५०

भावादित्यर्थः । पवनशब्देन प्रेरकवर्गः सर्वोऽप्युक्तः ।

अथवा सूक्ष्मा परा पश्यन्ती मध्यमा वैखरीति पञ्चपदीं वाचमाश्रित्याह—मूलाधारादिति । सप्तपद्यपि वागनेनैव सूचिता । शून्य संवित् सूक्ष्मादीनि सप्तपदानि । तत्राऽनुत्पन्ना निष्पन्दा शून्या । वागुत्पित्सुः संवित् । उत्पत्त्यवस्था सूक्ष्मा । मूलाधारात् प्रथममुदिता परेति विभागः ॥ ४३ ॥

जातेन शिशुना रोदनव्याजेन एवं किमप्युच्यते चेत् कथं वर्णानभिव्यक्तिरिति तत्राह—स्रोत इति । अक्षराभिव्यक्तिस्थानस्येत्यर्थः ॥ ४४ ॥

गर्भे विवेकवतोऽप्यस्य मायाप्रभाववशात् अविवेकपूर्वकं संसारक्रममाह—ज्ञाताऽस्मीति यदाऽस्य भावो भवति तदाऽहङ्कारादौ आत्मबुद्धिः दृढ़तरा जातेत्यर्थः । अहंभावबद्धस्य ममभावप्रकारमाह—चित्पूर्वक इत्यादिना । चिच्छब्देन उक्ता मनआदयः कथ्यन्ते । अहङ्कारपूर्वको भाव इत्यर्थः ।

पितरं वीक्ष्य तत्रापि ममत्वबन्ध इत्यर्थः मायाभावस्य विक्षेपशक्तिविलसितमभिधाय आच्छादनशक्तेरप्याह—एवमिति ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

विविधं सरणं विसरणं विविधपद्मादिरूपेणाऽवस्थानमित्यर्थः । सुषुम्ना-

अप्यव्यक्तं प्रलपति यदा कुण्डलिनी तदा ।
मूलाधारे विसरति सुषुम्नावेष्टनी मुहुः ॥ ५१
त्रिचतुःपञ्चषट्सप्त चाऽष्टशो दशशोऽपि च ।
अथ द्वादशपञ्चाशद्भेदेन गुणयेत् क्रमात् ॥ ५२
यदा त्रिशोऽथ गुणयेत्तदा त्रिगुणिता विभुः ।
शक्तिः कामाग्निनादात्मा गूढमूर्त्तिः प्रतीयते ॥ ५३
तदा तां तारमित्याहुरोमात्मेति बहुश्रुताः ।
तामेव शक्तिं ब्रुवते हरेमात्मेति चापरे ॥ ५४
त्रिगुणा सा त्रिदोषा सा त्रिवर्णा सा त्रयी च सा ।
त्रिलोका सा त्रिमूर्त्तिः सा त्रिरेखा सा विशिष्यते ॥ ५५
एतेषां तारणात्तारः शक्तिस्तद्वृतिशक्तितः ।
यदा चतुर्धा गुणिता सूक्ष्मादिस्थानवाचिकी ॥ ५६
वाचिका जाग्रदादीनां करणानाञ्च सा तदा ।
सा यदा पञ्चगुणिता पञ्चपञ्चविभेदिनी ॥ ५७

वेष्टनीति । सुषुम्नायामात्मानं विविधपद्मादिरूपेण वेष्टयति गुणयति स्थापयतीत्यर्थः । ॥ ५० ॥ ५१ ॥

मुहुः वेष्टनमेव दर्शयति—त्रिचतुरिति ॥ ५२ ॥

एवमात्मानं गुणयन्ती कुण्डलिन्येव यन्त्र मन्त्र देवतादि सकलजगन्मयीत्याह—यदेत्यादिना । त्रिगुणिता त्रिगुणितयन्त्र स्वरूपिणीत्यर्थः । त्रिकोणसम्बन्धान् त्रिबीजात्मकान् मन्त्रानस्या विभूतित्वेन कथयति—शक्तिरिति । गूढमूर्तिः शक्तिस्तदा प्रतीयत इत्यन्वयः । गूढमूर्तिः गुप्तमूर्तिः । मूर्तिं विशिनष्टि—कामाग्निनादात्मेति । कामः कामराजबीजं मध्यमबीजानीत्यर्थः । अग्निर्वाग्भवः प्रथमबीजानीत्यर्थः । नादः नादप्रधानानि तृतीयबीजानीत्यर्थः । कामाग्निनादात्मेति मूर्तिमन्त्रोद्धारो वा दर्शितः । कामः ईकारः । अग्नी रेफः । नादो हकारः । आत्मा बिन्दुः । हं हरिहर इत्येवं तत्सिद्धं भवति । ओमात्मेति । अकारोकारमकारात्मेत्यर्थः । हरेमात्मेति । हकाररेफेमात्मेत्यर्थः ॥ ५३॥५४ ॥

विभूत्यन्तराण्युक्तविद्यार्थरूपाण्याह—त्रिगुणा सेति । त्रिरेखास्त्रिकोणरेखाः । सूक्ष्मादीति । परादीत्यर्थः । पञ्चपञ्चेति पञ्चविंशतितत्त्वादिकम् उक्तम् ।

पञ्चानामक्षराणाञ्च वर्णानां मरुतां तथा ।
गुणिता सा यदा षोढ़ा कोशोर्मिरसभेदिनी ॥ ५८
तदा षड्गुणिताख्यस्य यन्त्रस्य च विभेदिनी ।
यदा सा सप्तगुणिता तारहृल्लेखयोस्तदा ॥ ५९
भेदैरहाद्यैः शान्तान्तैर्भिद्यते सप्तभिः पृथक् ।
अकारश्चाऽप्युकारश्च मकारो बिन्दुरेव च ॥ ६०
नादश्च शक्तिः शान्तश्च तारभेदाः समीरिताः ।
हकारो रेफमाये च बिन्दुनादौ तथैव च ॥ ६१
शक्तिशान्तौ च सम्प्रोक्ताः शक्तेर्भेदाश्च सप्तधा ।
अङ्गेभ्योऽस्याश्च सप्तभ्यः सप्तधा भिद्यते जगत् ॥ ६२
लोकाद्रिद्वीपपातालसिन्धुग्रहमुनिस्वरैः ।
धात्वादिभिस्तथाऽन्यैश्च सप्तसंख्याप्रभेदकैः ॥ ६३
यदाऽष्टधा सा गुणिता तदा प्रकृतिभेदिनी ।
अष्टाक्षरा हि वस्वाशामातृमूर्तिविभेदिनी ॥ ६४
दशधा गुणिता नाड़ीसर्माशादिविभेदिनी ।
द्वादशात्मिक्यपि यदा तदा राश्यर्कमूर्तियुक् ॥ ६५

वर्णानां पोतादिभूतवर्णानामित्यर्थः । मरुतां प्राणादीनाम् ॥ ५५॥५६॥५७॥५८ ॥

लोका भूस्यादयः । मेरु निषध हेमकूट हिमवन्नील श्वेत शृङ्गिणः पर्वताः । जम्बू प्लक्ष शाल्मली कुश क्रौञ्च शाक पुष्करा द्वीपाः । अतल वितल सुतल गभस्तिमन्महातल नितल पातालाः सप्त । क्षारेक्षु सुरा घृत दधि क्षीर शुद्धोदाः सिन्धवः । ग्रहाः सूर्यादयः । भरद्वाज काश्यप गौतमात्रि विश्वामित्र जमदग्नि वसिष्ठा मुनयः । षड्जर्षभ गान्धार धैवत मध्यम पञ्चम निषधाः स्वराः । धातवः त्वगादयः । आवहादिकमादिशब्दार्थः । अत्र सप्तात्मकात् तारादेः सप्तविधजगदुत्पत्तिकथनं सर्वत्र तत्तद्गुणितसंख्यात्मनः तत्तदात्मकजगदुत्पत्तेरुपलक्षणम् ॥५८॥६०॥ ६१॥६२॥६३॥

प्रकृतयोऽष्टप्रकृतयः । अनन्त वासुकि तक्षक कर्कोटक पद्म महापद्म शङ्खपाल गुलिका अहयः । धरध्रुवसोमापाग्निवायुप्रत्युषप्रभासा वसवः । मातरो ब्राह्माख्यादयः । शर्व भव रुद्रोग्र भीमेशान महादेव पशुपतयो मूर्तयः ॥ ६४ ॥

नाड्यः सुषुम्नाद्याः । हृद् गुह्य तालु वदनोदर नेत्र कण्ठभ्रूमध्य शङ्ख गुदा

मन्त्रश्च द्वादशार्णाख्यमभिधत्ते स्वरानपि ।
तत्संख्यश्च तथा यन्त्रं शक्तेस्तद्गुणितात्मकम् ।
पञ्चाशद्वा प्रगुणिता पञ्चाशद्वर्णभेदिनी ॥ ६६

पञ्चाशदंशगुणिताऽथ यदा भवेत् सा
देवी तदात्मविनिवेशितदिव्यभावा ।
सोषुम्नवर्त्मसुषिरोदरनादसङ्गात्
पञ्चाशदीरयति पंक्तिश एव वर्णान् ॥ ६७

इति श्रीप्रपञ्चसारे द्वितीयः पटलः ।

मर्माणि । आदिशब्देन वाय्वग्निदशकादिकं ग्राह्यम् ।

अर्का धात्रादयः । मूर्तयः केशवाद्याः । स्वरा अपिनपुंसकाः ॥ ६५॥६६ ॥

* त्रिगुणादिषु अयमाशयः— मूलाधार स्वाधिष्ठान मणिपुरकानाहत विशुद्धि-लम्बिकाज्ञा कला ब्रह्मरन्ध्रेषु त्रिचतुष्पञ्च षट्सप्ताष्ट दश द्वादश पञ्चाशद्दलानि पद्मानि सञ्चिन्त्य तेषु इ न्म ऐ ख भ ऋ य र ह्म ल इत्यन्तान् सर्वांश्च वर्णान् स्मृत्वा कर्णिकासु अकारोकार मकार बिन्दु नाद शक्ति शान्त शान्त्यतीत निर्विकल्पान् इष्टदेवताकारान् स्मृत्वा । दलेषु तत्परिवारत्वेनोक्तां विभूतिं स्मृत्वा । अमृतमयैरुपहारैः संपूज्य संहृत्य अमृतमास्रावयेदिति ॥ * ॥

एवं शिशुवाक्यगताक्षरानुसारेण कुण्डल्यवस्थानविशेषमभिधाय नित्यसिद्ध-मातृकाक्षररूपेणापि वदन् उपसंहरति—पञ्चाशदंशेति ।

कथं देवीत्वमिति तदाह—आत्मेति । प्राप्तचिदानन्दरूपपुरुषभावेत्यर्थः । नादसङ्गः पश्यन्ती मध्यमात्मभावः ॥ ६७ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
द्वितीयः पटलः ।

तृतीयः पटलः ।

अथोभयात्मका वर्णाः स्युरग्नीषोमभेदतः ।
त एव स्युस्त्रिधा भूयः सोमेनाग्निविभागतः ॥ १
स्वराख्याः षोड़श प्रोक्ताः स्पर्शाख्याः पञ्चविंशतिः ।
व्यापकाश्च दशैते स्युः सोमेनाग्न्यात्मकाः क्रमात् ॥ २
एषु स्वरा ऋस्वदीर्घभेदेन द्विविधा मताः ।
पूर्वौ ऋस्वः परो दीर्घौ बिन्दुसर्गान्तिकौ च तौ ॥ ३

एवं वर्णनिष्पत्तिप्रकारमभिधाय तद्विभूतिकथनाय तृतीयपटलारम्भः ।

अथेति । अथशब्दो हेत्वर्थः । यस्मात् प्राप्तचिदग्नीन्दुभावात् शक्त्यमृतदीधितेः जाता वर्णाः तस्मादित्यर्थः । सर्ववर्णेषु अकारांशोऽग्न्यात्मकः पुरुषांशः । इतरः प्रकृत्यात्मकः सोमांशः । प्रकाशप्रकाश्यांशाभ्यां वाऽग्नीषोमात्मकत्वं स्वरव्यञ्जनभेदेन वा समविभागतो वा । अनेन च प्रपञ्चयागादिषु अग्नीषोममन्त्रौ सूचितौ । सतारशक्त्यादिपूर्वकम् आदिठान्तमुक्त्वा सोममण्डलाय नमः स्वः स्वाहा इति वा सोममन्त्रः । इतरोऽवशिष्टः ।

पुनरप्यक्षराणां व्याप्त्यन्तरमाह त एवेति । मिश्रं रूपमिनात्मकमिति द्रष्टव्यम् । अग्नीषोमात्मकत्वं पूर्ववदेव स्वरस्पर्शव्यापकभेदेन वा सोमेनाग्न्यात्मकत्वम् । अनेन च प्रपञ्चयागादिषु मण्डलत्रयमन्त्राः सूचिताः ।

स्वरानुक्त्वा सोममण्डलाय नमः स्वाहेति वा सोममण्डलमन्त्रः । इतरत् द्वयमूह्यम् ॥ १ ॥

अष्टत्रिंशत्कलान्यासे तत्प्राणप्रतिष्ठामन्त्रांशप्रदर्शनार्थं तद्व्यापकमन्त्रांशोद्धारार्थं चाह—स्वराख्याः षोड़शेति ।

अं सोममण्डलाय षोड़शकामकलात्मने साममयमण्डलात्मने अन्तरात्मने परमात्मने नमः । उं सूर्यमण्डलाय द्वादशार्ककलात्मने यजुर्मयेत्यादि समानम् । मं वह्निमण्डलाय दशधर्मकलात्मने ऋङ्मयेत्यादि समानम् । इत्येते मण्डलमन्त्राः ।

असूचितमंशान्तरम् उत्तरत्र किञ्चित् सूचयिष्यति ॥ २ ॥

स्वराणामेव पृथग्व्याप्तिं दर्शयन् तेषाम् अष्टमूर्तितच्छक्त्यादिवाचकत्वाय द्विप्रकारत्वमाह—एष्विति ॥ ३ ॥

आद्यन्तस्वरषट्कस्य मध्यमं यच्चतुष्टयम् ।
वर्णानामागमधनैस्तन्नपुंसकमीरितम् ॥ ४
तच्चतुष्कं सुषुम्नास्थे कुर्यात् प्राणेऽयनस्थितिम् ।
दक्षोत्तरस्थे प्राणाख्ये स्यातां दक्षोत्तरायणे ॥ ५
दक्षसव्यस्थिते ह्रस्वदीर्घाः पञ्चोदयन्ति च ।
भूतभूतकलाभिस्तदुदयः प्रागुदीरितः ॥ ६

स्वराणां स्त्रीपुंनपुंसकात्मकत्वमाह—आद्यन्तेति । अवशिष्टह्रस्वपञ्चकस्य पुरुषत्वं दीर्घपञ्चकस्य स्त्रीत्वं चाऽवगन्तव्यम् । बिन्दुविसर्गौ च स्त्रीपुरुषाद्यनुगतौ ।

आगमधनैरित्ययमर्थः—अनुत्तराकार पुरुषस्य आनन्दाकारशक्तीच्छेकारेशनेकारोन्मेषोकारानन्तरभूनतोकारावस्थायां पृथिव्यादिविलयादवशिष्टानि तत्त्वावस्थारूपाणि अचराख्यकिञ्चित्कराणीति नपुंसकशब्देनागमेषु उच्यन्त इति ॥ ४ ॥

स्त्रीपुरुषभागयोर्मध्यस्थत्वं नपुंसकत्वे हेत्वन्तरत्वं वदन् तेषां विनियोगमाह—तच्चतुष्कमिति । सुषुम्नास्थे सति प्राणे अयनसंक्रान्तिरूपां स्थितिं कुर्यादित्यर्थः । तदानीं तेषामुदयस्तत्प्रधानानां च मन्त्राणां तत्रापि ह्रस्वद्वयस्य दक्षिणसंक्रमणे । दीर्घयोरितरसंक्रमण इत्यवगन्तव्यम् ।

अनयनेऽपि अयनकार्यसिद्ध्यर्थम् आध्यात्मिकमयनमाह—दक्षोत्तरस्थ इति । बाह्यघटिकापञ्चकेन आध्यात्मिकमयनम् उक्तविधविलम्बस्यापि अनुपपत्तौ श्वासोच्छ्वासयोरेव कालावयवसम्पादनं द्रष्टव्यम् । तत्र श्वासोच्छ्वासात्मकानि अहोरात्रपक्षमासायनानि द्रष्टव्यानि । अहोरात्रात्मकौ वा श्वासोच्छ्वासौ । पक्षात्मकौ वा अयनात्मकौ वा इच्छावशेन ज्ञातव्यौ ॥ ५ ॥

ह्रस्वदीर्घाणां तत्प्रधानानाम् अग्नीषोमस्त्रीपुरुषाद्यात्मकानां च मन्त्राणाम् अयनयोरुदयं वदन् तेषां वीर्योद्भवकालं सूचयति—दक्षसव्यस्थित इति । चशब्दः तत्प्रधान मन्त्रग्रहनक्षत्राद्युदयसमुच्चयार्थः । तत्र क्षहरादिप्रधाना आग्नेयमन्त्राः । वौषडादिप्रधानाः सौम्याः । हुंफड्न्ताः पुरुषाः । स्वाहान्ताः स्त्रियः । नमोऽन्ता नपुंसकाः । ते च वश्य शान्ति क्रूरकर्मसु प्रायेण प्रशस्ताः । भूतभूतकलाभिः सहोदयन्तीति सम्बन्धः । भूतकला निवृत्त्याद्याः । तत्र राशिषु एकैकघटिकायां वायुग्निभूजलाकाशभूतानामुदयः ।

केन प्रकारेणोदय इति पुटयोरुभयोरित्यादिनोक्तः । स इत्याह—तदुदय इति ॥ ६ ॥

बिन्दुसर्गौ च यौ प्रोक्तौ तौ सूर्यशशिनौ क्रमात् ।
तयोर्विकारविस्तारः पुरस्तात् संप्रवक्ष्यते ॥ ७
स्पर्शाख्या अपि ये वर्णाः पञ्चपञ्चविभेदतः ।
भवन्ति पञ्चवर्गास्तदन्त्यश्चात्मा रविः स्मृतः ॥ ८
चतुर्विंशतितत्त्वाख्यास्तस्माद्वर्णाः परे क्रमात् ।
तेन स्पर्शाक्षराः सौराः प्राणाग्नीलाम्बुखात्मकाः ॥ ९
व्यापकाश्च द्विवर्गाः स्युस्तथा पञ्चविभेदतः ।
शशीनाग्न्युत्थिता यस्मात् स्वरस्पृग्व्यापकाक्षराः ॥ १०
तत्त्विभेदसमुद्भूता अष्टात्रिंशत्कला मताः ।
स्वरैः सौम्याः स्पर्शयुग्मैः सौरा याद्याश्च वह्निजाः ॥ ११

स्वराणां सौम्यत्वे हेतुं वदन् बिन्दुसर्गयोस्तत्त्वं कालनिवर्तकत्वेन इतरस्वरवत् कालसम्बन्धं चाह—बिन्दुसर्गाविति । अनेन इतरस्वराणां कालरूपतिथ्यात्मकत्वं कार्यानुसारेण विसर्गादियोगश्च सूचितः ।

पुरस्तादिति । सः सर्गश्लेषित इत्यादिनेत्यर्थः । अथवाऽजपापटलेऽन्येषु वा बिन्दुविसर्गान्वितेषु मन्त्रेष्वित्यर्थः ॥ ७ ॥

एवं स्वराणां व्याप्तिं सौम्यत्वं चाभिधाय स्पर्शानां सौरत्वं व्याप्तिं च वदंस्तेषां भूतेन्द्रियमात्रादिसम्बन्धयोग्यत्वाय पाञ्चविध्यमप्याह—स्पर्शाख्या इति । अन्त्यो मकारः पुरुषः । सूर्यः जीवः । भाद्यः प्रकृतिबुद्ध्यहंकारमनांसि । तन्मात्र-श्रोत्रवागाकाशादय इतरा वर्णा इति क्रमेण चतुर्विंशतितत्त्वयोगः । स्पर्शानामन्त्य आत्मा रविः स्वावयवेषु अनुगतो यस्मात् तेन स्पर्शाक्षराः सौरा इत्यर्थः । प्राणाग्नी-लाम्बुखात्मका इति न चतुर्विंशतितत्त्वसम्बन्धक्रमः । किन्तु स्पर्शानामाध्यात्मं स्वरवत् भूतैः सह उदयक्रम उक्त इत्यवगन्तव्यम् ॥ ८ ॥ ९ ॥

व्यापकानामप्युदयक्रमं वदन् पञ्चशो वर्गद्वयत्वमाह—व्यापका इति । तथेति प्राणाग्न्यादिक्रमः सूचितः । आग्नेयत्वं तु व्यापकानां नृसिंहाख्यकालाग्निरूप-त्वकारान्तत्वेन वक्ष्यति भुवनं कषत इति । अत्र पञ्चाशद्वर्णेभ्यः कथमष्टत्रिंशत्कलो-त्पत्तिरित्याशङ्क्य शश्यादिकलारूपतिथिमासभ्राजकादिसंबन्धेन वर्णानामष्ट-त्रिंशत्संख्यत्वादिति वदन् न्यासे मण्डलमन्त्रैः व्यापकं कलानां वर्णयोगं च सूचयति—शशीति ॥ १० ॥

सम्बन्धविशेषमाह—स्वरैरित्यादिना ॥ ११ ॥

षोड़श द्वादश दश संख्याः स्युः क्रमशः कलाः ।
वर्णेभ्य एव तारस्य पञ्चभेदैस्तु भूतगैः ॥ १२
सर्वगाश्च समुत्पन्नाः पञ्चाशत्संख्यकाः कलाः ।
तेभ्य एव तु तावत्यः शक्तिभिर्विष्णुमूर्तयः ॥ १३
तावत्यो मातृभिः सार्द्धं तेभ्यः स्यू रुद्रमूर्तयः ।
तेभ्य एव तु पञ्चाशत् स्युरोषधय ईरिताः ॥ १४
याभिस्तु मन्त्रिणः सिद्धिं प्राप्नुयुर्वाञ्छितार्थदाम् ।
अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः ॥ १५
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ।
पूर्णा पूर्णामृता कामदायिन्यः स्वरजाः कलाः ॥ १६
तप[पि]नी ताप[पि]नी धूम्रा मरीचिर्ज्वालिनी रुचिः ।
सुषुम्ना भोगदा विश्वा बोध[धि]नी धार[रि]णी क्षमा ॥ १७
कभाद्या वसुदाः सौराष्ठडान्ता द्वादशेरिताः ।
धूम्रार्चिरुष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी ॥ १८
सुश्रीः सुरूपा कपिला हव्यकव्यवहे अपि ।
याद्यार्णयुक्ता वह्न्यत्या दश धर्मप्रदाः कलाः ॥ १९
सृष्टिर्दृष्टिः स्मृतिर्मेधा कान्तिर्लक्ष्मीर्धृतिः स्थिरा ।
स्थितिः सिद्धिरकारोत्थाः कला दश समीरिताः ॥ २०
अकारप्रभवा ब्रह्मजाताः स्युः सृष्टये कलाः ।
जरा च पालिनी शान्तिरैश्वरी रतिकामिके ॥ २१
वरदा ह्लादिनी प्रीतिर्दीर्घाश्चोकारजाः कलाः ।
उकारप्रभवा विष्णुजाताः स्युः स्थितये कलाः ॥ २२

पञ्चाशत्कलान्यासे वर्णप्रणवांशभूततत्सम्बन्धिसर्वयोगं च सूचयति—वर्णेभ्य इति । कामदायिन्य इति मण्डलमन्त्रांशः सूचितः । उत्तरयोः वसुदा धर्मदा इति पदाभ्यासः सूचितः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

अकारोत्था इत्यकारयोगः तत्कलान्यासे । ब्रह्मजाता इत्यादिनापि तत्तद्योगः ।

तीक्ष्णा रौद्री भया निद्रा तन्द्रा क्षुत् क्रोधिनी क्रिया ।
उत्कारी चैव मृत्युश्च मकाराच्चरजाः कलाः ॥ २३

मकारप्रभवा रुद्रजाताः संहृतये कलाः ।
विन्दोरपि चतस्रः स्युः पीता श्वेताऽरुणाऽसिता ॥ २४

निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ।
इन्धिका दीपिका चैव रेचिका मोचिका परा ॥ २५

सूक्ष्मा सूक्ष्मामृता ज्ञानामृता चाप्यायिनी तथा ।
व्यापिनी व्योमरूपा स्यात् अनन्ता नादसम्भवा ॥ २६

नादजाः षोड़श प्रोक्ता भुक्तिमुक्तिप्रदायिकाः ।
केशव नारायण माधव गोविन्द विष्णवः ॥ २७

मधुसूदनसंज्ञश्च सप्तमः स्यात्त्रिविक्रमः ।
वामनः श्रीधराख्यश्च हृषीकेशस्त्वनन्तरः ॥ २८

पद्मनाभस्तथा दामोदराह्वो वासुदेवयुक् ।
सङ्कर्षणश्च प्रद्युम्नः सानिरुद्धः स्वरोद्भवाः ॥ २९

ततश्चक्री गदी शार्ङ्गी खड्गी शङ्खी हली तथा ।
मुषली शूलिसंज्ञश्च भूयः पाशी तथाऽङ्कुशी ॥ ३०

मुकुन्दो नन्दजो नन्दी नरो नरकजिद्धरिः ।
कृष्णः सत्यः सात्वतश्च शौरिः शूरो जनार्दनः ॥ ३१

भूधरो विश्वमूर्तिश्च वैकुण्ठः पुरुषोत्तमः ।
बली बलानुजो बालो वृषघ्नश्च वृषस्तथा ॥ ३२

हंसो [सिंहो] वराहो विमलो नृसिंहो मूर्तयो हलाम् ।
कीर्त्तिः कान्तिस्तुष्टिपुष्टी धृतिः क्षान्तिः क्रिया दया ॥ ३३

मेधा च हर्षा श्रद्धाह्वा लज्जा लक्ष्मीः सरस्वती ।
प्रीती रतिश्च संप्रोक्ताः क्रमेण स्वरशक्तयः ॥ ३४

बिन्दुजा ईशजाः नादजाः सदाशिवजा इति द्रष्टव्यम् । भुक्तिर्बिन्दुकलासु योज्या ॥ २०—५२ ॥

जया दुर्गा प्रभा सत्या चण्डा वाणी विलासिनी ।
विरजा विजया विश्वा विनदा सुनदा स्मृतिः ॥ ३५
ऋद्धिः समृद्धिः शुद्धिश्च भुक्तिर्मुक्तिर्मतिः क्षमा ।
रमोमा क्लेदिनी क्लिन्ना वसुदा वसुधाऽपरा ॥ ३६
परा परायणा सूक्ष्मा सन्ध्या प्रज्ञा प्रभा निशा ।
अमोघा विद्युता चेति शक्तयः सर्वकामदाः ॥ ३७
इमाः पञ्चाशदुद्दिष्टा नमोऽन्ता वर्णपूर्विकाः ।
सधातुप्राणशक्त्यात्मयुक्ता यादिषु मूर्तयः ॥ ३८
श्रीकण्ठोऽनन्तसूक्ष्मौ च त्रिमूर्तिरमरेश्वरः ।
अर्घीशो भावभूतिश्च तिथिः स्थाणुर्हराह्वयः ॥ ३९
झिण्टीशो भौतिकः सद्योजातश्चाऽनुग्रहेश्वरः ।
अक्रूरश्च महासेनः स्युरेताः स्वरमूर्तयः ॥ ४०
ततः क्रोधीश चण्डेश पञ्चान्तक शिवोत्तमाः ।
तथैकरुद्र कूर्मैकनेत्राख्यचतुराननाः ॥ ४१
अजेश शर्व सोमेश्वराह्वा लाङ्गलिदारुकौ ।
अर्द्धनारीश्वरश्चोमाकान्तश्चाषाढ़िदण्डिनौ ॥ ४२
अद्रिर्मीनश्च मेषश्च लोहितश्च शिखी तथा ।
छगलण्डद्विरण्डौ च महाकालकपालिनौ ॥ ४३
भुजङ्गेशः पिनाकी च खड्गीशश्च वकस्तथा ।
श्वेतो भृगुश्च नकुली शिवः संवर्त्तकस्ततः ॥ ४४
पूर्णोदरी च विरजा तृतीया शाल्मली तथा ।
लोलाक्षी वर्तुलाक्षी च दीर्घघोणा तथैव च ॥ ४५
सुदीर्घमुखिगोमुख्यौ नवमी दीर्घजिह्विका ।
कुण्डोदर्यूर्ध्वकेश्यौ च मुखी विकृतपूर्विका ॥ ४६
सज्वालोल्काश्रिया विद्यामुख्यः स्युः स्वरशक्तयः ।
महाकालीसरस्वत्यौ सर्वसिद्धिसमन्विते ॥ ४७

गौरी त्रैलोक्यविद्या च तथा मन्त्रात्मशक्तिकी ।
भूतमाता लम्बोदरी द्राविणी नागरी तथा ॥ ४८
वैखरी मञ्जरी चैव रूपिणी वीरिणी तथा ।
कोटरी पूतना भद्रकाली योगिन्य एव च ॥ ४९
शङ्खिनी गर्जिनी कालरात्रि कुर्दि[ञि]न्य एव च ।
कपर्दिनी महावज्रा जया च सुमुखेश्वरी ॥ ५०
रेवती माधवी चैव वारुणी वायवी तथा ।
रक्षोपधारिणी चाऽन्या तथैव सहजाह्वया ॥ ५१
लक्ष्मीश्च व्यापिनी मायेत्याख्याता वर्णशक्तयः ।
इत्युक्तास्त्रिविधो न्यासः क्रमात् सर्वसमृद्धिदः ॥ ५२
चन्दनकुचन्दनागुरुकर्पूरोशीररोगजलघुसृणाः ।
कक्कोलजातिमांसीमुराचोरग्रन्थिरोचनापत्राः ॥ ५३
पिप्पलबिल्वगुहारुणतृणकलवङ्गाह्वकुम्भिवन्दिन्यः ।
सोडुम्बरीकाश्मरिकास्थिराञ्जदरपुष्पिकामयूरशिखाः ॥ ५४
प्लक्षाग्निमन्थसिंहीकुशाह्वदर्भाश्च कृष्णाहरपुष्पी ।
रोहिणलुण्डुकबृहतीपाटलचिचातुलस्यपामार्गाः ॥ ५५
शतमूलिलताद्विरेफा विष्णुक्रान्ता मुषल्यथाञ्जलिनी ।
दूर्वा श्रीदेवीसहे तथैव लक्ष्मीसदाभद्रे ॥ ५६
आदीनामिति कथिता वर्णानां क्रमवशादथौषधयः ।
गुलिकाकषायभसितप्रभेदतो निखिलसिद्धिदायिन्यः ॥ ५७
यथा भवन्ति देहान्तरमी पञ्चाशदक्षराः ।
येन येन प्रकारेण तथा वक्ष्यामि तत्त्वतः ॥ ५८

ओषधिकथनप्रयोजनमाह—गुलिकेति । भसितादिकरणप्रकारास्तु उत्तरत्र उच्यन्ते ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥

पञ्चाशदंशगुणितेत्यत्र पञ्चाशदीरयति पंक्तिश एव वर्णान् इत्युक्तानां वर्णानां विभूतिमभिधाय तदीरणादिप्रकारं वक्तुमुपक्रमते—यथेति । स्वरूपतो यथा

समीरिताः समीरेण सुषुम्नारन्ध्रनिर्गताः ।
व्यक्तिं प्रयान्ति वदने कण्ठादिस्थानघट्टिताः ॥ ५९
उच्चैरुन्मार्गगो वायुरुदात्तं कुरुते स्वरम् ।
नीचैर्गतोऽनुदात्तश्च स्वरितं तिर्यगागतः ॥ ६०
अर्धैकद्वित्रिसंख्याभिर्मात्राभिर्लिपयः क्रमात् ।
सव्यञ्जना ह्रस्वदीर्घप्लुतसंज्ञा भवन्ति ताः ॥ ६१
अकारेकारयोर्योगादेकारो वर्ण इष्यते ।
तस्यैवैकारयोगेन स्यादैकाराक्षरं तथा ॥ ६२
उकारयोगात्तस्यैव स्यादौकाराह्वयः स्वरः ।
तस्यैवौकारयोगेन स्यादौकाराह्वयः स्वरः ॥ ६३
सन्ध्यक्षराः स्युश्चत्वारो मन्त्राः सर्वार्थसाधकाः ।
ऌवर्णर्वर्णयोर्व्यक्तिः लरोः सम्यक् प्रदृश्यते ॥ ६४

भवन्ति स्वरमात्रासन्धिस्थान प्रयत्नभूतषट्कर्मसु च येन येन प्रकारेण भवन्ति तथाच वक्ष्यामीत्यर्थः ॥ ५८ ॥

स्वरूपनिष्पत्तिप्रकारमाह—समीरिता इति ॥ ५९ ॥

वर्णानां पुरुषप्रकृत्युभयवाचकतया प्रयोगे स्वरविशेषं विवक्षन्नाह—उच्चैरिति । उन्मार्गग इत्युच्चैरित्यस्य व्याख्यानम् । तिर्यक् आगतः मध्यतः प्रसरन्नित्यर्थः ॥६०॥

पापक्षयमोक्षाप्यायनविनियोगे वर्णानां मात्राभेदं सूचयन्नाह—अर्धेति ॥ ६१ ॥

सर्वेषामेव वर्णानां प्रकृतिपुरुषवाचकत्वसिद्धये अध्यात्मकत्वम् अभिप्रेत्य केषाञ्चित्सन्धिं वदन् द्व्यात्मकतामाह—अकारेकारयोरिति ॥ ६२ ॥ ६३ ॥

तेषां प्रकृतिपुरुषवाचकमन्त्रत्वमाह—सन्ध्यक्षरा इति । प्रकृतिपुरुषात्मकोऽर्थः सर्वार्थस्तस्य साधकाः तद्वाचका इत्यर्थः । एषामृषिच्छन्दसो मातृकोक्ते । देवता परमात्मा । तत्तद्वर्णादियुतैः स्वरैरङ्गानि । मुद्राभयशुकवरदकरो द्विभुजः शुक्लरक्तभागद्वयः प्रकृतिपुरुषात्मकः कोऽपि देवो ध्येयः । ऌवर्णं ॠवर्णयोरङ्गविशेषं वदन्नितरेष्वपि तं सूचयति—ऌवर्णर्वर्णयोरिति । ऌवर्णर्वर्णयोर्मन्त्रयोः व्यक्तिः व्यज्यते अनेनेति व्यक्तिशब्देनाऽङ्गसामान्यमुच्यते । लरोः लकाररेफयोः । सम्यक् लां लीं रां रीमित्यादिप्रकारेण प्रदृश्यते । मूलागमेष्वित्यर्थः । इ उ ए ऐ ओ औ वर्णानां यकारवकारयोः बिन्दुसर्गयोगो द्रष्टव्यः ॥ ६४ ॥

बिन्दुसर्गात्मनोर्व्यक्तिममसोरजपां वदेत् ।
कण्ठात्तु निःसरन् सर्गः प्रायोऽचामेकतः परः ॥ ६५

नश्वरः सर्ग एव स्यात् सोष्मा सप्राणकस्तु हः ।
स सर्गः श्लेषितः कण्ठे वायुनाऽकादिमीरयेत् ॥ ६६

वर्गं स्पर्शनमात्रेण कं स्वरस्पर्शनात् तु खम् ।
स्तोकगम्भीरसंस्पर्शात् गघौ ङश्च बहिर्गतः ॥ ६७

विसर्गस्तालुगः सोष्मेशं चवर्गञ्च यं यथा ।
ऋटुरेफषकारांश्च मूर्धगो दन्तगस्तथा ॥ ६८

लृतवर्गलसानोष्ठादुपूपध्मानसंज्ञकान् ।
दन्तौष्ठाभ्यां वञ्च तत्तत्स्थानगोऽर्णान् समीरयेत् ॥ ६९

बिन्दुसर्गाङ्केषु हकारसकारयोगमाह—बिन्दुसर्गात्मनोरिति । बिन्दुसर्गात्मनोः अमसोरिति सम्बन्धः । हकारसकारयोः बिन्दुसर्गयोश्च क्रमेण पुरुषात्मकत्वं प्रकृत्यात्मकत्वं च सम्बन्धहेतुः । स्थानसाम्यमकारयोगश्च । अतोऽकाराङ्केष्वपि हकारयोगो द्रष्टव्यः ।

ननु सर्वसमान बिन्दुविसर्गमन्त्रयोः स्थाने कथमकारोच्चारः । ततश्च कथं तयोः हकारसकारसंयोग इति । नैष दोषः । तयोरभिव्यक्त्यर्थत्वेनाकार-सम्बन्धोपपत्तेरित्याह—कण्ठादिति । तुशब्दः शङ्काव्यावृत्त्यर्थः । प्रायः सृष्टिरूप-प्रकृतिप्रतिभटः संहारात्मकः पुरुषः प्रायः तद्वाचको बिन्दुरित्यर्थः । सर्ग-स्तत्प्रतिभटबिन्दुश्च अचामेकतः प्रधानतः अकारात् पर इत्यर्थः ॥ ६५ ॥

अतत्परत्वेऽनभिव्यक्तिदोषमाह—नश्वर इति । सर्ग एव चेत् केवलः स्यात् तर्हि नश्वरः स्यादित्यर्थः । बिन्दोरपि उपलक्षणार्थमेतत् । यद्येवं सकारहकारौ प्रकृतिपुरुषवाचकौ । कथं तर्हि हकारस्यैव पूर्वं सर्ववाचकत्वमुक्तमिति । नायं दोषः । हकारस्यापि उभयात्मकत्वादित्याह—सोष्मा सप्राणकस्तु ह इति । उष्मा बलं शक्तिः प्रकृतिः स एव प्राणः कः प्राणस्य प्राणः पुरुषः ।

एवं हकारस्य प्रकृतिपुरुषात्मकत्वमभिधाय तदेव प्रपञ्चयन् तस्य प्रकृति-प्राधान्यमाश्रित्य सर्ववर्णादिकारणत्वमाह—स सर्ग इति । अकादिं वर्गमिति छेदः । तत्रैव वर्णविशेषाभिव्यञ्जकं प्रयत्नविशेषमाह—स्पर्शनमात्रेणेति । सोष्मा साग्निः । इश्च शश्चेति छेदाः । उपसंहरति—तत्तदिति ॥ ६६॥६७॥६८॥६९ ॥

ह्रस्वाः पञ्च परे च सन्धिविकृताः पञ्चाथ विन्दुन्तिका
कादयाः प्राणहुताशभूकखमया यादयाश्च शार्णान्तिकाः ।
हान्ताः षचलसाः क्रमेण कथिता भूतात्मकास्ते पृथक्
तैस्तैः पञ्चभिरेव वर्णदशकैः स्युः स्तम्भनाद्याः क्रियाः ॥ ७०
ऊद्गदादिललाः कोर्नसौ चतुर्थार्णका वसौ वारः ।
दृष्ट्यैव द्वितीयरक्षा वह्नेरद्वन्द्वयोनिकादियषाः ॥ ७१
मरुतः कपोलबिन्दुकपञ्चमवर्णाः शहौ तथा व्योम्नः ।
मनुषु परेष्वपि मन्त्री करोतु कर्माणि तस्य संसिद्ध्यै ॥ ७२
स्तम्भनाद्यमथ पार्थिवैरपामक्षरैश्च परिवर्षणादिकम् ।
दाहशोषणसशून्यतादिकान् वह्निवायुवियदक्षरैश्चरेत् ॥ ७३
दशभिर्दशभिरमीभिर्नमोऽन्तिकैर्द्वन्द्वशश्च बिन्दुयुतैः ।
योनेर्मध्ये कोणत्रितये मध्ये च संयजेन्मन्त्री ॥ ७४

वर्णानामुक्तमेव भूतसम्बन्धं विशदयन् तान् स्तम्भनादिषु विनियुङ्क्ते—ह्रस्वा इति । अ इ उ ऋ ऌ इति ह्रस्वाः । परे च दीर्घाः । आदयः पञ्च । ए ऐ ओ औ अं एते बिन्दन्ताः सन्धिविकृताः । ष च ल स ह इत्यन्त्यो वर्गः ॥ ७० ॥ ॥ ७१ ॥ ७२ ॥ ७३ ॥

स्तम्भनादिप्रयोगप्रकारमाह—दशभिरिति । अं आं नमः । एं कं नमः । चं टं नमः । तं पं नमः । यं षं नमः । इत्यादि मन्त्रप्रयोगप्रकारः । योनिस्त्रिकोणं तस्य मध्ये प्रथमो मन्त्रः । द्वितीयतृतीयचतुर्थाः अग्रादिकोणेषु । पञ्चमो मध्य एव संयजेत् । संलिख्य सञ्चिन्त्य वा पूजयेत् । मन्त्रीति सिद्धमन्त्रस्यायं प्रयोग इति सूचितः । मध्ये पञ्चीकृतभूतबीजं लिखित्वा तद्बिन्दूर्ध्वाधोभागादिषु साधकसाध्यकर्मयोगो यन्त्रजीवादियोगश्च सूचितः । एतच्च यन्त्रं पार्थिव-मण्डलगतं स्तम्भने । परिवर्षणादिष्वपि आप्यादिमण्डलगतानि यन्त्राणि । ह्सौः इति यन्त्रजीवं मध्यबीजाधोभागे न्यसेत् । हंसः संह इति मध्यजीवबीजचतुर्दिक्षु मध्याभिमुखं यन्त्रप्राणं लिखेत् । यन्त्रराजाय विद्महे वरप्रदाय धीमहि तन्नो यन्त्रः प्रचोदयात् इति गायत्री । गुणशोऽष्टदिक्षु पद्मवत्सु यन्त्रेषु दलेषु लेख्या । तद्बहिर्दशदिक्षु लं रं लं क्षं वं शं सं हं क्लीं अं इति यन्त्रहृदयम् । ततो यथावकाशं प्राणप्रतिष्ठामन्त्रः । यन्त्रसामान्यमपि मन्त्रीत्यनेन सूचितम् ॥ ७४ ॥

पूर्वोक्ताद्बिन्दुमात्रात् स्वयमथ रवतन्मात्रतामभ्युपेता-
ऽकारादीन् द्वाष्ट कादीनपि तदनुगतान् पञ्चविंशत्तथैव ।
यादीन् संयुक्तधातूनपि गुणसहितैः पञ्चभूतैश्च ताभि-
स्तन्मात्राभिर्व्यतीत्य प्रकृतिरथ हसंज्ञा भवेद्व्याप्य विश्वम् ॥ ७५

इति श्रीप्रपञ्चसारे तृतीयः पटलः ॥

एवं पटलत्रयोक्तां सृष्टिं संक्षेपेणाऽनुवदन् संहारमाह—पूर्वोक्तादिति । स्वयमिति । निस्तरङ्गा तत्त्वसंज्ञा प्रकृतिः सा स्वयमेव बिन्दुतत्त्वद्वारा रवतन्मात्रतां शब्दब्रह्मात्मकतामभ्युपेता प्राप्ता सती अकारादीन् षोड़श स्वरान् कादीनपि पञ्चविंशत् स्वरानुगतानभ्युपेता संयुक्तधातून् यादीनपि अभ्युपेतेत्यर्थः । अर्थात्मकतामुक्तामाह—गुणसहितैरिति । तन्मात्राभिः सह यादीनभ्युपेतेति सम्बन्धः ।

संहारमाह—व्यतीत्येति । कार्यजातमुक्तम् । स्वात्मन्येव संहृत्येत्यर्थः । विश्वं सर्वं ब्रह्म तद् व्याप्य तेनाऽभिन्नतां प्राप्येत्यर्थः ॥ ७५ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
तृतीयः पटलः ।

चतुर्थः पटलः ।

अथ व्यवस्थिते त्वेवमस्य शक्तित्वमिष्यते ।
कृतकृत्यस्य जगति सततं रूढसंस्थितेः ॥ १
प्राणात्मकं हकाराख्यं बीजं तेन तदुद्भवाः ।
षड्मयः स्यू रेफोत्था गुणाश्चत्वार एव च ॥ २

एवं हकारस्य केवलस्य विश्वयोनित्वमभिधायादौ मूलार्णशब्दोक्तकूटलेखात्मतां प्राप्तस्य विश्वयोनित्वं वक्तुं चतुर्थपटलारम्भः ।

अथेति । अथशब्दो हेत्वर्थः । हेतुत्वेन विवक्षितमर्थं स्वयमेव दर्शयति—जगत्येवं व्यवस्थित इति । एवमुक्तेन प्रकारेण जगति कार्ये कारणत्वेन व्यवस्थित इत्यर्थः । तुशब्दोऽवधारणार्थः । अस्य हकारस्य शक्तित्वं शक्तिवाचकमन्त्रत्वमिष्यते । कथमेकरूपस्य हकारस्य गुणत्रयात्मकशक्तिवाचकत्वमिति । नैष दोषः । वर्णान्तरसंयोगः कृतः कर्त्तव्यो यस्य तस्यैव मन्त्रत्वेष्टेरित्याह—कृतकृत्यस्येति । कर्तव्यमेव दर्शयन् हकारं विशिनष्टि—रूढसंस्थितेरिति । रेफोढो रूढः संभूय स्थित ईं यस्मिन् हकारे स संस्थितिः रूढश्चासौ संस्थितिश्चेति विग्रहः । तस्य रूढसंस्थितेः ईकाररेफसंयुक्तस्येत्यर्थः । बिन्द्वादियोगार्थं रूढसंस्थितिं विशिनष्टि—सततमिति । ततः सहितं यथा भवति तथा रूढसंस्थितेरित्यर्थः । ततः बिन्दुः । व्याप्तत्वात्तस्य ।

अन्योऽर्थः । जातस्य शिशोः मुखान्निर्गतानां वर्णानां व्याप्त्यादिकमभिहितं तृतीये पटले । अथैवं वर्णानां तत्त्वे व्यवस्थिते अस्य वर्णोच्चारकस्य पुरुषस्य शक्तित्वं जगन्मूलकारणात्मकशक्त्यात्मकत्वमिष्यते ।

प्राकृतस्य परिच्छिन्नस्याऽस्य उक्तशक्त्यात्मकत्वम् अनुपपन्नमिति चेन्न । न्यासध्यानयोगादिभिः योग्यत्वस्य सम्पाद्यमानत्वात् सम्पादितत्वाच्च इत्याह—कृतकृत्यस्य जगतीति । जगति सर्वतत्त्वात्मके शरीरे यन्न्यासादिकं कर्तव्यं तत् कृतं यस्य साधकस्य स तथोक्तः । अतएव सततं रूढसंस्थिते रूढा प्रसिद्धा संविद्रूपप्रकृत्यात्मकत्वेन स्थितिर्यस्य स तथोक्तः ॥ १ ॥

उक्तस्याऽक्षरत्रयस्य व्याप्तिं वदन् साधकस्य प्रकृत्यात्मकत्वसिद्धये षोडशाङ्गन्यासमाह—प्राणात्मकमिति । प्राणे सत्येव मनोदेहयोः शोकजरादिधर्मवत्त्वदर्शनात् तदात्मकहकारधर्मत्वं षड्मीणामुक्तम् ॥ २ ॥

पवनाद्याः पृथिव्यन्ताः स्पर्शाद्यैश्च गुणैः सह ।
करणान्यपि चत्वारि सङ्घातश्चेतनेति च ॥ ३
ईकारस्य गुणाः प्रोक्ताः षड़िति क्रमशो बुधैः ।
ऊकारान्तास्त्वकाराद्याः षड्वर्णाः षड्भ्य एव च ॥ ४
प्रभेदेभ्यः समुत्पन्ना हकारस्य महात्मनः ।
ऋकाराद्यास्तु चत्वारो रेफोत्था लृपराः स्मृताः ॥ ५
एकारादिविसर्गान्तं वर्णानां षट्कमुद्गतम् ।
ईकारस्य षड़ङ्गेभ्य इतीदं षोड़शाङ्गवत् ॥ ६

गुणचतुष्टयमाह—पवनाद्या इति । तेषां गुणशब्दवाच्यत्वे हेतुः—स्पर्शाद्यैरिति । पारतन्त्र्याद्वा गुणशब्दः । तेषु करणानि मनआदीनि । संघातोऽवशिष्टकार्यकारणसंघातः । चेतना चैतन्याभ्यासः । चेतनालक्षणा बुद्धिवृत्तिर्वा ।

अयमत्र न्यासक्रमः । प्राणात्मकं प्राणशरीरं हकाराख्यं बीजं बिन्दुसहितम् । हं प्राणात्मने नम इति प्राणबुद्ध्या व्यापयेदित्यर्थः । तेन प्राणात्मकेन हकारेण सह तदुद्भवाः षडूर्मयः स्वाधारेषु न्यस्तव्याः । हं बुभुक्षायै नमः । हं पिपासायै नमः । हं शोकाय नमः । हं मोहाय नमः । हं जरायै नमः । हं मृत्यवे नमः । इति प्राणबुद्धिदेहेषु यथायोग्यं न्यसेदित्यर्थः । रेफोत्था गुणा इति चशब्दादाकाशशब्दौ गृह्येते । रं आकाशशब्दाभ्यां नम इति मूर्ध्नि न्यस्य । रं वायुस्पर्शाभ्यां नमः । रं तेजोरूपाभ्यां नमः । रं अब्रसाभ्यां नमः । रं पृथिवीगन्धाभ्यां नमः । इति वक्त्रहृद्गुह्यपादेषु न्यसेदित्यर्थः । करणान्यपीति । ईं ज्ञानशक्तये नम इति व्यापकं न्यस्य ईं मनसे नमः । ईं बुद्धै नमः । ईं अहङ्काराय नमः । ईं चित्ताय नमः । ईं संघाताय नमः । ईं चेतनायै नमः । इति मनआदिषु न्यसेदित्यर्थः । बुधैरिति प्रणवशक्तिभ्यां व्यापकं सूचितम् ।

अस्यैव न्यासस्य षोड़शस्वरयोगमाह—ऊकारान्ता इति । तुशब्दस्तत्तदक्षरयुक्तस्वरयोगं सूचयति । हं बुभुक्षायै नमः । हां पिपासायै नमः इत्यादि । ऋं वायुस्पर्शाभ्यां नमः । यें मनसे । यैं बुद्धये नम इत्यादयो मन्त्राः ।

हकारस्य महात्मन इति । तत्तद्वर्गन्यासानन्तरं तैस्तैर्वर्गैः सहितेन तेन तेन वर्णेन व्यापकं सूचितम् । हं हां हिं हीं हुं हूं हकारात्मने नम इत्यादयो व्यापकमन्त्रा इति । इदं षोड़शाङ्गवदिति । तत्तद्बीजयुतषोड़शस्वरानुक्रमाऽन्ते

एभ्यः संजज्ञिरेऽङ्गेभ्यः स्वराः षोड़श सर्वगाः ।
तेभ्यो वर्णान्तराः सर्वे ततो मूलमिदं विदुः ॥ ७

ह्रीं इत्युच्चार्य व्यापकं सूचितमिति । एतैरुक्तैः स्वरैरिदं बीजं साधकशरीरं च षोड़शाङ्गवदित्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

पुनरप्यस्यैव न्यासस्य विशेषमाह—एभ्य इति । एभ्य उक्तेभ्यो हकारादिविशिष्टेभ्यः स्वरेभ्यो बुभुक्षादिभ्यश्चाङ्गेभ्यः । सर्वगाः सर्ववर्णानुगताः स्वराः अकखादिक्षान्ताक्षरसंयुक्ताः स्वराः संजज्ञिर इत्यर्थः ।

अयमत्र प्रयोगक्रमः । हं अं बुभुक्षायै नमः । हां आं पिपासायै नमः । हिं इं शोकाय नमः । इत्यादि स्थानं व्यापकादिकं पूर्ववदेव । अथवा पूर्वोक्तस्वरपारायण न्यासवदेव न्यासः कार्य इति । षट्त्रिंशन्न्यासभेदा गताः ।

पुनरप्यस्यैव न्यासस्य भेदं सूचयति—तेभ्यो वर्णान्तराः सर्व इति । तेभ्यः हकारादिविशिष्टाकखगघादिसंयुक्तषोड़शस्वरेभ्यो बुभुक्षादिभ्यश्च वर्णान्तरा अकखादिषट्त्रिंशद्वर्णाः संजज्ञिर इत्यर्थः ।

अयमत्र प्रयोगक्रमः । हं अं बुभुक्षायै नमः । हं अं कं बुभुक्षायै नमः । हं कं खं बुभुक्षायै नमः । इत्यादि क्षान्तं समानम् । हं आं अं बुभुक्षायै नमः । हं आं कं बुभुक्षायै नमः । इत्यादि क्षान्तमेवमेव । हं अः अं बुभुक्षायै नमः । हं अः कं बुभुक्षायै नमः । हं अः खं बुभुक्षायै नमः । इत्यन्तं द्रष्टव्यम् । अकारपद्मदलेषु वृत्ताकारेणैषां न्यासः । पुनः हं कं अं बुभुक्षायै नमः । हं कं कं बुभुक्षायै नमः इत्यादि षोड़शपर्यायाः काम्बुजदलेषु वृत्ताकारेण न्यस्तव्याः । पुनः हं खं अं बुभुक्षायै नमः । हं खं कं बुभुक्षायै । हं खं खं बुभुक्षायै नमः । इत्यादिका ब्रह्मब्रह्मपारायणवत् खाद्यम्बुजदलेषु न्यस्तव्या इति बुभुक्षान्यासभेदाः ।

अथ पिपासादिन्यासभेदाः । अथादौ हां हीमादियुता ब्रह्मब्रह्मपारायणवत् आदिङ्खैरेव संयोज्याऽकाराद्यम्बुजदलेषु न्यस्तव्याः । अथवा ब्रह्मविष्णवादिपारायणवद् द्वितीयदीर्घादिसंयुक्ता न्यस्तव्याः । हां अं अं पिपासायै नमः । तथा हां अं कं पिपासायै नम इत्यादिक्षान्तम् । हां आं अं पिपासायै नमः । हां आं कं पिपासायै नमः इत्यादि विसर्गान्तमूह्यम् । हां अं कं पिपासायै । हां कं कं पिपासायै । हां कं खं पिपासायै इत्याद्यूह्यम् । पुनः हां खं अं पिपासायै । हां खं कं पिपासायै । हां खं खं पिपासायै इत्याद्यूह्यं सर्वम् । ततो मूलमिदं विदुरिति प्रतिपर्यायं मूलेन व्यापकन्यासाः सूचिताः ॥ ७ ॥

गतो वो बीजतामेष प्राणिष्वेवं व्यवस्थितः ।
ब्रह्माण्डं ग्रस्तमेतेन व्याप्तं स्थावरजङ्गमम् ॥ ८
नादः प्राणश्च जीवश्च घोषश्चेत्यादि कथ्यते ।
एष पुंस्त्रीनियमितैर्लिङ्गैश्च सनपुंसकैः ॥ ९
रेफो माया बीजमिति त्रिधा समभिधीयते ।
शक्तिः श्रीः सन्नतिः कान्तिर्लक्ष्मीर्मेधा सरस्वती ॥ १०

गतो वो बीजतामित्यादिना षडध्वन्यासः सूचितः । वो युष्माकं ब्रह्मविष्णुरुद्राणां बीजतां वाचकतामितीश्वरसदाशिवयोरपि उपलक्षणमेतत् । प्राणिषु अध्वषट्कविशिष्टेषु जीवेषु एवमुक्तेन प्रकारेण पञ्चमूर्त्यात्मकत्वे सति अध्वाभिमानित्वेन व्यवस्थितः । अध्वोपाधिकप्राणिनियामक पञ्चमूर्त्यात्मना व्यवस्थित इत्यर्थः । तत्राऽध्वानः संग्रहेणोच्यन्ते । विस्तारस्याऽशक्यत्वात् । अध्वानो द्विविधाः । वाच्यवाचकभेदेन । वाचको वर्णपदमन्त्रभेदेन त्रिविधः । वाच्यं च तत्त्वभुवनकलाभेदात् । हं हिं हुं हें होमिति वर्णाः । ओं ह्रीं हौं नमः शिवाय शिवायै इति वा पदपञ्चकम् । सद्योजातादयो मन्त्राः । पृथिव्यादीनि तत्त्वानि । ब्रह्मलोकादीनि भुवनानि । ब्रह्माद्याः मूर्तयः कलाः । इति मूर्तिस्थानेषु न्यासः । अक्षरतत्त्वपदभुवनमन्त्रकलाक्रमेण न्यासः । हं नमः पृथिव्यै नमः । ओं नमो ब्रह्मलोकाय नमः । सद्योजाताय नमः । ब्रह्मणे नमः । इत्यादिक्रमेण मन्त्रप्रयोगो द्रष्टव्यः । प्रणवेनैतान् क्रमेण संहृत्य योगः कार्य इत्याह—ब्रह्माण्डमिति । ब्रह्माण्डमित्युपलक्षणम् । सर्वस्याऽध्वजातस्य । व्याप्तं स्थावरजङ्गममिति मूर्त्यधिष्ठेयतया ध्यातस्य तत्तत्तत्त्वादिवर्तिनः प्राणिजातस्यापि लय इत्युक्तः ॥ ८ ॥

नाद इत्यादिना मूर्तिलयानन्तरं मात्रान्यासयोगावाह । ह्रीं नादात्मने । ह्रीं प्राणात्मने । एवं घोषजीव बिन्दुकला निरोधिका नादनादान्तादयोऽपि पादावारभ्य व्यापकत्वेन न्यस्तव्याः ।

लिङ्गन्यासमाह—एष इति । रं पुरुषात्मने नमः । ईं स्त्र्यात्मने नमः । हं नपुंसकात्मने नमः । ह्रीं अलिङ्गात्मने नमः । इत्येते मन्त्राः सूचिताः । दक्षिणोत्तरमध्यभागव्यापकेषु न्यासः । एष इत्यनेन व्यापकमन्त्रः सूचितः ।

शक्त्यादिन्यासं सूचयन् व्याप्तिमाह—शक्तिरिति । शक्तिः श्रीरित्येताभिः शक्तिभिः । आद्यैश्चाऽकारादिक्षकारान्तैर्वर्णैः सह मातृकास्थानेषु न्यसेदित्यर्थः । अं शक्त्यै नमः । आं शक्त्यै नमः । इत्यादयो मन्त्राः । एवं अं श्रियै नमः ।

क्षान्तिः पुष्टिः स्मृतिः शान्तिरित्याद्यैः स्वार्थवाचकैः ।
नानाविकारतां प्राप्तैः स्वैः स्वैर्भावैर्विकल्पितैः ॥ ११
तामेनां कुण्डलीत्येके सन्तो हृदयगां विदुः ।
सा रौति सततं देवी भृङ्गीसङ्गीतकध्वनिः ॥ १२
आकृतिं स्वेन भावेन पिण्डितां बहुधा विदुः ।
कुण्डली सर्वथा ज्ञेया सुषुम्नानुगतैव सा ॥ १३

इत्यादि दशपर्याया ऊह्याः । एतेषामेव न्यासानां विशेषमाह—स्वार्थवाचकैरिति । स्वार्थशब्देन कुण्डलिनी उच्यते । तस्या वाचकास्त्र्यक्षराः त्रिबीजात्मकाश्च मन्त्राः विद्याश्च । तैश्च सह शक्त्यादिन्यासं कुर्यात् । प्रथममेकैकं बीजं संयोज्य शक्त्यैकादशकं न्यसेत् । पुनः द्वितीय तृतीय समस्तसंयोगेनापि तथा न्यसेदित्यर्थः ।

उक्तबीजसंयुक्त एव न्यासे मन्त्रान्तरसंयोगमाह—नानाविकारतां प्राप्तैरिति । उक्तत्रिबीजमन्त्राणां विकारत्वं नानाविधत्वं प्राप्ता ये ब्रह्मसरस्वती विष्णुलक्ष्मी-रुद्रोमा गणेशदुर्गादयः तेषां मन्त्रैरित्यर्थः । तैश्च सहोक्तमेव न्यासं कुर्यादिति सर्वमन्त्राणां शक्त्यादिन्यासः सूचितः । ओं अं ऐं नमो ब्रह्मणे शक्त्यै नमः । ओं अं ऐं नमः सरस्वत्यै शक्त्यै नमः । ओं अं ऐं नमो विष्णवे शक्त्यै नमः । ओं अं ऐं नमो लक्ष्म्यै शक्त्यै नमः । ओं अं ऐं नमः शिवाय शक्त्यै नमः । ओं अं ऐं नम उमायै शक्त्यै नमः । ओं अं ऐं गं नमः क्षिप्रप्रसादनाय शक्त्यै नमः । ओं अं ऐं ओं क्लीं दुं नमो दुर्गायै शक्त्यै नमः । इत्यादि प्रकारेण सर्वमूलमौलिकमन्त्रेषु प्रयोगा द्रष्टव्याः ।

अथैवं विधानामेवैषां सर्वेषां स्वरपारायणन्यासमाह—स्वैः स्वैर्भावैरिति । स्वैः स्वैरकारककारादिसम्बन्धिभिः भावैः षोडशस्वरैः सह न्यसेदित्यर्थः । न्यासस्तु षोडशदलेषु कार्यः । व्यञ्जनपारायणन्यासमाह—विकल्पितैरिति । पूर्वोक्त-विरचनावत् विकल्पोऽवगन्तव्यः ॥ ८ ॥ १० ॥ ११ ॥

कुण्डलीन्यासं वक्तुं स्थानं सूचयति—तामेनामिति । अन्ये मूलाधार-नाभिभ्रूमध्यद्वादशान्तेषु विदुरिति स्थानसूचनमेतत् । सा रौतीति सर्वस्थानानु-गतनादज्योतिश्चिन्तनमुक्तम् ॥ १२ ॥

कुण्डलिनीन्यासमाह—आकृतिमिति । स्वेन भावेन च कुण्डलिनीवाचकहकारेण कुण्डलिनीबीजेन च पिण्डितामाकृतिं ब्रह्मब्रह्मादिरूपेण सर्वस्थानेषु बहुधा विदुरित्यर्थः । अयं भावः । ह्स्रां ह्स्रीमिति कुण्डलिनीबीजं नाभौ त्रिकोणमध्ये

चराचरस्य जगतो बीजत्वाद्बीजमेव तत् ।
मूलस्य बिन्दुयोगेन शतानन्द त्वदुद्भवः ॥ १४
रेफान्वितेकाराकारयोगादुत्पत्तिरेतयोः ।
हङ्काराख्यो भवांस्तेन हरिरित्येष शब्द्यते ॥ १५
हरत्वमस्य तेनैव सर्वात्मत्वं ममापि च ।
अस्य बिन्दोः समुत्पत्त्या तदन्तोऽसौ हमुच्यते ॥ १६

न्यसेत् । ब्रह्माणं सरस्वतीं च सञ्चिन्त्य हं परब्रह्मणे पराशक्त्यै नमः । हं साक्षिणे साक्षिण्यै नमः । इत्यपि मध्य एव व्यापकत्वेन विन्यसेत् । हौं चतुर्मूर्तये चतुर्मूर्त्यै नमः । इत्यपि व्याप्य हौं सर्वेश्वराय मूलप्रकृत्यै नमः । हैं रुद्रसर्वेश्वराय उमामूलप्रकृत्यै नमः । हें विष्णुसर्वेश्वराय लक्ष्मीमूलप्रकृत्यै नमः । ह्रां ह्रूं ब्रह्मसर्वेश्वराय सरस्वतीमूलप्रकृत्यै नम इति द्वादशान्त भ्रूमध्य हृदय नाभिषु त्रिकोणमध्यकोणत्रयेषु वा न्यसित्वा तेषां परिवारत्वेन वक्ष्यमाणान् मन्त्रान् न्यसेत् । ह्रूं रुद्ररुद्रायोमोमायै । ह्लूं रुद्रविष्णवे उमालक्ष्म्यै । ह्रं रुद्रब्रह्मणे उमासरस्वत्यै नमः । इति रुद्रसर्वेश्वरपरितः । ह्रूं विष्णुरुद्राय लक्ष्म्युमायै । ह्लुं विष्णुविष्णवे लक्ष्मीलक्ष्म्यै । ह्रीं विष्णुब्रह्मणे लक्ष्मीसरस्वत्यै नमः । इति विष्णुसर्वेश्वरपरितः । ह्रिं ब्रह्मरुद्राय सरस्वत्युमायै । ह्रां ब्रह्मविष्णवे सरस्वती-लक्ष्म्यै । ह्रं ब्रह्मब्रह्मणे सरस्वतीसरस्वत्यै नमः । इति ब्रह्मसर्वेश्वरपरितः इति ।

एवं नाभौ न्यसित्वा हृदयादिषु मध्ये विष्ण्वादीन् सञ्चिन्त्योक्तप्रकारेण षोड़शमूर्तिन्यासं कुर्यात् । कुण्डली सर्वथा ज्ञेया इति चतुर्मूर्तियोगादि-निर्विकल्पयोगान्तान् योगानुक्तान् सूचयति ॥ १३ ॥

केन मन्त्रेण एवं कुण्डली ज्ञेयेति होमिति सहकारेण प्रणवेनेत्याह—चराचर-स्येति । न केवलं प्रणव एव चराचरस्येदं बीजं यतस्तदपि शब्दब्रह्म हकारो बीजमेवेत्यर्थः । बीजत्वमेव प्रपञ्चयन् मूर्तिन्यासमाह—मूलस्येति ॥ १४ ॥

रेफान्वितेन इकारेण योगाद्विष्णोरुत्पत्तिः । रेफान्वितेनाऽकारेण योगाद्रुद्रस्य । उक्तेऽर्थे गमकमाह—हङ्काराख्य इति । सर्वात्मत्वं मम सर्वसंयोगादित्यर्थः । हं ब्रह्मणे नमः इति । हरिः विष्णवे नमः । हरः रुद्राय नमः । ह्रीं सर्वेश्वराय नम इति नाभ्यादिषु न्यसेदित्यर्थः । एतदेव मन्त्रचतुष्टयं प्रणवसंयुक्तं पिण्डीकृतं प्रणवचतुष्टयं भवति । हों ह्रों ह्रों ह्रोमिति ।

विभूत्यन्तरं दर्शयन् अजपापरमात्मप्रणवन्यासानाह—अस्येति । अस्य हस्य

स हंकारः पुमान् प्रोक्तः स इति प्रकृतिः स्मृता ।
अजपेयं मता शक्तिस्तथा दक्षिणवामतः ॥ १७
बिन्दुर्दक्षिणभागस्तु वामभागो विसर्गकः ।
तेन दक्षिणवामाख्यौ भागौ पुंस्त्रीविशेषितौ ॥ १८
बिन्दुः पुरुष इत्युक्तो विसर्गः प्रकृतिर्मता ।
पुंप्रकृत्यात्मको हंसस्तदात्मकमिदं जगत् ॥ १९
पुंरूपं सा विदित्वा स्वं सोहम्भावमुपागता ।
स एष परमात्माख्यो मनुरस्य महामनोः ॥ २०
सकारञ्च हकारञ्च लोपयित्वा प्रयोजयेत् ।
सन्धिं वै पूर्वरूपाख्यं ततोऽसौ प्रणवो भवेत् ॥ २१

बिन्दुतत्त्वादभिव्यक्तेः तदन्तः तच्छिरस्कोऽसौ हः हमित्युच्यते । इत्यजपाप्रथमबीजोद्धारः ॥ १५॥१६ ॥

द्वितीयबीजस्वरूपमाह—स इति । उद्धृतयोर्बीजयोस्तत्त्वं वदन् न्यासमन्त्रावाह—हंकार इति । हं पुरुषात्मने नमः । सः प्रकृत्यात्मने नमः । इति मन्त्रौ सूचितौ । देवतात्वेन शक्तिरेव ध्येयेत्याह—अजपेति । न्यासस्थानमाह—तथा दक्षिणवामत इति । यथा मूलशिरसोर्न्यासः प्रसिद्धः । तथा दक्षिणवामयोरपि न्यस्तव्यावित्यर्थः ॥ १७ ॥

न्यासे नियममाह—बिन्दुरिति । बिन्दुविसर्गयुक्तौ हकारसकारौ बिन्दुविसर्गशब्दार्थौ । भागनियमे गमकमाह—तेनेति । देवानां सर्वेषां चेत्यर्थः ॥ १८ ॥

तेन कथं पुंस्त्रीविशेषितत्वमिति । तत्राह—बिन्दुरिति । अतोऽर्धनारीश्वरदेवत्यो हंसमन्त्रः तथा ध्येय इत्याह—पुंप्रकृतीति । तस्य सर्वात्मकत्वं वदन् न्यासफलमाह—तदात्मकमिति । अयमत्र द्वितीयो न्यासप्रकारः । उक्तमन्त्राभ्यां शिरो ललाट भ्रूनेत्र श्रोत्रनासा गण्ड गलांस बाहु मूलोपबाहु कूर्पर प्रकोष्ठ मणिबन्धतलाङ्गुल्यूरःकक्ष स्तनोदर पार्श्व नाभि जठर स्फिग्वृषणपादमूलोरु जानु जङ्घागुल्फप्रपदाङ्गुलिद्वयेषु न्यसित्वा । हंसः प्रकृतिपुरुषात्मने नम इति व्यापयेदिति । पुंप्रकृत्यात्मको हंस इत्यनेनैव सूचितो व्यापकमन्त्रः ॥ १९ ॥

एवं प्रत्यगात्मनो ब्रह्मणैकत्वप्रतिपादकं मनुमभिधाय तस्याऽनेन तत्प्रतिपादकं परमात्ममन्त्रमुद्धरति—पुंरूपमिति । सा तदुपाधिको जीव इत्यर्थः । अस्यापि

तारादिभक्ताच्चरमांशतः स्युर्भूतानि खादीन्यथ मध्यमांशात् ।
इनादितेजांसि च पूर्वभागाच्छब्दाः समस्ताः प्रभवन्ति लोके ॥ २२

एवमेषा जगत्सूतिः सवितेत्यभिधीयते ।
यदा तदेति खैस्तत्त्वैश्चतुर्विंशतिधा भिदाम् ॥ २३
तद्वर्णभिन्ना गायत्री गायकत्राणनाद्भवेत् ।
सप्तग्रहात्मिका प्रोक्ता यदेयं सप्तभेदिनी ॥ २४
तदा स्वरेशः सूर्योऽयं कवर्गेशस्तु लोहितः ।
चवर्गप्रभवः काव्यष्टवर्गाद् बुधसम्भवः ॥ २५
तवर्गोत्थः सुरगुरुः पवर्गोत्थः शनैश्चरः ।
यवर्गजोऽयं शीतांशुरिति सप्तगुणा त्वियम् ॥ २६

मन्त्रस्य न्यासादिकमुक्तप्रायम् । पुनरेकत्वानुभवसाधनं प्रणवमुद्धरति—अस्य महामनोरिति ॥ २० ॥ २१ ॥

उद्धृतस्य तारस्य न्यासयोगादिकं वदन् विभूतिमाह—तारादिति । मं आकाशात्मने नमः । मं वाय्वात्मने नमः । मं तेज आत्मने नमः । मं अबात्मने नमः । मं पृथिव्यात्मने नमः इति मूर्धादिषु न्यसेदिति मकारन्यासः । उं सूर्याय नमः । उं सोमाय नमः । उं अग्नये नमः । इति हृन्मूर्धमूलाधारेषु उकारन्यासः । अं शब्दब्रह्मणे नम इति व्यापयेत् । इत्यकारन्यासः ॥ २२ ॥

गायत्रीतत्त्वन्यासं सूचयन् गायत्रीदेवतापि एषैव शक्तिरिति सहेतुकमाह—एवमिति । तत्त्वन्यासं सूचयति—यदा तदेति ॥ २३ ॥

तत्त्वन्यासे गायत्रीवर्णसान्निध्यमाह—तद्वर्णेति । तच्छब्दस्तत्त्ववाचकः । तत्त्वसंख्यवर्णसंयुक्तेत्यर्थः । सप्तग्रहात्मकत्वं वदन् सप्तग्रहन्यासं सूचयति—सप्तग्रहात्मिकेति । हकारादिशान्तान्तैः यदा सप्तभेदिनी तदा सप्तग्रहात्मिका इति न्यासमन्त्रेषु हकारात्मने नम इत्यादियोगः सूचितः ॥ २४ ॥

मन्त्रशेषं सूचयति—तदा स्वरेश इति । अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः स्वराधिपतये सूर्याय भगवते हकारात्मने नमः । कं खं गं घं ङं कवर्गाधिपतये अङ्गारकाय भगवते रेफात्मने नमः । चं छं जं झं ञं चवर्गाधिपतये शुक्राय भगवते ईकारात्मने नमः । टं ठं डं ढं णं टवर्गाधिपतये बुधाय भगवते बिन्द्वात्मने नमः । तं थं दं धं नं तवर्गाधिपतये बृहस्पतये भगवते

यथा स्वरेभ्यो नाऽन्ये स्युर्वर्णाः षड्वर्गभेदिताः ।
तथा सवित्रनुसूतं ग्रहषट्कं न संशयः ॥ २७
इति संलीनसूर्यांशे वर्गषट्के तु षड्गुणा ।
हृल्लेखेयं तथा यन्त्रं स्मर्यते स्मृतिकोविदैः ॥ २८
सर्वव्याप्ता हि सा शक्तिः शश्वद्भास्कररूपिणी ।
स्वभासा क्रमते यत्र तत्राऽस्याः स्थितिरिष्यते ॥ २९
अस्यास्तु रजसा चैव तमसा च दिवानिशम् ।
सत्त्वावष्टब्धबिन्द्वात्मा मेरुं पर्येति भास्करः ॥ ३०
अस्या विकाराद्वर्णेभ्यो जाता द्वादश राशयः ।
लवादिकालोपचितैस्तैः स्याच्चक्रगतिस्त्रिधा ॥ ३१
ऋक्षराश्यादियुतया चक्रगत्या जगत्स्थितिः ।
वक्ष्यामि चक्ररूपञ्च प्रबन्धं राशिभिर्यथा ॥ ३२

नादात्मने नमः । पं फं बं भं मं पवर्गाधिपतये शनैश्चराय भगवते शक्त्यात्मने नमः । यं रं लं वं शं षं सं हं लं क्षं यवर्गाधिपतये सोमाय भगवते शान्तात्मने नमः । इति मन्त्राः सूचिताः । इति सप्तगुणा त्वियमिति । ह्रीं अं क्षं सर्वाधिपतये सर्वैश्वर्यं संविदे नमः । इति व्यापकमन्त्रः सूचितः ॥ २५ ॥ २६ ॥

तस्या व्यापकत्वं सूचयन् ग्रहाणां सूर्यात्मकमंविद्व्याप्यत्वमाह – यथेति । उक्तं हि स्वरकार्यत्वं वर्णान्तराणां तेभ्यो वर्णान्तरा इति । अत्र सप्तग्रहन्यासार्थं षड्गुणितयन्त्रं सूचयति—यन्त्रमिति । स्मृतिकोविदैरिति स्मृतिप्रकारः सूचितः । हृदयमध्य गुह्य जान्वंसमूर्धांस जानुकोणं स्मरन्तीत्यर्थः ॥ २७ ॥ २८ ॥

अस्य न्यासस्य ध्यानं देवताव्याप्तिं च दर्शयति—सर्वेति ॥ २९ ॥

अहोरात्रन्यासमाह—अस्यास्त्विति । रेफेकारहकारा रजआदयः । रं अह्ने नमः । ईं रात्रये नमः । हं मेरवे नमः । ह्रीं भास्कराय नमः । इति मन्त्रा मूर्धमूलाधारसुषुम्नाहृत्स न्यस्तव्या इत्यर्थः ॥ ३० ॥

राशिव्याप्तिं वदन् राशिन्यासे वर्णयोगं सूचयति—अस्या इति ।

कालचक्रमध्ये लवादिन्यासं राशिन्यासं च सूचयति—लवादीति ॥ ३१ ॥

चक्रसंहारेण स्वरूपस्थितिं सूचयति—ऋक्षेति । चक्रस्य गतिः संहारः । जगतः परमात्मरूपेण स्थितिरित्यर्थः । वक्ष्यामीति सुबोधम् ॥ ३२ ॥

अन्तर्बहिर्विभागेन रचयेद्राशिमण्डलम् ।
भूचक्र एष मेषादिः प्रविज्ञेयोऽथ मानुषः ॥ ३३
आद्यैर्मेषाह्वयो राशिरीकारान्तैः प्रजायते ।
ऋकारान्तैरुकारादौर्वृषो युग्मं ततस्त्रिभिः ॥ ३४
एदैतोः कर्कटो राशिरोदौतोः सिंहसम्भवः ।
अमःशवर्गलेभ्यश्च सञ्जाता कन्यका मता ॥ ३५
षड्भ्यः कचटतेभ्यश्च पयाभ्याञ्च प्रजज्ञिरे ।
वणिगाद्याश्च मीनान्ता राशयः शक्तिजृम्भणात् ॥ ३६
चतुर्भिर्यादिभिः सार्द्धं स्यात् ञकारस्तु मीनगः ।
स्यातामर्धाधिकौ पञ्चनाड़िकौ चापकर्कटौ ॥ ३७

अन्तर्बहिरिति । अयमर्थः । चतुरस्रत्रयात्मकं सकोणसूत्रं राशिमण्डलं मूलाधारे मनसा लिखित्वा । तन्मध्ये षट्कोणं देव्यधिष्ठितमध्यं लवत्रुटिकला-काष्ठानिमेषमात्राधिष्ठित षट्कोणं स्मृत्वा राशिचक्रे प्रतित्रिकोणं चतुरस्रं लिखित्वा तेषां मध्ये त्रिकोणानि लिखेत् । तत्र चतुरस्रकोणेषु त्रिकोणकोणेषु च घटिका-न्यासः । राशिव्यापकमन्त्रैः वक्ष्यमाणैः तस्मिन् तस्मिन् राशौ व्यापकम् । ततः त्रिकोणमध्ये राशिवर्णैः सह धात्राद्यादित्यन्यासः । ततो वक्ष्यमाणमन्त्रै राशि-वेधन्यासः । ततस्तदधिपतिवेधन्यासः । पुनः राशिचक्रात् बहिः वृत्तं लिखित्वा तत्र परितः सप्तविंशति त्रिकोणान्यपि लिखित्वा तेषु नक्षत्रन्यासं नक्षत्रदेवतान्यासं नक्षत्रवेधन्यासं च कृत्वा तद्बहिरपि वृत्तं विधाय तत्र त्रिंशत्त्रिकोणात्मकं तिथि-चक्रं लिखित्वा तेषु तिथिन्यासं तिथिदेवतान्यासं च कृत्वा मेषमीनान्तराले तिथिचक्रे वा करणन्यासं कृत्वा समष्टिमन्त्रेण व्यापयेत् । अथवा राशिचक्र एव नक्षत्रतिथिन्यासोऽपि । तथा चेत् राशिमण्डल एव नक्षत्रमण्डलं तिथिमण्डलं च कार्यम् । इत्यन्तर्बहिर्विभागेन राश्यादिमण्डलरचनाप्रकारो न्यासप्रकारश्चोक्तः ।

अथ मन्त्रविशेषप्रदर्शनार्थं ग्रन्थे व्याख्यायते—भूचक्र इति । समष्टिमन्त्रे भूचक्राय नमः । इति योगो दर्शितः । मेषादिरिति न्यासोपक्रमस्थानं दर्शितम् । मानुष इति । राशिव्यापकमन्त्रेषु लग्नादेः पूर्वं मानुषपदयोगो दर्शितः ॥ ३३ ॥

तेषामेव प्रथमतोऽक्षरयोगक्रमं दर्शयति—आद्यैरिति ॥ ३४॥३५॥३६॥३७ ॥

वर्णानामुपरि राशिनाड़िकासंख्यायोगं दर्शयति—स्यातामिति । अनेनैव नाड़िकान्यासोऽपि दर्शितः ॥ ३७॥३८॥३९ ॥

पादाधिका मकरयुक्सिंहवृश्चिकसंज्ञकाः ।
पादोनौ कुम्भवृषभौ वणिक्कन्ये च पञ्चके ॥ ३८
त्रिपादोनौ मीनमेषौ संख्योक्ता राशिसंश्रिता ।
चापो नीरगयुक्कन्याः पीताः स्युरुभयास्त्वमी ॥ ३९
वणिङ्मकरमेषाह्वकुलीरा रक्तरोचिषः ।
चरा वशिष्टाश्चत्वारः स्थिराः श्वेताः पृथङ्मताः ॥ ४०
स्युः कर्कटो वृश्चिकमीनराशी विप्रा नृपाः सिंहधनुश्च मेषः ।
तुला सकुम्भा मिथुनञ्च वैश्याः कन्यावृषौ द्वौ मकरश्च शूद्राः ॥ ४१
आङ्गारावजवृश्चिकौ वृषतुले शुक्रस्य युक्कन्यके
बौधे कर्कटकाह्वयो हिमरुचेः सिंहस्तथा गोपतेः ।
चापाञ्जावपि धेषणौ मकरकुम्भाख्यौ च मान्दौ ग्रहाः
प्रोक्ता राश्यधिपा बली च कलशे सोऽयं क्रमो दर्शितः ॥ ४२
लग्नो धनं भ्रातृबन्धुपुत्रशत्रुकलत्रकाः ।
मरणं धर्मकर्मायव्यया द्वादश राशयः ॥ ४३

संख्यायाः परस्ताच्चरस्थिरोभयपदं पीतादिपदं च दर्शयति— चाप इति ॥ ॥ ३९॥४० ॥

चरादिपीताद्योर्मध्ये ब्राह्मणादि पदं दर्शयति—स्युरिति ॥ ४१ ॥

राश्यधिपतिन्यासं दर्शयति—आङ्गाराविति ॥ ४२ ॥

राशिनाम्नः पूर्वं लग्नादियोगं दर्शयति—लग्न इति । अयमत्र प्रयोगक्रमः । क्लीं समस्तकालसाक्षिण्यै संविदे नम इति षट्कोणमध्ये न्यसेत् । क्लीं लवाय नमः । क्लीं त्रुट्यै नमः । क्लीं कलायै नमः । क्लीं काष्ठायै नमः । क्लीं निमेषाय नमः । क्लीं मात्रायै नमः । इति षट्कोणेषु । क्लीं मेषराशिप्रथमघटिकायै नमः । क्लीं मेषराशिद्वितीयघटिकायै नमः । एवं तृतीय चतुर्थघटिकायै नम इति । राशिमध्यचतुरस्रकोष्ठेषु न्यसित्वा । मेषराशिपादाय नम इति चतुरस्रमध्यगतत्रिकोणाग्रकोणे न्यसेत् । एवं सर्वत्र घटिकान्यासो द्रष्टव्यः ।

घटिकान्यासानन्तरं राशिमन्त्रैः तं तं राशिं व्यापयेत् । क्लीं अं आं इं ईं सपादचतुर्घटिकात्मने चरात्मने नृपवर्णात्मने रक्तवर्णाय मनुष्यलग्नाय मेषराशये नमः । उं ऊं ऋं पादोनपञ्चघटिकात्मने स्थिरात्मने शूद्रवर्णात्मने

ततस्तदूर्ध्वभागस्थो भुवश्चक्रः समस्तथा ।
स तु सिंहादिको यस्मिन् पैतृकी नियता गतिः ॥ ४४
तदूर्ध्वभागसंस्थः स्यात् स्वश्चक्रश्चाऽपि तादृशः ।
स तु चापादिको दैवश्चक्रस्त्वैनाभिकस्तु सः ॥ ४५

श्वेतवर्णाय मनुष्यधनाय ऋषभराशये नमः । ऋं लृं लॄं पादाधिकपञ्चघटिकात्मने उभयात्मने वैश्यवर्णात्मने पीतवर्णाय मनुष्यभ्रात्रे मिथुनराशये नमः । एं ऐं अर्धाधिकपञ्चघटिकात्मने चरात्मने ब्राह्मणवर्णात्मने रक्तवर्णाय मनुष्यबन्धवे कर्कटराशये नमः । ओं औं पादाधिकपञ्चघटिकात्मने स्थिरात्मने नृपवर्णात्मने श्वेतवर्णाय मनुष्यपुत्राय सिंहराशये नमः । अं अः शं षं सं हं लं पञ्चघटिकात्मने उभयात्मने शूद्रवर्णात्मने पीतवर्णाय मनुष्यशत्रवे कन्याराशये नमः । कं खं गं घं ङं पञ्चघटिकात्मने चरात्मने वैश्यवर्णात्मने रक्तवर्णाय मनुष्यकलत्राय तुलाराशये नमः । चं छं जं झं ञं पादाधिकपञ्चघटिकात्मने स्थिरात्मने ब्राह्मणवर्णात्मने श्वेतवर्णाय मनुष्यमरणाय वृश्चिकराशये नमः । टं ठं डं ढं णं अर्धाधिक-पञ्चघटिकात्मने उभयात्मने नृपवर्णात्मने पीतवर्णाय मनुष्यधर्माय धनुराशये नमः । तं थं दं धं नं पादाधिकपञ्चघटिकात्मने चरात्मने शूद्रवर्णात्मने रक्तवर्णाय मनुष्यकर्मणे मकरराशये नमः । पं फं बं भं मं पादोनपञ्चघटिकात्मने स्थिरात्मने वैश्यवर्णात्मने श्वेतवर्णाय मनुष्यायाय कुम्भराशये नमः । यं रं लं वं त्रिपादोनपञ्चघटिकात्मने उभयात्मने ब्राह्मणवर्णात्मने पीतवर्णाय मनुष्यव्ययाय मीनराशये नमः इति व्यापकमन्त्राः ।

अथ धात्रादिन्यासः । मेषराशये नम इत्यादिषु मेषराश्यधिपतये धात्रे नम इत्यादि योज्यं धात्रादि न्यासे ।

अथ राशिवेधन्यासः । राशिव्यापकमन्त्रैरेव विध्युर्धनुर्मेषसिंहा इति वक्ष्यमाण-प्रकारेण न्यासः ।

अथ राश्यधिपग्रहन्यासः । तत्र मेषराश्यधिपतये धात्रे नम इत्यादि स्थानेषु मेषराश्यधिपतये अङ्गारकाय नमः । इत्यादिकं प्रक्षिप्य न्यासः कार्यः । अधिपतयश्च आङ्गारकावजवृश्चिकावित्यादिनोक्ताः ॥ ४३ ॥

मूलाधारचक्रवदेव हृच्चक्रेऽपि न्यासः कर्तव्यः । इत्याह—ततस्तदूर्ध्व इति । तत्र न्यासः सिंहादिक इत्याह—स त्विति । लग्नादयश्च पितृलग्नाय सिंहराशये नमः । इत्येवं क्रमेण योज्या इत्याह—यस्मिन्निति ॥ ४४ ॥

मूर्धस्थस्वश्चक्रेऽपि समो न्यास इत्याह—तदूर्ध्व इति । तत्र चापादिको न्यास

धनुस्तु देवलग्नत्वात् समासाल्लग्नमुच्यते ।
विध्युर्धनुर्मेषसिंहा मकरर्षभकन्यकाः ॥ ४६
सकुम्भयुग्मवणिजो मीनवृश्चिककर्कटाः ।
अयन्तु राशिवेधः स्यादन्यो वेधस्तु भात्मकः ॥ ४७
मूलाश्विनीमघाज्येष्ठारेवत्यश्लेषकास्तथा ।
याम्यपूर्वानुपूर्वाहिर्ब्रध्नपुष्यानुराधकाः ॥ ४८
स्वाती शतभिषार्द्रा च श्रोणारोहिणहस्तकाः ।
पादं पादत्रयैर्विध्याद् योजयेदधमर्धकैः ॥ ४९

इत्याह स त्विति । चक्रत्रयन्यासानन्तरं त्वैनाभिकाय कालचक्राय नम इति व्यापकमाह—चक्रस्त्वैनाभिक इति ॥ ४५ ॥

धनुर्मासाय देवलग्नाय धनूराशये नम इत्यादि क्रमेण मन्त्रः प्रयोक्तव्य इत्याह—धनुस्त्विति । मासादूर्ध्वं लग्नादिकमुच्यत इत्यर्थः । वेधन्यासप्रकारमुक्तमाह—विध्युरिति ॥ ४६ ॥ ४७ ॥

नक्षत्रन्यासं वदन् वेधसाम्यात् प्रथमं नक्षत्रवेधन्यासमाह—मूलेति । न्यासक्रमस्तूच्यते । क्लीं अं आं अश्विन्यै नमः । इ भरण्यै नमः । ईं उं ऊं कृत्तिकायै नमः । ऋ ॠं ऌं ॡं रोहिण्यै नमः । एं मृगीर्षायै नमः । ऐं आर्द्रायै नमः । ओं औं पुनर्वसवे नमः । कं पुष्यायै नमः । खं गं अश्लेषायै नमः । घं ङं मघायै नमः । चं पूर्वफल्गुन्यै नमः । छं जं उत्तरफल्गुन्यै नमः । झं ञं हस्तायै नमः । टं ठं चित्रायै नमः । डं स्वात्यै नमः । ढं णं विशाखायै नमः । तं थं दं अनुराधायै नमः । धं ज्येष्ठायै नमः । नं पं फं मूलायै नमः । बं पूर्वाषाढ़ायै नमः । भं उत्तराषाढ़ायै नमः । मं श्रवणायै नमः । यं रं अविष्ठायै नमः । लं शतभिषजे नमः । वं शं पूर्वभाद्रपदायै नमः । षं सं हं उत्तरभाद्रपदायै नमः । लं क्षं अं अः रेवत्यै नमः । इति नक्षत्रचक्रे न्यसेत् ।

पुनस्तत्रैव नक्षत्रदेवतान्यासं कुर्यात् । अं आं अश्विन्यधिपतिभ्यामश्विभ्यां नम इत्यादि क्रमेण मन्त्राः द्रष्टव्याः । पुनरेभिरेव मन्त्रैः नक्षत्रवेधन्यासः । स च मूलाश्विन्यादिक्रमेण न्यस्तव्यः । राशिचक्र एव चेत् नक्षत्रन्यासः तदा राश्यर्णैः राशिभिश्च सह न्यासः कार्यः । अं आं इं ईं अश्विनीभरणीकृत्तिकापादात्मने मेषराशये नम इत्यादिक्रमेण मन्त्रा द्रष्टव्याः । एवं उं ऊं ऋं कृत्तिकापादत्रयरोहिणी मृगशीर्षा पूर्वार्धात्मने ऋषभराशये नमः । ऋं ऌं ॡं मृगशीर्षोत्तरा-

चरस्थिरोभयात्मानश्चातुर्वर्ण्यगुणात्मकाः ।
राशिं राश्यधिपास्त्वेवं विध्युर्वेधविधानतः ॥ ५०

एभ्य एव तु राशिभ्यो नक्षत्राणाञ्च सम्भवः ।
स चाऽप्यक्षरभेदेन सप्तविंशतिधा भवेत् ॥ ५१

आभ्यामश्वयुगेर्जाता भरणी कृत्तिका पुनः ।
लिप्तित्रयाद्रोहिणी च तत्पुरस्ताच्चतुष्टयात् ॥ ५२

एदैतोर्मृगशीर्षार्द्रे तदन्त्याभ्यां पुनर्वसुः ।
अमसोः केवलो योगो रेवत्यर्थं पृथङ्मतः ॥ ५३

कतस्तिष्यस्तथाऽश्लेषा खगयोर्घङ्योर्मघा ।
चतः पूर्वाऽथ छजयोरुत्तरा झञयोस्तथा ॥ ५४

हस्तश्चित्रा च टठयोः स्वाती डादक्षरादभूत् ।
विशाखा तु ढणोङ्गूता तथदेभ्योऽनुराधिका ॥ ५५

र्धार्द्रापुनर्वसुत्रिपादात्मने मिथुनराशये नमः । एं ऐं पुनर्वसुपादपुष्याश्लेषात्मने कर्कटकराशये नमः । ओं औं मघापूर्वोत्तरपादात्मने सिंहराशये नमः । अं अः शं षं सं हं लं उत्तरात्रिपादहस्ताचित्रापूर्वार्धात्मने कन्याराशये नमः । कं खं गं घं ङं चित्रोत्तरार्धस्वातीविशाखात्रिपादात्मने तुलाराशये नमः । चं छं जं झं ञं विशाखापादानुराधाज्येष्ठात्मने वृश्चिकराशये नमः । टं ठं डं ढं णं मूलापूर्वाषाढोत्तराषाढापादात्मने धनूराशये नमः । तं थं दं धं नं उत्तराषाढात्रिपादश्रवणाश्विष्ठा पूर्वार्धात्मने मकरराशये नमः । पं फं बं भं मं श्विष्ठोत्तरार्धशतभिषक्पूर्वभाद्रत्रिपादात्मने कुम्भराशये नमः । यं रं लं वं ञं पूर्वभाद्रपादोत्तरभाद्ररेवत्यात्मने मीनराशये नमः । इति मन्त्रांशाः । प्रथमं राशिगतपूर्वपादत्रिपादार्धत्रिकोणेषु नक्षत्रन्यासं कृत्वोक्तैः मन्त्रैः व्यापयेद्वा ।

नक्षत्रवेधन्यासक्रमं दर्शयति—मूलाश्विनीति । मूलाश्विनीमघा विध्युः । एवं ज्येष्ठा रेवत्यश्लेषकाद्याः ॥ ४८ ॥ ४९ ॥

पूर्वोक्तराशिव्यापकमन्त्रक्रमं सूचयति—चरेति । राश्यधिपन्यासे राशिवेधन्यासे चोक्तमेव मन्त्रं सविशेषं सूचयति—राश्यधिपास्त्विति ॥ ५० ॥

नक्षत्रन्यासेऽक्षरयोगक्रममाह—एभ्य एव त्विति ॥५१॥५२॥५३॥५४॥५५॥५६॥ ॥५७॥५८॥५९॥

ज्येष्ठा धकारान्मूलाख्या नपफेभ्यो बतस्तथा ।
पूर्वाषाढ़ा भतोऽन्या च संजाता श्रवणा मतः ॥ ५६
श्रविष्ठाख्या च यरयोस्तथा शतभिषा लतः ।
वशयोः प्रोष्ठपत्संज्ञा षसहेभ्यः परा स्मृता ॥ ५७
ताभ्याममोभ्यां लार्णोऽयं यदा वै सह वत्स्यते ।
तदेन्दुसूर्ययोर्योगादमावास्या प्रकीर्त्यते ॥ ५८
कषतो भुवनं मत्तः कषयोः सङ्गमो भवेत् ।
ततः चकारः सञ्जातो नृसिंहस्तस्य देवता ॥ ५९
स पुनः षसहैः सार्द्धं परप्रोष्ठपदं गतः ।
कारस्कराख्यामलकोदुम्बरा जम्बुसंज्ञकः ॥ ६०
खदिरः कृष्णवंशौ च पिप्पलो नागरोहिणौ ।
पलाशप्लक्षकाम्बष्ठबिल्वार्जुनविकङ्कताः ॥ ६१
वकुलः सरलः सर्जो वञ्जुलः पनसार्ककौ ।
शमीकदम्बाम्रनिम्बमधूकान्ता दिनाद्रिपाः ॥ ६२
आयुष्कामः स्वर्चवृक्षं छेदयेन्न कदाचन ।
सेचयेद्वर्धयेच्चापि पूजयेत् प्रणमेत्तथा ॥ ६३
तिथिनक्षत्रवारेषु तेषु मन्त्रजपो वरः ।
तस्मादेषां दिनानाञ्च वक्ष्यन्ते देवतादयः ॥ ६४
अश्वियमानलधातृशशिरुद्रादितिसुरेज्यसर्पाश्च
पित्र्यर्यमभगदिनकृत्त्वष्टारो मरुतस्तथेन्द्राग्नी ।
मित्रेन्द्रौ निर्ऋतिजले विश्वेदेवा हरिस्तथा वसवः
वरुणोऽजैकपादहिर्ब्रध्नः पूषा च देवता भानाम् ॥ ६५
अश्वेभाजभुजङ्गसर्पसरमामार्जारकाजाकुली
मूषा मूषिकरुद्रयानमहिषीव्याघ्रा यमारोहणम् ।

नक्षत्रवृक्षकथनम् उत्तरत्र प्रयोगार्थम् ॥ ६०॥६१॥६२॥६३ ॥
नक्षत्रदेवतान्यासं सूचयति—अश्वीति ॥ ६४॥६५॥६६ ॥

व्याघ्रोऽणी हरिणी श्ववानरपशुः शाखामृगः स्त्री हयो
मर्त्यो गौः करिणीति साधु कथिता नक्षत्रयोन्यः क्रमात् ॥ ६६

एभ्योऽमावास्यान्ता वर्त्तन्ते प्रतिपदादिकास्तिथयः ।
राशिभ्योऽत्र तिथीनामध्यर्धयुगन्तु राशिरेकः स्यात् ॥ ६७

तेन त्रिंशत्तिथयो द्वादशधा वर्णभेदतो भिन्नाः ।
ता एव स्युर्द्वेधा पुनरपि पूर्वान्त्यपक्षभेदेन ॥ ६८

पक्षः पञ्चदशाहः स्यात् पूर्वः प्रतिपदादिकः शुक्लः ।
तद्वज्ज्ञेयोऽप्यपरः पक्षः कृष्णः प्रतिपदादिकः प्रोक्तः ॥ ६९

संक्रामाम्ये सत्यपि सौम्यात्तु क्रासवृद्धितस्तिथयः ।
न समाः पक्षद्वितये त्रिंशद्भेदं तथाहि संप्राप्ताः ॥ ७०

अग्न्यप्त्रुमाः सविघ्ननागा गुहसवितृमातरो दुर्गा ।
ककुभो धनपतिविष्णुयमहरचन्द्राः क्रमेण तिथ्यधिपाः ॥ ७१

तिथिन्यासं सूचयति—एभ्य इति । हं शुक्लपक्षाय नमः । सः कृष्णपक्षाय नमः । इति तिथिमण्डलदक्षिणवामभागयोः न्यसेदिति पक्षन्यासः । हं अं शुक्लप्रथमाकलायै नमः इत्यादि । हं अं शुक्लपञ्चदशीकलायै नम इत्यन्तं तिथिमण्डलवामभागे विन्यस्य । सः कं खं कृष्णप्रथमाकलायै नमः । सः गं घं कृष्णद्वितीयाकलायै नमः । एवं सः ङं चं कृष्णतृतीयाकलायै नम इत्यारभ्य सः वं शं षं कृष्णपञ्चदशीकलायै नम इत्यन्तं दक्षिणभागे न्यसेत् ।

पुनः तिथ्यधिपतिन्यासं कुर्यात् । हं अं शुक्लप्रथमाकलाधिपतयेऽग्नये नम इत्यादिमन्त्रैस्तिथ्यधिपतिन्यासः । पक्षद्वयेऽप्यग्न्याद्या एव वक्ष्यमाणा देवताः ।

राशिचक्र एव वा पूर्वार्धत्रिपादकोणेषु तिथ्यादिन्यासः । अथवा तिथिचक्रे तिथिन्यासं कृत्वा । राशिचक्रे तिथिन्यासं कुर्यात् । अं आं इं ईं शुक्लप्रथमाद्वितीयातृतीयार्धकलात्मने मेषराशये नम इत्यादिमन्त्रैः तत्तद्राशिस्थानेषु व्यापयेदिति न्यासप्रकारः ।

एभ्योऽमावास्यान्ता वर्तन्त इत्यनेन राशिचक्रे तिथिन्यासो दर्शितः ॥ ६७ ॥

वर्णभेदतो भिन्ना इति । तिथिचक्रन्यासे वर्णविशेषयोगमाह । ता एवेति पक्षन्यासः सूचितः ॥ ६८ ॥

प्रतिपदादिकः शुक्ल इति न्यासमन्त्रांशाः सूचिताः ॥ ६९ ॥ ७० ॥

राशिभ्यः सदिनेभ्यः सतिथिभ्यः शक्तिजृम्भणसमुत्थात् ।
अक्षरभेदविकारात् करणानि च सप्तभेदकान्यभवन् ॥ ७२
सिंहव्याघ्रवराहाः खरगजवृषकुक्कुराः प्रतिपदर्धात् ।
अन्त्यात्तिथ्यर्धार्धं तिष्ठन्त्याकृष्णगोश्वतुर्दश्याः ॥ ७३
एवं सग्रहराशिकदिनतिथिकरणप्रभेदकाः कथिताः ।
अस्मात् पञ्चविभागाद्विज्ञेया पञ्चवर्णनिष्पत्तिः ।
वर्णाः पीतश्वेतारुणासितश्यामकास्तथा क्वाद्याः ॥ ७४

इति मूलाक्षरविकृतं
कथितमिदं वर्णविकृतिबाहुल्यम् ।
सचराचरस्य जगतो
मूलत्वान्मूलताऽस्य बीजस्य ॥ ७५

अग्न्यश्वीति । तिथ्यधिपतिन्यासः उक्तः ॥ ७१ ॥

करणन्यासं सूचयति—राशिभ्य इति । करणपञ्चकन्यासे गते तिथियुक्त-राशिमन्त्रेण व्यापकं सूचितम् । सदिनेभ्य इति प्रतिपर्यायं सप्तग्रहयोगः सूचितः । सतिथिभ्य इति तत्तत्तिथ्यर्धयोगः सूचितः । न्यासस्थानं च तिथिमण्डलं सूचितम् । शक्तिजृम्भणसमुत्थादित्यादिना शक्तिसहितानां षष्टिसंख्यानां वर्णानां योगः सूचितः ।

क्रीं सूर्यात्मने सिंहकरणाय शुक्लप्रतिपदप[दुत्त]रार्धात्मने नम इति प्रतिपच्चक्रापरार्धे विन्यस्य । क्रीं अं सोमात्मने व्याघ्रकरणाय शुक्लद्वितीया-प्रथमार्धात्मने नम इति द्वितीयाचक्रप्रथमार्धे न्यसेत् । इत्यादिक्रमेण न्यासमन्त्रा ऊह्याः । पक्षिमृगसर्पकीटकरणानि अवशिष्टानि केतुराहुग्रहौ ॥ ७२॥७३ ॥

कालसमष्टिमन्त्रव्यापकं सूचयति—एवमिति । क्रीं राशिग्रहनक्षत्रतिथि-करणात्मने पृथिव्यप्तेजोवाय्वाकाशात्मने त्रैनाभिकाय कालचक्राय नम इति मन्त्रः ॥ ७४ ॥

सर्वमन्त्रेषु शक्तियोगं सूचयति—इतीति ।

व्याप्तिन्यासकथनफलम् उपसंहरन् अवसाने हृल्लेखया व्यापकमाह—सचरा-चरस्येति । अस्य साधकस्यैव न्यस्तविग्रहस्य बीजस्य मन्त्रस्य मूलकारणात्मता एवं सिद्धेत्यर्थः ॥ ७५ ॥

यां ज्ञात्वा सकलमपास्य कर्मबन्धं
तद्विष्णोः परमपदं प्रयाति लोकः ।
तामेतां त्रिजगति जन्तुजीवभूतां
हृल्लेखां जपत च नित्यमर्चयीत ॥ ७६

इति श्रीप्रपञ्चसारे चतुर्थः पटलः ।

कालचक्रयोगं दर्शयन् पटलमुपसंहरति—यामिति । न्यासानन्तरं जपादिकं चानेनैव सूचितम् । त्रिजगतीति चक्रात्मके जगत्त्रये ये जन्तवः तेषां जीवभूतां तेषु प्रविश्य जीवात्मतां प्राप्तां परां चिन्मात्ररूपामिति कालचक्रयोगक्रमः सूचितः । सकलं हृल्लेखां ज्ञात्वा जपतेति हृद्यम् ॥ ७६ ॥

* अत्र लग्न इत्यादिना राश्यानुकूल्यस्य सूचितत्वात् राशिनक्षत्रनामार्णानुकूल्यं संक्षेपत उच्यते । यस्मिन् राश्यक्षरगणे साधकस्य नामाद्यक्षरं दृष्टं तं राशिमारभ्य मन्त्रस्याद्यक्षरसम्बन्धराश्यन्तं लग्नादिभिर्गणयेत् । तत्र धनभ्रातृबन्धुपुत्रकलत्रधर्मायानाम् अन्यतमरूपा ये मन्त्राक्षरयुक्तराशिवर्णास्ते ग्राह्या इति ।

राश्यानुकूल्यमन्यथाऽपि उच्यते । प्रथमपञ्चमनवमा बन्धवः । द्वितीयषष्ठदशमाः सेवकाः । तृतीयसप्तमैकादशाः पोषकाः । द्वादशाष्टमचतुर्था घातकाः । स्वराशिमारभ्य गणनं त्रिनवखण्डं मण्डलं कृत्वा तेषु अश्विन्याद्यक्षराण्यग्रकोष्ठादारभ्य लिखित्वा

जन्म सम्पत् विपत् क्षेमः प्रत्यरिः साधको वधः ।
मैत्रं परममैत्रं च जन्मादिषु पुनः पुनः ॥

इत्युक्तप्रकारेण स्वनामाक्षरं स्वनक्षत्राक्षरं चारभ्य मन्त्राक्षरपर्यन्तं गणिते सम्पत्क्षेमसाधकमैत्र परममैत्राणाम् अन्यतमं चेत् भवति तर्हि शोभनम् ।

अथ नामानुकूल्यं षोडशकोष्ठं मण्डलमालिख्य ईशानकोष्ठमारभ्य एकैकान्तरितम् अकारादिक्षकारान्तानि अक्षराणि तत्र लिखित्वा । नामाद्यक्षरयुक्तं खण्डचतुष्टयम् आरभ्य सिद्धसाध्यसुसिद्धारित्वेन जानीयात् । सिद्धसिद्धो यथोक्तजपादिना सिध्यति । सिद्धसाध्यो द्विगुणात् । सिद्धसुसिद्धोऽर्धेन । सिद्धारिर्बान्धवान् हन्ति । साध्यसिद्धादयो विघ्ननैरर्थक्यस्त्रीनाशगोत्रनाशान् प्रयच्छन्ति । सुसिद्धसिद्धोऽर्धजपात् । तत्साध्यः त्रि[द्वि]गुणजपात् । तत्सुसिद्धो ग्रहणादेव सिद्धिदः । तदरिर्भ्रातिहानिदः । अरिसिद्धादयः पुत्रपुत्रोपत्ग्रामहानिदाः ।

नृसिंहार्कवराहाणां प्रासादप्रणवस्य च वैदिके पिण्डमन्त्रे च न सिद्धादि-परीक्षणमावश्यकम् ।

अथ कुलाकुलविभागः ।

मन्त्रनामाद्यक्षरयोः एकभूतसम्बन्धित्वे एककुलता । पार्थिवानाम् आप्यानि मित्राणि । आग्नेयानां मारुतानि मित्राणि । पार्थिवाप्यानां मारुतानि शत्रवः । आग्नेयानाम् आप्यानि शत्रवः । आप्यानां तैजसानि च शत्रवः । नाभसानि सर्वाविरुद्धानीति ।

अथ ऋणधनविभागः । साधकनामाक्षराणि मन्त्राक्षराणि च अजभ्झ-ल्विभागेन गणित्वाऽष्टशः परित्यक्ते यस्याऽक्षरमधिकं भवति सोऽधमर्णः । अन्यः उत्तमर्णः । साधकाक्षरस्योत्तमर्णत्वे शोभनम् ।

शत्रुमरणादिशब्देन मन्त्रदोषाणामपि सूचितत्वात् तच्छुद्धये प्रयोगः कथ्यते । योनिबन्धपूर्वकं बीजबिन्द्वादिक्रमेण उन्मन्थन्तं गत्वा तत्रस्थो यं मन्त्रं सहस्रवार-मावर्तयेत् स शुद्धो निर्दोषो भवति ।

मातृकापद्मं लिखित्वा स्वेष्टमन्त्रं तत उद्धरेत् । इदं जननम् । प्रणवान्तरितान् मन्त्रवर्णान् जपेत् शताद्वय्या । एतज्जीवनम् । भूर्जे मन्त्रवर्णानालिख्य वायुबीजेन प्रत्येकं शतं शतं ताड़येत् । एतत्ताड़नम् । तथैव लिखित्वा मन्त्रवर्णसंख्यं करवीरपुष्पैरग्निबीजेन ताड़येत् । एतत् बोधनम् । स्वतन्त्रोक्तप्रकारेणाऽश्वत्थ-पल्लवेनाऽष्टशतमभिषिञ्चेत् । अयमभिषेकः । सञ्चिन्त्य मनसा मन्त्रान् ज्योति-र्मन्त्रेण मलत्रयं संदहेत् । एतद्विमलीकरणम् । ओं क्लीं नम इति ज्योतिर्मन्त्रः । स्वजप्तेन कुशोदकेन प्रतिवर्णप्रोक्षणम् आप्यायनम् । नाम्ना स्वेन तर्पणं तर्पणम् । तारमाया रमायोगो दीपनम् । अन्येषामप्रकाशनं गोपनम् । इत्थं दशधा शोधिते छिन्ना रुद्धा इत्यादयो दोषाः नश्यन्ति । *

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे

चतुर्थः पटलः ।

पञ्चमः पटलः ।

अथ प्रवक्ष्ये विधिवन्मनूनां दीक्षाविधानं जगतो हिताय ।
येनोपलब्धेन समाप्नुवन्ति सिद्धिं परत्रेह च साधकेशाः ॥ १

दद्याच्च दिव्यभावं क्षिणुयाद्दुरितान्यतो भवेद्दीक्षा ।
मननात्तत्त्वपदस्य त्रायते इति मन्त्रमुच्यते भयतः ॥ २

दैवादिकस्याऽप्यथ मानुषादेः पित्रादिकस्याऽप्यथ वत्सरस्य ।
आदिं समारभ्य समग्रसम्पद्यत्नेन दीक्षाविधिमारभेत ॥ ३

शुभकर्मणि दीक्षायां मण्डपकरणे गृहादिविधिषु तथा ।
विहितो वास्तुबलिः स्याद्रक्षोविघ्नोपशान्तिसम्पद्धाः ॥ ४

अभवत् पुराऽथ किल वास्तुपुमानिति विश्रुतो जगदुपद्रवकृत् ।
चतुरस्रसंस्थितिरसौ निहतो निहितः क्षितौ सुरगणैर्दितिजः ॥ ५

अदीक्षितानामुक्तन्यासादिषु अनधिकारात् तत्सिद्धये साङ्गोपाङ्गदीक्षाकथनाय पञ्चम षष्ठपटलारम्भः ।

अतोऽथशब्दो हेत्वर्थः । विधिवदिति वेदाविरुद्धत्वमुक्तम् । जगतो हितार्थत्वमेव दर्शयति—येनेति । न केवलं दीक्षालाभमात्रेण ऐहिकामुष्मिक पुरुषार्थलाभः । किन्तु तत्पूर्वकमन्त्रसाधनादेव इत्याह—साधकेशा इति ॥ १ ॥

दीक्षाशब्दनिर्वचनेन दीक्षायाः सिद्धिदानसामर्थ्यं दर्शयति—दद्यादिति । दाञ् दाने । क्षि क्षये । इति धातुद्वयनिष्पन्नत्वात् दीक्षाशब्दस्येत्यर्थः । दीक्षाया अपि मन्त्रयोगः सामर्थ्यहेतुरिति वदन् मनुशब्दपर्यायं मन्त्रपदं निर्वक्ति—मननादिति ॥ २ ॥

दीक्षाकालं नियमयन्नाचार्यस्य नियममाह—दैवादिकस्येति । दैवशब्दादय आदौ येषां वत्सराणां ते तथोक्ताः । आदिं पूर्वपक्षमित्यर्थः । देवा ब्रह्माद्याः पञ्चमूर्तयो हृदादिस्थानगताः । मानुषः साधकः पिता आचार्यः । एषामादिभूतस्य वत्सरस्य वत्सान् देवादीन् व्याप्य रौतीति वत्सरः । तस्यादिं स्पर्शव्यापिन्यादिशक्तिं समालभ्य समः शिष्यात्मनः अग्रसम्पत्तिः परमपदप्राप्तिस्तत्साधकेन यत्नविशेषेण युक्तः सन् आचार्यो दीक्षाविधिमारभेत् इत्याचार्यस्य नियम उक्तः ॥ ३ ॥

तद्देहसंस्थिता ये देवास्ते विश्रुतास्त्रिपञ्चाशत् ।
मण्डलमध्येऽभ्यर्च्या यथा तथोक्तक्रमेण वक्ष्यन्ते ॥ ६

कृत्वाऽवनिं समतलां चतुरस्रकृष्णा-
मष्टाष्टकोद्यतपदाञ्च सकोणसूत्राम् ।
तस्यां चतुष्पदसमन्वितमध्यकोष्ठे
ब्रह्मा तु साधकवरेण समर्चनीयः ॥ ७

प्राग्याम्यवारुणोदग्दिक्कोष्ठचतुष्पदेषु समभियजेत् ।
आर्यकमथ सविवस्वत्संज्ञमथ मित्रं महीधरं क्रमशः ॥ ८
कोणद्वयार्धकोष्ठेष्वर्च्याः सावित्रसवितृशक्राह्वाः ।
सेन्द्रजयरुद्रतज्जयसापश्च वत्सकस्तथाऽग्न्याद्याः ॥ ९
अस्रे पार्श्वोत्थपदे द्वन्द्वे शर्वं गुहार्यमणौ च यजेत् ।
जम्भकपिलिपिच्छाख्यौ चरकिविदार्यौ च पूतना प्रोक्ता ॥ १०
अर्धपदाद्यन्तासु च चतसृषु दिक्षु क्रमेण बहिरर्च्याः ।
वासवयमजलेशशशिनामष्टावष्टौ च मन्त्रिणा विधिना ॥ ११
ईशानाख्यः सपर्जन्यो जयन्तः शक्रभास्करौ ।
सत्यो वृषोऽन्तरिक्षश्च देवताः प्रागुदीरिताः ॥ १२
अग्निः पूषा च वितथो यमश्च गृहरक्षकः ।
गन्धर्वो भृङ्गराजश्च मृगो दक्षदिगाश्रिताः ॥ १३
निर्ऋतिर्दौवारिकश्च सुग्रीवो वरुणस्तथा ।
पुष्पदन्तासुरौ शेषोरगौ प्रत्यग्दिगाश्रिताः ॥ १४

उद्यतपदाञ्चेति चकारेण कोणचतुष्के कोष्ठचतुष्कमपरं गुरुगणेशदुर्गाक्षेत्रेश-यजनार्थं सूचितम्। ब्रह्मा त्विति तस्य सरस्वतीसाहित्यमुक्तम्। साधकवरेणेति। मध्ये ब्रह्मपीठादिपूजनमुक्तम्। अणिमादिसर्वसिद्ध्यन्ता ब्रह्मनवशक्तयः। ओं सर्वज्ञानक्रियाव्यक्तकमलासनाय योगपीठाय नम इति पीठमन्त्रः। ओं नमो ब्रह्मण इति मूलमन्त्रः। प्रजापतिः ऋषिः। पंक्तिश्छन्दः। ब्रह्मा देवता। अक्षरैरङ्गानि। स्रुक्स्रुवदण्डकमण्डलुधरो ब्रह्मा ध्येयः ॥ ४॥५॥६॥७ ॥

कोणेषु स्थितमर्धकोष्ठद्वयं कोणद्वयार्धकोष्ठं तेष्वित्यर्थः ॥ ८।९॥१० ॥

मन्त्रिणेति। ब्रह्मणः पार्श्वयोः विष्णुरुद्रयोः स्वस्वमन्त्रेण पूजनमुक्तम्।

वायुर्नागश्च मुख्यश्च सोमो भल्लाट एव च ।
अर्गलाख्यो दितिस्तद्वददितिः सौम्यदिग्गताः ॥ १५
इतीरितानामपि देवतानां चित्राणि कृत्वा रजसा पदानि ।
पयोऽम्बुसा साधु बलिः प्रदेयो द्रव्यैश्च वा तन्त्रविशेषसिद्धैः ॥ १६
भूयो भूमितले समे विरहिते रोमास्थिलोष्टादिभिः
कर्तव्यं नवसप्तपञ्चकमितैर्हस्तैः परीणाहतः ।
युक्तं द्वारचतुष्ककल्पितपयोभूरुट्चतुस्तोरणं
दर्भस्रक्परिवीतमुज्ज्वलतरं स्यात् संवृतं मण्डपम् ॥ १७
सप्ताहतो वा नवरात्रतो वा प्रागेव दीक्षादिवसाद् यथावत् ।
सपालिकापञ्चमुखीशरावचतुष्टये बीजनिवापमुक्तम् ॥ १८
अन्यस्मिन् भवने सुसंवृततरे शुद्धे स्थले मण्डलं
कुर्यात् प्राग्वरुणायतं पदचतुष्कोपेतभानूदरम् ।

विधिनेति । पीठादिपूजापूर्वकमित्यर्थः ॥ ११॥१२॥१३॥१४॥१५ ॥

इतीरितानामपीति अपिशब्दः क्षेत्रपालादिसूचनार्थः । साध्विति मुष्टिमात्रैः दर्भाग्रैः सकूर्चैः पदानि आस्तीर्य तां तां देवतामावाह्य जलादिभिः सम्पूज्य प्रणवशक्तिपूर्वैः नमोऽन्तैः नामभिः बलिर्देय इत्यर्थः । द्रव्यैश्च वा तन्त्रेति । दध्याज्यगुडमिश्रमन्नं ब्रह्मणः पायसकृसरमाषान्नमुद्गान्नगुलान्नघृतान्नदध्यन्नैरेकैकस्य वर्गस्य बलिरित्यर्थः ॥ १६ ॥

रोमादिकमुद्धृत्य पुण्याहं वाचयित्वा शुभनक्षत्रादियुते काले मण्डपं विधातव्यम् । एककलशपक्षे पञ्चहस्तं मण्डपम् । नवकलशपक्षे सप्तहस्तम् । अष्टोत्तरशतपक्षे नवहस्तम् । सहस्रपक्षे सप्तपञ्चकमितम् । पञ्चत्रिंशद्धस्तमानमित्यर्थः । स च षोडशस्तम्भयुतः । मध्ये चत्वारः प्रान्तेऽवशिष्टाः । मध्या अष्टहस्तप्रमाणाः । अन्ये पञ्चहस्तप्रमाणाः । तेषां पञ्चमोंऽशो भूमौ खातव्यः । तोरणस्तम्भाः सप्तहस्ताः । तदर्धाः फलकाः । शूलानि हस्तमानानि । ध्वजाष्टकं लोकपालप्रभम् । मध्येऽरत्निमात्रोन्नतं मण्डलार्थं स्थानं कल्पयेत् ॥ १७ ॥

दीक्षादिवसात् यथावदिति । पुण्याहादिपुरःसरमित्यर्थः ॥ १८ ॥

अन्यस्मिन् भवने दीक्षामण्डपोत्तरभागस्थ इत्यर्थः । पदचतुष्केति । पञ्चहस्तप्रमाणानि द्वादशाङ्गुलान्तराणि पूर्वापरायतानि पञ्च सूत्राणि निपात्य । दक्षिणोत्तरसूत्राण्येकादशाऽर्पयित्वा । पङ्क्त्या सर्वतो वीथ्यो विधातव्याः ।

पीतारक्तसितासितं प्रतिपदं वङ्क्राद्यादिशर्वान्तिमं
याम्योदीच्यसमायतं प्रणिगदन्त्यन्ये च तन्मन्त्रिणः ॥ १९
वैष्णव्यस्त्वथ पालिका अपि चतुर्विंशाङ्गुलोच्छ्रायका
वेरिञ्चो घटिकास्तु पञ्चवदना द्व्यष्टाङ्गुलोत्सेधकाः ।
शैवाः स्युर्द्विषड्ङ्गुला अपि शरावाह्वा जलक्षालिताः
सूत्रैश्च प्रकलय्य पङ्क्तिषु च ताः प्रोक्तक्रमाद्विन्यसेत् ॥ २०
पृथगपि शालीतण्डुलपूर्णासु सदर्भबद्धकूर्चासु ।
मृद्वालुकाकरीषैः क्रमेण पूर्णानि तानि पात्राणि ॥ २१
शालीकङ्गुश्यामाकतिलसर्षपमुद्गमाषनिष्पावाः ।
खल्वाढ़किसमेता बीजानि विदुः प्ररोहयोग्यानि ॥ २२
प्रक्षाल्य तानि निवपेदभिमन्त्र्य मूल-
बीजेन साधकवरस्त्वथ पात्रकेषु ।
विप्राशिषा च विधिवत् प्रतिपाद्यमान-
शङ्खादिमुख्यतरपञ्चमहास्वनैश्च ॥ २३
हारिद्राद्भिः सम्यगभ्युक्ष्य वस्त्रैराच्छाद्याऽद्भिः सिच्यतां पञ्चघोषैः ।
सायंप्रातःशर्वरीषु प्रदद्यादुक्तैर्द्रव्यैस्तद्बलिं साधकेशः ॥ २४
भूतपितृयक्षनागब्रह्मशिवा देवताश्च विष्ण्वन्ताः ।
ताभ्यः क्रमेण रात्रिषु सप्तसु नवसु वा तद्बलिर्देयः ॥ २५

ततश्चोक्तरजसाऽऽपूर्य वीथ्यः श्यामेन पूरणीयाः इत्यर्थः ॥ १९ ॥

अपि चतुर्विंशाङ्गुलोच्छ्रायका इति तदर्धमुखविस्तारः सूचितः । मुखार्धोधोविस्तारश्च । घटिकास्त्विति । षड्ङ्गुलमुखपरिमाणत्वं तावत् परिमाणपृष्ठत्वं चोक्तम् । द्विषड्ङ्गुला अपीति । द्वादशाङ्गुलमुखत्वं तदर्धाधोभागत्वं चोक्तम् । पङ्क्तिषु चेति पश्चिमादि विन्यसेदित्यर्थः । प्रोक्तक्रमो वङ्क्राद्यादिशर्वान्तिकः ॥ २०॥२१॥२२ ॥

साधकवर इति प्रक्षालनायाऽमृतबीजं सूचितम् । दुन्दुभ्यादयस्तालादयो वीणादयो मुखवाद्यादयः शङ्खादयश्च पञ्चमहाशब्दाः । विधिवत् प्रतिपाद्यमानेति । उचिततालशब्द विशेषेणेत्यर्थः ॥ २३ ॥

तद्बलिं साधकेश इति । प्रागादिदिक्षु दानं सूचितम् ॥ २४—२९ ॥

लाजातिलनक्तरजोदधिशक्त्वन्नानि भूतक्रूराख्यम् ।
पैचं तिलतण्डुलकं सोडुम्बरिकधानलाजकं याक्षम् ॥ २६
क्षीरोदशक्तुपिष्टं नागं पद्माक्षतञ्च वैरिञ्चम् ।
अन्नापूपं शैवं गुड़ौदनं वैष्णवं च दौग्धान्नम् ॥ २७
कृशरञ्च वैष्णवेयं यदि नवरात्रं क्रमेण बलिरुक्तः ।
तारादिकैर्नमोऽन्तैः स्वैः स्वैरपि नामभिश्च बलिमन्त्रः ॥ २८
पात्राणि वि[वि]विधान्यपि परितः पुनरष्टदिक्षु बलिकृद्भिः ।
बीजारोपणकर्म प्रथितमिदं सार्वकामिकं भवति ॥ २९

प्रागेव लक्षणयुतानि च मण्डपेऽस्मिन्
कुण्डानि कारयतु सम्यगथो दिशासु ।
आखण्डलार्कसुतवारिधनाधिपानां
दोर्मात्रकाणि विलसद्गुणमेखलानि ॥ ३०

चतुरस्रमर्धशशिबिम्बविलसितमथ त्रिकोणकम् ।
पद्मदलरुचिरवृत्तमिति ब्रुवते बुधा विधिषु कुण्डलक्षणम् ॥ ३१

विंशत्या चतुरधिकाभिरङ्गुलीभिः
सूत्रेणाऽप्यथ परिसूत्र्य भूमिभागम् ।
ताभिश्च प्रखनतु तावतीभिरेकां
त्यक्त्वा चाऽङ्गुलिमपि मेखलाश्च कार्याः ॥ ३२

सत्त्वपूर्वकगुणान्विताः क्रमात् द्वादशाष्टचतुरङ्गुलोच्छ्रिताः ।
सर्वतोऽङ्गुलिचतुष्कविस्तृता मेखलाः सकलसिद्धिदा मताः ॥ ३३

योनिस्तत्पश्चिमायामथ दिशि चतुरस्रस्थलारब्धनाला
तन्मध्योल्लासिरन्ध्रोपरि परिविततात्त्वत्थपत्रानुकारा ।

प्रागेवेति मण्डलनिर्माणादित्यर्थः ॥ ३० ॥ ३१ ॥

ताभिश्च प्रखनत्विति । मेखलोच्छ्रायेण सार्धमिति द्रष्टव्यम् । तावतीभिः मेखलाश्च कार्या इति । मेखलाविस्तारः समुच्चित्योक्तः । तत्राधो मेखलाविस्तारो द्वादशाङ्गुलः । मध्यमेखलाया अष्टाङ्गुलः । ऊर्ध्वमेखलायाश्चतुरङ्गुलः । इति मिलित्वा चतुर्विंशाङ्गुलविस्तारत्वं विवक्षितम् । उच्छ्रायश्चैवमेव द्रष्टव्यः । ॥ ३२ ॥ ३३ ॥

उत्सेधायामकाभ्यां प्रकृतिविकृतिसंज्ञाङ्गुलाऽष्टाङ्गुला स्या-
द्विस्तृत्या द्वादशार्धाङ्गुलमितनमिताग्रा निविष्टैव कुण्डे ॥ ३४
अथवा दिशि कुण्डमुत्तरस्यां प्रविदध्याच्चतुरस्रमेकमेव ।
गदितैरपि लक्षणैः समेतापघनं दृष्टिमनोहरञ्च कान्त्या ॥ ३५

ततो मण्डपमध्ये तु स्थण्डिलं गोमयाम्बुना ।
उपलिप्य यथान्यायं तस्य मध्ये निधापयेत् ॥ ३६
सूत्रं प्राक्प्रत्यगात्तागं विप्राशीर्वचनैः सह ।
गुणितेनाऽभितो मत्स्यौ मध्यादारभ्य विन्यसेत् ॥ ३७
तन्मध्यस्थितयाम्योदगग्रं सूत्रं निधापयेत् ।
ततो मध्यात् सपद्वस्तमानेन च दिशं प्रति ॥ ३८

चतुरस्रस्थलेति । पृथिवीस्थानारब्धनालेत्यर्थः । तन्मध्योल्लासिरम्ब इति । तस्य नालस्य मध्यमेखलाया वा मध्ये विलसितरम्भेत्यर्थः । उत्सेधायामकाभ्यामिति । उत्सेधेन आयामेन च प्रकृतिविकृतिसंज्ञाङ्गुलाऽष्टाङ्गुला च प्रत्येकं पञ्चदशाङ्गुलेत्यर्थः । द्वादशार्धाङ्गुलेति । उपक्रमे द्व्यङ्गुला । ततो दशाङ्गुला । मध्ये पञ्चाङ्गुला । अवसानेऽङ्गुलविस्तृतेत्यर्थः । शतार्धहोमे मुष्टिमितानि कुण्डानि । शतहोमेऽरत्निमितानि । सहस्रहोमे पञ्चाङ्गुलाधिकारत्निमितानि । अयुतहोमे दशाङ्गुलाधिकारत्निमितानि । अर्धलक्षहोमे पञ्चदशाङ्गुलाधिकारत्निमितानि । लक्षहोमे विंशत्यङ्गुलाधिकारत्निमितानि । पञ्चाशल्लक्षहोमे कोटिहोमे च कराष्टकमितानि । सर्वेष्वपि कुण्डेषु प्रथममेखलोच्छ्रायेण तुल्यं खातम् । कण्ठोऽष्टयवैः हस्तमात्रे अरत्निमात्रे षड्भिः मुष्टिमिते चतुर्भिः अन्येषु अङ्गुलिद्वयवद्दध्या कण्ठः कर्तव्यः । मुष्टिमिते प्रथमा मेखला दशाङ्गुला । द्वितीयतृतीये त्र्यंशे अरत्निमिते प्रथमा द्वादशाङ्गुला । द्वितीयतृतीये त्र्यंशे हस्तमानेऽपि प्रथमा मेखला द्वादशाङ्गुला । अन्ये पूर्ववत् । अन्येषां कुण्डानामङ्गुलिद्वयवद्वितः प्रथमा मेखला । अन्ये त्र्यंशे कार्ये । सर्वत्र कण्ठमानेनाऽन्तःप्रविष्टा योनिः कार्या ॥ ३४ ॥ ३५ ॥

यथान्यायमिति । ईशानकोणावसानत्वमभ्युक्षणादिकं च सूचितम् ॥ ३६ ॥

गुणितेनेति । सूत्रद्विगुणितं कृत्वा तेन गुणितेन सूत्रेण प्राक्प्रसृतसूत्रस्याऽभितो मध्याद् द्विगुणितस्यापि उभयतो मध्यादारभ्य उभयतो मत्स्यौ विन्यसेदित्यर्थः । सपद्वस्तेत्यत्र पादशब्दशः षट् त्रिंशदङ्गुलवचनः । "पादः षट्

सूत्रेषु मकरान् न्यसेत् स्पष्टानन्योन्यतः समान् ।
सूत्राग्रमकरेभ्यस्तु न्यसेत् कोणेषु मत्स्यकान् ॥ ३९
कोणमत्स्यस्थिताग्राणि दिक्षु सूत्राणि पातयेत् ।
ततो भवेच्चतुष्कोष्ठं चतुरस्रञ्च मण्डलम् ॥ ४०
तत्राऽग्निमारुतं सूत्रं नैर्ऋतेशञ्च पातयेत् ।
प्राग्याम्यवारुणोदीच्यसूत्राग्रमकरेषु च ॥ ४१
निहिताग्रयुगं सूत्रचतुष्कं प्रतिपादयेत् ।
कृते एवं भवेयुस्ते कोणकोष्ठेषु मत्स्यकाः ॥ ४२
तेषु प्राग्वारुणांस्तन्तून् याम्योदीच्यान्निपातयेत् ।
षट्पञ्चाशत्पदानि स्युरधिकानि शतद्वयात् ॥ ४३
यदा तदाऽथो विभजेत् पदानि क्रमशः सुधीः ।
पदैः षोड़शभिर्मध्ये पद्मं वृत्तत्रयान्वितम् ॥ ४४
अष्टचत्वारिंशता ते राशिः स्याद्वीथ्यशीतिभिः ।
सद्वादशैः शतपदैः शोभायुग्द्वारकोणकम् ॥ ४५
द्वाराणि पदषट्कानि शोभाख्याः स्युश्चतुष्पदाः ।
चतुष्पदाश्चोपशोभाः षट्पदं कोणकं भवेत् ॥ ४६
वृत्तवीथ्योरारचयेन्मध्ये सूत्रचतुष्टयम् ।
प्राग्याम्यवारुणोदीच्यं भवेत्तद्राशिमण्डलम् ॥ ४७
कर्णिकायाः केसराणां दलसन्धेर्दलस्य च ।
दलाग्रवृत्तराशीनां वीथ्याः शोभोपशोभयोः ॥ ४८
वृत्तानि चतुरस्राणि व्यक्तं स्थानानि कल्पयेत् ।
भवेन्मण्डलमध्यार्धे कर्णिका चतुरङ्गुला ॥ ४९
द्व्यङ्गुलाः केसराश्च स्युः सन्धिश्च चतुरङ्गुलः ।
तथा दलानां मानन्तदग्रं द्व्यङ्गुलकं भवेत् ॥ ५०

त्रिंगदङ्गुलः" इत्यासवचनात् । यथा यथा स्थित एवार्थः ॥ ३७—४८ ॥
मण्डलमध्यार्धं इति । मण्डलस्य मध्यं मण्डलमध्यं राशिमण्डलान्तः ।

अन्तरालं पृथग्वृत्तत्रये द्वाङ्गुलमुच्यते ।
ततश्च राशिचक्रं स्यात् स्वस्ववर्णविभूषितम् ॥ ५१
राशिमङ्गुलकैः कुर्यात् षड्भिर्नवभिरेव वा ।
द्वाविंशदङ्गुलं ह्येतत् परस्तात्तावदिष्यते ॥ ५२
वृत्तं चक्रमुशन्त्येके चतुरस्रञ्च तद्विदः ।
यदि वा वर्त्तुलमराः स्युश्च द्वादश राशयः ॥ ५३
ते स्युः पिपीलिकामध्या मातुलुङ्गनिभा अपि ।
चक्रं च चतुरस्रं च त्र्यस्रा द्वादश राशयः ॥ ५४
भवेयुः पङ्कजदलनिभा वा कथिता बुधैः ।
तद्बहौ रुचिरान् कुर्यात् चतुरः कल्पशाखिनः ॥ ५५
ललितान् रूढ़कुसुमान् फलपल्लवशोभितान् ।
जलजैः स्थलजैर्वापि सुमनोभिः समन्वितान् ॥ ५६
हंससारसकारण्डशुकभ्रमरकोकिलैः ।
मयूरचक्रवाकाद्यैरारूढ़विटपानतान् ॥ ५७
सर्वर्तुनिर्वृतिकरान् विलोचनमनोहरान् ।
तद्बहिः पार्थिवं कुर्यान्मण्डलं कृष्णकोणकम् ॥ ५८
मण्डलानि तु तत्त्वज्ञो राश्यन्तान्येव कारयेत् ।
राशावन्यत्र रचयेत् प्रमोहादन्यमण्डलम् ॥ ५९
आवाह्य देवतामन्यामर्चयंस्त्वन्यदेवताम् ।
उभाभ्यां लभते शापं मन्त्री तरलदुर्मतिः ॥ ६०
कालात्मकस्य देवस्य राशेर्व्यक्तिमजानता ।
कृतं समस्तं व्यर्थं स्यादज्ञेन ज्ञानमानिना ॥ ६१
तस्मात् सर्वप्रयत्नेन राशीन् साधिपतीन् क्रमात् ।
अवगम्याऽनुरूपाणि मण्डलानि च नान्यधीः ॥ ६२

तस्याप्यर्धे मध्य इत्यर्थः ॥ ४८ ॥ ५० ॥ ५१ ॥

षड्भिः नवभिरेव वेति । वृत्तराशिपक्षे षड्भिः । त्र्यस्रराशिपक्षे नवभि-

उपक्रमेदर्चयितुं होतुं वा सर्वदेवताः ।
रजांसि पञ्चवर्णानि पञ्चद्रव्यात्मकानि च ॥ ६३
पीतशुक्लारुणशितिश्यामान्येतानि भूतशः ।
हारिद्रं स्याद्रजः पीतं ताण्डुलञ्च सितं भवेत् ॥ ६४
तथा दोषारजः क्षारसंयुक्तं रक्तमुच्यते ।
कृष्णं दग्धपुलाकोत्थं श्यामं बिल्वदलादिकम् ॥ ६५
मितेन रजसा कार्याः सौमारेखा विपश्चिता ।
अङ्गुलोत्सेधविस्ताराः सर्वा मण्डलकर्मसु ॥ ६६
पीता स्यात् कर्णिका शुक्लपीतरक्ताश्च केसराः ।
दलान्यक्षान्यन्तरालं श्यामचूर्णेन पूरयेत् ॥ ६७
सितरक्तासितैर्वर्णैर्वृत्तत्रयमुदीरितम् ।
नानावर्णविचित्राः स्युश्चित्राकाराश्च वीथयः ॥ ६८
द्वारशोभोपशोभास्राः सितरक्तनिशासिताः ।
राशिचक्रावशिष्टानि कोणान्यस्रिषु यानि वै ।
पीठपादानि तानि स्युररुणान्यसितानि च ॥ ६९
अथवाऽरुणानि दलानि च तथा दलसन्धिरप्यसितरुग्भवति ।
असितारुणाच्छरजसा विहितान्यपि वर्तुलानि कथयन्त्यपरे ॥ ७०

इति श्रीप्रपञ्चसारे पञ्चमः पटलः ।

रित्यर्थः । द्वात्रिंशदङ्गुलमिति । पादः षट् त्रिंशदङ्गुल इत्यस्मिन् पक्षे पक्षान्तरे अपि त्रिंशद्द्वयाङ्गुलं षड्ङ्गुलमित्यर्थः ॥ ५२—६८ ॥

राशिचक्रावशिष्टानीति वृत्तराशिपक्षे द्रष्टव्यम् ॥ ६९ ॥

अथवाऽरुणानीति वैष्णवादौ विशेषोऽभिहितः ॥ ७० ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
पञ्चमः पटलः

षष्ठः पटलः ।

अथ पुनराचम्य गुरुः प्राग्वदनो विष्टरोपविष्टः सन् ।
प्राणायामं सलिपिन्यासं कृत्वा न्यसेत्तद्ऋष्यादीन् ॥ १

अथ पुनरिति । एवं साधनसंपत्त्यानन्तर्यमथशब्दार्थः । पुनराचम्येति । नित्याचमनव्यतिरेकेण पुनराचमनविधानात् । स्नानपूजादिकमपि नित्यानन्तरं पृथक् कर्तव्यमिति सूचितम् । अतस्तदुच्यते । ब्राह्मे मुहूर्त्ते उत्थाय । देवतां ध्यात्वा । कर्मसमर्पणं विधाय । हंसपूजां संकल्प्य । सुशुद्धः । स्वाचान्तः । सकलीकृत्य अस्त्रेण मृदं खनित्वा । हृदयेनादाय । शिरसा जलतीरेऽस्त्रशोधिते धृत्वा । शिखया शर्करादिकमुद्धृत्याऽस्त्रेण संप्रोच्य । नेत्रेण संवीच्य । कवचेन त्रिधा विभज्य । मूलेनाऽभिमन्त्र्य । भागेनाऽस्त्रमन्त्रेणाऽङ्गानि प्रक्षाल्य । भागान्तरमापादतलमस्तकमालिप्य । तीर्थमवगाह्य । निमज्याऽस्त्रमन्त्रं शक्त्यावर्त्य । उन्मज्य आचम्याऽपरं मृद्भागं त्रिधा विभज्याऽस्त्राङ्गमूलैरेकैकमभिमन्त्र्य अस्त्रजप्तं दिक्षु रक्षार्थं निक्षिप्याऽङ्गजप्तेनात्मानमालभ्याऽपरं हृन्मन्त्रानीते तीर्थे मूलेन विलोड्य । निमज्य मूलं शक्तितोऽनुसन्धाय । साङ्गेन मूलेनाऽभिषिच्य । तीरमागत्याचम्य । अस्त्रप्रोक्षितं वासः परिधायाचम्य । सकलीकृत्य । पूजाक्रमेण सन्तर्प्यीद्दास्य । द्वास्थः सूर्यमुपस्थाय । यागमण्डपं गत्वा । वेदमन्त्रैः आचम्याथर्वाङ्गाग्निभिः संमृज्य । चक्षुरादिकं तत्तद्देवतामन्त्रैरुपस्पृशेत् । पुनः सवित्रेऽर्घ्यं दत्त्वा । सामान्यार्घ्येण द्वारपूजां कुर्यात् । अस्त्रजप्तोदकेन द्वारं संप्रोच्य । गं गणपतये । श्रीं लक्ष्म्यै । सां सरस्वत्यै नम इत्यूर्ध्वभागे संपूज्य । गं गणपतये । क्षं क्षेत्रपालाय । गं गङ्गायै । यं यमुनायै नम इति दक्षसव्यभागयोः । ततो देहल्यामस्त्रं संपूज्याऽस्त्रदृष्टस्त्रोदकास्त्रपार्ष्णिघातैर्दिव्यादिव्यविघ्नान् उत्सार्य वामशाखाश्रयेण देहलीं लङ्घयित्वा । निर्ऋतिकोणे वास्त्वीशं ब्रह्माणं च संपूज्य । पञ्चगव्यार्घ्यतोयाभ्याम् अस्त्रेण मण्डलमभ्युक्ष्य । मूलमन्त्रेण संवीक्ष्याऽस्त्रेण संप्रोक्ष्य । तेनैव दर्भैः सन्ताड्य । वर्मणाऽभ्युक्ष्य । तेनैव चन्दनागरुकर्पूरैः सन्धूप्य । लाजाचन्दनसिद्धार्थभस्मदूर्वाकुशाक्षतान् अस्त्रेण सप्तजप्तान्मण्डपे विकीर्याऽस्त्रजप्तदर्भमुष्टिना तान् संमार्ज्य । ईशानकोणे वर्धन्यासनत्वेन तानि सङ्कल्पयेत् । पुण्याहं वाचयित्वाऽत्र ब्राह्मणान् भोजयित्वा तत्र मण्डलमुक्तलक्षणं कर्तव्यमित्येतत् सर्वमुक्तं—गुरुरिति ।

पुनरस्त्रप्रोक्षिते शुद्धे विष्टरे लिपिपद्ममध्यगप्रणवबिन्दौ प्राङ्मुख उदङ्मुखो वा बद्धासन उपविशेदित्याह—प्राग्वदन इत्यादिना।

विष्टरोपविष्ट इत्यनेनैव गुर्वादिवन्दनस्य अङ्गुलिकरशोधनस्य अपरिच्छिन्नताया जीवरक्षायाश्च सूचितत्वात्। तदुच्यते। विष्टरे परमात्मनि समष्ट्यात्मनि अस्त्रतेजसि गुर्वादिषु च मानसोपवेशो हि विष्टरोपवेशः। ओं ह्रीं परमात्माद्यशेषपारम्पर्यक्रमेण स्वगुरुपादाम्बुजं यावत्तावत् प्रणौमि इति शिरसि गुरुपरम्परां नत्वा। गं अस्मद्गुरुभ्यो नमः। गं गणपतये नमः। दुं दुर्गायै नमः। सां सरस्वत्यै नमः। क्षं क्षेत्रपालाय नमः। पं परमात्मने नमः। इति अंसोर्वग्रहृत्सु नत्वाऽस्त्रेण अङ्गुलिकरशोधनतालत्रयदिग्बन्धनाग्निप्राकारवेष्टनानि विधिवत् विधायाकारादिमन्त्रैः पादादिमस्तकान्तं व्यापकं कुर्वन्। अपरिच्छिन्नतनुर्भूत्वा। जीवरक्षां कुर्यात्। लृं वृं रृं यृं ह्रृं इति पादगुह्यहृन्मुखमस्तकेषु न्यसन्। भूतपारवश्यं हित्वा। ह्रीं स्त्रं ओं इति पादादिमस्तकान्तं व्यापकत्रयं कुर्वन्। कारणबन्धत्यागं चिद्रूपत्वोद्भावनं ब्रह्मलक्षणलक्षितत्वं च स्मृत्वा। हंसः सोऽहमिति मूलादिमस्तकान्तं मस्तकादिमूलान्तं च व्यापयन्। ब्रह्मात्मनोरैक्यं भावयेदिति जीवरक्षाप्रकारः।

अथ प्राणायामः कर्तव्य इत्याह—प्राणायामं सलिपिन्यासमिति। प्रथमं तावत् परिच्छिन्नं वायुं दक्षिणनासापुटेन विरेच्य। वामनासापुटेनापूर्य च सूर्यमण्डलस्थं वायुमण्डलं सबीजं धूम्रवर्णं सञ्चिन्त्य। सूर्यमण्डले स्वर्णवर्णान् विन्यस्य। पूरककाले तयोर्नाभावैक्यं सञ्चिन्त्य। कुम्भककाले शोषयित्वा। दक्षिणनासया विरेच्य। तस्यामेव सवायुमण्डलम् अग्निमण्डलं सञ्चिन्त्याऽग्निमण्डले व्यापकाक्षराणि विन्यस्य। हृदयस्थेनाऽग्निमण्डलेन पूरयन् एकीकृत्य। कुम्भककाले सन्दह्य। वामनासिकया विरेच्य। तस्यामेमृतमण्डलं सञ्चिन्त्य। तत्र स्वरान् विन्यस्य। तन्मूर्धस्थेनाऽमृतमण्डलेन एकीकृत्य। प्लावनं कुर्यात् इति प्राणायामप्रकारः।

अथवा यादिदशकं सधातुप्राणशक्त्यात्मसु न्यसन् तान् पञ्चीकृतभूतेषु संहरेत्।

अत्र प्राणशब्देनेन्द्रियादि प्रवृत्तिकारणमात्रम् उच्यते। शक्तिशब्देन ज्ञानवृद्धिकरमात्रम्। आत्मशब्देन जीवस्थितिकारणमात्रमिति विभागः। यादिन्यासेन तान् सञ्चिन्त्य। क्ष्मौमिति उत्कृष्य। पञ्चीकृतबीजानि मूर्धादिषु न्यसन् तान् तेषु संयोज्य। क्ष्रोमिति आप्याय्य। पञ्चीकृतपृथिव्यादिसंहाराय प्राणायामपञ्चकं विधाय। समानधनञ्जयान्तःकरणवाक्श्रोत्रपञ्चकेषु मनणअङादिपञ्चकान् न्यसन्

ऋषिर्गुरुत्वाच्छिरसैव धार्यः छन्दोऽक्षरत्वाद्रसनागतं स्यात् ।
धियाऽवगन्तव्यतया सदैव हृदि प्रदिष्टा मनुदेवता च ॥ २

ऋषिवर्णादिकौ धातू स्तो गत्या प्रापणेन च ।
याभ्यां यत्स्वरूपं स गुरुः स्याद्ऋषिवाचकः ॥ ३

इच्छादानार्थकौ धातू स्तश्छदाद्यश्च दादिकः ।
तयोरिच्छां ददातीति छन्दो मन्त्रार्णवाचकम् ॥ ४

आत्मनो देवताभावप्रदानाद्देवतेति च ।
पदं समस्ततन्त्रेषु विद्वद्भिः समुदीरितम् ॥ ५

हृदयशिरसोः शिखायां कवचाद्यस्त्रेषु सहचतुर्थीषु ।
नत्या हुत्या च वषड् हुं वौषट् फट्पदैः षड्ङ्गविधिः ॥ ६

तान् सञ्चिन्त्य । क्ष्म्रौमिति उत्क्रष्याऽपञ्चीकृतबीजानि मूर्धादिषु न्यसन् तेषु संयोज्य । क्ष्रौमित्याप्याय्याऽपञ्चीकृतभूतलयार्थं प्राणायामपञ्चकं विधायाऽकारादि-विसर्गान्तं नाभ्यादिगतब्रह्मब्रह्मादिषु न्यसित्वा । क्ष्म्रौमिति तानुत्क्रष्य । क्ष्रौमित्याप्यायनं कुर्वन् । कारणे संयोज्य । सत्वरजस्तमःसाम्यबीजतद्वासनाः संहरन् । प्राणायामषट्कं कृत्वा । कञ्चित्कालं स्वात्मन्यवस्थाय । निरवद्यादि-मन्त्रैः व्यापयन् । सर्वं सृष्ट्वा । मातृकान्यासं विधाय । वक्ष्यमाणक्रमेण पीठन्यासं कृत्वा । तत्तन्मूर्तिमन्त्रेण मूर्तिं सङ्कल्प्य । आवाहन स्थापनासन प्रतिष्ठा सन्निधान-सन्निरोध स्थैर्य स्वागत सुस्वागताभिमुख्यावगुण्ठनानि विधाय । करन्यासाङ्गुलि-न्यासव्यापकवर्णन्यासादिकान् न्यासान् विधायाङ्गर्ष्यादिकं न्यसेदित्यभिप्रायः ॥ १ ॥

ऋगतौ । षिङ् प्रापणे । इति एतौ ऋषिवर्णादिकौ धातू गत्या प्रापणेन चार्थेन युक्तौ । आभ्यां निष्पन्न ऋषिशब्दः ।

अथावयवार्थमभिधाय समुदायार्थमाह—यत्स्वरूपं याति स गुरुः स्याद्ऋषि-वाचक इति । यस्य परमात्मनः स्वरूपं याति । शिष्यो गुरुश्च सः परमात्मैव गुरुरूपेण स्थितः ऋषिवाचकः । ऋषिशब्दो वाचको यस्य स तथोक्तः इति देवतागुर्वात्मनामैक्यमुक्तम् ॥ २॥३ ॥

छदु इच्छायां दाण् दाने इतीच्छादानार्थौ धातू । तयो रूपं छन्दःशब्दः । समुदायार्थमाह—इच्छां ददातीति ॥ ४ ॥

दिव् क्रीड़ा विजिगीषा व्यवहार द्युति स्तुति मोद मदस्वप्नकान्तिगतिषु तच्छ्वत्च्छ तनुकरणे इति धातुद्वयनिष्पन्नो देवताशब्दः ॥ ५ ॥

हृदयं बुद्धिगम्यत्वात् प्रणामः स्यान्नमःपदम् ।
क्रियते हृदयेनाऽतो बुद्धिगम्या नमस्क्रिया ॥ ७
तुङ्गार्थं स्याच्छिरः स्वे स्वे विषयाहरणे द्विठः ।
शिरोमन्त्रेण चोत्तुङ्गविषयाहुतिरीरिता ॥ ८
शिखा तेजः समुद्दिष्टा वषड्डित्यङ्गमुच्यते ।
तत्तेजोऽस्य तनुः प्रोक्ता शिखामन्त्रेण मन्त्रिणः ॥ ९
कव ग्रहण इत्यस्माद्धातोः कवचसम्भवः ।
हुन्तेजस्तेजसा देहो गृह्यते कवचं ततः ॥ १०
नेत्रं दृष्टिः समुद्दिष्टा वौषड्दर्शनमुच्यते ।
दर्शनं दृशि येन स्यात्तत्तेजो नेत्रवाचकम् ॥ ११
असुवसादिकौ धातू स्तः क्षेपचलनार्थकौ ।
ताभ्यामनिष्टमाक्षिप्य चालयेत् फट् पदाग्निना ॥ १२

हृदयमिति परमात्मोच्यते । कथं हृत्स्थबुद्धिगम्यत्वादिति योज्यम् । समुदायार्थमाह—क्रियत इति । हृदयमन्त्रेणान्वयव्यतिरेकैरनात्मनो विविच्यात्मप्रतिपत्तिः क्रियत इत्यर्थः ॥ ६ ॥ ७ ॥

तुङ्गार्थमुत्कृष्टपरमात्मार्थं स्यात् । शिरःशब्दस्तस्मै सर्वविषयाहरणे स्वाहाशब्दो वर्तते । समुदायार्थमाह—शिर इति । उत्तुङ्गे परमात्मनि विषयस्य हृन्मन्त्रेण विविक्तस्याहुतिर्विलापनमुक्तम् । शिरोमन्त्रेणेत्यर्थः ॥ ८ ॥

एवमपवादं कृत्वाऽध्यारोपाय शिखामन्त्र इत्याह—शिखेति । तेजश्चिदात्मकं शिखेत्युपदिष्टम् । अङ्गं कार्यकरणात्मकं शरीरं वषड्डित्युच्यते । समुदायार्थमाह—तदिति । अस्य मन्त्रिणः स्वरूपभूतं तेजस्तनुः प्रोक्ता । तनोस्तत्र अध्यस्तत्वादित्यर्थः ॥ ९ ॥

आत्मन्यनात्माध्यासमभिधाय आत्मनोऽनात्मन्यध्यासमाह कवचेन—कव ग्रहण इति । तेजसा चैतन्येन देहः पूर्वोक्तो गृह्यते व्याप्यते यतस्ततः कवचमित्युच्यत इत्यर्थः ॥ १० ॥

अथाध्यासनिवर्तकं ज्ञानमाह नेत्रमन्त्रेण—नेत्रमिति दृष्टिः । दृष्टेः दृष्टिः परमात्मा । दर्शनं तदाकारं ज्ञानम् । समुदायार्थमाह—दर्शनमिति । दृष्टिरूपे परमात्मनीत्यर्थः ॥ ११ ॥

उत्पन्नज्ञानस्य संसारनिवृत्तिमाह अस्त्रेण—असुवसादीति । असुक्षेपणे

अङ्गमन्त्रा इमे प्रोक्ताः सर्वतन्त्रेषु मन्त्रिभिः ।
पञ्चैव यस्य मन्त्रस्य भवन्त्यङ्गानि मन्त्रिणः ॥ १३
सर्वेष्वपि च मन्त्रेषु नेत्रलोपो विधीयते ।
अङ्गुलीषु क्रमादङ्गैरङ्गुष्ठादिषु विन्यसेत् ॥ १४
कनिष्ठान्तासु तद्बाह्यतलयोः करयोः सुधीः ।
अस्त्रेण तालत्रितयं कृत्वा तेनैव बन्धयेत् ॥ १५
दिशो दश क्रमादङ्गषट्कं वा पञ्चकं न्यसेत् ।
जपारम्भे मनूनान्तु सामान्येयं प्रकल्पना ॥ १६
शङ्खं सगन्धपुष्पाक्षततोयं वामतः प्रविन्यस्य ।
साङ्गं मन्त्रं पूजामूर्तौ न्यसेत् गुरूपदेशेन ॥ १७

त्रस चलन इति धातू स्तः ॥ १२ ॥

मन्त्रिभिरिति सर्वज्ञादिपदयोगः सूचितः । तैश्च ज्ञानानन्दादिमात्रं लक्ष्यं निष्कलनिष्ठस्य । सकलनिष्ठस्य तु सर्वज्ञत्वादिशक्त्यात्मकत्वं तैरुच्यते । हृदयादिशब्दैरपि परिच्छिन्नापरिच्छिन्नसर्वज्ञत्वादिशक्त्यैक्यमुच्यते । सकलनिष्ठस्य त्वङ्गैक्यमेव उच्यत इति विभागः ।

मन्त्रिण इति नेत्रमन्त्रलोपेऽपि न मन्त्रित्वहानिरित्यर्थः ॥ १३॥१४ ॥

सुधीरिति । कस्यचित् कनिष्ठादिक्रमत्वं नमस्कारान्तत्वम् अङ्गुलीनाम् असंयोजनन्यासक्रमं च सूचितवान् ॥ १४॥१५ ॥

दिशो दश क्रमादिति च क्रमोऽन्य इति सूचितः ॥ १६ ॥

बाह्यपूजार्थं शङ्खपूरणक्रममाह— शङ्खमिति । न्यासानन्तरं ध्यात्वा । अर्घ्यादिभिरुपचारैः मनसा संपूज्य । किञ्चिज्जपित्वा । वामश्वासाग्रतोऽर्घ्यमण्डलं सामान्यार्घ्यजलेन विधाय अस्त्रेणार्घ्यपात्राधारं प्रक्षाल्य । रमित्यर्घ्यमण्डले प्रतिष्ठाप्य । तत्र व्यापककला न्यसित्वा अग्निमण्डलमन्त्रेणाऽभिमन्त्र्य । अर्घ्यपात्रमप्यस्त्रेण प्रक्षाल्य । हमिति सूर्यमण्डलं बुद्ध्याधारे संस्थाप्य । तत्र सूर्यकला न्यसित्वा । सूर्यमण्डलमन्त्रेणाऽभिमृश्य । मूलेन गन्धाक्षतादिकं निक्षिप्य । सम्मूलेन ब्रह्ममन्त्रेण सामान्यार्घ्यजलैरापूर्य । गामिति गालिनीं प्रदर्श्य । ठं अमृतीभव वं निर्विषीभव क्षौं सं इति अमृतीकरणनिर्विषीकरणगरुडसुरभिमुद्राः प्रदर्श्य ।

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

न्यसेच्च दक्षभागे सुमनःपात्रं तथाऽभितो दीपान् ।
अन्यत्साधनमखिलं पुरतो गन्धाक्षतादिकं मन्त्री ॥ १८
प्रथमं निजसव्यतो यथावत् प्रयजेद्देवमयान् महागुरून् स्वान् ।
गणनायकमन्यतश्च पाशाङ्कुशदन्ताभयहस्तमुज्ज्वलाङ्गम् ॥ १९
रक्तं धर्मं वृषतनुमथाऽग्नौ हरिं श्यामवर्णं
ज्ञानं रक्षोदिशि मरुति पीतञ्च वैराग्यसंज्ञम् ।
भूताकारं द्विरदतनुमैश्वर्यमीशे च कृष्णं
नञ्पूर्वैस्तैर्यजतु दिशि चित्राणि गात्राणि पीठे ॥ २०
मध्येऽनन्तं पद्ममस्मिंश्च सूर्यं सोमं वह्निं तारवर्णैर्विभक्तैः ।
सत्त्वादींश्च त्रीन् गुणानात्मयुक्ताञ्छक्तीः किञ्जल्केषु मध्ये यजेच्च ॥
श्वेताकृष्णारक्तापीताश्यामानलोपमाः प्रोक्ताः ।
अञ्जनजपासमानवर्णास्तेजोरूपाश्च शक्तयः प्रोक्ताः ॥ २२

इति तीर्थमावाह्य । तत्र स्वरकला न्यसित्वा । सोममण्डलमन्त्रेणाऽभिमृश्य । हृदयेनाऽष्टगन्धादिकं निक्षिप्य । शिरसा धेनुमुद्रां बद्ध्वा । शिखया लोलिन्याऽऽलोड्य । नेत्रेणाऽवलोक्य । कवचेनाऽवगुण्ठ्याऽस्त्रेण सतालत्रयं दिशो बद्ध्वा । आधारादिकम् अग्न्यादिमण्डलमन्त्रैः जलादिभिरभ्यर्च्य । पीठमन्त्रेण पुष्पाञ्जलिं कृत्वा । जलमध्ये देवमावाह्य । सकलीकृत्य । जलादिभिः संपूज्य अङ्गमन्त्रैरपि जलादिभिरर्चयित्वा । भगवन्तं मूलेन व्यापयन्निष्कलीकृत्याऽऽनन्दरूपेणाऽर्घ्यजलात्मनाऽवस्थितं भावयित्वा । समूलेन दक्षिणकरतलेन पात्रमुखमाच्छादयेत् । अष्टवारं मूलं जपित्वा । तदर्घ्यं करकोदके प्रक्षिप्य । ततः किञ्चिदादाय समूलेन करतले अर्घ्योदकं किञ्चिदादाय समूलेन वामतलेन पिधायाऽष्टवारं जपित्वा अन्ते पूजोपकरणमात्मानं च त्रिधा प्रोक्षयित्वा सर्वं सच्चिदानन्दरूपं भावयेदित्युक्तं गुरूपदेशेनेति ॥ १७ ॥

गन्धाक्षतादिकं मन्त्रीति मूलहृद्भ्यां तेषामभिमर्शनमुक्तम् ॥ १८ ॥

निजसव्यतो यथावदिति । प्रथमं न्यासस्थानेषु जलादिभिरात्मपूजां कृत्वा आत्मानमलङ्कृत्य सासनमूर्तिपूजापूर्वकं गुरुगणेशावर्चयेदित्यर्थः । देवमयानिति गुरुध्यानमुक्तम् । गुं परमगुरुभ्यो नमः । गुं परापरगुरुभ्यो नमः । गुं अपरगुरुभ्यो नमः । गुं अस्मद्गुरुभ्यो नमः । इति मन्त्रा महागुर्वादिपदसूचिताः । तत आधारशक्तिं मूलप्रकृत्यनन्तं पृथिवीं कल्पकवृक्षं रत्नमण्डपमन्त्रैः मध्ये

विन्यस्य कर्णिकोपरि शालींस्तदुपरि तण्डुलांश्च तथा ॥
तेषामुपरि च दर्भान् दर्भोपरि कूर्चमक्षतोपेतम् ॥ २३
त्रिगुणेन च तन्तुरूपभाजा परितोऽग्रो परिवेष्टितं यथावत् ।
लघुनाऽलघु धूपितञ्च कूर्चोपरि कुम्भं निदधातु तारजापी ॥ २४
न्यस्य दर्भमयकूर्चमक्षताद्यन्वितं सनवरत्नकं घटे ।
पूरयेत् सह कषादिकान्तगैरक्षरौषधिविपाचितैर्जलैः ॥ २५
अथवा दशमूलपुष्पदुग्धाङ्घ्रिपचर्मोत्क्वथितैः कषायतोयैः ।
स्तनजद्रुमचर्मसाधितैर्वा सलिलैः संयतधीः शुभोदकैर्वा ॥ २६
शङ्खे कषायोदकपूरिते च विलोड्य सम्यग्विधिनाऽष्टगन्धम् ।
कलाः समावाह्य विनिक्षिपेत्तत्क्वाथोदकापूर्णमुखे च कुम्भे ॥ २७
त्रिविधं गन्धाष्टकमपि शाक्तेयं वैष्णवञ्च शैवमपि ।
गन्धाष्टकेन शक्तिः स्यात् क्रमशो मन्त्रिणा कृतेऽनन्ता ॥ २८
चन्दनकर्पूरागुरुकुङ्कुमकपिमांसिरोचनाचोराः ।
गन्धाष्टकमपि शक्तेः सान्निध्यकरञ्च लोकरञ्जनकृत् ॥ २९
चन्दनक्रीवेरागुरुकुष्ठास्तगुशीरमांसिमुरमपरम् ।
चन्दनकर्पूरागुरुदलरुधिरकुशीतरोगजमपरम् ॥ ३०
अष्टत्रिंशत्प्रभेदेन याः कलाः प्रागुदीरिताः ।
गुरूपदेशक्रमतस्ता विद्वान् विनियोजयेत् ॥ ३१

संपूज्य धर्मादिकमुक्तस्थानेषु पूजयेत् । मध्ये यजेच्च इति चशब्दः पीठसमष्टि-मन्त्रपुष्पाञ्जलिसूचनार्थः ॥ १८॥२०॥२१॥२२ ॥

शालिविन्यसनादिकं पीठपूजायाः पूर्वमेव ॥ २३॥२४ ॥

सह कषादिकान्तगैरिति त्रिशः प्रतिलोमपठितेन मन्त्रेण सहेत्यर्थः ॥ २५ ॥

संयतधीः शुभोदकैर्वेति । विनाऽप्यौषधैस्तज्जन्यसामर्थ्योपादनक्षम इत्यर्थः ।

विलोड्य सम्यग्विधिनेति । समूलेन हृदयेनापूर्य । हृदयेनाऽष्टगन्धं निक्षिप्य । शिरसा धेनुमुद्रां प्रदर्श्य इत्यादिकं सूचितम् ॥ २६ ॥ २७ ॥

मन्त्रिणा कृतेऽनन्तेति । गन्धद्वारामिति मन्त्रस्य जपः सूचितः ॥२८॥२९॥३०॥

कलाः समावाह्येत्येतत् विवृणोति—अष्टत्रिंशदिति । गुरूपदेशक्रमत इति । आग्नेयसौरसौम्यक्रमेणेत्यर्थः । विद्वानिति । मण्डलमन्त्राणां जातवेदसे तत्सवितु

याः पञ्चाशत्कलास्तारपञ्चभेदसमुत्थिताः ।
पञ्चपञ्चकसम्भिन्ना विदुस्तास्तत्त्ववेदिनः ॥ ३२
सप्तात्मकस्य तारस्य परौ द्वौ तु परौ यतः ।
ततस्तु शक्तिशान्त्याख्यौ पठ्येते न परैः सह ॥ ३३
प्रथमं प्रकृतेर्हंसः प्रतद्विष्णुरनन्तरः ।
त्रैयम्बकं तृतीयं स्यात् चतुर्थस्तत्पदादिकः ॥ ३४
विष्णुर्योनिरितीत्यादिः पञ्चमः कल्प्यतां मनुः ।
चतुर्नवतिमन्त्रात्मा देवतावाह्य पूर्यताम् ॥ ३५
अत्र याः पञ्च संप्रोक्ता ऋचस्तारस्य पञ्चभिः ।
कलाप्रभेदैश्च मिथो युज्यन्ते ताः पृथक् क्रमात् ॥ ३६

त्रयम्बक इत्यृचां च क्रमेण संयोगं जानन्नित्यर्थः ॥ ३१ ॥

तारपञ्चभेदसमुत्थिता इत्यकारादिकलान्यासानन्तरम् अं ब्रह्मणे नमः उं विष्णवे नमः । मं रुद्राय नमः । ओं बिन्द्वात्मने ईश्वराय नमः । औं नादात्मने सदाशिवाय नम इति मन्त्राणामावाहनं सूचितम् । पञ्चपञ्चकसंभिन्ना इति । लं पृथिव्यात्मने गन्धतन्मात्रात्मने घ्राणात्मने उपस्थानन्दात्मने निवृत्त्यात्मने नमः । तथा वं अब्बात्मने रसतन्मात्रात्मने रसनात्मने पायुविसर्गात्मने प्रतिष्ठात्मने नमः । तथा रं अग्न्यात्मने रूपतन्मात्रात्मने चक्षुरात्मने पादगमनात्मने विद्यात्मने नमः । तथा यं वाय्वात्मने स्पर्शतन्मात्रात्मने त्वगात्मने पाण्यादानात्मने शान्त्यात्मने नमः । तथा हं आकाशात्मने शब्दतन्मात्रात्मने श्रोत्रात्मने वाग्वचनात्मने शान्त्यतीतात्मने नमः । इति पञ्चपञ्चकावाहनमुक्तम् ॥ ३२ ॥

शक्तिशान्तिकलावाहनं सूचयति—सप्तात्मकस्येति । नादकलान्यासानन्तरम् इच्छाशक्तये नमः । क्रियाशक्तये नमः । ज्ञानशक्तये नमः । इति शक्तिकलाआवाह्य । चिदात्मने नमः । आनन्दात्मने नमः । इति शान्तिकलावाहनम् । एवं चतुर्नवतिकलावाहनमपि सिद्धं भवति । विनापि मन्त्रैरित्यर्थः ।

न पठ्येते परैः सहेति । तत्र पञ्चकादिसंभेदो नास्तीत्यर्थः । ओं शक्त्यात्मने शान्त्यात्मने नम इति तु योज्यम् । चतुर्नवतीति त्रिनवतिकलावाहनानन्तरं मूलमन्त्रमपि सकलमन्त्रा पूरयेदित्यर्थः ॥ ३३ ॥

कलाप्रभेदैश्च मिथ इति । एकैककलावाहनान्तरं युज्यन्त इत्यर्थः । क्रमादिति । हंस इति अकारकलादिषु । प्रतद्विष्णुरिति उकारकलादिष्वित्यादि-

कुर्यात् प्राणप्रतिष्ठाञ्च तत्र तत्र समाहितः ।
प्राणप्रतिष्ठामन्त्रेण पुनस्तोयं कलात्मकम् ।
उच्चारयन् मूलमन्त्रं कलशे सन्निधापयेत् ॥ ३७

प्रोक्त्वापूर्वममुष्य शब्दमथ च प्राणा इह प्राणका-
स्तद्वज्जीव इह स्थितेति च तथा सर्वेन्द्रियाणीति च ।
तद्वद्वाङ्मनसावुदीर्य तदनु प्राणा इहायान्त्विति
स्वाहान्तं प्रजपेन्मनुं निशितधीः प्राणान् प्रतिष्ठापयेत् ॥ ३८

अश्वत्थचूतपनसस्तवकैः सूत्रामवल्लरीतण्डुलैः[युक्तैः] ।
सुरतरुधिया पिधाय कुम्भमुखं वेष्टयीत वासोभ्याम् ॥ ३९

पुनस्तोयगतं देवं साध्यमन्त्रानुरूपतः ।
सकलीकृत्य च गुरुरुपचारान् समाचरेत् ॥ ४०

आसनस्वागते सार्घ्यपाद्ये साचमनीयके ।
मधुपर्काचमस्नानवसनाभरणान्यपि ॥ ४१

सुगन्धसुमनोधूपदीपान्नैवेद्यवन्दने ।
प्रयोजयेदर्चनायामुपचारांस्तु षोड़श ॥ ४२

क्रमेण योग इत्यर्थः ॥ ३४॥३५॥३६ ॥

प्रोक्त्वापूर्वमिति । आपूर्वं प्रोक्त्वा आं क्रीं क्रौं यं रं लं वं शं षं सं हौं क्षं सं हंसः क्रीं होमिति प्रोक्त्वा इत्यर्थः । अत्रामुष्येति साध्यनामग्रहणमुक्तम् । तद्वज्जीव इति पूर्ववदापूर्वमेवेत्यर्थः । चशब्दो जीवपदात् पूर्वं तत्तत्पदद्योतनार्थः । तथा सर्वेन्द्रियाणीत्यपि । तथा तद्वदित्यपि तथा वाङ्मनसग्रहणं चक्षुःश्रोत्रघ्राणानामुपलक्षणार्थम् । निशितधीरिति । पाशेन देवताः सर्वगा व्याप्य हींकारेणोपस्थाय क्रौमित्याभिमुख्यं संभाव्य यादिभिर्देवतां सकलां सञ्चिन्त्याऽवशिष्टेन तदनुज्ञया सान्निध्यमापादयेदित्यर्थः ॥ ३७॥३८ ॥

सूत्रामवल्लरी कल्पलतारूपा ध्येया । तण्डुलानि तत्फलपुष्परूपाणि । वासः छायारूपम् ॥ ३९ ॥

सकलीकृत्येति । आवाहनादिन्यासान्तं कृत्वा । विश्रमपूजां च कृत्वाऽनुज्ञामादाय उपचारान् कल्पयेदित्यर्थः । गुरुरिति शङ्खपूरणवदर्घ्यादिक्रमो द्रव्यदेवतासम्बन्धश्चैकात्मप्रलक्षणः सूचितः ॥ ४० ५३ ॥

अर्घ्यपाद्याचमनमधुपर्काचमनान्यपि ।
गन्धादयो निवेद्यान्ता उपचारा दश क्रमात् ॥ ४३
गन्धादिका निवेद्यान्ता पूजा पञ्चोपचारिकी ।
सपर्याः त्रिविधाः प्रोक्तास्तासामेकां समाचरेत् ॥ ४४
गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपाः ।
दूर्वा चेति क्रमादर्घ्यद्रव्याष्टकमुदीरितम् ॥ ४५
पाद्यं श्यामाकदूर्वाब्जविष्णुक्रान्ताभिरुच्यते ।
जातीलवङ्गकक्कोलैर्मतमाचमनीयकम् ॥ ४६
मधुपर्कश्च सक्षौद्रं दधि प्रोक्तं मनीषिभिः ।
शुद्धाभिरद्भिर्विहितं पुनराचमनीयकम् ॥ ४७
चन्दनागुरुकर्पूरपङ्कं गन्धमिहेष्यते ।
अथवा लघुकाश्मीरपटीरमृगनाभिजम् ॥ ४८
तुलस्यौ पङ्कजे जात्यौ केतक्यौ करवीरकौ ।
शस्तानि दश पुष्पाणि तथा रक्तोत्पलानि च ॥ ४९
उत्पलानि च नीलानि कुमुदानि च मालती ।
मल्लिका कुन्दमन्दारनन्द्यावर्तादिकानि च ॥ ५०
पलाशपाटलीपार्थपारन्त्यावर्तकानि च ।
चम्पकानि सनागानि रक्तमन्दारकाणि च ॥ ५१
अशोकोद्भवबिल्वोत्थकर्णिकारोद्भवानि च ।
सुगन्धानि सुरूपाणि स्वागमोक्तानि यानि च ॥ ५२
मुकुलैः पतितैर्म्लानैः शीर्णैर्वा जन्तुदूषितैः ।
आघ्रातैरङ्गसंस्पृष्टैरुषितैरपि नाऽर्चयेत् ॥ ५३
सगुग्गुल्वगुरूशीरसिताज्यमधुचन्दनैः ।
साराङ्गारे विनिक्षिप्तैर्मन्त्री नीचैः प्रधूपयेत् ॥ ५४

मन्त्री नीचैरिति धूपे गन्धविशेषं सूचयन् गन्धादिष्वपि सूचयति ।
ॐ लं श्रीं ॐ नमः पराय गन्धतन्मात्रप्रकृत्यानन्दात्मकं गन्धं कल्पयामि नम

गोसर्पिषा वा तैलेन वर्त्या च लघुगर्भया ।
दीपितं सुरभिं शुद्धं दीपमुच्चैः प्रदीपयेत् ॥ ५५

इत्यादयो मन्त्रा देवस्य गन्धादिदाने । आवरणानां तु तत्तन्नाममन्त्रैरेव देयम् । अथवा आगमोक्तैः श्लोकैरेवावाहनादयः कर्तव्या इति सूचितः ।

स्वात्मसंस्थमजं शुद्धं त्वामद्य परमेश्वर ।
अरण्यामिव हव्याशं मूर्तावावाहयाम्यहम् ॥ नमः ।
तवेयं महिमा मूर्तिस्तस्यां त्वां सर्वगं प्रभो ।
भक्तिस्नेहसमाकृष्टं दीपवत् स्थापयाम्यहम् ॥ नमः ।
सर्वान्तर्यामिणे देव सर्वबीजमयं शुभम् ।
स्वात्मस्थाय परं शुद्धमासनं कल्पयाम्यहम् ॥ नमः ।
अस्मिन् वरासने देव सुखमास्वाऽचरात्मके ।
प्रतिष्ठितो भवाऽस्मिंस्त्वं प्रसीद परमेश्वर ॥ नमः ।
अनन्या तव देवेश मूर्तिः शक्तिरियं प्रभो ।
सान्निध्यं कुरु तस्यां त्वं भक्तानुग्रहतत्पर ॥ नमः ।
आज्ञया तव देवेश कृपाम्भोधे गुणाम्बुधे ।
स्वात्मानन्दैकतृप्तं त्वां निरुणधि पितर्गुरो ॥ नमः ।
हृद्या पीयूषवर्षिण्या पूरयन् यज्ञविप्लवम् ।
मूर्तौ वा यज्ञसम्पत्त्यै स्थिरो भव महेश्वर ॥ नमः ।
यस्य दर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये ।
तस्मै ते परमेशाय स्वागतं स्वागतं च मे ॥ नमः ।
कृतार्थोऽनुगृहीतोऽस्मि सफलं जीवितं मम ।
यदागतोऽसि देवेश सुस्वागतमिदं पुनः ॥ नमः ।
अज्ञानाद्वा प्रमादाद्वा वैकल्यात्साधनस्य वा ।
यदाऽपूर्णं भवेत् कृत्यं तदाऽप्यभिमुखो भव ॥ नमः ।
अभक्तवाङ्मनश्चक्षुःश्रोत्रदूराऽमितद्युते ।
त्वत्तेजःपञ्जरेणेश वेष्टितो भव सर्वतः ॥ नमः ।
तापत्रयहरं दिव्यं परमानन्दलक्षणम् ।
तापत्रयविनिर्मुक्तं तवाऽर्घ्यं कल्पयाम्यहम् ॥ नमः ।
यद्भक्तिलेशसंपर्कात् परमानन्दसंभवः ।
तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये ॥ नमः ।

सुशितेन सुशुद्धेन पायसेन सुसर्पिषा ।
सितोपदंशकदलीदध्याद्यैश्च निवेदयेत् ॥ ५६

वेदानामपि वेदाय देवानां देवतात्मने ।
आचामं कल्पयामीश शुद्धानां शुद्धिहेतवे ॥ नमः ।
सर्वकालुष्यहीनाय परिपूर्णसुखात्मकम् ।
मधुपर्कमिदं देव कल्पयामि प्रसीद मे ॥ नमः ।

वेदानामपि वेदायेत्यादिरेव पुनराचमनमन्त्रः ।

परमानन्दबोधाब्धिनिमग्ननिजमूर्तये ।
साङ्गोपाङ्गमिदं स्नानं कल्पयामीश ते पुनः ॥ नमः ।

अयमत्र स्नानक्रमः । उत्तरभागे स्नानशालां निर्माय । यानेन सोपचारं देवं तत्र नीत्वा । यानादवरोप्य । पादुकाभ्यामन्तः नीत्वा । पीठं समर्प्य अर्घ्यादिकं दत्त्वा केशप्रसाधनाङ्गमर्दनाभ्यङ्गामलकचूर्ण कुङ्कुमानुलेप कषायोदकस्नान पञ्चगव्य पञ्चामृत स्नान गन्धानुलेपन गन्धोदकस्नानाष्टगन्धानुलेपाष्टगन्धोदकस्नान दिव्यगन्धानुलेप दिव्यगन्धोदकस्नानपुष्पफलस्वर्णरत्नमन्त्रोदकस्नानानि अर्घ्यादिपूर्वकं प्रयच्छेदिति ।

मायाचित्रपटाच्छन्न निजगुह्योरुतेजसे ।
निरावरणविज्ञान वस्त्रं ते कल्पयाम्यहम् ॥ नमः ।
यमाश्रित्य महामाया जगत्संमोहिनी सदा ।
तस्मै ते परमेशाय कल्पयाम्युत्तरीयकम् ॥ नमः ।
यस्य शक्तित्रयेणेदं संप्रोतमखिलं जगत् ।
यज्ञसूत्राय तस्मै ते यज्ञसूत्रं प्रकल्पये ॥ नमः ।
स्वभावसुन्दराङ्गाय नानाशक्त्याश्रयाय ते ।
भूषणानि विचित्राणि कल्पयाम्यमरार्चित ॥ नमः ।

इति भूषणन्यासान्तरम् ।

समस्तदेवदेवेश सर्वतृप्तिकरं परम ।
अखण्डानन्दसंपूर्णं गृहाण जलमुत्तमम् । नमः ॥
परमानन्दसौरभ्यपूर्णा[परि]पूर्णदिगन्तरम् ।
गृहाण परमं गन्धं कृपया परमेश्वर । नमः ॥
तुरीयवनसंभूतं नानागुणमनोहरम् ।
आनन्दसौरभं पुष्पं गृह्यतामिदमुत्तमम् । नमः ॥

वर्णैर्मनुप्रपुटितैः क्रमशः शतार्धै-
र्न्यासक्रमादभियजेत् सकलासु मन्त्री ।
गन्धादिभिः प्रथमतो मनुदेवतासु
त्रैलोक्यमोहनमिति प्रथितः प्रयोगः ॥ ५७

हृदयं सशिरस्तथा शिखया कवचञ्चेत्यनलादिकास्विषु ।
पुरतो नयनं दिशासु मन्त्री पुनरस्त्रञ्च समर्चयेत् क्रमात् ॥ ५८

वनस्पतिरसोपेतो गन्धाढ्यो गन्ध उत्तमः ।
आग्नेयः सर्वदेवानां धूपोऽयं परिगृह्यताम् । नमः ॥
सुप्रकाशो महादीपः सर्वतस्तिमिरापहः ।
सबाह्याभ्यन्तरज्योतिः दीपोऽयं परिगृह्यताम् । नमः ॥५४॥५५॥५६॥

पुनः पुष्पाञ्जलिं विधाय प्रसरपुष्पाञ्जलिमेकाक्षरादिमन्त्रैः कुर्यादित्याह— वर्णैर्मनुप्रपुटितैरिति । न्यासक्रमात् लिपिन्यासक्रमात् । क्रमश इति परादिक्रमः सूचितः । सकलास्विति परादि कलायोगः । मन्त्री इति एकाक्षरादिमन्त्रयोगः । प्रथमत इत्यावरणपूजायाः पूर्वमित्यर्थः ।

अयमत्र प्रयोगक्रमः । ओं नमः । अहं नमः । विश्वयोन्ये नमः । इति परापुष्पाञ्जलिः । महासत्तायै नमः । महाचिते नमः । महानन्दायै नमः । महैश्वर्यै नमः । अं नमः । वामायै ज्येष्ठायै रौद्र्यै अम्बिकायै नमः । इति मूर्धवामदक्षिणभागमूलाधारेषु पूजयेत् । हं नमः । इच्छायै नमः । क्रियायै नमः । ज्ञानायै नमः । शान्तायै नम इत्यपि तथेति पश्यन्तीपुष्पाञ्जलिः । शून्यात्मने स्पर्शात्मने नादात्मने ध्वन्यात्मने बिन्दात्मने शक्त्यात्मने बीजात्मने अक्षरात्मने नमः । इति मध्यमापुष्पाञ्जलिः । ततो मनुप्रपुटितैर्वर्णैः वर्णस्थाने वैखरीपुष्पाञ्जलिः । ओं नमः । मं नमः । उं नमः । इत्येकाक्षरमन्त्रैः मूर्धादिषु । अहं हरिहर नमः । हर नमः । हरि नमः । अहं नमः । इति द्व्यक्षरैरपि तेष्वेव । ओं नमो ब्रह्मणे विष्णवे शिवाय नमः । ओं नमः शिवाय ओं नमो विष्णवे ओं नमो ब्रह्मणे इति षड्क्षरैरपि तेष्वेव । ओं क्लीं हंसः सोहं स्वाहा । ओं नमो नारायणाय । ह्रीं नमः शिवाय नमः । ओं क्लीं ह्रीं नमः शिवाय । ओं नमो नारायणाय । ओं क्लीं हंसः सोहं स्वाहा । इत्यपि तेष्वेव । ओं तत्सत् नमो ब्रह्मणे तत्सत् नमः । ओं नमो भगवते वासुदेवाय क्लीं क्लीं नमः शिवाय । हंसः सोहं नमः । ओं क्लीं ह्रीं नमः शिवाय

हारस्फटिककलायाञ्जनपिङ्गलवह्निरोचिषो ललनाः ।
अभयवरोद्यतहस्ताः प्रधानतनवोऽङ्गदेवताः कथिताः ॥ ५९
आदावङ्गावरणं तन्त्रत्वादीरितं विधानेषु ।
अन्ते च लोकपालावृतिरथ कुलिशादिकानाञ्च ॥ ६०
इन्द्राग्नियमनिशाचरवरुणानिलधनेशशिवाहिपतिविधयः ।
जात्यधिपहेतिवाहनपरिवारान्ताः क्रमेण यष्टव्याः ॥ ६१
पीतः पिङ्गः कृष्णो धूम्रः श्वेतश्च धूम्रसितशुक्लाः ।
काशारुणाम्बुजाभा लोकेशा वासवादयः प्रोक्ताः ॥ ६२
वज्रं सशक्तिर्दण्डः खड्गः पाशाङ्कुशौ गदाशूलौ ।
रथचरणनलिनसंज्ञौ प्रोक्तान्यस्त्राणि लोकपालानाम् ॥ ६३
पीतहिमजलदगगनाचिरप्रभारक्तकुन्दनीलरुचः ।
करविन्दारुणवर्णाः प्रोक्ताः स्युर्वर्णतोऽपि वज्राद्याः ॥ ६४

हंसः सोऽहं ओं नमो भगवते वासुदेवाय ओं तत्सत् नमो ब्रह्मणे तत्सत् नमः इत्यपि । तथा पुनः समस्तव्यस्तगायत्रानुष्टुप्त्रयेण च तेष्वेव ।

नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् । इति विष्णुगायत्री ।

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् । इति रौद्री ।

हंसात्मकोऽयमपामग्नेस्तेजसा दीप्यमानः स नो मृत्योस्त्रायतां नमो ब्रह्मणे विश्वनाभिरिति ब्रह्मानुष्टुप । इतरत् द्वयं वक्ष्यति । तत आवरणस्थाने तत्सामान्यमन्त्रैः पुष्पाञ्जलिं कुर्यादिति प्रसरपुष्पाञ्जलिः ॥ ५७॥५८ ॥

प्रधानतनव इति पक्षान्तरम् । आवरणपूजानन्तरं प्रसरपुष्पाञ्जलिवैलोम्येन संकोचपुष्पाञ्जलिं कृत्वा । अर्घ्याद्यष्टकं दत्त्वा । निवेद्य । पात्रमस्त्रमन्त्रेण संशोध्य । तस्मिन् मूलमन्त्रतेजसि निवेद्य । जातं संपाद्य अमृतीकरणं निर्विषीकरणं द्वयं विधाय । मूलेनाऽभिमन्त्र्य । कवचास्त्राभ्यां संरक्ष्य । परिषेकादिकं कृत्वा । नेत्रेण नेत्रयोः पुष्पाञ्जलिं विधाय ।

सत्पात्रतद्रविःसौक्ष्म्यविविधानेकभक्षणम् ।
निवेदयामि देवेश सानुगाय गृहाण तत् ॥ नमः ।

इति निवेद्य सुरभिसंहारग्रासप्राणादिसुरभिसंहारमुद्राः प्रदर्श्य मूलं किञ्चित् जपेत् ॥ ५९॥६०॥६१॥६२॥६३ ॥६४ ॥

कृते निवेद्ये च ततो मण्डलं परितः क्रमात् ।
मङ्गलाऽङ्कुरपात्राणि स्थापनीयानि मन्त्रिणा ॥ ६५
उपलिप्य कुण्डमत्र स्वचरणयोग्या विलिख्य रेखाश्च ।
अभ्युक्ष्य प्रणवेन प्रकल्पयेद् योगविष्टरं मन्त्री ॥ ६६
अथवा षट्कोणावृतत्रिकोणके गुरुजनोपदेशेन ।
प्राणाग्निहोत्रविधिनाऽप्यावसथीयाह्वयेऽनलस्थाने ॥ ६७
तत्राथो सद्दतुमतीमतीन्द्रियाभां
संस्मृत्य सकलजगन्मयीञ्च शक्तिम् ।
तद्योनौ मणिभवमारणेयकं वा
तारेणाक्षिपतु गृहीत्यमेव वाऽग्निम् ॥ ६८
चित्पिङ्गलपदमुक्त्वा हृनदहपचयुग्मकानि सर्वघ्नम् ।
आक्षापयाग्निजाये प्रभाष्य मनुनाऽमुनाऽनलं ज्वालयेत् ॥ ६९

मण्डलं परितः क्रमादिति अङ्कुरार्पणगत क्रमेणेत्यर्थः । मन्त्रिणेति विष्णवे नम इत्यादिमन्त्रैरित्यर्थः ॥ ६५ ॥

उपलिप्य कुण्डमत्र चेति चकारेण कुण्डसंस्काराः सूचिताः । प्रथमं मूलेन वीक्षणं कुर्यात् । ततोऽस्त्रेण प्रोक्षणम् । तेनैव दर्भैः संमार्जनम् । वर्मणा अभ्युक्षणम् । अस्त्रेण खननोद्धारौ । पूरणं हृदा । समीकरणमस्त्रेण । वर्मणा सेचनम् । अस्त्रेण कुट्टनम् । वर्मणा मार्जनं विलेपनं कलारूपतत्त्वकल्पनं त्रिसूत्रवेष्टनं च । हृदयेन अर्चनम् । अस्त्रेण वज्रीकरणम् । हृदयेन चतुष्पथीकरणम् । कवचेनाऽक्षपाटनमिति कुण्डसंस्कारः । अथवा वीक्षणप्रोक्षणताडनाभ्युक्षणैरेव संस्कुर्यात् । योगविष्टरं मन्त्रीति । ओं क्लीं वागीश्वरी वागीश्वरासनाय नम इति मन्त्रेण पूजयेदित्यर्थः ॥ ६६ ॥

गुरुजनोपदेशेनेति । गुप्तोक्तविधिना महागणपतिपटलोक्तविधिना वा त्रिकोणत्रयं मन्त्रविशेषानुसारेण लिखेदित्यर्थः । मूलाधारेऽपि त्रिकोणमध्याग्नौ योगविष्टरं कल्पनीयमित्याह—प्राणाग्नीति ॥ ६७ ॥

उभयत्रापि वागीश्वरी कल्पनीयावित्याह—तत्रेति । सद्दतुमतीं बाह्ये वागीश्वरीं अतीन्द्रियाभां मूलाधार इति विशेषः । चशब्दः शक्तिमत्समुच्चयार्थः । मण्यादिजमग्निं पात्रेण आनीयाऽस्त्रेण क्रव्यादांशं परित्यज्य ।

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम् ॥ ७०
अनेन ज्वलितं मन्त्रेणोपतिष्ठेद्धुताशनम् ।
ततः प्रविन्यसेद्देहे जिह्वामन्त्रैर्विभावसोः ॥ ७१
सलिङ्गगुदमूर्द्धास्यनासानेत्रेषु च क्रमात् ।
ससर्वाङ्गेषु जिह्वाश्च वच्यन्ते त्रिविधात्मिकाः ॥ ७२
हिरण्या गगना रक्ता कृष्णा चैव तु सुप्रभा ।
बहुरूपाऽतिरक्ता च जिह्वाः सप्तेति सात्त्विकाः ॥ ७३
पद्मरागा सुवर्णा च तृतीया भद्रलोहिता ।
लोहिताख्या तथा श्वेता धूमिनी सकरालिका ॥ ७४
राजस्यः कथिता जिह्वाः क्रमात् कल्याणरेतसः ।
विश्वमूर्त्तिस्फुलिङ्गिन्यौ धूम्रवर्णा मनोजवा ॥ ७५
लोहिता च करालाख्या कालौ तामसजिह्विकाः ।
अनलेरार्घिबिन्द्वन्ताः पादियान्ताक्षरान्विताः ॥ ७६
सात्त्विका दिव्यपूजासु राजस्यः काम्यकर्मसु ।
तामस्यः क्रूरकार्येषु प्रयोक्तव्या विपश्चिता ॥ ७७
सुराः सपितृगन्धर्वयक्षनागपिशाचकाः ।
राक्षसाश्च क्रमादग्नेराश्रिता रसनास्वमी ॥ ७८
जिह्वासु चिदशादीनां तत्तत्कार्यसमाप्तये ।
जुहुयाद्वाञ्छितां सिद्धिं दद्युस्ता देवता मताः ॥ ७९
स्वनामसदृशाकाराः प्रायो जिह्वा हविर्भुजः ।
मन्त्री प्रविन्यसेद् भूयो वक्त्रेरङ्गानि वै क्रमात् ॥ ८०

वीक्षणादिभिः संस्कृत्य । तमग्निं नासिकाद्वारेण मूलाधारं नीत्वा शिवशक्त्यात्मक-कुण्डलिन्या एकीकृत्य । तत्र प्राणाग्निहोत्रविधिना सकृत् वर्णहोमं विधाय । तमग्निं प्रणवेन बैन्दवाग्निना एकीकृत्य अमृतमास्राव्य । तमग्निं रं अग्निचैतन्याय नमः इति पात्राग्नौ संस्थाप्य । तारेणाऽभिमन्त्र्य । सुरभ्या अमृतीकृत्य । अस्त्रेण संरक्ष्य । कवचेनाऽवगुण्ठ्य । रं अग्नये नम इत्यभ्यर्च्य । कुण्डोपरि त्रिः प्रणवेन परिभ्राम्य । तारेण शिवबीजबुद्ध्या देव्या योनौ क्षिपेदित्यर्थः ॥ ६८—७९ ॥

सहस्रार्चिः स्वस्तिपूर्ण उत्तिष्ठपुरुषस्तथा ।
धूमव्यापी सप्तजिह्वो धनुर्द्धर इतीरितः ॥ ८१
अङ्गमन्त्रान् क्रमादष्टमूर्तीश्चाऽथ प्रविन्यसेत् ।
मूर्धांसपार्श्वकक्ष्यन्धुकटिपार्श्वांसकेषु च ॥ ८२
प्रादक्षिण्येन विन्यस्येद् यथावद्देशिकोत्तमः ।
जातवेदाः सप्तजिह्वो हव्यवाहन एव च ॥ ८३
अश्वोदरजसंज्ञश्च सवैश्वानर एव च ।
कौमारतेजाश्च तथा विश्वदेवमुखाह्वयौ ॥ ८४
स्युरष्टमूर्त्तयो वह्नेरग्नये पदपूर्विकाः ।
प्रणवादिनमोऽन्ताश्च पुनर्दर्भचतुष्टयैः ॥ ८५
दिक्क्रमात् संपरिस्तीर्य सम्यग्गन्धादिभिर्यजेत् ।
मध्ये च कोणषट्के च जिह्वाभिः केसरेषु च ॥ ८६
अङ्गमन्त्रैस्ततो बाह्ये चाऽष्टभिर्मूर्तिभिः क्रमात् ।
ततोऽग्निमनुना तेन मन्त्री मध्ये च सयजेत् ॥ ८७
वैश्वानरं जातवेदमुक्त्वा चेहावहेति च ।
लोहिताक्षपदं सर्वकर्माणीति समीरयेत् ।
ब्रूयाच्च साधयेत्यन्ते वह्निजायान्तिको मनुः ॥ ८८
विनयनमरुणाप्तावद्धमौलि सुशुक्लां-
शुकमरुणमनेकाकल्पमम्भोजसंस्थम् ।

मन्त्री प्रविन्यसेदिति । ज्ञानादिसर्वज्ञादियोगः सूचितः । पीठमूर्ति-पूजादिकं चाङ्गन्यासात् पूर्वम् ॥ ८०॥८१ ॥

यथावत् देशिकोत्तम इति । अग्न्यादिपादाष्टकयोगः शक्तियोगश्च सूचितः । ॥ ८२॥८३॥८४ ॥

संपरिस्तीर्य सम्यगिति । परिषेचनपूर्वकत्वं परिस्तरणानन्तरं परिधि-निधानम् । तेषु प्रागादि क्रमेण ब्रह्मादिमूर्तिचतुष्टयपूजाश्च सूचिताः । पुनः वैश्वानरमन्त्रेणाऽग्निं संपूज्य जिह्वाद्यावरणपूजा च कार्या । मूर्तिबाह्ये मातृभैरवावृतिरपि पूज्या इति केचित् । तद्बहिर्लोकपालाः पूज्याः ॥ ८५॥८६ ॥

मनुना तेन मन्त्रीति प्रणवशक्तियोगः सूचितः । समृद्धिमन्त्रोक्ता ऋष्यादयः ।

अभिमतवरशक्तिस्वस्तिकाभीतिहस्तं
नमत कनकमालालङ्कृतांस कृशानुम् ॥ ८९
जिह्वा ज्वालारुचः प्रोक्ता वराभययुतानि च ।
अङ्गानि मूर्तयः शक्तिस्वस्तिकोद्यतदोर्द्वयाः ॥ ९०
संस्कृतेन घृतेनाऽभिद्योतनोद्योतितेन च ।
व्याहृत्यनन्तरं तेन मनुना जुहुयात्त्रिशः ॥ ९१
गर्भाधानादिका वह्नेः समुद्वाहावसानिकाः ।
क्रियास्तारेण वै कुर्यादाज्याहुत्यष्टकैः पृथक् ॥ ९२

ह्रीं बीजं । स्वाहा शक्तिः ॥ ८७॥८८॥८९॥९० ॥

आवरण पूजानन्तरं स्रुक्स्रुवौ पाणिभ्यामादाय अधोमुखं त्रिशः प्रताप्य । दर्भैः अग्रादिक्रमेण संमार्ज्य । सव्यहस्तेन गृहीत्वा दक्षिणेन प्रोक्षयित्वाऽस्त्रेण पुनः प्रताप्य । दर्भानग्नौ प्रक्षिप्याऽऽत्मदक्षभागे कुशास्तरे संस्थाप्याऽऽज्यस्थालोमस्त्रेण संप्रोक्ष्य । वोक्षणादि संस्कृतमाज्यं तस्मिन्निक्षिप्य । निरुह्य वायव्येऽङ्गारान् हृदा तेषु संस्थापयेत् । इदं तापनं नाम आज्यसंस्कारः । दर्भद्वयं संदीप्याज्ये क्षिप्त्वा । वह्नौ क्षिपेत् । हृदयेन इदं पवित्रीकरणम् । दीप्तेन दर्भद्वयेन नीराज्य कवचेनाग्नौ क्षिपेत् । इदमभिद्योतनम् । घृते प्रज्वलितान् दर्भान् प्रदर्श्य अस्त्रमन्त्रेणाऽग्नौ प्रक्षिपेत् । इदमुद्योतनम् । आहृत्याज्यं बहिर्वह्नावङ्गारान् संयोज्य । हस्तौ प्रक्षाल्य । प्रादेशमात्रौ कुशावङ्गुष्ठोपकनिष्ठिकाभ्यां धृत्वा अस्त्रेणोत्पुनीयात् । इदमुत्पवनम् । एतदेवात्माभिमुखं कुर्यात् । संप्लवनमिदम् । प्रादेशमात्रं संग्रन्थि दर्भयुग्ममाज्ये विन्यस्य । स्रुवेण दक्षिणभागादाज्यमादाय । हृदा सह अग्नये स्वाहेति अग्नेः दक्षिणनेत्रे हुत्वा । भागान्तरात् इतरनेत्रे सोमाय स्वाहेति हुत्वा । मध्यादादायाऽग्नीषोमाभ्यां स्वाहेति ललाटनेत्रे हुत्वा । दक्षिणभागादादाय अग्नये स्विष्टकृते स्वाहेति वक्त्रे जुहुयात् । सहृदया एव सर्वे मन्त्राः । स्वाहेति तत्तद्भागे संपातं च कुर्यात् । इदं नेत्रवक्त्रोद्घाटनम् । एतत् सर्वमुक्तं—संस्कृतेन घृतेनेत्यादिना ।

व्याहृत्यनन्तरमिति प्रणवानन्तर्यस्याप्युपलक्षणम् । गर्भाधान पुंसवन सोमन्तोन्नयन जातकर्म नामकरणोपनिष्क्रमणान्नप्राशन चौलोपनयनवेदव्रतचतुष्टयसमावर्तविवाहाग्न्याधानादिकाः । तत्तत्कर्मसमाप्तये चतुर्गृहीतेन पूर्णाहुतौस्तिष्ठन्वौषडन्तेन मूलेन जुहुयात् । ततः पितरौ संपूज्य आत्महृदये स्थापयित्वा समिधो

जिह्वाङ्गमूर्तिमनुभिरेकाहुत्या हुनेत्ततः ।
जिह्वायां मध्यसंस्थायां मन्त्री ज्वालावलीतनौ ॥ ९३
तारादेर्दशभिर्भेदैः पूर्वपूर्वसमन्वितैः ।
मनुना गाणपत्येन हुनेत्पूर्वं दशाहुतीः ॥ ९४
जुहुयाच्च चतुर्वार समस्तेनैव तेन तु ।
आज्येन साध्यमनुना पञ्चविंशतिसंख्यकम् ॥ ९५
जुहुयात् सर्वहोमेषु सुधीरनलहृन्मये ।
तान्त्रिकाणामयं न्यायो हुतानां समुदीरितः ॥ ९६
पुनः साध्येन मनुना हुनेदष्टसहस्रकम् ।
अथवाऽष्टशतं सर्पिःसंयुक्तेन पयोम्बसा ॥ ९७
द्रव्यैर्विधानप्रोक्तैर्वा महाव्याहृतिपश्चिमम् ।
पुनः समापयेद्धोमं परिषेकावसानकम् ॥ ९८

जुहुयात् ॥ ९१॥९२ ॥

मन्त्री ज्वालावली तनाविति समस्ताग्निमन्त्रैः होमः सूचितः । गणपतये इत्यन्तः सप्तमः । वरवरदे इत्यन्तोऽष्टमः । सर्वजनं मे इत्यन्तो नवमः । ततः चर्वर्थमग्निं प्राक् स्थापयित्वा । साध्यमन्त्रस्य पीठपूजादिकं कृत्वा । बाह्याग्निरूपान्तामभ्यर्च्य साध्यमनुना अग्निमुखे पञ्चविंशतिवारं जुहुयात् । इदं वक्त्रैकीकरणम् ॥ ९३॥९४ ॥

सुधीरित्यग्निदेवतैक्यं जानन्नित्यर्थः । आत्मनि देवतैक्यं भावयन् मूलेनैकादश जुहुयादिति । नाडीसन्धानमेतत् । अथ जिह्वाङ्गादिमन्त्रैरपि हुत्वा । कुण्डान्तरेष्वग्निं पूर्वादितो विहृत्य सावरणां देवतां तेषु संपूज्य मूलेनाऽष्टनवपञ्चविंशतिसंख्यं हुत्वा आज्येन साध्यचरुणा वा पुनः साध्येन मनुना हुनेदित्यादि सकलकुण्डेषु समानम् ॥ ९५॥९६ ॥

द्रव्यैर्विधानप्रोक्तैरित्यत्रायं द्रव्यपरिमाणविधिः । कर्षमानं घृतम् । शुक्तिमात्रं पयः । पञ्चगव्यमधूनि तत्समानानि । दुग्धान्नमक्षमात्रम् । दधि प्रसृतम् । मुष्टिर्लाजं । पृथुकसक्तवः । गुलशर्करे पलार्धे । ग्रासार्धाश्चरवः । इक्षुः पर्वान्तः । पत्रपुष्पापूपकदलीनारङ्गफलानि एकैकशः । मातुलुङ्गं चतुःखण्डम् । पनसं दशखण्डम् । नालिकेरम् अष्टखण्डम् । बिल्वं त्रिखण्डम् । त्रिखण्डं कपित्थम् । उर्वारुकं त्रिखण्डम् । फलान्यन्यानि अखण्डानि । समिधो दशाङ्गुलाः । दूर्वा-

भूर्भुवःस्वर्भूर्भुवःस्वःपूर्वं स्वाहान्तमेव च ।
अग्नये च पृथिव्यै च महते च समन्वितम् ॥ ९९
वायवे चाऽन्तरिक्षाय महते च समन्वितम् ।
आदित्याय च वै दिवे महते च समन्वितम् ॥ १००
चन्द्रमसे नक्षत्रेभ्यो दिग्भ्यश्च महतेऽन्वितम् ।
महाव्याहृतयस्त्वेताः सर्वशो देवतामयाः ॥ १०१
ब्रह्मार्पणाख्यमनुना पुनरष्टावथाहुतीः ।
जुहुयान्मन्त्रवर्येण कर्मबन्धविमुक्तये ॥ १०२
इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः ।
जाग्रत्स्वप्नसुषुप्तीनामन्तेऽवस्थास्वितीरयेत् ॥ १०३
ततश्च मनसा वाचा कर्मणेति प्रभाषयेत् ।
हस्ताभ्याञ्च तथा पद्भ्यामुदरेणेति भाषयेत् ॥ १०४
शिश्ना च यत् स्मृतं प्रोक्तं यदुक्तं यत्कृतं तथा ।
तत्सर्वमिति संभाष्य ब्रह्मार्पणपदं वदेत् ॥ १०५
भवत्वन्ते द्विठश्चाऽयं ब्रह्मार्पणमनुर्मतः ।
हुते तु देशिकः पश्चान्मण्डले बलिमारभेत् ॥ १०६

त्रिकयुता । गलूची चतुरङ्गुला । व्रीहिमुद्गमाषयवकोद्रवगोधूमाः मुष्टिमात्राः । तण्डुलाः तदर्धतः । तिलसर्षपाः चुलुकमानाः । शुक्तिमात्रं लवणम् । मरिचान्येकविंशतिः । पुरं बदरमात्रम् । चन्दनागरुकर्पूरकस्तूरीकुङ्कुमानि तिन्तिणीफलमानानि ।

समिद्धोमेऽग्निं स्थितं ध्यायेत् । शयानमाज्यहोमेषु । निषण्णं शेषहोमेषु ।

अग्नेरास्ये होतव्यम् । स्वर्णसिन्दूरबालार्ककुङ्कुमक्षौद्रवर्णोऽग्निः शुभदः । भेरीवारिदहस्तिध्वनिः शुभदः । नागचम्पकपुन्नागपाटलीयूथिकापद्मेन्दीवरकह्लारसर्पिर्गुलुगन्धोऽग्निः शुभदः । प्रदक्षिणाग्निर्निष्कम्पः शुभः । कुन्देन्दुधवलो धूमः शुभदः । कृष्णवर्णोऽग्निर्यजमानं नाशयेत् । श्वेतो वायसस्वरो राष्ट्रं नाशयेत् । भर्भरस्वरः सर्वनाशकः । पूतिगन्धो होतृदुःखप्रदः । छिन्नावृत्ताशिखा धनक्षयं मृत्युं च कुर्यात् । शुकपारावतनिभोऽग्निः तुरङ्गगोहानिकृत् । एवंविधेषु दोषेषु मूलेनाज्येन प्रायश्चित्ताय पञ्चविंशतिवारं जुहुयात् ॥ ९७—१०६ ॥

नक्षत्राणां सराशीनां सवाराणां यथाक्रमम् ।
दद्याद्बलिं गन्धपुष्पधूपदीपकमादरात् ॥ १०७
ताराणामश्विनादीनां राशिः पादाधिकं द्वयम् ।
मेषादिमुक्त्वा नक्षत्रसंज्ञापूर्वमनन्तरम् ॥ १०८
देवताभ्यः पदं प्रोक्त्वा दिवानक्तं पदं वदेत् ।
चारिभ्यश्चाऽथ सर्वेभ्यो भूतेभ्यश्च नमो वदेत् ॥ १०९
एवं राशौ तु सम्पूर्णे तस्मिंस्तद्वत् प्रयोजयेत् ।
तथा राश्यधिपानाञ्च ग्रहाणां तत्र तत्र तु ॥ ११०
सप्तानां करणानाञ्च दद्यान्मीनाद्वमेषयोः ।
अन्तराले बलिस्त्वेवं संप्रोक्तः कलशात्मकः ॥ १११
पुनर्निवेद्यमुद्धृत्य पुरावत् परिपूज्य च ।
मुखवासादिकं दत्त्वा स्तुत्वा तद्युक्तया पुनः ॥ ११२
स्तुत्वा यथावत् प्रणमेद्भक्तियुक्तस्तु साधकः ।
अष्टाङ्गं वापि पञ्चाङ्गमुभाभ्यां वा समाहितः ॥ ११३
दोर्भ्यां पदाभ्यां जानुभ्यामुरसा शिरसा दृशा ।
वचसा मनसा चेति प्रणामोऽष्टाङ्ग ईरितः ॥ ११४
बाहुभ्याञ्च सजानुभ्यां शिरसा वचसा धिया ।
पञ्चाङ्गकः प्रणामः स्यात् पूजासु प्रवराविमौ ॥ ११५
गुर्वाद्यास्तारादिका यागमन्त्रा लोकेशान्तास्ते चतुर्थीनमोऽन्ताः ।
पूजायामप्यग्निकार्ये द्विठान्ता बीजैः पूजा स्याद्विभक्त्या वियुक्तैः ॥

मेषादिमुक्त्वेति । बलिमन्त्रोद्धारः । नक्षत्रसंज्ञां पूर्वमुक्त्वा । मेषादिराशिसंज्ञामनन्तरमुक्त्वा । देवताभ्य इत्यादि वदेदित्यन्वयः । अश्विनी भरणी कृत्तिकापादनक्षत्रमेषराशिदेवताभ्यो दिवानक्तचारिभ्यः सर्वेभ्यो भूतेभ्यो नम इत्यादयो मन्त्राः । राश्यधिपबलिमन्त्रेषु तत्तद्राश्यधिपतिनामसंयोगश्च विशेषः ॥ १०७ ॥ ॥ १०८॥१०९॥११०॥१११ ॥

पुनर्निवेद्यमुद्धृत्येति । पानीयं समर्प्य यथाविधानं जलं दत्त्वा गण्डूषदन्तधावनादिकं समर्प्य । अर्घ्याद्यष्टकं दत्त्वा प्रसरपुष्पाञ्जलिं विधाय दर्पणादिकं तैर्मन्त्रैः प्रयच्छेत् ।

वाससी च पुनरङ्गुलिभूषां होमकृत् सुमुखजप्रवरेषु ।
ईश्वरार्पणमिति प्रति दत्त्वा वर्धितो द्विजमुखेरितवाग्भिः ॥ ११७

नत्वा ततस्तनुभृते परमात्मने स्वं
द्रव्यार्धमेव गुरवे चतुरंशकं वा ।
दत्त्वा दशांशमथवापि च वित्तशाठ्यं
हित्वाऽर्पयेन्निजतनुं तदधीनचेताः ॥ ११८

बुद्धिः सवासना कृप्ता दर्पणं मङ्गलानि च ।
मनो वृत्तिर्विचित्रा ते नृत्यरूपेण कल्पिता ॥
ध्वनयो गीतिरूपेण शब्दा वाद्यप्रभेदतः ।
छत्राणि तव पद्मानि कल्पितानि मया प्रभो ॥
सुषुम्ना ध्वजरूपेण प्राणाद्यास्त्रामरात्मना ।
अहङ्कारो गजत्वेन कृप्तो देहो रथात्मना ॥
इन्द्रियाण्यश्वरूपाणि शब्दादि रथवर्त्मना ।
मनः प्रग्रहरूपेण बुद्धिः सारथिरूपतः ॥
सर्वमन्यन्मया कृप्तं तवोपकरणात्मना ॥

इति राजोपचारान् दत्त्वा । पुष्पाञ्जलिं विधाय । प्रसन्नार्घ्यं दत्त्वा । मूलमन्त्रं शक्त्यनुसारेण जप्त्वा । समर्प्य । प्रदक्षिणस्तुतिनमस्कारादिकं विधाय । देवतानुज्ञया तूत्तरतः कर्करीं स्थापयेत् । ईशानकोणे पूर्वसन्धितं विकिरे हेमवस्त्रादिसंयुक्तां तोयपूर्णां कर्करीं स्थाप्य । तस्यां सिंहस्थां खड्गखेटकधारिणीं घोररूपां पश्चिमास्यामस्त्रदेवतां संपूज्य । चलासनेन प्रदक्षिणं नालमुक्तवारिणा सार्धं नयन् रक्षतेति लोकपालानां देवानां श्रावयित्वाऽस्त्रमन्त्रेण यथापूर्वं स्थापयेत् । पूजयेच्च । पुनश्चर्वर्थं स्थापितेऽग्नौ पुनश्चरुं पाचयेत् । पात्रमस्त्रेण प्रक्षाल्य । मूलजप्तानां तण्डुलानां प्रस्तिपञ्चदशकं तत्राऽस्त्रेण निक्षिप्य । प्रक्षाल्य । गव्यपयसा संपूर्य । कवचेन तन्मुखं पिधाय । प्राङ्मुखो मूलमन्त्रं जपन् पचेत् । मूलेन तत्राऽभिघारं दत्त्वा कवचेनाऽवतार्याऽस्त्रजप्ते कुशास्तीर्णे मण्डले संस्थाप्य । त्रिधा विभज्य । देवायाऽग्नये च भागद्वयं दत्त्वा । परं शिष्येण सार्धं भुक्त्वाऽऽचम्याऽऽचान्तं शिष्यमानीय । सकलीकृत्य । तालप्रमाणं कृष्णं दन्तकाष्ठं तस्मै दद्यात् । स तेन दन्तान् संशोध्य । प्रक्षाल्य । विसृज्याऽऽचम्याऽऽगच्छेत् । तं शिखाबन्धाभिरक्षितं कृत्वा । वेद्यां दर्भास्तरे तेन सार्धं शयीतेत्यधिवासः ।

अथ पटुरवमुख्यवाद्यघोषैर्द्विजमुखनिष्पतदाशिषां रवेण ।
सुनियतमपि सुस्थितं च शिष्यं कलशजलैरभिषेचयेद् यथावत् ॥ ११९
यथा पुरा पूरितमक्षरैर्घटैः सुधामयैः शिष्यतनौ तथैव तैः ।
प्रपूरयन्मन्त्रिवरोऽभिषेचयेदवाप्तये मङ्क्षु यथेष्टसम्पदाम् ॥ १२०
विमले परिधाय वाससी पुनराचम्य गुरुं प्रणम्य च ।
निकटे समुपासते वदेदपि शिष्याय मनुं त्रिशो गुरुः ॥ १२१

ततः प्रातरुत्थाय कृतनित्यपूजो नैमित्तिकीमपि जपादिसमर्पणान्तं विधाय शुद्धं शिष्यमानीय । पञ्चगव्यं प्राशयित्वा । तं कुण्डसमीपे नीत्वा तं दिव्यदृष्ट्या विलोक्य । तच्चैतन्यं स्वहृदये संयोज्य । संक्षेपतो विस्तरतो वाऽध्वशोधनं कुर्यात् ॥ ११२ ॥ ११३ ॥ ११४ ॥ ११५ ॥ ११६ ॥ ११७ ॥ ११८ ॥

मन्त्रवर्णपदभुवनतत्त्वकलाध्वनः पदान्युनाभिहृद्भालमूर्धसु स्मृत्वा आचार्यकुण्डे सप्तृतैस्तिलैरमुकमध्वानं शोधयामि स्वाहेति प्रत्येकमध्वनामाहुत्यष्टकं शुद्ध्यर्थं हुत्वा । क्रमेण विलाप्य । सृष्टिक्रमेणोत्पाद्य । स्वहृत्स्थं चैतन्यं तत्र नियोज्य । मूलेन पूर्णां हुत्वा । देवतां कलश उद्वास्य । पुनर्व्याहृति जिह्वाङ्गादीनां हुत्वा परिषिच्यात्मनि अग्निमुद्वास्य । नेत्रमन्त्रेण शिष्यनेत्रे बद्ध्वा । तं मण्डलमानीय । तेन कलशस्थे देवे पुष्पाञ्जलिं कारयित्वा । नेत्रबन्धं विसृज्य । सर्वस्वादिक्रमेण दत्तदक्षिणं तं दर्भसंस्तरे स्थापयित्वा आत्मयागक्रमेण तं संहृत्य । उत्पाद्य । साध्यमन्त्रन्यासादिकं तच्छरीरे विधाय । कलशस्थदेवाय पुष्पाञ्जलिं विधाय । तं निष्कलीकृत्योद्धृत्य धृत्वा अभिषिञ्चतो गुरोर्भावनाप्रकारमाह—अथ पटुरवेति । पटुरवाणां मुखे भवा या उन्मनी साक्षिरूपिणी तेन वाद्या समनी तस्या घोषैः द्वारभूतैः शिष्यशरीरं प्रविश्य । तद्द्विजमुखात् कुण्डलीमुखान्निष्पततामाशिषामिच्छाशरीराणां ब्रह्मादिपञ्चमूर्तीनां कारणभूतेन रवेण द्वारभूतेन संस्पर्शव्यापिनी समनीद्वारेण परमपदं प्राप्य । सुनियतमपि शिष्यं देवताविग्रहरूपेण सुस्थितं ध्यात्वा । कलशजलैः कला यस्मिन् शेरते परमात्मनि तद्रूपैः जलैः यथावदभेदेनाऽभिषेचयेत् इत्यर्थः ॥ ११९ ॥

अभिषेककाले मातृका मनसा अनुलोमेन जप्तव्येत्याह—यथा पुरेति । मन्त्रिवर इति । मातृकानन्तरं मूलं त्रिरुच्चरन् अभिषेचयेत् । तदनन्तरं न्यासादिकं च कुर्यादिति उक्तम् ॥ १२० ॥

त्रिशो गुरुरिति । शिष्यहृत्पुण्डरीकस्थां देवतां संपूज्य । तस्य दक्षिणकर्णे

गुरुणा समनुगृहीतं मन्त्रं सद्यो जपेच्छतावृत्त्या ।
गुरुदेवतामनूनामैक्यं सम्भावयन् धिया शिष्यः ॥ १२२
मन्त्रे मन्त्रगुरावपि मन्त्री मन्त्रस्य देवतायां च ।
त्रिषु विहितसततभक्तिः प्रेत्येह निजेप्सितं फलं लभते ॥ १२३
सङ्क्षेपादिति गदिता हिताय दीक्षा
जन्तूनां प्रवरफलप्रदाऽचिराय ।
प्राप्यैनां जपविधिरादरेण कार्यो
विद्वद्भिः सहुतविधिर्निजेष्टसिद्ध्यै ॥ १२४
प्रोक्तेनैवं कलशविधिनैकेन वाऽनेककुम्भै-
र्भक्त्या यो वा सुमतिरभिषिञ्चेन्नरो मन्त्रजापी ।
कामान् प्राप्नोत्ययमिह परत्रापि किं तत्र चित्रं
लोकैश्चिन्त्यो न खलु मणिमन्त्रौषधीनां प्रभावः ॥ १२५

इति श्रीप्रपञ्चसारे षष्ठः पटलः ॥

सर्षिच्छन्दोदेवतं त्रिश उच्चार्य । सोदकं दत्त्वा । स्वयं च निजशक्तिहान्यनवाप्तये जपेदित्यर्थः ॥ १२१ ॥ १२२ ॥ १२३ ॥ १२४ ॥ १२५ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
षष्ठः पटलः ।

सप्तमः पटलः ।

अथाऽक्षराणामधिदेवतायाः समस्तबोधस्थितिदीपिकायाः ।
अशेषदुःखप्रशमाय नॄणां वक्ष्ये जपादेः प्रवरं विधानम् ॥ १

ब्रह्माऽस्या ऋषिरीरितः सुमतिभिर्गायत्रमुक्तश्च त-
च्छन्दस्त्वेव सरस्वती निगदिता मन्त्रेषु तद्देवता ।
आद्यन्तस्वरषट्कलघ्वपरयोरन्तस्थितैः कादिभि-
र्वर्गैर्यान्तगतैः क्रमेण कथिता न्यस्याः षडङ्गानि च ॥ २

सर्वमन्त्रजपादेः लिपिन्यासादिपूर्वकत्वात् सर्वमन्त्रमयज्ञानशक्तिरूपत्वेन प्राधान्याच्च प्रथमतो मातृकाविधानं वक्तुमारभते—अथेति । सर्वमन्त्रसामान्य-दीक्षाकथनानन्तर्यमथशब्दार्थः । समस्तबोधस्थितिदीपिकाया इत्यक्षराधिदेवता-त्वोपपादनम् । बोधानां ज्ञानशक्तिप्रसरात्मकानां शब्दानां स्थितयः वैखरी मध्यमा-पश्यन्ती परा लक्षणाः । तासां दीपिका उन्मनीशक्तिरित्यर्थः ।

अथवा समस्तानां बोधानां स्थितिः पर्यवसानं यस्मिन् परमात्मनि तस्य प्रकाशिकाया इत्यर्थः । अस्ति हि सर्ववर्णानां वाक्यरूपत्वेन ब्रह्मात्मबोधकत्वम् ।

अथवा समस्ता बोधास्तिष्ठन्ति येषु विषयेषु तस्य सर्वस्य दीपिकाया इत्यर्थः । शब्दानुविद्धं हि सर्वं विज्ञानजातम् । अशेषदुःखप्रशमायेति विनियोगोक्तिः । बिन्दुविसर्गौ बीजशक्ती । हसावित्यन्ये । ततो हमिति बीजं स इति शक्तिः । इत्युभयाविरोधेन सिद्धं भवति । अथाऽनन्तरमक्षराणाम् अधिदेवताया मातृकाया जपादेः प्रवरं विधानं वक्ष्य इत्यन्वयः ।

कस्यानन्तरमिति आह—अधिदेवताया इति । भुवनाधिपतेरित्यर्थः । वाग्भवानन्तर्यमप्याह—समस्तेति ।

प्रणवानन्तर्यमप्याह—जपादेरिति । प्रणववाग्भवशक्त्यनन्तरं नमोऽन्ता वर्णा जपादौ प्रयोक्तव्या इत्यर्थः ॥ १ ॥

सुमतिभिरिति विधिपदयोगः सूचितः । उक्तं चेति देवीपदयोगः सूचितः । मातृका सरस्वती देवता । क्रमेण कथिता न्यस्या इति । ऋषादि-योग उक्तः । भुवनेश्वर्यादि योगे चायं विशेषः ॥ २ ॥

पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षो-
देशां भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम् ।
अक्षस्रक्कुम्भचिन्तालिखितवरकरां वीक्षणां पद्मसंस्था-
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ॥ ३

काननवृत्तद्वाक्षिश्रुतिनोगण्डौष्ठदन्तमूर्धास्ये ।
दोःपत्सन्ध्यग्रकेषु च पार्श्वद्वयपृष्ठनाभिजठरेषु ॥ ४
हृद्दोर्मूलापरगलकक्षेषु हृदादिपाणिपादयुगे ।
जठरानलयोर्व्यापकसंज्ञान्न्यस्येदथो वर्णान् क्रमशः ॥ ५

संदीक्षितो विमलधीर्गुरुणाऽनुशिष्टो
लक्षं न्यसेत् सुनियतः प्रजपेच्च तावत् ।
अन्तेऽयुतं प्रतिहुनेन्मधुरत्रयाक्तैः
शुद्धैस्तिलैरपि यजेद्दिनशोऽक्षरेशीम् ॥ ६

व्योमाविःसचतुर्दशस्वरविसर्गान्तस्फुरत्कर्णिकं
किञ्जल्कालिखितस्वरं प्रतिदलं प्रारब्धवर्गाष्टकम् ।
क्ष्माबिम्बेन च सप्तमार्णवयुजास्वाशासु संवेष्टितं
वर्णाब्जं शिरसि स्मृतं विषगदप्रध्वंसि मृत्युञ्जयम् ॥ ७

भारतीमिति नादाद्यात्मकं सूक्ष्मरूपं कथितम्। तामिति परं चिदात्मकं भारतीं तां भुवनेश्वरीरूपिणीमिति। स्थूलध्यानेऽपि पाशाङ्कुशपुस्तकाक्ष-वलययोगः सूचितः ॥ ३ ॥

विमलधीरिति तत्तदक्षरन्यासे तत्पारायणादि व्याख्यविस्मरणं सूचितम्। गुरुणाऽनुशिष्ट इति करन्यासादिकं सूचितम्। आदिषट्कं तलादिषु न्यसित्वा ककारादिदशकं दक्षकनिष्ठाद्यङ्गुलीषु व्यापकादिकमङ्गुलीपर्वसु न्यस्याऽङ्ग-मन्त्रैरपि न्यसेदिति करन्यासः। सामान्यपटलोक्ता न्यासाः सर्वत्र कार्या इति। सुनियत इति ब्रह्मचर्यस्थानासनादिनियमाः सूचिताः। अपि यजेदिति तर्पणाभिषेकोपस्थानादिकम् उक्तम् ॥ ४ ॥ ५ ॥ ६ ॥

व्योमाविःसेति। हकारसकारावुद्धृतौ। प्रतिदलं प्रारब्धेति। पारायणा-क्षराणां शक्त्यनुसारेण लेखनं सूचितम्। ऋग्वेदादिगतवर्गप्रश्नादीनां च सप्तमार्णः ठकारः। विषध्वंसे गारुड्योगः। गदध्वंसे नारसिंह्योगः। मृत्युञ्जये

प्रविधाय पद्ममथ पीठमथो कथितक्रमेण विधिनाऽभियजेत् ।
नवभिश्च शक्तिभिरमुत्र सहावरणैः समर्चयतु वर्णतनुम् ॥ ८

मेधा प्रज्ञा प्रभा विद्या धीर्धृतिस्मृतिबुद्धयः ।
विद्येश्वरीति संप्रोक्ता भारत्या नव शक्तयः ॥ ९

अङ्गान्यादौ तदनु च कलायुग्मशश्चाऽष्टवर्गान्
ब्रह्माण्याद्याः शतमखमुखाद्यानथो लोकपालान् ।
मुख्यैर्गन्धैः प्रवरकुसुमैर्धूपदीपैर्निवेद्यै-
र्वर्णान् जापी यजतु दिनशो भारतीं भक्तिनम्रः ॥ १०

ब्रह्माणी माहेशी कौमारी वैष्णवी च वाराही ।
इन्द्राणी चामुण्डा समहालक्ष्मीश्च मातरः प्रोक्ताः ॥ ११

वर्गस्वरयाद्यंशाः क्रमेण कलधौतरजतताम्राः स्युः ।
इति रचितं रुचकमिदं साधकसर्वार्थदायि सततं स्यात् ॥ १२

त्रिवारमम्भः परिजप्तमेतया पिबेद्दिनादावपि विद्यया सुधीः ।
अनेडमूकोऽपि कवित्वगर्वितः पराञ्च सिद्धिं लभतेऽर्कमासतः ॥ १३

तद्योगः [रुद्रयोगः] ॥ ७ ॥

विधिनाऽभियजेदिति । पृथिव्यनन्तरं विद्याब्धियोगः सूचितः । प्रविधायेति यन्त्रजीवादियोगः । अमुत्रेति । ओं ह्रीं वर्णाम्बाय सरस्वत्यासनाय नमः इति पीठमन्त्रः सूचितः । वर्णतनुमिति मातृकया मूर्तिपूजा ॥ ८ ॥ ९ ॥

चाऽष्टवर्गानिति चशब्देन व्यापिन्यादिशक्तिभिश्चतुर्थमावरणं सूचितम् । व्यापिनी पालिनी वाचिनी क्लेदिनी धारिणी मालिनी हंसिनी शान्तिन्यः शक्तयः । ताश्च श्वेताः अक्षवलयपुस्तकधारिण्यः । ब्रह्माणी कनकवर्णा अक्षसूत्र-कमण्डलुवरदाभयधरा । शूलपरशुदुन्दुभिकपालधरा माहेश्वरी । अङ्कुशदण्ड-खट्वाङ्गपाशधरा कौमारी । चक्रघण्टाकपालशङ्खधरा वैष्णवी । मुसलखड्गखेटका-भयधरा वाराही । अङ्कुशतोमरपाशकुलिशधरा इन्द्राणी । शूलक्षुपाण-नृशिरःकपालधरा चामुण्डा रक्ता । अक्षस्रक् बीजापूर कपाल पङ्कजधरा महालक्ष्मीः । शतमखमुखाद्यानिति—शतमखमुखाः लं रं टं क्षं वं यं सं हं क्लीं अमिति बीजानि । तान्यादौ येषां लोकपालानां ते तथोक्ताः । वर्णान्-जापीति वर्णजापी वेत्यर्थः ॥ १० ॥ ११ ॥ १२ ॥

कमलोद्भवौषधिरसेन वचया पयसा च पक्वमथ सर्पिरपि ।
अयुताभिजप्तममुना दिनशो लिहतां कविर्भवति वत्सरतः ॥ १४

वर्णौषध्या शृताभिः कलशममलधीरद्भिरापूर्य नूनं
प्रातस्तेनाऽभिषिञ्चेद्दशशतपरिजप्तेन यं वापि मासम् ।
स स्यान्मेधेन्दिरायुः प्रशमकवियशो विश्वसंवादयुक्तो
नारी वन्ध्याऽपि नानागुणगणनिलयं पुत्रवर्यं प्रसूते ॥ १५

आधारोद्यच्छक्तिबिन्दूत्थिताया वक्त्रे मूर्धेन्दुं ग्रसन्त्याः प्रभायाः ।
चाद्यान्तार्णान् पातयेद्वह्निसोमप्रोतान्मन्त्री मुच्यते रोगजातैः ॥

अपि विद्ययेति । कर्णिकाबीजयोगः सूचितः । अथवा अपिशब्देन दशाक्षरीयोगः विद्याशब्देन त्रैपुराणामन्यतमयोः योगः सूचितः । सुधीरित्याधारेषु पञ्चवर्णादिचिन्तनम् । अयमत्र प्रयोगक्रमः । स्वयं देवताविग्रहो भूत्वा । लिपिपत्रे हस्ते संकल्प्य । तस्मिन् जलमादाय । ऐं क्लीं सौः अः वद वद वाग्वादिनि स्वाहा अः सौः क्लीं ऐं एवं चकारान्तं जपित्वा । चाद्यकारान्तमेव सबिन्दुकं जपित्वा । एवमेव सबिन्दुविसर्गम् अकारादिक्षान्तं जपित्वा पिबन् । मूलाधाराद्याधारेषु चतुःषड् दश द्वादश षोड़श द्विदलपद्मेषु वर्णानां वादि वादि-डादि कादि आदि हादीनां दीपशिखावद्व्याप्तिं ध्यायेत् । पुनरप्येवं द्विवारं पिबन् वर्णानामास्यान्तरम् उद्गमनम् आस्याच्छास्त्राद्याकारेण निर्गमनं च ध्यायेत् । सप्तत्रैकवर्गैर्वा त्रिवारजप इति ।

अप्ययुताभिजप्तमिति पूजाहोमादिकमुक्तम् ॥ १३ ॥ १४ ॥

कलशममलधीरिति कामनानुगुणबीजयोगादिकं सूचितम् । मेधाकामस्य श्रीर्योगः । इन्दिराकामस्य तद्योगः । आयुषि जुंसंयोगः । प्रशमे प्रणवयोगः । कवित्वे वाग्भवयोगः । यशसि अजपायोगः । विश्वसंवादे शक्तियोगः । नानागुणाश्रयपुत्रकामे सर्वयोग इति ।

अथवा भानुवारे मध्यप्रागादि दिक्षु नवकलशान् मुक्तामाणिक्यवैडूर्यगोमेद-वज्रविद्रुमपुष्परागमरकतनीलरत्नयुतान् संपूज्याऽभिषिञ्चेत् । तत्र मध्ये सर्वैः बीजैः देवीं संपूज्य । दलकुम्भेषु श्रीः इत्यादिभिः व्यापिन्याद्याः पूज्याः । शान्तिन्या दुर्गाबीजेन पूजा त्रिलोहमुद्रिका नवरत्नमुद्रिका वा कलितसङ्गता कार्या । कलशजपपूजा होममहिता ॥ १५ ॥

वह्निसोमप्रोतानिति । अग्नीषोमात्मकानित्यर्थः । मन्त्रीति । श्रीं क्लीं

विन्यासैरथ सजपैर्हुतार्चनाद्यै-
र्ध्यानेन प्रभजति भारतीं नरो यः ।
स श्रीमान् पुनरचिरेण काव्यकर्ता
म्लेलादीन् जयति जरामृत्युरोगैः ॥ १७

ह्रं ह्लं नमः । ओं ह्रीं ह्रं ह्लं नमः । ओं ह्रीं ह्रं ह्लं नम इत्यादिक्रमेण पातयेदित्यर्थः ॥ १६ ॥

विन्यासैरिति । शुद्ध सविसर्ग सबिन्दुविसर्ग सबिन्दु सकल सकेशवादि-सश्रीकण्ठादि सशक्तिकमलामार समारकमलाशक्ति सशक्ति सकमल समारन्यासैरन्यै-श्चेत्यर्थः । जपाश्चैवंविधाः । हुतार्चनाविधौ मातृकोक्तौ ।

शुद्धन्यासे अङ्गर्षिध्यानादिकं मातृकायामुक्तप्रकारेण द्रष्टव्यम् । सरस्वती एव देवता ।

विसर्गन्यासे विसर्गान्तान्यङ्गानीत्येव विशेषः । ध्यानपूजादिकं समानम् । सृष्टिसरस्वती देवता ।

बिन्दुविसर्गयोगे तथाविधानि अङ्गानि । स्थितिसरस्वती देवता । ध्याने तु विशेषः । सिन्दूरवर्णं वराक्षसूत्रमृगपुस्तकधरं देवं ध्यात्वा । तत्पार्श्वे काञ्चनाभां पुस्तकाक्षमालाधरां देवीं ध्यायेदिति ।

सबिन्दुन्यासे संहारसरस्वती देवता । रक्तवर्णाम् अक्षमालाटङ्कमृगपुस्तकधरां ध्यायेत् ।

सकलन्यासे प्रजापतिः ऋषिः । गायत्री छन्दः । कला सरस्वती देवता । ह्रस्वदीर्घान्तरस्थैः प्रणवैरङ्गानि । पद्म चक्र शूलमृगाक्षसूत्र पुस्तक टङ्क कपालशङ्ख-कलशधरा मुक्ताविद्युत्पयोद स्फटिक जपावर्णपञ्चवदना शुक्लवर्णा ध्येया ।

केशवादियुतन्यासे प्रजापतिः ऋषिः । गायत्री छन्दः । अर्धलक्ष्मीनारायणौ देवता । दीर्घषट्कयुक्तेन कामेनाऽङ्गानि । अथवा ओं नमो ह्रीं नमो नारायणाय हंसः सोऽहं अं कं खं गं घं ङं आं ओं नमो नारायणाय हंसः सोऽहं देव्यै हृदयाय नमः । इत्यादिमन्त्रैरङ्गानि कुर्यात् । पद्मिनी विष्णुपत्नी वरदा कमलरूपा-शूलिन्योऽवशिष्टाः शक्तयः । पद्म गदा शङ्ख चक्र पुस्तक पद्मादर्श रत्नकलशधरो विद्युत्पयोदवर्णो ध्येयः ।

श्रीकण्ठादियुतन्यासेऽम्बरीष ऋषिः । अनुष्टुप् छन्दः । अर्धनारीश्वरो देवता । दक्षिणामूर्तिगायत्री ऋषिच्छन्दसी इत्यन्ये । षड्दीर्घयुजा हसाऽङ्गानि । अथवा

कलाः कला नादभवा वदन्त्यजाः कचादिवर्णानुभवाष्टतादिकान् ।
पयादिकान्माक्षरजाश्च बिन्दुजाः क्रमादनन्तावधिकास्तु षादिकान् ॥

कुर्यात् कलाभिराभिर्मन्त्री दिनशस्तनौ कलान्यासम् ।
सान्निध्यकृत् स मर्त्यः प्रतिमाकलशादिषु प्रविज्ञेयः ॥ १९

ओं नमो भगवति ब्रह्माणि रक्ष रक्ष पद्महस्ते मां रक्ष रक्ष अं कं खं गं घं ङं आं क्लीं ह्सौः सञ्जीवनि सञ्जीवनि हृदयाय नमः । ओं नमो भगवति माहेश्वरि रक्ष रक्ष त्रिशूलहस्ते मां रक्ष रक्ष इं चं छं जं झं ञं ईं क्लीं ह्सौः ऊर्ध्वकेशिनि शिरसे स्वाहा । ओं नमो भगवति कौमारि रक्ष रक्ष शक्तिहस्ते मां रक्ष रक्ष उं टं ठं डं ढं णं ऊं क्लीं ह्सौः जटिलकेशिनि शिखायै वषट् । ओं नमो भगवति वैष्णवि रक्ष रक्ष चक्रहस्ते मां रक्ष रक्ष एं तं थं दं धं नं ऐं क्लीं ह्सौः मायात्रैलोक्यरूपिणि सहस्रपरिवर्तिनि कवचाय हुं । ओं नमो भगवति वाराहि रक्ष रक्ष दंष्ट्रहस्ते मां रक्ष रक्ष ओं पं फं बं भं मं औं क्लीं ह्सौः ताराक्षिणि नेत्रत्रयाय वौषट् । ओं नमो भगवति इन्द्राणि रक्ष रक्ष वज्रहस्ते मां रक्ष रक्ष अं यं रं लं वं शं षं सं हं लं क्षं अः क्लीं ह्सौः मारय मारय अस्त्राय फट् । ओं नमो भगवति चामुण्डे रक्ष रक्ष पाशहस्ते मां रक्ष रक्ष अं इत्यादि ङस्वाष्टकं कादिक्षान्तं दीर्घाष्टकं चोक्त्वा सर्वाङ्गं रक्ष रक्ष सर्वाङ्गव्यापिनि स्वाहा इति मन्त्रैरङ्गानि व्यापकं च कुर्यात् । वन्धूककाञ्चननिभोऽक्षमालाङ्कुशपाशवरदधरो ध्येयः ।

शक्तिकमलामारयोगे शक्तेः ऋष्यादिकं न्यसेत् । द्विरुक्तैर्बीजैरङ्गानि । अक्षस्रक्पञ्चशर पद्माङ्कुश पाशपद्मेक्षुधनुः पुस्तकधरा अरुणा ध्येया ।

समारकमलाशक्तिन्यासे सम्मोहनगायत्रीजगज्जनन्य ऋष्यादयः । द्विरुक्तैर्बीजैरङ्गानि । पञ्चबाण पद्माङ्कुशाक्षमाला पुस्तकपाशपद्मधनुर्धरा ध्येया ।

सशक्तिन्यासे शक्तिवदङ्गर्ष्यादिकम् । अक्षस्रगङ्कुशपाशपुस्तकधरा ध्येया ।

सश्रीन्यासे श्रीबीजवदङ्गर्ष्यादिकम् । अक्षस्रकमलद्वयपुस्तकधरा ध्येया ।

सकामन्यासे कामबीजवदङ्गर्ष्यादिकम् । अक्षस्रक्शरचापपुस्तकधरा ध्येया ।

स श्रीमानिति । केशवादियोगे श्रीबीजयोगे च श्रीरेव फलम् । कलायोगे काव्यकर्तृत्वम् । श्रीकण्ठादियोगे क्ष्वेलादिजयः । जरापमृत्युरोगादिजयोऽन्येषाम् । सर्वं सर्वत्र वा ॥ १७ ॥

कलाः कला इति कलान्यासे वर्णयोगक्रममाह । प्रसङ्गाच्चान्यत् ॥ १८ ॥

मन्त्रीति । कलान्यासे पाशाङ्कुशत्रयाक्षरादियोगः सूचितः ॥ १९ ॥

मन्त्रोद्धारविधानेन वर्णव्यत्यासकृन्निरुद्दिष्टा ।
आभिः श्रीकण्ठादिप्रोक्तैर्वा नामभिर्वा विशेषज्ञैः ॥ २०

अष्टाक्षरोक्तमनुवर्यविशिष्टमूर्त्तिं
संस्मृत्य विष्णुमपि मन्त्रितमो यथावत् ।
वर्णैर्न्यसेदपि पुरेव च केशवादि-
मूर्त्या युतैर्वपुषि भक्तिभरावनम्रः ॥ २१

रुद्रादीन् शक्तियुतान् न्यसेद् याद्यांस्त्वगादिसप्तधातुयुतान् ।
श्रीकण्ठादौ विद्वान् वर्णान् प्राग्बीजसंयुतांश्चापि ॥ २२

सिन्दूरकाञ्चनसमोभयभागमर्धं-
नारीश्वरं गिरिसुताहरचिह्नभूषम् ।
पाशाभयाक्षवलयेष्टदहस्तमेवं
स्मृत्वा न्यसेत् सकलवाञ्छितवस्तुसिद्ध्यै ॥ २३

शक्त्या शक्तिश्रीभ्यां शक्तिश्रीक्लीभिरन्वितैर्वर्णैः ।
श्रीशक्त्या युगस्मराद्यैरथवा विहितः समृद्धये न्यासः ॥ २४

अथाऽनया पञ्चविभेदभिन्नया प्रपञ्चयागस्य विधिः प्रकथ्यते ।
कृते तु यस्मिन्निह साधकोत्तमाः प्रयान्ति निर्वाणपदं तदव्ययम् ॥ २५

विशेषज्ञैरिति । उद्धारस्य मलसंहाररूपत्वं जानद्भिरित्यर्थः ॥ २० ॥

केशवादिन्यासे विशेषमाह—अष्टाक्षरेति । अष्टाक्षरपटल उक्तो यो मनुवर्य-स्तेन विशिष्टमूर्तिं विष्णुमिति । वर्णोर्ध्वभागेऽष्टाक्षरयोगोऽप्युक्तः । विष्णु-मपीति श्रियमपीत्यर्थः । मन्त्रितम इति वर्णादौ त्रिपुटादियोगः सूचितः । यथावदित्यर्धलक्ष्मीनारायणध्येयत्वं सूचितम् । न्यसेदपीति पूजादिकमपि कुर्यादित्यर्थः ॥ २१ ॥

रुद्रादीनिति । रुद्राणां श्रीकण्ठादिमूर्तीनामादौ स्थितान् वर्णान् शक्तियुतान् मूर्त्यन्ते पूर्णोदर्यादिशक्तियुतान् । याद्यैस्त्वगादिधातुयोगः सर्वन्यासेषु समानः । श्रीकण्ठादौ विद्वानिति । श्रीकण्ठादिमूर्तीनामादौ वर्णानामुपरि पञ्चाक्षरी-विद्यायोगः उक्तः । प्राग् बीजसंयुतानिति वर्णादौ प्रणवशक्तिप्रासादयोग उक्तः । अपीत्यजपादियोगः ॥ २२॥२३॥२४ ॥

पञ्चविभेदभिन्नयेति । पञ्चाशत् सप्त चि द्वेकमन्त्रसम्बद्धयेत्यर्थः । सशक्ति-

पूर्वं महागणपतिं स्वविधानसिद्ध-
रूपञ्च साङ्गमपि सावरणं विचिन्त्य ।
बीजेन संयुतमृचा प्रजपेत माला-
मन्त्रं निजेष्टविधयेऽवहितो यथावत् ॥ २६

सचतुश्चत्वारिंशद्वारं बीजं तथैकवारमृचम् ।
प्रजपेच्चतुरावृत्त्या मालापूर्वं मनुञ्च मन्त्रितमः ॥ २७

समुनिच्छन्दो दैवतमपि साङ्गमातृकां च विन्यसेत् ।
प्रागभिहितेन विधिना वारत्रितयं ग्रहांश्च सप्त तथा ॥ २८

वदने च बाहुपादद्वितये जठरे च वक्षसि यथावत् ।
अर्काद्यान् विन्यसेत् क्रमेण मन्त्री स्वरादिवर्गेशान् ॥ २९

कमलामार समारकमलाशक्ति सशक्तिकमला सशक्ति समारपञ्चन्यासभेदयुतयेति वार्थः । साधकोत्तमा इति प्रपञ्चयागादौ तत्त्वस्मृहामधिकार उक्तः ॥ २५ ॥

पूर्वमिति । लिपिन्यासात् पूर्वं नित्यलिपिन्यासादुत्तरमित्यर्थः । अवहित इति बीजादीनां ध्यानभेदः सूचितः । यथावदित्यङ्गादिन्यासपूर्वकत्वम् ॥ २६ ॥

मन्त्रितम इति विभूतिमन्त्रजपः । बीजषट्कानन्तरं महाविभूते वरे वरदे सर्वजनविमर्दिनीत्यादिर्विभूतिमन्त्रः ॥ २७ ॥

ग्रहांश्च सप्तेति नवग्रहन्यासः सूचितः ॥ २८ ॥

प्राणाग्निहोत्रार्थं सप्तग्रहन्यासस्थानमाह— वदन इति । अयमत्र न्यासक्रमः । स्वरस्थाने स्वरान् विन्यस्य । तानुक्त्वा । स्वराधिपतये सूर्याय भगवते नमः । इति स्वरस्थाने व्यापयेत् । कवर्गं न्यसित्वा । तानुक्त्वा । कवर्गाधिपतये मङ्गलाय भगवते नमः । चवर्गाधिपतये शुक्राय नमः । इत्यादयो व्यापकमन्त्राः ज्ञातव्याः । यथावदिति प्रणवशक्तिमूलमन्त्रादियोगो व्यापकन्यासश्च सूचितः ।

मन्त्री स्वरादिवर्गेशानिति । भगवत्पदस्य तत्तदधिपतिपदस्य च योग उक्तः । स्वरानुक्त्वा सोममण्डलाय नम इति मूर्धादिगलपर्यन्तं व्याप्य । स्पर्शानुक्त्वा सूर्यमण्डलाय नम इति गलादिनाभिपर्यन्तं व्याप्य । यादिकमुक्त्वा अग्निमण्डलाय नम इति नाभ्यादिपादान्तं न्यसेदिति मण्डलत्रयन्यासः । आदिठान्तमुक्त्वा सोममण्डलाय नम इति मूर्धादिहृदयान्तं न्यसित्वा । डादिक्षान्तमुक्त्वाऽग्नि-मण्डलायेति हृदादिपादान्तं न्यसेदिति अग्नीषोमन्यासः । आदिक्षान्तमुक्त्वा

तारश्च शक्तिरजपा परमात्मबीजं
वह्नेः प्रिया च गदिता इति पञ्च मन्त्राः ।
एभिस्तृतीयलिपिभिः कथितः प्रपञ्च-
यागात्त्रयो हुतविधिः सकलार्थदायी ॥ ३०
ब्रह्मा स्यादृषिरस्य च छन्दः परमान्विता च गायत्री ।
सकलपदार्थसदर्थपरिपूर्णं देवता परं ज्योतिः ॥ ३१
जायाऽग्नेर्हृदयमथो शिरश्च सोऽहं
हंसात्मा त्वथ च शिखा स्वयञ्च वर्म ।
ताराख्यं समुदितमीक्षणं तथाऽस्त्रं
प्रोक्तं स्याद्धरिहरवर्णमङ्गमेवम् ॥ ३२

हंसः पुरुषात्मने नम इति व्यापकत्वेन हंसन्यासः । एते चाऽन्याश्च यथावदित्यनेन सूचिताः । तथेति वा ।

अथ नवग्रहन्यासः । चं लं हं सं षं मरकतवर्णाय केतवे भगवते नमः । शं वं लं रं यं गोमेदवर्णाय राहवे भगवते नमः । मं भं बं फं पं नीलवर्णाय शनैश्चराय भगवते नमः । नं धं दं थं तं विद्रुमवर्णाय बृहस्पतये भगवते नमः । णं ढं डं ठं टं वज्रवर्णाय बुधाय भगवते नमः । ञं झं जं छं चं पुष्परागवर्णाय शुक्राय भगवते नमः । ङं घं गं खं कं वैडूर्यवर्णाय अङ्गारकाय भगवते नमः । अः अं औं ओं ऐं एं ऌं ऌं मुक्तावर्णाय सोमाय भगवते नमः । ॠं ऋं ऊं उं ईं इं आं अं माणिक्यवर्णाय सूर्याय भगवते नम इति मूलाधार लिङ्गमूल नाभि हृदय गल लम्बिका भ्रमध्य ललाट ब्रह्मरन्ध्रेषु न्यसित्वा । मण्डलत्रयाग्नीषोमहंसन्यासान् पूर्वोक्तवैपरीत्येन न्यसेदिति । 'हुत्वा महात्माऽथ शतार्धसंख्यं विन्यस्य तावच्च'इति प्राणाग्निहोत्रस्य प्राथम्यं वक्ष्यति ।

अतः प्रथमं नवग्रहमण्डलत्रयादिन्यासं कृत्वा । सप्तग्रहमण्डलत्रयादि-न्यासः कर्तव्यः ॥ २९ ॥

ब्रह्मा स्यादृषिरस्य प्रपञ्चयागमन्त्रस्य । प्राणाग्निहोत्रस्य तु स्वयंभूरित्यर्थः । परमान्विता चेति । स्वयमन्विता या गायत्री प्राणाग्निहोत्रस्येत्यर्थः । स्वयंज्योतिः प्राणाग्निहोत्रदेवता ॥ ३०॥३१ ॥

शिरश्च सोऽहमिति । प्राणाग्निहोत्रे हंसस्य शिरस्त्वमुक्तम् । अथ च शिखेति । प्राणाग्निहोत्रे सोऽहमित्यस्य शिखात्वं सूचितम् । स्वयं च वर्मेति । शक्तेः ध्येयत्वं

अत्राऽकारहकाराद्यावाद्यौ शान्तान्तिकौ मनू ।
हकारश्चाऽप्यकारश्च बिन्दुः सर्गी च साक्षरः ॥ ३३
साकारश्चात्ममन्त्रः षड्इन्द्रियात्मक उच्यते ।
सकारौकारहकारा बिन्दुः पञ्चार्णको मनुः ॥ ३४
करणात्मसमायुक्तः परमात्माह्वयो मनुः ।
सवाकारैर्हृदीर्घाभ्यां वह्निजायामनुर्मतः ॥ ३५
वागादीन्द्रियसम्भिन्नः सोऽयं पञ्चाक्षरात्मकः ।
तस्मादेभिः कृतो न्यासो विशेषादवरोहकृत् ॥ ३६
ब्रह्मा बृहत्तया स्यात् परमपदेन प्रकाशितः प्रवरः ।
गायकसन्त्राणनतो गायत्रं समुदीरितं छन्दः ॥ ३७
परमन्यदतिशयं वा ज्योतिस्तेजो निरूपितेऽन्यद् यत् ।
अतिशायि च नितरामिति कथितैवं देवता परं ज्योतिः ॥ ३८
स्वेति स्वर्गः स्वेति चात्मा समुक्तो हेत्याहुतिर्हेति विद्याद् गतिञ्च ।
स्वर्गात्मावध्यातता धामशाखा वह्नेर्जाया यत्र ह्रयेत सर्वम् ॥ ३९
स इति परिततं परन्तु तेजस्त्वमहमिति मय्युदिते मनोऽस्य यत्र ।
तदिति सकलचित्प्रकाशरूपं कथितमिदं शिरसोऽपि मन्त्रमेवम् ॥

सूचितम् । मन्त्राणां व्याप्तिकथनेन न्यासविशेषाः सूचिताः । ते च गुर्वादिवन्दनं कृत्वा अस्त्रेण करशुद्ध्यादिकं प्राणायामादिकं च कृत्वा न्यस्तव्याः ॥ ३२॥३३ ॥ ॥ ३४॥३५॥३६॥३७॥३८ ॥

हेत्याहुतिरिति स्वर्गशब्दार्थस्य परमात्मनः स्वशब्दार्थप्रत्यगात्मन्याह्वान-मित्यर्थः । हेति विद्यात् गतिं चेति । आत्मनः परमात्मनि गतिमित्यर्थः । हृदयमन्त्रेण जीवात्मपरमात्मनोः परस्परमेकत्वम् उक्तमिति । तात्पर्यमाह— स्वर्गात्मेति । अयमेवार्थ इत्यत्रोपपत्तिमाह—यत्र ह्रयेतेति ॥ ३९ ॥

परमात्ममन्त्रस्य त्वंपदार्थपर्यन्तं तत्पदार्थत्वमाह—स इति । अहमिति मय्युदिते मनोऽस्य यत्रेति । देहेन्द्रियादिभ्य उद्गते मयि साक्षिणि परमात्मन्यस्य साधकस्य मनो यत्र वर्तते साक्षितया सोऽहंशब्दार्थ इत्यर्थः ।

वाक्यार्थमाह—तदिति । सकलः परिपूर्णः चित्प्रकाशश्च तं रूपयतीति सकलचित्प्रकाशरूपो मन्त्रः ॥ ४० ॥

हमिति प्रकाशितोऽहं स इति च सकलप्रकाशनिर्वाणम् ।
अतुलमनुष्णमशीतं यत्तदितीत्थं प्रकाशितेह शिखा ॥ ४१

प्रतिमथ्य गुणत्रयानुबद्धं सकलं स्थावरजङ्गमाभिपूर्णम् ।
स्वगुणैर्निजबिन्दुसन्ततात्माखिललोकस्थितिवर्ममन्त्र उक्तः ॥ ४२

आद्यैस्त्रिभेदैस्तपनान्तिकैर्यत् सृजत्यजस्रं जगतोऽस्य भावम् ।
तेजस्तदेतन्मनुवर्यकस्य नेत्रत्रयं सन्त उदाहरन्ति ॥ ४३

हङ्काराख्यो धातुर्हरणार्थे साधकानभीष्टान् ।
संहरतीति यदेतत्तेजोरूपं तदस्त्रमन्त्रः स्यात् ॥ ४४
यदा लिपिविभिन्नोऽयं तदात्माष्टाक्षरः स्मृतः ।
एतत् सर्वप्रपञ्चस्य मूलमष्टाक्षरं स्मृतम् ॥ ४५
प्रपञ्चयागस्त्वमुना कृतो न्यासविधिर्मतः ।
वर्णैर्देहेऽनले द्रव्यैर्विद्याहुतविधिं द्विधा ॥ ४६
मातृकान्यासवत्सार्धं लिपिनाऽष्टाक्षरेण तु ।
नित्यं न्यसेत् संयतात्मा पञ्चाशद्वारमुत्तमम् ॥ ४७

अजपायास्तत्पदार्थपर्यन्तं त्वंपदार्थतामाह—हमिति । अतुलमिति वाक्यार्थकथनम् ॥ ४१ ॥

एवं होमाधिकरणाग्निशोधनार्थयोः परमात्माजपामन्त्रयोरर्थमभिधाय । द्रव्यसंशोधनार्थस्य शक्तिबीजस्यार्थमाह—प्रतिमथ्येति । प्रतिमथ्य संहृत्य गुणत्रयव्याप्तं सकलं जगत् स्वगुणैः हकारादिरूपैः तांश्च हकारादीन् बिन्दौ गुणसाम्यात्मनि संहृत्य । सर्वलोकाश्रयापरप्रकृत्यमृतात्मनाऽवस्थितः कवचमन्त्र इत्यर्थः ॥ ४२ ॥

प्रणवस्याऽमृतरूपद्रव्योत्पादकत्वेन विनियोगं वदन् नेत्रमन्त्रार्थमाह—आद्यैरिति । अजस्रमिति प्रतिहोममित्यर्थः ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥

पञ्चाशन्मन्त्रैः प्रपञ्चयागक्रममाह—मातृकान्यासवदिति । सप्तग्रहमण्डलत्रयादिहोमं सूचयति । अयमत्र क्रियाक्रमः । प्राणाग्निहोत्रप्रपञ्चयागयोः ऋष्यादिकं विन्यस्य । शक्तिरूपमात्मानं ध्यात्वा । अष्टाक्षरद्वयमष्टवारमावर्त्य । हयरौं ययरौं रयरौं वयरौं लयरौं इति मूलाधारत्रिकोणशक्ति बिन्दुमध्यप्राग्वारुणसौम्य दक्षिणदिगतकुण्डेष्वग्नीनुज्ज्वाल्य । चाद्यकारान्तमुच्चरन् । पादादिमस्तकान्तं व्याप्य । स्वशरीरात्मकं सर्वं जगत् परमामृतेनैकीकृत्य । ओं श्रीं

ह्वं परंज्योतिषि जुहोमि सोऽहं हंसः स्वाहा। ओं क्लीं लं परंज्योतिषि जुहोमि सोऽहं हंसः स्वाहा। ओं क्लीं हं परंज्योतिषि जुहोमि सोऽहं हंसः स्वाहा। ओं क्लीं सं परंज्योतिषि जुहोमि सोऽहं हंसः स्वाहा। ओं क्लीं षं परंज्योतिषि जुहोमि सोऽहं हंसः स्वाहा। इति मध्यादिकुण्डेषु हुत्वा। शाद्यकारान्तमेवं हुत्वा अकारमवशेषयेत्। पुनः प्रणवशक्तिबीजाभ्यां शरीरमुत्पाद्य। शुद्धन्यासेन सकलीकृत्य। शाद्यकारान्तं व्यापकत्वेन पूर्ववदमृतीकृत्य। पुनः ह्वं शं मं नं णं जं डं अः एं ऊं आकाशशब्दतन्मात्र श्रोत्र वागात्म शान्त्यतीत नादतुरीयातीतानुग्रह सदाशिवेशानवासुदेवान् परंज्योतिषीत्यादि मध्ये। ओं क्लीं लं वं भं धं ढं झं घं अं ल्लृं उं वायुस्पर्शतन्मात्र स्पर्शपाणिप्रकृति शान्तिबिन्दुतुरीयतिरोधानेश्वरतत्पुरुष संकर्षणान् परंज्योतिषीत्यादि पूर्वकुण्डे। ओं क्लीं हं लं वं दं डं जं गं औं ल्लृं ईं तेजोरूपतन्मात्र चक्षुःपादाहंकार विद्यामकार सुषुप्ति संहाररुद्राघोर प्रद्युम्नान् परंज्योतिषीत्यादि पश्चिमे। ओं क्लीं सं रं फं थं ठं छं खं ओं ऋं इं अप्रसतन्मात्र रसनपायु मनःप्रतिष्ठोकार स्वप्नस्थिति विष्णुवामदेवानिरुद्धान् परंज्योतिषीत्यादि सौम्ये। ओं क्लीं षं यं पं तं टं चं कं ऐं ऋं आं पृथिवीगन्धतन्मात्रघ्राणोपस्थ बुद्धि निवृत्त्यकार जाग्रत्सृष्टि ब्रह्मसद्योजातनारायणान् परंज्यतिषीत्यादि दक्षिणे कुण्डे हुनेत्। पुनः लरियों वरियों ररियों यरियों हरियोमित्यग्नीनेकीकृत्य। पुनः पूर्ववदुत्पाद्य। सबिन्दुकेन सकलीकृत्य। पूर्ववदमृतीकृत्य। ओं क्लीं अं परंज्योतिषीत्यादिना हुत्वा। पूर्ववदुत्पाद्य। सविसर्गेण सकलीकृत्याऽमृतीकृत्य। ओं क्लीं ह्वं परंज्योतिषीत्यारभ्याऽकारान्तं हुत्वा। पूर्ववदुत्पाद्य। सबिन्दुसविसर्गेण सकलीकृत्य। नवग्रहन्यासमन्त्रैः विधिवत् हुत्वा। पूर्ववदुत्पाद्य। सकलन्यासेन सकलीकृत्याऽमृतीकृत्याऽग्न्यादिमण्डलत्रयन्यासमन्त्रैः विधिवत् हुत्वोत्पाद्य। सकेशवादिन्यासेन सकलीकृत्याऽमृतीकृत्याऽग्नीषोमन्यासमन्त्राभ्यां हुत्वोत्पाद्य। श्रीकण्ठादिन्यासेन सकलीकृत्याऽमृतीकृत्य हंसन्यासमन्त्रेण हुत्वोत्पाद्य। सशक्ति कमला मारन्यासेन सकलीकृत्य प्रपञ्चयागं कुर्यात्। ओं क्लीं अं परंज्योतिषि जुहोमि हंसः सोऽहं स्वाहेत्यादि चकारान्तं वर्णस्थानेषु न्यस्य हुत्वा। पूर्ववदुत्पाद्य। समार कमला शक्तिन्यासेन सकलीकृत्य। सप्तग्रहन्यासवत् हुत्वा। पूर्ववदुत्पाद्य। सशक्तिन्यासेन सकलीकृत्य। सोमादिमण्डलत्रयन्यासवत् हुत्वा। पूर्ववत् समुत्पाद्य सकमलान्यासेन सकलीकृत्याऽग्नीषोमन्यासवत् हुत्वोत्पाद्य। समारन्यासेन सकलीकृत्य। हंसन्यासवत् हुत्वा। प्रणवेन स्वात्मस्थो भवेदिति प्रपञ्चयागः॥ ४७॥

पञ्चज्ञानेन्द्रियाबद्धाः सर्वास्तु लिपयो मताः ।
ताभिरारात्तनं सर्वं तत्तदिन्द्रियगोचरम् ॥ ४८
स्मर्तव्याशेषलोकान्तर्वर्त्ति यत्तेज ऐश्वरम् ।
ब्रह्माग्नौ जुहुयात्तस्मिन् सदा सर्वत्र वर्तिनि ॥ ४९
ब्रह्मात्मभिर्महामन्त्रैर्ब्रह्मविद्भिः समाहितैः ।
ब्रह्माग्नौ ब्रह्महविषा हुतं ब्रह्मार्पणं स्मृतम् ॥ ५०
एवं वर्णविभेदभिन्नमदृढं मांसास्थि[न्त्र]मज्जावृतं
देहं तत् चरमक्षरे सुविशदे सर्वत्र वर्तिन्यथ ।
हुत्वा ब्रह्महुताशने विमलधीस्तेजःस्वरूपी स्वयं
भूत्वा सर्वमनून् जपेदभियजेद्ध्यायेत्तथा तर्पयेत् ॥ ५१

एवं समन्त्रकं प्रपञ्चयागमभिधायाऽमन्त्रकं विदुषामयत्नसाध्यं प्रपञ्चयागमाह—पञ्चज्ञानेन्द्रियेति । वाचकवर्गस्य इन्द्रियसम्बन्धमभिधाय तद्वारेण वाच्यस्यापि तत्त्वगणस्य तदाह—त्विति ।

अथ होमप्रकारमाह—ताभिरिति । ताभिर्लिपिभिः सह तत्तदिन्द्रियगोचरं ब्रह्माग्नौ जुहुयादित्यन्वयः । आरात्तनं दूरमन्तिकं च अध्यात्ममधिदैवतं चेत्यर्थः । अयं होमप्रकारः । सर्वसाक्षित्वेन स्वयमवाच्यमवाचकं ब्रह्म भूत्वा घटादिविषयदर्शनसमये स्वस्मादुत्पद्यमानस्य तत्त्वगणस्य स्वस्मिन्नेव लयं दर्शनावसाने भावयेदिति । तत्राहतशिवतत्त्वं प्रमाताऽकारार्थः । परिणामिन्यपरशक्तिरित्यर्थः । तस्य परिणामसामर्थ्यमाहतशक्तिः चकारतदर्थरूपिणी विमर्शप्रकाशाभ्यां वा शक्तिशिवतत्त्वभेदः । तदिच्छाक्रियाज्ञानानि सदाशिवेश्वरविद्यातत्त्वानि । तत्तद्विक्षेपे तदाच्छादने च मायातत्त्वम् अवस्थितम् । कालस्तत्तत्काले । नियतिः तस्य देशादिनियमे । कला किञ्चित्कर्तृत्वे । अविद्या किञ्चिज्ज्ञत्वे । रागः तत्पूर्णतायाम् । पुरुषः तज्ज्ञत्वाभिमानित्वे । प्रकृतिः सुखदुःखादौ । अहंकारादित्रयम् अहंकारनिश्चयसंकल्पादौ । श्रोत्रादिकं शब्दस्पर्शरूपास्वादपरिमलेषु । वागादिकं वचनादानगमनविसर्गानन्देषु । शब्दाकाशादिकं तु सर्वविषयेषु प्रसिद्धमेव ॥ ४८ ॥ ४९ ॥

अमन्त्रके समन्त्रके च कथिते होमे पृथक् ब्रह्मार्पणं न कर्तव्यमित्याह—ब्रह्मात्मभिरिति ॥ ५० ॥

एवं प्राणाग्निहोत्रप्रपञ्चयागाभ्यां शुद्धस्य सकलीकरणन्यासेन आत्मसात्कृत-

देवताविग्रहस्यैव जपादौ अधिकार इत्याह—एवं वर्णेति। तेजःस्वरूपी स्वयं भूत्वेति सकलीकरणन्यासेन चतुर्नवति मन्त्रात्मक देवताविग्रहो भूत्वेत्यर्थः।

अयं न्यासक्रमः। प्रपञ्चयागानन्तरम् अपरिच्छिन्ने परतेजसि प्रणवशक्तिभ्यां व्यापयन् अपरं जीवात्मकं तेजः सञ्चिन्त्य ताभ्यामेव सुषुम्नां कारणशक्तिकवलीकृतजीवां स्मृत्वा तदग्रे ताभ्यामेव सहस्रदलं कारणात्मकं पद्मं प्रतिपाद्य तस्मात् ताभ्यामेव वर्णात्मकममृतपिण्डं सुषुम्नाकवलनक्रमेण उत्पाद्य विसर्गान्वितमातृकान्यासेन सकलीकृत्य मूलाधार हृद् भ्रूमध्येषु दश द्वादश षोड़शप्रणवजपेन तावद्दलानि पद्मानि सञ्चिन्त्य दशदलेषु व्यापककला न्यसित्वा कर्णिकायां मं वह्निमण्डलाय दशधर्मकलात्मने नमः इत्यादि मन्त्रं जातवेदस इति ऋचं च जपित्वा तत्रैव व्यापककलानामग्नेश्च प्राणप्रतिष्ठां कुर्यात्। पुनः द्वादशदलेषु स्वर्गकला न्यसित्वा कर्णिकायां अं सूर्यमण्डलायेत्यादि मन्त्रं तत्सवितुरिति ऋचं च जपित्वा तत्रैव स्वर्गकलानां सूर्यस्य च प्राणप्रतिष्ठां विधाय। षोड़शदलेषु स्वरकला न्यसित्वा कर्णिकायां उं सोममण्डलायेति मन्त्रं त्र्यम्बकमिति ऋचं च जपित्वा तत्रैव स्वरकलानां सोमस्य च प्राणप्रतिष्ठां कुर्यात्।

पुनः पञ्चाशत्कला न्यसेत्। कं सृष्ट्यै नमः इत्यादि दशकं पादयोर्न्यस्य लं पृथिवीगन्धतन्मात्रेत्यादि मन्त्रेण पादयोर्व्यापकत्वेन न्यसेत्। अं ब्रह्मणे नमः लं पृथिव्यै नमः इत्यादिमन्त्रैः षष्ठपटलोक्तैर्वा यथास्थानं न्यसेत्। एवमेवोकारादिकलान्यासेष्वपि द्विधा पञ्चकन्यासो द्रष्टव्यः। पुनः पादयोः हंसः शुचिषदिति ऋचं च जपित्वा तत्रैवाऽकारकलानां ब्रह्मणश्च प्राणप्रतिष्ठां कुर्यात्। पुनः टं जरायै नम इत्याद्या उकारकला हस्तयोः न्यस्य अप्पञ्चकं विन्यस्य हस्तयोः प्रतद्विष्णुरिति ऋचं जपित्वा तत्रैव उकारकलानां विष्णोश्च प्राणप्रतिष्ठां कुर्यात्। पुनः पं तीक्ष्णायै नम इत्यादि मकारकला मूलाण्डगुह्यनाभिहृत्कलपार्श्वहृदयपृष्ठककुत्सु न्यसित्वा तेजःपञ्चकं विन्यस्य हृदये त्र्यम्बकमिति ऋचं विन्यस्य तत्रैव मकारकलानां रुद्रस्य च प्राणप्रतिष्ठां कुर्यात्। पुनः षं पीतायै नम इत्यादि बिन्दुकला गलास्यनेत्रादिषु न्यसित्वा वायुपञ्चकं विन्यस्य भ्रूमध्ये तत्सवितुरिति ऋचं न्यसित्वा तत्रैव बिन्दुकलानामीश्वरस्य च प्राणप्रतिष्ठां कुर्यात्। पुनः अं निवृत्त्यै नमः इत्यादिनादकला विसर्गाद्यकारान्तस्थानेषु विन्यस्याऽऽकाशपञ्चकं न्यसित्वा शिरसि विष्णोर्योनिमिति ऋचं च विन्यस्य तत्र नादकलानां सदाशिवस्य च प्राणप्रतिष्ठां कुर्यात्।

पुनर्जीवकलाः सकला मातृकान्यासवत् विन्यस्य हृदये जीवकलानां प्राणप्रतिष्ठां

शुद्धस्याऽपि सबिन्दुकस्त्वथ कलायुक्केशवाद्यैर्युतः
श्रीकण्ठादियुतश्च शक्तिकमलामारैश्च चैकैकशः ।
न्यासास्ते दशधा पृथङ्निगदिताः स्युर्ब्रह्मयागान्तिकाः
सर्वे साधकसिद्धिसाधनविधौ सङ्कल्पकल्पद्रुमाः ॥ ५२

प्रपञ्चयागस्तु विशेषतो विपत्प्रपञ्चसंसारविशेषयापकः ।
परश्च नित्यं भजतामयत्नतः परस्य चार्थस्य निवेदकः सदा ॥ ५३

द्रव्यैर्यथा यैः क्रियते प्रपञ्चयागक्रिया तानि तथैव सम्यक् ।
यास्वप्यवस्थासु च ताश्च कृत्वा प्राप्नोति यत्तत् कथयामि सर्वम् ॥ ५४

प्रोक्तक्रमेण विघ्नान्तिकमपि हुत्वा घृतेन मन्त्रितमः ।
एकावृत्त्या जुहुयात् प्रपञ्चयागाह्वयं घृतेन ततः ॥ ५५

अश्वत्थोडुम्बरप्लक्षन्यग्रोधसम्भवाः समिधः ।
तिलसर्षपदौग्धघृतान्यष्टद्रव्याणि संप्रदिष्टानि ॥ ५६

एतैर्जुहोति अ[नि]युताधिकलक्षसंख्यं
मन्त्री ततोऽर्धमथवापि तदर्धकं यः ।
स त्वैहिकीं सकलसिद्धिमवाप्य वाञ्छा-
योग्यां पदं परतरं च परत्र याति ॥ ५७

विधाय हृदये परमात्मकला दश प्रणवलक्षणा न्यस्य तत्रैव तासां प्राणप्रतिष्ठां कुर्यात् । पाशाङ्कुशत्रचरमूलमन्त्राभ्यां सहेदं सकलीकरणं कर्तव्यम् । पुनस्त्रिवारं मातृकां न्यस्य इष्टमन्त्रन्यासादिकं कुर्यादिति सकलीकरणप्रकारः ॥ ५१ ॥

शुद्धादिन्यासानां प्राणाग्निहोत्रप्रपञ्चयागशेषत्वेन तत्फलत्वेन फलवत्त्व-मभिधाय स्वातन्त्र्येणापि फलसम्बन्धमाह—शुद्धस्यापीति ॥ ५२ ॥

समन्त्रकप्रपञ्चयागस्य विशेषतो भुक्तिमुक्तिहेतुत्वमाह—प्रपञ्चयागस्त्विति । विपत्प्रपञ्चयापनं विलापनं मोक्ष इत्यर्थः । संसारविशेषयापनं निर्वाहः भुक्तिरित्यर्थः । अमन्त्रकप्रपञ्चयागस्याऽयत्नेन केवलमोक्षहेतुत्वमाह—परश्चेति । परः अन्यः प्रपञ्चयागः । अमन्त्रक इत्यर्थः ॥ ५३ ॥ ५४ ॥

प्रोक्तक्रमेणेति । षष्ठपटलोक्तक्रमेणेत्यर्थः । मन्त्रितम इति बीजेन च ऋचा मूलहोमं सूचयति ॥ ५५ ॥ ५६ ॥

लक्षसंख्यं मन्त्रीति । सिद्धिकामस्य श्रीबीजयोगं मुक्तिकामस्य प्रणवपुटितत्वं

एकद्विकत्रिकचतुष्कशताभिवृत्त्या
तां तां समीक्ष्य विकृतिं प्रजुहोतु मन्त्री ।
क्षुद्रज्वरादिविषमग्रहभूतयक्ष-
रक्षःपिशाचजनिते महति प्रकोपे ॥ ५८

द्वादशसहस्रमथवा तद्विगुणं वा चतुर्गुणं वाथो ।
जुहुयात् क्षुद्रग्रह रिपु विषमज्वर भूतसम्भवे कोपे ॥ ५९

अयथाप्रतिपत्ति मन्त्रकाणां प्रजपात् स्यादिह विस्मृतिर्नराणाम् ।
शमयेदचिरात् सहस्रवृत्त्या मतिमान् वस्तुभिरेभिरेव जुह्वन् ॥ ६०

एतैः सहस्रद्वितयाभिवृत्त्या जुहोति यस्तु क्रमशो यथावत् ।
जयेत् क्षणेनैव स विस्मृतिञ्च सापस्मृतिं शापभवांश्च दोषान् ॥ ६१

मधुरत्रयावसिक्तैरेतैर्लक्षं जुहोति यो मन्त्री ।
तस्य सुराधिपविभवो महदृद्ध्या तृणलवायते न चिरात् ॥ ६२

लक्षं तदर्धकं वा मधुरत्रयसंयुतैर्हुनेदेतैः ।
अब्दत्रयादथाऽर्वाक् त्रिभुवनमखिलं वशीकुरुते ॥ ६३

वश्यादिकानि कर्माण्यभिकाङ्क्षन्नेभिरेव सद्द्रव्यैः ।
जुहुयाच्च कार्यगुरुतालाघवमभिवीक्ष्य योग्यपरिमाणम् ॥ ६४

लक्षं तिलैर्वा जुहुयादघानां शान्त्यै श्रियेऽब्जो नलिनैर्यथावत् ।
दौग्धेन पुष्ट्यै यशसे घृतेन वश्याय जातीकुसुमैश्च लोणैः ॥ ६५

च सूचयति ॥ ५७ ॥

प्रजुहोतु मन्त्रीति । नृसिंहबीजयोगः सूचितः ॥ ५८ ॥

होमविधिमाह—द्वादशसहस्रमिति ॥ ५९ ॥

मतिमान् वस्तुभिरिति । दशांशेनाभिषेकः पञ्चब्रह्मभिर्योजितपञ्चगव्य-प्राशनं च प्रातःकाले मध्याह्ने हृदयमात्रजले स्थित्वा सूर्यमन्त्रजपः रात्रौ तिलहोमश्च सूचितः ॥ ६० ॥

क्रमशो यथावदित्यमृतध्यानं नृसिंहयोगश्च सूचितः ॥ ६१ ॥

मन्त्रीति श्रीयोगः ॥ ६२ ॥ ६३ ॥

सद्द्रव्यैरिति । तत्तत्कर्मयोग्यो व्यञ्जनयोग उक्तः ॥ ६४ ॥ ६५ ॥

शालीतण्डुलचूर्णकैस्त्रिमधुरासिक्तैः स्वसाध्याकृतिं
कृत्वाऽष्टोर्ध्वशताख्यमस्य शितधीः प्राणान् प्रतिष्ठाप्य च ।
न्यासोक्तक्रमतो निशासु जुहुयात्तां सप्तरात्रं नरो
नारी वा वशमेति मङ्क्षु विधिना तेनैव लोणेन वा ॥ ६६

पञ्चाशद्दोषधिविपाचितपञ्चगव्य-
जाते घृतेन शतवृत्ति हुनेद् घटाग्नौ ।
तावत् प्रजप्य विधिनाऽभिसमर्च्य सिद्धं
भस्माददीत सकलाभ्युदयावहं तत् ॥ ६७

अनुदिनमनुलिम्पेत्तेन किञ्चित् समद्या-
त्तिलकमपि विदध्यादुत्तमाङ्गे क्षिपेच्च ।
अनुततदुरितापस्मारभूतापमृत्यु-
ग्रहविषरहितः स्यात् प्रीयते च प्रजाभिः ॥ ६८

एका दशार्धकणिकां वरकाञ्चनस्य
दद्यात्तदैव गुरवेऽथ सहस्रहोमे ।
अर्धोर्ध्वपञ्चकणिका द्विकणा च सार्धा
स्याद्दक्षिणेह कथिता मुनिभिस्त्रिधैवम् ॥ ६९

निजेप्सितं दिव्यजनैः सुरद्रुमात् समस्तमेव प्रतिलभ्यते यथा ।
प्रपञ्चयागादपि साधकैस्तथा करप्रचेयाः सकलार्थसिद्धयः ॥ ७०

इति श्रीप्रपञ्चसारे सप्तमः पटलः ।

सप्तरात्रमित्यष्टम्यादि चतुर्दश्यन्तमित्यर्थः ॥ ६६ ॥ ६७ ॥ ६८ ॥

एका दशार्धकणिकामिति । एका प्रधाना दक्षिणा सा दशार्धकणिकां वरकाञ्चनस्य दद्यादिति इत्यन्वयः । पलस्य सप्तमभागः कणिका ॥ ६९ ॥ ७० ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
सप्तमः पटलः ।

अष्टमः पटलः ।

अथ हितविधये विदुषां वच्ये प्राणाग्निहोत्रविहितविधिम् ।
बद्ध्वा पद्मासनमृजुकायो मन्त्री विशेत् पुरोवदनः ॥ १

शक्तेः सत्त्वनिबद्धमध्यमथ तन्मायारजोवेष्टितं
प्राग्रक्षोऽनिलदिग्गताश्रिजठरं मध्ये च नाभेरधः ।
मध्ये प्राग्वरुणेन्द्रयाम्यलसितैः कुण्डैर्ज्वलद्वह्निभि-
र्मूलाधारमनारतं समतलं योगी स्मरेत् सिद्धये ॥ २

मध्येन्द्रवरुणशशियमदिग्भवानि क्रमेण कुण्डानि ।
आवसथजसभ्याहवनीयान्वाहार्यगार्हपत्यानि ॥ ३

चिद्रूपात् सकलप्रभाप्रभवकान्मूलप्रकृत्यात्मनः
कल्पार्कात् प्रतिलोमतोऽमृतमयीं ज्योतीरुचाऽच्छां धिया ।
स्रष्टामक्षरमालिकां तु जुहुयात् कुण्डेषु तेषु क्रमात्
कल्पान्ताग्निशिखास्फुरत्कुहरकेष्वास्रावितां वर्णशः ॥ ४

प्रपञ्चयागात् पूर्वमेव कर्तव्यमपि प्राणाग्निहोत्रं क्रमगोपनार्थम् अनन्तरमाह —अथेति । विदुषामिति । शुद्धसबिन्द्वादिमाटकाभेदसंयोगक्रमविदामित्यर्थः । मन्त्री विशेदिति । आधारशक्तिकमलासनाय नम इति स्वासनपूजनं सूचितम् ॥ १ ॥

जठरं मध्य इति अशनकाले कुण्डानां स्थानमुक्तम् । नाभेरध इति योगकाले नाभिर्लिङ्गं तस्य द्वाङ्गुलाध इत्यर्थः । ज्वलद्वह्निभिरिति । हयरोमित्यादि-मन्त्रैः अग्निज्वलनमुक्तम् । अनारतमिति अनेन प्राणेन क्रियादिशक्त्यात्मना आरतमित्यर्थः । समो जीवस्य अस्य च परस्य स्थानत्वात् समतलमित्युक्तम् । कुण्डनामकथनमशनकाले मन्त्रेषु तद्योगार्थम् ॥ २ ॥ ३ ॥

पञ्चाशद्वर्णैः पञ्चकुण्डेषु क्रमेण होमं दर्शयति—चिद्रूपादिति । अर्कत्वे हेतुः सकलप्रभेति । तत्र हेतुः मूलप्रकृत्यात्मन इति । अमृतमयीमानन्दमयी-मित्यर्थः । ज्योतीरुचा स्रष्टामित्यन्वयः । कुण्डलीस्पर्शाभिव्यक्तामित्यर्थः । धिया जुहुयादित्यन्वयः । त्विति तृतीयहोमार्थमकारावशेषं सूचयति । कल्पान्ता-ग्निः मूलाधारस्थोऽग्निः ॥ ४ ॥

चाद्यास्ते सप्तवर्गा मरकतपशुमेदाञ्जनीलाभ्रवर्णा
भूयः स्युर्विद्रुमाभाः कुलिशसमरुचः पुष्यवैदूर्यभासः ।
सर्वे ते पञ्चशोऽभिस्रवदमृतमया व्यापकस्पर्शसंज्ञा
मुक्तामाणिक्यरूपाः सुमतिभिरुदिताश्चाऽष्टशः स्युः स्वराख्याः ॥ ५
एतानि केतोरमृताकरारेर्मन्दस्य जीवस्य च सोमजस्य ।
शुक्रारसोमांशुमतां क्रमेण नवैव रत्नानि विदुर्नवानाम् ॥ ६

इत्येवं हुतविधिमन्वहं दिनादौ
ये सम्यग्विदधति मन्त्रिणः शतार्धम् ।
ते रत्नैरपि कनकांशुकैः सधान्यैः
सम्पन्नाः सकलजगत्प्रिया भवन्ति ॥ ७

अन्त्यशवर्गान्त्यासेवामश्रवणान्यथावसथजाते ।
असितावर्गचतुर्थांसूक्ष्माः सत्याह्वये च सश्रोत्राः ॥ ८
हलयुतवर्गतृतीयौपराः सशान्तीश्च पश्चिमे वह्नौ ।
भृगुरेफफादिपञ्चकसद्योऽतिथिलोचनानि सभ्येऽग्नौ ॥ ९
मज्जात्वग्वर्गादिकभौतिकभावाह्वयप्रतिष्ठाश्च ।
गार्हपत्ये जुहुयादित्युक्तं होमकर्म वर्णानाम् ॥ १०

व्योम्ना मध्योत्थितेऽग्नावखिलमविरतं शब्दमैन्द्रेऽनिलेन
स्पर्शं खेनैव रूपं पुनरपरभवे सोमजेऽङ्गी रसञ्च ।
याम्ये गन्धं पृथिव्योभयरुचिरुचिरेष्वक्षरौघैर्हुनेद् यो
मन्त्री स्यात् सर्ववेद्यप्रतिमथनसमुद्भासितप्रत्यगात्मा ॥ ११

नवग्रहहोमं पञ्चमं समन्त्रोद्धारं दर्शयति—चाद्या इति । व्यापकेत्यादिपदैः मण्डलत्रयहोमः षष्ठः सूचितः । सुमतिभिरिति । परमानन्दतत्त्वविद्भिरित्यर्थः ॥ ५ ॥ ६ ॥

सम्यग्विदधतीति । अस्माभिः पूर्वोक्तः क्रमः सूचितः । मन्त्रिण इति मूलमन्त्रादियोगः । ते रत्नैरित्येतद् गुणफलम् ॥ ७ ॥

दशभिर्दशभिर्वर्णैः सह भूतमन्त्रैः होमं द्वितीयं दर्शयति—अन्त्यशवर्गान्त्या इति ॥ ८ ॥ ९ ॥ १० ॥

व्योम्नेत्यादिना भूतमन्त्रोद्धारः कृतः । अखिलमविरतमिति पदाभ्यां

सतारशक्त्याद्यजपान्तमेवं हुत्वा महात्माऽथ शतार्धसंख्यम् ।
विन्यस्य तावच्च तथैव सूत्रमात्राकृतिर्नित्यतनुश्च भूयात् ॥ १२

कल्पादित्यमुखः स्वमूलविलसत्कल्पानलान्तःस्फुर-
च्चन्द्रार्कग्रहकालभूतभुवनब्रह्मेशविष्णुादिकः ।
अव्यक्तोऽक्षरसंज्ञकोऽमृतमयस्तेजोद्वयोद्यत्प्रभो-
नित्यानन्दमयस्त्वनादिनिधनो यः स्यात् स हंसात्मकः ॥ १३

अनुदिनममुना भजतां विधिनाहारक्रियासु मन्त्रविदाम् ।
प्राणाद्याः स्युर्मरुतो गार्हपत्यादिकानि कुण्डानि ॥ १४

सप्तम्यन्तां च कुण्डाख्यामाख्यां च मरुतामपि ।
हिरण्यागगनारक्ताकृष्णाभिर्वर्णमीरयेत् ॥ १५

शब्दविशेषाः तदनुगतं सामान्यं चोक्तम् । अविरतं निरन्तरमनुगतमित्यर्थः । उभयरुचिरुचिरेष्विति । चिदानन्दात्मककल्पकाग्न्यर्कप्रकाशविशिष्टेष्वित्यर्थः । उभयरुचिरुचिरेषु अक्षरौषैरिति पदाभ्यां सप्तमाष्टमहोमौ सूचितौ । मन्त्रीति अवशिष्टाः होममन्त्राः सूचिताः ॥ ११ ॥

प्राणाग्निहोत्रे प्रणवशक्त्याद्यनन्तरं परमात्ममन्त्रम् अभिधाय अजपा-स्वाहाकारौ प्रयोक्तव्यौ इत्याह—सतारेति । महात्मेति अक्षुद्रचित्ततया मन्त्रार्थस्मरणसमर्थ इत्यर्थः । विन्यस्य तावच्चेति । प्रपञ्चयागं च शतार्धवारं कृत्वा इत्यर्थः । सूत्रमात्राकृतिरिति सकलनिष्कलध्यानमुक्तम् । नित्यतनुरिति निष्कलध्यानम् । स्थूलध्यानं तु पूर्वमेवोक्तम् । स्वयं च वर्मेति ध्यातस्यैव फलत्वाफलत्वमपि अनेनैवोक्तम् ॥ १२ ॥

अथ स्थूलादिध्यानं समुच्चित्य वदन् सफलं प्राणाग्निहोत्रमुपसंहरति—कल्पादित्यमुख इति । विष्ण्वादिक इत्यन्तेन स्थूलं रूपमुक्तम् । तेजोद्वयोद्यत्प्रभ इत्यन्तेन सूक्ष्मम् । अवशिष्टेन परमिति विभागः ॥ १३ ॥

उक्तः प्राणाग्निहोत्रकर्तॄणाम् अशनकाले प्राणाग्निहोत्राधिकार इत्याह—अनु-दिनमिति । मन्त्रविदामित्यनेन प्राणाग्निहोत्रशेषभूताः केचन मन्त्राः सूचिताः ।

अयमत्र होमक्रमः । स्वेष्टदेवस्य सकलीकरणं विधाय । तं ध्यात्वा ओं अद्वायां प्राणे निविष्टोऽमृतं जुहोमि इत्यारभ्य । अद्वायां ब्रह्मणि मात्मानिविष्टोऽमृतं जुहोमि इत्यन्तैर्मन्त्रैः दक्षिणोत्तरपश्चिमपूर्वमध्यकुण्डेषु अग्नीन् उज्ज्वाल्य सप्रणवे लिपिपद्मे हविरादाय । अन्नं प्राणमन्नमपानमाहुः । अन्नं मृत्युं तमु जीवातुमाहुः ।

समुप्रभाभिः सहितं शुचयः पावका इति ।
अग्निं विहृत्य चेत्येवमात्मानमुपचर्य च ॥ १६
ऊर्ध्वाधस्तियगूर्ध्वाधस्तियक्समममथो वदेत् ।
गच्छतूक्त्वा ठयुग्मं च पञ्चाग्नीन् संस्मरेत्ततः ॥ १७
हुताहुतिसमुद्दीप्तशिखासंयुक्तरोचिषः ।
गार्हपत्यादिकं भूय उपचर्यान्तमेव च ॥ १८

अन्नं ब्रह्मणो जवसं वदन्ति । अन्नमाहुः प्रजननं प्रजानाम् । इति उपस्थाय सदशप्रणवगायत्रया त्रिवारमभिमन्त्र्य । विद्युदसि विद्य मे पाप्मानम् । इति हस्तप्रक्षालनं विधाय । परिषिच्य । उपस्पृश्य । ओं तद्ब्रह्म । ओं तद्वायुः । ओं तदात्मा । ओं तत्सत्यम् । ओं तत्सर्वम् । ओं तत्पुरो नमः ।

ओं अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु ।
त्वं यज्ञस्त्वं वषट्कारस्त्वं विष्णुः पुरुषः परः ॥
त्वमापः आपोज्योतीरसोऽमृतं ब्रह्म भूर्भुवःस्वरोम् ॥

अमृतोपस्तरणमसि इत्याचम्य । चितिः स्रुक् । चित्तमाज्यम् । वाग वेदिः । आधीतं वर्हिः । केतो अग्निः । विज्ञातमग्निः । वाक्पतिर्होता । मन उपवक्ता । प्राणो हविः । सामाध्वर्युः । वाचस्पते विधे नामन् विधेम ते नामविधे त्वमस्माकं नाम । वाचस्पतिः सोमं पिबत्वास्मा नृम्णं ध्यात् स्वाहेति जपित्वा । ओं गार्हपत्ये प्राणे हिरण्यवर्णाः शुचयः पावकाः अग्निं विहृत्य आत्मानमुपचर्योर्ध्वं गच्छतु स्वाहा । श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमि । शिवोमाविशाप्रदाहाय प्राणात्मने नारायणाय मह्यं मह्यं स्वाहेति दक्षिणाग्नौ हुत्वा । ओमन्वाहार्ये अपाने गगनवर्णाः शुचयः पावकाः अग्निं विहृत्यात्मानमुपचर्याऽधो गच्छतु स्वाहा । श्रद्धायामपाने निविष्टोऽमृतं जुहोमि । शिवोमाविशाप्रदाहायाऽपानात्मने नारायणाय मह्यं मह्यं स्वाहेति उत्तरे हुत्वा । ओमाहवनीये व्याने रक्तवर्णाः शुचयः पावकाः अग्निं विहृत्यात्मानमुपचर्य तिर्यग् गच्छतु स्वाहा । श्रद्धायां व्याने निविष्टोऽमृतं जुहोमि । शिवोमाविशाप्रदाहाय व्यानात्मने नारायणाय मह्यं मह्यं स्वाहा इति पश्चिमे हुत्वा । ओं सभ्ये उदाने कृष्णवर्णाः शुचयः पावकाः अग्निं विहृत्यात्मानमुपचर्योर्ध्वाधस्तिर्यग गच्छतु स्वाहा । श्रद्धायामुदाने निविष्टोऽमृतं जुहोमि । शिवोमाविशाप्रदाहाय उदानात्मने नारायणाय मह्यं मह्यं स्वाहा इति पूर्वे हुत्वा । ओं आवसथीये समाने सुप्रभावर्णाः शुचयः पावकाः अग्निं विहृत्यात्मानमुपचर्य

मन्त्रं सर्वमनुक्रम्य जिह्वाः संस्मृत्य सर्वशः ।
बहुरूपां तु सङ्कल्प्य पञ्चानलशिखायुताम् ॥ १९
अहं वैश्वानरो भूत्वा जुहोम्यन्नं चतुर्विधम् ।
पचाम्येवं विधानेनेत्यापूर्णं संयतेन्द्रियः ॥ २०
तूष्णीं हुत्वा पिधायाऽद्भिरुपस्पृश्य विधानतः ।
आरभ्य मूलाधारं स्वमामस्तकमनुस्मरेत् ॥ २१
क्षेत्रज्ञसंज्ञकममुं प्रकृतिस्थमाद्यं
व्याप्तद्विसप्तभुवनान्तमनन्यमेकम् ।
पञ्चाननाग्निरसनापरिदत्तशुद्ध-
सान्नाय्यतर्पितमतर्कितमात्मरूपम् ॥ २२
संचिन्त्य चरितामृताक्षरशतार्धाम्भोऽवसिक्तं हवि-
स्तेजम्ब्वाऽकुटिलान्तराधिरधिकं संदीप्तपञ्चानलः ।

समं गच्छतु स्वाहा । श्रद्धायां समाने निविष्टोऽमृतं जुहोमि । शिवोमाविशा-प्रदाहाय समानात्मने नारायणाय मह्यं मह्यं स्वाहेति मध्ये हुत्वा । अग्नीनेकीकृत्य । ओं गार्हपत्यान्वाहार्याहवनीयसभ्यावसथीयेषु प्राणापानव्यानोदानसमानेषु हिरण्य-गगन रक्त कृष्ण सुप्रभा वर्णाः शुचयः पावका अग्निं विह्वलात्मानमुपचर्यौर्ध्वाधस्ति-र्यगूर्ध्वाधस्तिर्यक्समं गच्छतु स्वाहा । अहं वैश्वानरो भूत्वा जुहोम्यन्नं चतुर्विधं पचामि । श्रद्धायां ब्रह्मणि म आत्मा निविष्टोऽमृतं जुहोमि । शिवोमाविशा-प्रदाहाय क्षेत्रज्ञात्मने नारायणाय मह्यं मह्यं स्वाहेति हुत्वा आपूर्णं तूष्णीं हुत्वा । अद्भिः पिधाय । गण्डूषादिकं कृत्वा । आचम्य । दृष्टिरसि दृश्यमे पाप्मानममृतात्मत्वमुपागामिति हस्तप्रक्षालनं कृत्वा । प्राणानां ग्रन्थिरसि रुद्रोमाविशान्तकस्तेनाऽन्नेनाऽऽप्यायस्व ।

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः ।
ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक् ॥

इति दक्षिणपादाङ्गुष्ठे जलधारामासिच्य । उद्वयं चित्रमित्यादिनोपतिष्ठेदिति ।

अथ प्रणवेन अमृतमास्रावयेदित्याह—आरभ्येत्यादिना ॥ १४ ॥ १५ ॥ १६ ॥ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

मातृकयापि अमृतं स्रावणीयमित्याह—सञ्चिन्त्येति । ततः श्रद्धायां प्राणे

सायं प्रातरनेन होमविधिना भोज्यानि नित्यं भजन्
प्राणी न प्रमदोदरं प्रविशति प्राणाग्निहोत्री पुनः ॥ २३

इति तव षड्ङ्गवेदशास्त्राद्युपहितसर्वविकारसङ्गमातुः ।
तनुरियमुदिता विरिञ्च विश्वस्थितिलयसृष्टिकरीह वर्णमाला ॥ २४

इति जगदनुषक्तां तामिमां वर्णमालां
न्यसत जपत भक्त्या जुह्वताऽभ्यर्चयीत ।
निरुपमकवितायुःकीर्तिकान्तीन्दिराप्तौ
सकलदुरितदुःखोच्छित्तये मुक्तये च ॥ २५

इतीरिता सकलजगत्प्रभाविनी
क्रमोत्क्रमक्रमगुणितार्णमालिका ।
अभीष्टसाधनविधये च मन्त्रिणां
भवेन्मनुप्रतिपुटिताक्षमालिका ॥ २६

मध्ये वद्यक्षरयोः सदवदवाग्वार्णका निचन्द्रयुगे ।
प्रोक्ता दशाक्षरीयं कण्वविराजौ च वाग्ऋषिप्रमुखाः ॥ २७

कक्षोक्षनयननासावदनाभ्युगुदेषु विन्यसेद्वर्णान् ।
स्वरपुटितैरथ हृल्भिः कुर्यादङ्गानि षट् क्रमान्मन्त्री ॥ २८

निविश्याऽमृतं हुतं प्राणमन्त्रेनाऽऽप्यायस्व इत्यारभ्य श्रद्धायां ब्रह्मणि म आत्मा निविश्याऽमृतं हुतं ब्रह्माणमन्त्रेनाप्यायस्व इत्यन्तैराप्याय्य अङ्गुष्ठादि न्यसित्वा उपसंहरेत् ॥ २२॥२३ ॥

शार्ङ्गी ब्रह्माणं प्रत्याह—इति तवेति ॥ २४ ॥

सर्वान् प्रत्याह—इति जगदनुषक्तामिति । अक्षमालाया मध्यस्थः क्षकारो मेरुत्वेन ज्ञेयः । अतस्तेन मन्त्रयोगो न कार्यः ॥ २५ ॥ २६ ॥

सरस्वतीदैवत्यां लिपिमभिधाय सरस्वतीदैवत्यं मन्त्रान्तरमाह—मध्ये वद्यक्षरयोरिति ॥ २७ ॥

अङ्गानि षट् क्रमान्मन्त्रीति । वद हृदयाय नमः । वद शिरसे स्वाहा । वाक् शिखायै वषट् । वादिनि कवचाय हुम् । स्वाहा नेत्रत्रयाय वौषट् । समस्तेनास्त्रम् इत्यङ्गेषु मन्त्रयोगः सूचितः । ऐं बीजम् । स्वाहा शक्तिः । अत्र

अमलकमलसंस्था लेखनीपुस्तकोद्यत्-
करयुगलसरोजा कुन्दमन्दारगौरी ।
धृतशशधरखण्डोल्लासिकोटीरचूड़ा
भवतु भवभयानां भञ्जिनी भारती वः ॥ २९

अक्षरलक्षजपान्ते जुहुयात्कमलैः सितैः पयोऽभ्यक्तैः ।
त्रिमधुरयुतैः सुशुद्धैरयुतं नियतात्मकस्तिलैरथवा ॥ ३०

मातृकोक्तविधिनाऽक्षराम्बुजे शक्तिभिश्च विनियुज्य पूर्ववत् ।
पीठमत्र वचसां महेश्वरीं पूजयेत् प्रथममङ्गमन्त्रकैः ॥ ३१
योगा सत्या विमला ज्ञाना बुद्धिः स्मृतिस्तथा मेधा ।
प्रज्ञेत्यष्टाभिर्मातृभिरपि लोकेशैः प्रपूजयेत् क्रमशः ॥ ३२
इति सिद्धमनुर्मनोजटूरो न चिरादेव कविर्भवेन्मनस्वी ।
जपहोमरतः सदावगच्छन् वनितां वागधिपतिर्गौरवेण ॥ ३३

न्यासान्वितं निशितधीः प्रजपेत् सहस्र-
मङ्गो मुखेऽनुदिवसं प्रपिबेत्तथापः ।
तन्मन्त्रिताः पुनरयन्त्रितमेव वाचां
सिद्धिर्भवेदभिमता परिवत्सरेण ॥ ३४

हृदयद्वयसे स्थितोऽथ तोये रविबिम्बे प्रतिपद्य वागधीशाम् ।
जपतस्त्रिसहस्रसंख्यमर्वाक् कवितामण्डलतो भवेत् प्रभुता ॥ ३५
पलाशबिल्वप्रसवैस्तयोश्च समिद्वरैः स्वादुयुतैश्च होमः ।
कवित्वसौभाग्यकरः समृद्धिलक्ष्मीप्रदो रञ्जनकृच्चिराय ॥ ३६
चतुरङ्गुलजैः समित्प्रसूनैर्जुहुयाद् यो मधुरत्रयावसिक्तैः ।
मनुजः समवाप्य धीविलासानचिरात्काव्यकृतां भवेत् पुरोगः ॥ ३७
सुविमलनखदन्तपाणिपादो मुदितमनाः परदूषणेषु मौनी ।
हरिहरकमलोद्भवाङ्घ्रिभक्तो भवति चिराय सरस्वतीनिवासः ॥ ३८

वचसां महेश्वरीमिति मातृकायामिव पीठमूर्तिमन्त्राविति युक्तम् ॥ २८॥२९ ॥ ३० ॥
॥ ३१ ॥ ३२ ॥ ३३ ॥

न्यासान्वितं निशितधीरिति बालया सह न्यसेत् जपेदप्पानमपि तथैव

आद्यन्तप्रणवगशक्तिमध्यसंस्था
वाग्भूयो भवति सरस्वती च ङेन्ता ।
नत्यन्तो मनुरयमीशसंख्यवर्णः
संप्रोक्तो भुवि भजमानपारिजातः ॥ ३९

सौषुम्नाग्रे भ्रूयुगमध्ये नवके तथैव रन्ध्राणाम् ।
विन्यस्य मन्त्रवर्णान् कुर्यादङ्गानि षट् क्रमाद्वाचा ॥ ४०

हंसारूढा हरहसितहारेन्दुकुन्दावदाता
वाणी मन्दस्मितयुतमुखी मौलिबद्धेन्दुरेखा ।
विद्यावीणामृतमयघटाक्षस्रगादीप्तहस्ता
शुभ्राब्जस्था भवदभिमतप्राप्तये भारती स्यात् ॥ ४१

दिनकरलक्षं प्रजपेन्मन्त्रमिमं संयतेन्द्रियो मन्त्री ।
द्वादशसहस्रकमथो सितसरसिजनागचम्पकैर्जुहुयात् ॥ ४२

पूजायां पार्श्वयुगे ससंस्कृता प्राकृता च वाग्देव्याः ।
केवलवाङ्मयरूपे संपूज्याऽङ्गैश्च शक्तिभिस्तदनु ॥ ४३

प्रज्ञा मेधा श्रुतिरपि शक्तिः स्मृत्याह्वया च वागीशी ।
सुमतिः स्वस्तिरिहाभिर्मातृभिराशेश्वरैः क्रमात् प्रयजेत् ॥ ४४

इति निगदितो वागीश्वर्याः सहोमजपार्चना-
विधिरनुदिनं मन्त्री त्वेनां भजन् परिमुच्यते ।
सकलदुरितैर्मेधालक्ष्मीयशोभिरवाप्यते
परमपरमां भक्तिं प्राप्योभयत्र च मोदते ॥ ४५

कुर्यात् । ध्यानं च तद्वत् कुर्यादित्यर्थः ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

अङ्गानि षट् क्रमाद् वाचेति । ऐं क्लां हृदयाय नमः इत्यादि क्रमेणेत्यर्थः । ऐं बीजम् । क्लीं शक्तिः । ऋष्यादिकं पूर्ववत् ॥ ३९ ॥ ४० ॥

हंसारूढा वाणीति वाग्भवे हंसयोग उक्तः । विद्यावीणेति । विद्या-पुस्तकम् । ['भसितहरहासेन्दु' इत्यपि पाठः ।] संयतेन्द्रियो मन्त्रीति बालायोग उक्तः ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥

मन्त्री त्वेनां जपन्निति । दुरितमोक्षे नृसिंहस्य लक्ष्मप्राप्तदबीजस्य यशसेऽज-

इति मातृकाविभेदान् प्रजपन्मन्त्रद्वयञ्च मन्त्रितमः ।
प्रजपेदेनां स्तुतिमपि दिनशो वाग्देव्यनुग्रहाय बुधः ॥ ४६
अमलकमलाधिवासिनि मनसो वैमल्यदायिनि मनोज्ञे ।
सुन्दरगात्रि सुशीले तव चरणाम्भोरुहं नमामि सदा ॥ ४७
अचलात्मजा च दुर्गा कमला त्रिपुरेति भेदिता जगति ।
या सा त्वमेव वाचामीश्वरि सर्वात्मना प्रसीद मम ॥ ४८
त्वच्चरणाम्भोरुहयोः प्रणामहीनः पुनर्द्विजातिरपि ।
भूयादनेडमूकस्त्वद्भक्तो भवति देवि सर्वज्ञः ॥ ४९
मूलाधारमुखोद्गतविसतन्तुनिभप्रभाप्रभावतया ।
विस्तृतलिपिव्राताहितमुखकरचरणादिके प्रसीद मम ॥ ५०
वर्णतनोऽमृतवर्णे नियतमतिभिर्वर्णितेऽपि योगीन्द्रैः ।
निर्णीतिकरणदूरे वर्णयितुं देहि देवि सामर्थ्यम् ॥ ५१
ससुरासुरमौलिलसन्मणिप्रभादीपिताङ्घ्रियुगनलिने ।
सकलागमस्वरूपे सर्वेश्वरि सन्निधिं विधेहि मयि ॥ ५२
पुस्तकजपवटहस्ते वरदाभयचिह्नचारुबाहुलते ।
कर्पूरामलदेहे वागीश्वरि विशोधयाऽऽशु मम चेतः ॥ ५३
क्षौमाम्बरपरिधाने मुक्तामणिविभूषणे मुदावासे ।
स्मितचन्द्रिकाविकसितमुखेन्दुबिम्बेऽम्बिके प्रसीद मम ॥ ५४
विद्यारूपेऽविद्याविनाशिनि विद्योतितेऽन्तरात्मविदाम् ।
गद्यैः सपद्यजातैराद्यैर्मुनिभिः स्तुते प्रसीद मम ॥ ५५
त्रिमुखि त्रयीस्वरूपे त्रिपुरे त्रिदशाभिवन्दिताङ्घ्रियुगे ।
त्रीक्षणविलसितवक्त्रे त्रिमूर्तिमूलात्मिके प्रसीद मम ॥ ५६
वेदात्मिके निरुक्तज्योतिर्व्याकरणकल्पशिक्षाभिः ।
सच्छन्दोभिः सन्ततकृप्तषड्ङ्गेन्द्रिये प्रसीद मम ॥ ५७

पाया योगः सूचितः ॥ ४५ ॥

मन्त्रद्वयं चेति । मन्त्रान्तरेष्वपि सारस्वतेषु स्तोत्रविनियोगार्थः । मन्त्रितम इति प्रतिश्लोकं वाग्भवयोगः सूचितः । वाक्सूत्रादिजपो वा । बुध इति

त्वच्चरणसरसि जन्मस्थितिमहितधियां न लिप्यते दोषः ।
भगवति भक्तिमतस्त्वयि परमां परमेश्वरि प्रसीद मम ॥ ५८
बोधात्मिके बुधानां हृदयाम्बुजचारुरङ्गनटनपरे ।
भगवति भवभङ्गकरीं भक्तिं भद्रार्थदे प्रसीद मम ॥ ५९
वागीशोस्तवमिति यो जपार्चनाहवनवृत्तिषु प्रजपेत् ।
स तु विमलचित्तवृत्तिर्देहापदि नित्यशुद्धमेति पदम् ॥ ६०

इति श्रीप्रपञ्चसारे अष्टमः पटलः ।

ध्यानम् ॥ ४६—६० ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
अष्टमः पटलः ।

नवमः पटलः ।

अथ प्रवक्ष्यामि सुदुर्लभाप्तिं विद्यां विशिष्टां त्रिपुराभिधानाम् ।
या सा त्रिभेदाऽपि जगत्यवाप्तत्रिंशत्प्रकारा त्रिदशाभिवन्द्या ॥ १
त्रिमूर्तिसर्गाच्च पुराभवत्वात्त्रयीमयत्वाच्च पुरैव देव्याः ।
लये त्रिलोक्या अपि पूरणत्वात् प्रायोऽम्बिकायास्त्रिपुरेति नाम ॥ २

व्योमेन्दुवह्न्याधरबिन्दुभिरेकमन्य-
द्रक्ताक्षकेन्द्रशिखिभिः सरमार्धचन्द्रैः ।

एवं ज्ञानशक्तिप्रधानान् मन्त्रान् अभिधाय क्रियाशक्तिप्रधानान् त्रैपुरान् मन्त्रान् प्रस्तौति—अथेति । बीजत्रयरूपेण त्रिभेदत्वम् । त्रिंशत्प्रकारत्वं तु तद्गतबीजबिन्द्वादिभिः । अथवा सुलभा दुर्लभा चाप्तिर्व्याप्तिरुच्चारणं यस्याः सा तथोक्ता । तत्र केवला बिन्द्वन्ता मकारान्ता विसर्गान्ता च सुवचा । बिन्दुविसर्गान्ता दुर्वचा । कूटस्थपृथग्गतौ वा सुदुर्वाचौ मन्त्राविति कूटाकूटपक्षयोरपि पञ्चपञ्चप्रकारौ सिद्धौ । पुनश्च

आदिमादिमनादिश्च मध्यं मध्यममध्यमम् ।
अन्त्यमन्त्यमनन्त्यश्च त्रिपुरा शीघ्रसिद्धिदा ॥

इति न्यायेन कूटपक्षे अकूटपक्षेऽपि त्रिंशत्प्रकारत्वं सिद्धम् । सर्वेषां त्रिबीजात्मकत्वेन त्रिप्रकारत्वं च सिद्धम् । विशिष्टामिति विद्याभेदमाह । अविशिष्टा शुद्धा बाला । विशिष्टा हकारादिव्यञ्जनविशिष्टा । सभेदानामेव एतेषां मन्त्राणां कुटाकूटत्वं सुदुर्वचत्वम् । 'आदिमादिमनादिं च' इत्यादि समानमिति सर्वेषा त्रिंशत्प्रकारत्वं त्रिप्रकारत्वं च सिद्धम् । पारायणभेदेन चाऽनन्तप्रकारत्वम् । पुनरपि मन्त्रान्तरयोगनिमित्तं भेदमाह—त्रिपुराभिधानामिति । त्रिपुराः सत्त्वादिशरीराः विष्ण्वादयः तेषामभिधानरूपां तत्तन्मन्त्रसंयोगेनेत्यर्थः । प्रकारान्तरेण त्रयस्त्रिंशत्प्रकारत्वं त्रिप्रकारत्वं च सिद्धम् । पारायणभेदेन चानन्तप्रकारत्वमाह अस्या विद्यायाः—या त्रिभेदापीति । कादिहान्ताक्षरात्मत्वेन त्रयस्त्रिंशत्प्रकारेत्यर्थः ॥ १ ॥

त्रिमूर्तिमन्त्रेषु विद्यासंयोग उपपत्तिमाह—त्रिमूर्तीति । पुरैव त्रयीमयत्वं सच्चिदानन्दरूपत्वं गुणसाम्यात्मकत्वं वा ॥ २ ॥

सरमार्धचन्द्रैरिति । सकाररूपिणी शक्तिर्यस्मिन् हकारे शिवे रमते स ह-

अन्यद्द्युशीतकरपावकमन्वमन्ते-
बीजैरमीभिरुदिता त्रिपुरेति विद्या ॥ ३
वागैश्वर्यातिशयदतया वाग्भवं बीजमुक्तं
त्रैलोक्यक्षोभणसवशताकृष्टिदं कामराजम् ।
शाक्तं क्ष्वेलापहरकविताकारकं मन्त्रमेतत्
प्रोक्तं धर्मद्रविणसुखमोक्षप्रदं साधकानाम् ॥ ४
नाभेरथाचरणमाहृदयाच्च नाभिं
मूर्ध्नस्तथा हृदयमित्यमुना क्रमेण ।
बीजैस्त्रिभिर्न्यसतु हस्ततले च सव्ये
दक्षाह्वये द्वितयमप्युभयोस्तृतीयम् ॥ ५
मूर्धनि गुह्यहृदोरपि नेत्रत्रितये च कर्णयोरास्ये ।
अंसद्वये च पृष्ठे कौर्परयोर्नाभिमण्डले न्यस्येत् ॥ ६

कारः सरः । मा श्रीः ईकारः । अर्धचन्द्रो बिन्दुरिति निष्कीलविद्योद्धारप्रकारः ॥३॥

व्यस्तविनियोगोक्तिर्वागैश्वर्येति । धर्मेति समस्तविनियोगोक्तिः । आदिनाथदेवीगायत्रीत्रिपुराभैरव्यः ऋष्यादयः । वाग्भवकामराजौ बीजशक्ती । शाक्तं वा शक्तिः ॥ ४ ॥

नाभेरथाचरणमिति । पीठमूर्तिन्यासावाहनादि कराङ्गुलिन्यास व्यापकलिपिश्रीकण्ठादिन्यासानन्तरमित्यर्थः । तत्र पीठन्यासे आधारशक्तिमूलप्रकृत्यनन्त पृथिव्यमृतार्णव रत्नद्वीप रत्नमण्डप कल्पकतरु श्वेतच्छत्राणि हृदि विन्यस्य । धर्मादिकं वरदान्तं दक्षिणकर्णांसपार्श्वकटिपादेषु । अधर्मादिकं वामकर्णादिषु । इच्छा ज्ञाना क्रिया कामा कामिनी कामदायिनी रतिप्रियानन्दामनोन्मन्यो नव शक्तयः । नवशक्तिन्यासानन्तरं नवयोनिचक्रासनाय नमः इति व्याप्य नवयोनिन्यासमाचरेत् । मूलबीजैः श्रोत्रद्वयचिबुकेषु प्रथमः पर्यायः । शङ्खद्वयास्येषु द्वितीयः । दृगद्वयघ्राणेषु तृतीयः । अंसद्वयहृत्सु चतुर्थः । कूर्परद्वयकुक्षिषु पञ्चमः । जानुद्वयान्त्रेषु षष्ठः । पादद्वयगुह्येषु सप्तमः । पार्श्वद्वयहृत्सु अष्टमः । स्तनद्वयकण्ठेषु नवम इति । पुनर्द्वादशशक्तिन्यासः । ऐं वामायै नमः । ज्येष्ठायै नमः । रौद्र्यै नमः । अम्बिकायै नमः । हृत्त्रिकोणरेखात्रये मध्ये च । इच्छायै ज्ञानायै क्रियायै कुलिकायै ।

वाग्भवेन पुनरङ्गुलीष्वथो विन्यसेच्च पुनरुक्तमार्गतः ।
अङ्गषट्कममुना विधाय तद्देवतां विशदधीर्विचिन्तयेत् ॥ ७

कोणबाह्येषु मध्ये च । ग्रहैर विषघ्नैर दूतयैं सर्वानन्दायै । कोणत्रितये मध्ये चेति । पुनश्चतुष्पीठन्यासः । ऐं क्लीं सौः ओड्याणपीठाय नमः । ऐं जालन्धरपीठाय नमः । क्लीं पूर्णगिरिपीठाय नमः । सौः कामरूपपीठाय नमः । इति शिरोललाटहृदयगुह्येषु पीठन्यासः । ऐं परायै । क्लीं अपरायै । सौः परापरायै । ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः । इति पीठसमष्टिमन्त्रेण व्याप्य । पादुकासप्तकं न्यसेत् । ऐं अण्डजे अङ्गजानन्ददेवि [श्रीपादुकाभ्यो नमः इतीत्यपि क्वचिदधिकः] अङ्घ्रिकरि आज्ञां पूजयामि नमः । ऐं परायै श्रीगुरुपादुकापङ्क्त्यै नमः । क्लीं अपरायै श्रीगुरुपादुकापङ्क्त्यै नमः । सौः परापरायै श्रीगुरुपादुकापङ्क्त्यै नमः । ऐं श्रीअनन्तनाथदेव श्रीअनन्तनाथदेवि श्रीगुरुपादुकाभ्यो नमः । एवमेव क्लीं श्रीअवतारनाथदेव श्रीअवतारनाथदेवि श्रीपादुकापद्मेभ्यो नमः । सौः श्रीसिद्धनाथदेव श्रीसिद्धनाथदेवि श्रीपादुकाभ्यो नमः इति शिरसि । ऐं क्लीं ह्सौः त्रिपुराभैरवीमूर्तये नमः । इति मूर्तिन्यासः ।

तत आवाहनादिकम् । ततः करन्यासाङ्गुलिन्यासौ । तत्राऽङ्गुलिन्यासे मध्यबीजस्थक्रकारेण विनपुंसकक्रस्वयुतैः ईशानादिमूर्तिभिः सहितैरङ्गुष्ठादिषु न्यसेत् । क्रों ईशानमनोभवाङ्गुष्ठाभ्यां नमः । क्रें तत्पुरुषमकरध्वजतर्जनीभ्यां नमः । क्रुं अघोरकुमारकन्दर्पमध्यमाभ्यां नमः । क्रिं वामदेवमन्मथानामिकाभ्यां नमः । क्रं सद्योजातकामदेवकनिष्ठिकाभ्यां नमः । पुनः षड्क्रेन सवाग्भवमध्यदीर्घेणाऽङ्गुलिं न्यसित्वा । बाणपञ्चकं न्यसेत् । द्रां शोषणबाणाङ्गुष्ठाभ्यां नमः । एवमेव द्रीं मोहन । क्लीं सन्दीपन । ब्लूं तापन । सः मादनबाणकनिष्ठिकाभ्यां नमः । इति बाणान् न्यसित्वा । मूलेन देहे त्रिशो व्याप्य । मूलपुटितमातृकां न्यसित्वा । श्रीकण्ठादिन्यासं कुर्यात् ॥ ५ ॥ ६ ॥

वाग्भवेन पुनरिति । मूलबीजमध्यमबीजदीर्घानन्तरमित्यर्थः । ह्स्रैं हसकलक्रां ह्स्रैं हृदयाय नमः । हसकलक्रीं हसकलक्रीं ह्स्रैं शिरसे स्वाहा । ह्स्रौः हसकलक्रूं ह्स्रैं शिखाये वषट् । ह्स्रैं हसकलक्रैं ह्स्रैं कवचाय हुं । हसकलक्रौं हसकलक्रौं ह्स्रैं नेत्रत्रयाय वौषट् । ह्स्रौः हसकलक्रः ह्स्रैं अस्त्राय फट् । पुनरुक्तिः पुनर्वचनम् । चशब्देन करयोः

आताम्रार्कायुताभां कलितशशिकलारञ्जितप्तां त्रिनेत्रां
देवीं पूर्णेन्दुवक्त्रां विधृतजपवटीपुस्तकाभीत्यभीष्टाम् ।
पीनोत्तुङ्गस्तनार्तां वलिलसितविलग्नामसृक्पङ्कराज-
न्मुण्डस्रङ्मण्डिताङ्गीमरुणतरदुकूलानुलेपां नमामि ॥ ८

बाणादिन्यासाः सूचिताः ।

विशदधीरिति । वैशद्यहेतुभूताक्षरतत्त्वत्रिपञ्चनवाद्वत्त्यमृतेश्वर्यादि रत्यादि-मूर्त्यङ्गबाणसुभगामात्रादिभूषणन्यासाः सूचिताः । तत्र मूर्धाधारहृत्सु मूलवर्णन्यासः । ह्स्रैं आत्मतत्त्वेश्वर्यै त्रिपुराभैरव्यै नमः । ह्सकलह्रीं विद्यातत्त्वेश्वर्यै त्रिपुराभैरव्यै नमः । ह्स्रौः शिवतत्त्वेश्वर्यै त्रिपुराभैरव्यै नमः । समस्तान्ते सर्वतत्त्वेश्वर्यै त्रिपुराभैरव्यै नमः । नाभ्याद्यास्यान्तं गुह्यादिभ्रूमध्यान्तं मूलाधारादिमस्तकान्तं पादादिमस्तकान्तं च तत्त्वन्यासः । पाद जानु गुह्य नाभि हृत्कण्ठास्य भ्रूमस्तकेषु त्र्याद्वत्तिन्यासः । मूर्धगुह्यहृत्सु दक्षिणवामोर्ध्वनेत्रेषु कर्णद्वयास्येषु अंसद्वयपृष्ठेषु कोर्परद्वयनाभिषु पञ्चा-द्वत्तिन्यासः । नवाद्वत्तिन्यासो नवयोनिन्यासवत् । ह्स्रौः अमृतेश्वर्यै नमः । मध्यमान्ते योगेश्वर्यै नमः । ह्स्रैं विश्वयोन्यै नमः । भ्रूमध्य हृदय मूलाधारेषु इत्यमृतेश्वर्यादिन्यासः । ह्स्रैं रत्यै नमः । मध्यमान्ते प्रीत्यै नमः । ह्स्रौः मनोभवायै नमः । इति मूलाधारादिषु रत्यादिन्यासः । मूर्तय ईशान-मनोभवाद्या मूर्धास्यहृद्गुह्यपादनामभिः ऊर्ध्वप्राग्दक्षिणोत्तरपश्चिमवक्त्राणां नामभिश्च संयोज्य तेष्वेव न्यस्तव्याः । ह्स्रौं ईशानमनोभवाय मूर्ध्ने नमः । ह्स्रौं ईशानमनोभवायोर्ध्ववक्त्राय नमः । इत्यादि प्रयोगक्रमः । पुनरङ्गानि विन्यस्य मूर्तिन्यासवद् बाणन्यासं विधाय । ततः सुभगादिन्यासं ललाट-भ्रूमध्याद्यष्टाधारेषु ऐं क्लीं ब्लूं स्त्रीं सः इति बीजैः सह विन्यस्य । मूलाधारा-द्यष्टाधारेषु आं क्षामादिदीर्घयुता ब्रह्माण्याद्या अं क्षमादिह्रस्वयुतैः भैरवैः सह विन्यस्य । शिरसि मूलमन्त्रं न्यसित्वा । व्याप्य । अङ्गर्थादिकं विन्यस्य । भूषणन्यासं विधाय । आताम्रार्कायुताभामित्युक्तप्रकारेण विशदधीः ध्यायेदित्यर्थः ।

शिरो ललाटभ्रू कर्णद्वयाक्षिद्वय नासाद्वय गण्डद्वयौष्ठद्वय दन्तद्वयास्येषु स्वरान् गल कण्ठ पार्श्वद्वय स्तनद्वय पादबाहुद्वय कोर्परद्वय पाणितलतत्पृष्ठनाभिगुह्योरुद्वय-जानुद्वय जङ्घाद्वय स्फिक्पादतलद्वय पादाङ्गुष्ठद्वयेषु कादिरान्तं काञ्ची ग्रैवेय-

दीक्षां प्राप्य विशिष्टलक्षणयुजः सत्सम्प्रदायाद् गुरो-
र्लब्ध्वा मन्त्रममुं जपेत् सुनियतस्तत्त्वार्धलक्षावधि ।
स्वाक्तैश्च नवैः पलाशकुसुमैः सम्यक् समिद्धेऽनले
मन्त्री भानुसहस्रकं प्रतिहुनेदश्वारिसूनैरपि ॥ ९

प्राणायामैः पवित्रीकृततनुरथ मन्त्री निजाधारराज-
द्योनिस्थां दिव्यरूपां प्रमुदितमनसाऽभ्यर्चयित्वोपचारैः ।

कटकहृद्गुह्यकुण्डलद्वयमौलिषु वललशक्षसषहान् न्यसेदिति भूषणन्यासः ।

असृक्पङ्कराजन्मुण्डस्रङ्मण्डिताङ्गीमिति । कुङ्कुमपङ्कवच्छोभमानाभिः मुण्डस्रग्भिः उत्तमाङ्गरूपाभिः स्रग्भिः शक्तिव्यापिनीसमनीभिर्मण्डितशरीरामिति परावरध्यानकथनमेतत् । अथवा असृक् अकारः स्रष्टा परः । तस्य पङ्कः सान्द्रीभावः आभास इत्यर्थः । तेन राजन्ती मुण्डा कुण्डलिनी । तस्याः स्रग्वदविच्छिन्नतया वर्तमानाः शक्तिभेदाः मुण्डस्रजः । तैरलङ्कृतशरीरामित्यर्थः । यथाश्रुतो वार्थः । तस्मिन् पक्षे आताम्रेत्यनेनैव परादिरूपकथनं द्रष्टव्यम् । निष्कीलपञ्चकूटे पाशाङ्कुशपुस्तकाक्षस्रग्धरा वा देवी ध्येया । षट्कूटादिषु पाशाङ्कुशशूलकपालधरा वा ॥ ७॥८ ॥

सत्सम्प्रदायादिति । वैदिकादित्यर्थः । परप्रकाशानन्दनाथश्रीपादुकां पूजयामि । तथा परविमर्शानन्द परमशिवानन्द कामेश्वर्यम्बाश्रीपादुकाम् । मोक्षानन्दकामानन्दामृतानन्दा दिव्यौघः । ईशः तत्पुरुषः अघोरः वामः सदानन्दः सिद्धौघः । उत्तमोङ्गवानन्द परमानन्द सर्वज्ञानन्द शक्तानन्दस्वच्छन्दानन्द सिद्धानन्द गोविन्दानन्द शङ्करानन्दाः स्वगुरुत्रयं च मानवौघः । इत्ययं वैदिकसम्प्रदायक्रमः । सुनियत इति । ब्रह्मचर्यादिमानित्यर्थः । तत्त्वानि तदर्धं च तत्त्वार्धं षट्त्रिंशदित्यर्थः । अनेन शुद्धादिचतुष्कूटान्तजपसंख्योक्ता । तत्त्वलक्षावधीति पञ्चकूटस्य तत्त्वार्धलक्षावधीति षट्कूटादेरित्यवगन्तव्यम् । चतुष्कूटान्तस्य पालाशैर्होमः । परमश्वारिजैः । अपिशब्देन सर्वत्रापि शतांशो होमः सूचितः । अथवा भानुसहस्रकमित्यनेनैव सर्वत्र शतांशहोमः सूचितः । भान्तीति भानवः षट्त्रिंशत्तत्त्वानि चतुर्विंशतितत्त्वानि द्वादशादित्याश्च तत्सहस्रकमिति हि तस्यार्थः । मन्त्रीति काम्यहोमेषु तत्तत्कामनोचितबीजयोगः ॥ ९ ॥

प्राणायामैः पवित्रीकृततनुरिति । वैधकप्राणायामसूचनम् । मूलेन

बद्ध्वाऽसौ योनिमुद्रामपि निजगुदलिङ्गान्तरस्थां प्रदीप्तां
भूयो द्रव्यैस्तु शुद्धैररुणरुचिभिरित्यारभेद्बाह्यपूजाम् ॥ १०

वामादिशक्तिसहितं परिपूज्य पीठं
तत्र प्रकल्प्य विधिवन्नवयोनिचक्रम् ।
योनौ निधाय कलशं त्वथ मध्यगाया-
मावाह्य तां भगवतीं प्रयजेत् क्रमेण ॥ ११

वह्नेः पुरद्वितयवासवयोनिमध्य-
सम्बद्धवह्निवरुणेशसमाश्रितास्त्रि ।
देव्यर्चनाय मुनिभिर्विहितं पुरैव
लोकेऽतिदुर्लभमिदं नवयोनिचक्रम् ॥ १२

रेचकं पूरकं च कृत्वा । कुम्भककाले मातृकां प्रतिलोमेन जपन् । अकारलक्ष्ये परे सर्वं संहरेदिति वर्णविधः । पुनस्तन्मात्रापञ्चीकृतबीजानि पञ्चभूतस्थानेषु न्यसन् । सर्वं सृष्ट्वा । पञ्चीकृतापञ्चीकृतबीजानि पृथिव्यादिस्थानेषु न्यसन् । तानि तन्मात्रासु संहृत्य । गन्धमात्राबीजं पादादिजानुपर्यन्तं तत् न्यसित्वा । मूलमेकवारं जपन् । प्राणमायच्छन् । गन्धतन्मात्रं रसतन्मात्रायां संहृत्य । इतरा अपि मात्रा यथाक्रमं संहरेदिति कलाविधः । पूर्वोक्तषड्राधारयोगरूप-प्राणायामैः सर्वं संहरेदिति योगिनीविधः । एवं प्राणायामत्रयं कृत्वा । प्राणायाममन्त्रैरेव व्युत्क्रमेण सृष्टिः कार्येत्याह—अथ मन्त्रीति । दिव्यरूपा-मिति । व्यापिन्यादिप्रभाभिर्व्याप्तामित्यर्थः । बाह्ये अभ्यन्तरे च योनिमुद्रा बन्धनीया । अपीति ओड्याणजालन्धरखेचरीबन्धार्थः । इत्यारभेदिति । वक्ष्यमाणप्रकारेणेत्यर्थः ॥ १० ॥

वामादिशक्तिसहितमित्यत्र वामादिशक्तिसाहित्यं नवयोनिचक्रस्येत्यव-गन्तव्यम् । विधिवन्नवयोनिचक्रमिति । मध्ययोनौ मूलस्य अवशिष्टयोनिषु गायत्रीत्रिरत्रयस्य दलेषु मातृभैरवबीजानां बहिर्मातृकावेष्टनस्य चतुरस्रे मध्यबीजलेखनस्य च सूचनं कृतम् । यन्त्रजीवादिकं तु सर्वत्र समानम् । त्रिपुरादेवी च विद्महे कामेश्वरी च धीमहि । तन्नः क्लिन्ना प्रचोदयादिति गायत्री ॥ ११ ॥

नवयोनिरचनाप्रकारमाह—वह्नेरिति । वाग्भवादित्वमुपलक्षणं कामराज-

वामा ज्येष्ठा रौद्रिका साम्बिकेच्छा
ज्ञानाभिख्या सक्रिया कुञ्जिकाह्वा ।
प्रह्वी चान्या स्याद्विषन्नी सटूतिः
सर्वानन्दा शक्तयः स्युः क्रमेण ॥ १३

प्राङ्मध्ययोन्योः पुनरन्तराले सम्पूजयेत् प्राग्गुरुपादपङ्क्तिम् ।
पराभिधानामपराह्वयाञ्च परापराख्यामपि वाग्भवादिम् ॥ १४

तेनैव चाङ्गानि विदिग्दिशासु मन्त्री यथोक्तक्रमतः प्रपूज्य ।
तन्मध्ययोनेरभितः शरांश्च संपूजयेत् पञ्चममग्रभागे ॥ १५

सुभगां भगां भगान्ते सर्पिणीं भगमालिनीमनङ्गाह्वाम् ।
तत्पूर्वकुसुमसंज्ञां तदादिके चाथ मेखलामदने ॥ १६

ब्राह्मीमाहेश्वर्यौ कौमारी वैष्णवी च वाराही ।
इन्द्राणी चामुण्डा सचण्डिका चेति मातरः प्रोक्ताः ॥ १७

संपूज्य योनिषु च मातृगणं सचण्डि-
कान्तं दलेष्वभियजेदसिताङ्गकाद्यैः ।
तैर्भैरवैः सह सुगन्धकपुष्पधूप-
दीपादिकैर्भगवतीं प्रवरैर्निवेद्यैः ॥ १८

असिताङ्गाख्यो रुरुरपि चण्डक्रोधाह्वयौ तथोन्मत्तः ।
सकपालिभीषणाख्यौ संहारश्चाष्ट भैरवाः कथिताः ॥ १९

इति क्रमाम्ना विहिताभिषेकः संपूजयित्वा द्रविणैर्गुरूंश्च ।
जम्ब्वाऽर्चयित्वोक्ततयाऽथ हुत्वा युञ्जीत योगांश्च गुरूपदिष्टान् ॥ २०

अच्छाभः स्वच्छभूषो धरणिमयगृहे वाग्भवं लक्षमेकं
यो जप्यात्तद्दशांशं विहितहुतविधिर्मन्त्रजप्ताञ्जनादिः ।

शाक्तादित्वे परावरादिपङ्क्त्योः । मन्त्री यथोक्तक्रमत इत्यत्र मन्त्रीत्यङ्गेषु मूलयोगो मध्यबीजदीर्घयोगश्चोक्तः ॥ १२ ॥ १३॥ १४ ॥ १५ ॥ १६ ॥

इति क्रमाम्नेति । गुरोर्जपपूजादिक्रमाम्नेत्यर्थः । सहार्थे तृतीया । उक्ततयेति । केवलमुक्ततया न फलाकाङ्क्षयेत्यर्थः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

समस्तसाधनमभिधाय फलविशेषकामस्य समस्तव्यस्तसाधनं वदन् वाग्भव-

काव्यैर्नानार्थवृत्तैर्भुवनमखिलमापूरयेत् स स्वकीयै-
र्मारार्त्या विह्वलाभिः पुनरयमनिशं सेव्यते सुन्दरीभिः ॥ २१
रक्ताकल्पारुणतरदुकूलार्त्तवालेपहृद्यो
मौनी भूसद्मनि सुखनिविष्टो जपेल्लक्षमेकम् ।
बीजं मन्त्री रतिपतिमयं प्रोक्तहोमावसाने
योऽसौ लोके स सुरमनुजैः सेव्यते पूज्यते च ॥ २२
समुरासुरसिद्धयक्षविद्याधरगन्धर्वभुजङ्गचारणानाम् ।
प्रमदा मदवेगतो विकीर्णाभरणाः स्रस्तदुकूलकेशजालाः ॥ २३
अतिदुःसहमन्मथव्यथाभिर्व्यथितान्तःपरितापवेपिताङ्ग्यः ।
घनघर्मजतोयबिन्दुमुक्ताफलसक्तोरुकुचान्तबाहुमूलाः ॥ २४
रोमाञ्चकञ्चुकितगात्रलताघनोद्य-
दुत्तुङ्गपीनकुचकुम्भनिपीड़िताङ्ग्यः ।
औत्सुक्यभारपृथुवेपथुखिदखिन्न-
पादारविन्दचलनस्खलिताभिघाताः ॥ २५
मारसायकनिपातदारिता रागसागरनिमग्नमूर्त्तयः ।
श्वासमारुततरङ्गिताधरा वाष्पपूरभरविह्वलेक्षणाः ॥ २६
मस्तकारचितदोर्द्वयाञ्जलिप्राभृता हरिणशावलोचनाः ।
वाञ्छितार्थकरणोद्यताश्च तद्दृष्टिपातमपि संनमन्ति ताः ॥ २७
धरापवरके तथा जपतु लक्षमन्त्यं मनुं
सुशुक्लकुसुमांशुकाभरणलेपनाढ्यो वशी ।
अमुष्य वदनादनारततयोच्चरेद्भारती
विचित्रपदपद्धतिर्भवति चास्य लोको वशे ॥ २८

साधनक्रममाह—अच्छाभ इति । वाग्भवं लक्षमेकमिति । तदादिकं मन्त्रमित्यर्थः । होमः पालाशैरेव ॥ २१ ॥

बीजं मन्त्री रतिपतीति । मन्त्रस्य कामराजादित्वमुक्तम् । होमोऽश्वारिजै-र्दशांशः ॥ २२ ॥

मध्यबीजस्य चोभकत्वमाह—समुरासुरेति । अन्त्यं मनुमिति । अन्त्य-बीजादिकं मनुमित्यर्थः । ह्स्रः ह्स्रां ह्सकलह्रक्लीं क्लीं ह्रसरयोः इत्येवं क्रमेण

पलाशपुष्पैर्मधुरत्रयाक्तैर्होमं विदध्यादयुतावधिं यः ।
सरस्वतीमन्दिरमाशु भूयात् सौभाग्यलक्ष्म्योश्च स मन्त्रजापी ॥ २९
वाजीकरञ्चाक्षशमीवटोत्थैः समिद्वरैर्विल्वभवप्रसूनैः ।
त्रिस्वादुयुक्तैर्हवनक्रियाऽऽशु नरेन्द्रनारीनररञ्जनी स्यात् ॥ ३०
मालतीवकुलजैर्हलहलैश्चन्दनाम्भसि घने निमज्जितैः ।
श्रीकरी कुसुमकैर्हुतक्रिया सैव चाशु कविताकरी मता ॥ ३१
अनुलोमविलोममन्त्रमध्यस्थितसाध्याह्वयुतं प्रजप्य मन्त्री ।
पटुसंयुतया जुहोतु वाज्या नरनारीनरपान् वशे विधातुम् ॥ ३२
मधुरत्रयेण सह विल्वजैः फलैर्हवनक्रियाऽऽशु जनतानुरञ्जनी ।
अपि सैव साधकसमृद्धिदायिनी दिनशो विशिष्टकमलाकरी मता ॥
खण्डैः सुधालतोत्थैस्त्रिमधुरसिक्तैर्जुहोतु मन्त्रितमः ।
सकलोपद्रवशान्त्यै ज्वरापमृत्युप्रणोदनाय वशी ॥ ३४
फुल्लैर्विल्वप्रसूनैस्तदभिनवदलै रक्तकह्लारपुष्पैः
प्रत्येकं बन्धुजीवैररुणसरसिजैरुत्पलैः कैरवाह्वैः ।
नन्द्यावर्तैः सकुन्दैर्नृपतरुकुसुमैः पाटलीनागपुष्पैः
स्वाक्तैरिन्दिराये प्रजुहुत दिनशः सर्पिषा पायसेन ॥ ३५
मूलाधारात् स्फुरन्तीं शिखिपुरपुटवीतां प्रभां विद्युदाभा-
मार्कात्तन्मध्यगेन्दोः स्रवदमृतमुचा धारया मन्त्रमय्या ।
सद्यः सम्पूर्यमाणां त्रिभुवनमखिलं तन्मयत्वेन मन्त्री
ध्यायेन्मुच्येत वैरूप्यकदुरितजरारोगदारिद्र्यदोषैः ॥ ३६

वक्ष्यमाणाः परिवारवर्णाः प्रतिबीजमत्रापि प्रयोक्तव्याः ॥ २३ ॥ २४ ॥ २५ ॥ ॥ २६ ॥ २७ ॥ २८ ॥

समन्त्रजापीत्यनुजपः सूचितः । सर्वत्र दलद्दलैः विकसद्दलैरित्यर्थः । ॥ २९ ॥ ३० ॥ ३१ ॥

प्रजप्य मन्त्रीति कर्मसाधकयोरपि प्रयोगः सूचितः ॥ ३२ ॥ ३३ ॥

जुहोतु मन्त्रीतम इत्यन्त्यबीजादित्वमन्तयोगो वा सूचितः ॥ ३४ ॥ ३५ ॥

पूर्वसूचितान् योगानाह—मूलाधारादिति । शिखिपुरपुटेषु द्विरावृत्या मन्त्रन्यासं बहिरष्टदले केशरस्थाने स्वरयोगं दलेषु अष्टवर्गयोगं भूपुरे मध्यमबीजयोगं बीजविशेषयोगं चाह—मन्त्री ध्यायेदिति ॥ ३६ ॥

वह्नेर्बिम्बद्वयपरिवृताधारसंस्थं समुद्यद्-
बालार्काभं स्वरगणसमावेष्टितं वाग्भवाख्यम् ।
वाण्या स्वीयाद्वदनकुहरात् सन्ततं निःसरन्त्या
ध्यायेन्मन्त्री प्रततकिरणप्रावृतं दुःखशान्त्यै ॥ ३७
हृत्पद्मस्थितभानुबिम्बविलसद्योन्यन्तरालोत्थितं
मध्याह्नार्कसमप्रभं परिवृतं वर्णैः कभाद्यान्तकैः ।
ध्यातं मन्मथबीजराजमखिलब्रह्माण्डविक्षोभकं
राज्यैश्वर्यविमर्दिनीमपि रमां दत्त्वा जगद्रञ्जयेत् ॥ ३८
मूर्ध्नोऽथ द्वादशान्तोदितशशधरबिम्बस्थयोनौ स्फुरन्तं
संवीतं व्यापकार्णैर्धवलरुचि मकारस्थितं बीजमन्त्यम् ।
ध्यात्वा सारस्वताच्छामृतजललुलितं दिव्यकाव्यादिकर्ता
नित्यं क्ष्वेलापमृत्युग्रहदुरितविकारान्निहन्त्याशु मन्त्री ॥ ३९
योनेः परिभ्रमितकुण्डलिरूपिणीं तां
रक्तामृतद्रवमुचा निजतेजसैव ।
व्योमस्थलं सकलमप्यभिपूर्य तस्मि-
न्नावेश्य मङ्क्षु वशयेद्वनिता नरांश्च ॥ ४०
गुह्यस्थितं वा मदनस्य बीजं
जवारुणं रक्तसुधां स्रवन्तम् ।
विचिन्त्य तस्मिन् विनिवेश्य साध्यं
वशीकरोत्येव विदग्धलोकः ॥ ४१

वाग्भवयोगमाह—वह्नेर्बिम्बेति । षट्कोणेषु वाग्भवयोगमाह—ध्यायेन्मन्त्रीति ॥ ३७ ॥

मध्यमबीजयोगमाह—हृत्पद्मेति । योनिः षटकोणम् । अत्र कोणेषु मध्यमबीजयोगमुक्त्वा योन्यन्तरालोत्थितमित्यनेनैव अन्त्यबीजयोगमाह ॥ ३८ ॥

मूर्ध्न इति । योनिः षट्कोणमेव नवयोनिर्वा । मकारस्थितमिति च्छेदः । आशु मन्त्रीति । योनिष्वन्त्यबीजयोग उक्तः ॥ ३९ ॥

पुनर्वैश्यप्रधानं रक्तवर्णध्यानयुक्तं वाग्भवयोगमाह—योनेरिति ॥ ४० ॥

मध्यमबीजस्य स्थानभेदेन योगान्तरमाह—गुह्यस्थितमित्यादिना ॥ ४१ ॥

अन्त्यं बीजमथेन्दुकुन्दविशदं संचिन्त्य चित्ताम्बुजे
तद्भूतां धृतपुस्तकाक्षवलयां देवीं मुहुस्तन्मुखात् ।
उद्यन्तं निखिलाक्षरं निजमुखेनाऽनारतस्रोतसा
निर्यान्तञ्च निरस्तसंसृतिभयो भूयात् स वाग्वल्लभः ॥ ४२

सङ्क्षेपतो निगदिता त्रिपुराभिधाना
विद्या सजापहवना सविधानपूजा ।
सोपासना च सकलाभ्युदयप्रसिद्ध्यै-
वाणीरमाप्तिविधये जगतो हिताय ॥ ४३

विद्येशीं त्रिपुरामिति प्रतिभजेद् यो वा जपेन्नित्यशः
तद्वक्त्रादथ नूतनार्थविशदा वाणी मुदा निःसरेत् ।
सम्पत्त्या नृपनन्दिनी ततयशःपूरा भवेदिन्दिरा
तस्याऽसौ प्रतियाति सर्वमुनिभिः संप्रार्थनीयं पदम् ॥ ४४

इति श्रीप्रपञ्चसारे नवमः पटलः ।

अन्त्यबीजस्य सकलयोगमितरबीजयोरपि उपलक्षणार्थमाह—अन्त्यमिति । ॥ ४२ ॥ ४३ ॥ ४४ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
नवमः पटलः ।

दशमः पटलः ।

अथाभिवक्ष्ये सकलप्रपञ्चमूलात्मिकायाः प्रकृतेर्यथावत् ।
मन्त्रं तु साङ्गं सहुताभिषेकं जपार्चनाढ्यं सकलार्थसिद्ध्यै ॥ १

घनवर्त्मकृष्णगतिशान्तिबिन्दुभिः
कथितः परप्रकृतिवाचको मनुः ।
दुरितापहोऽर्थसुखधर्ममोक्षदो
भजतामशेषजनरञ्जनक्षमः ॥ २

शक्तिः स्यादृषिरस्य तु गायत्री चोदिता मनोश्छन्दः ।
बोधस्वरूपवाची संवित्प्रोक्ता च देवता गुरुभिः ॥ ३

नेत्रकरणर्तुदिनकरभुवनविकारस्वराग्निबिन्दुयुजा ।
व्योम्ना षड्ङ्गकृन्निर्जातिविभिन्नेन चापि संप्रोक्ता ॥ ४

अथेच्छाशक्तिप्रधानां भुवनेश्वरीमाह—अथाऽभिवक्ष्य इति । सकलप्रपञ्चमूलात्मिकाया इति । पूर्वोक्तनिष्कीलविद्यामध्यमबीजसारभूताया इत्यर्थः । अतोऽस्यास्तद्योगः सूचितः ।

अथवा सकलः प्रणवः पञ्चाशत्कलात्मकत्वात् । तस्य प्रपञ्चो विस्तारः विभूतिः श्रीरित्यर्थः । मूलं कामं वाक् च । एतेषामात्मभूताया मध्यस्थायाः प्रकृतेरित्येतेषामेकैकेन समस्तेन पुटितत्वं शक्तेः सूचितम् । यथावदिति । अनुलोमप्रतिलोमक्रमः सूचितः । साङ्गं त्विति । अङ्गेषु तत्तद्बीजदीर्घादियोगः सूचितः । सकलार्थसिद्ध्यै इति । प्रणवयोगे मोक्षस्य श्रीयोगेऽर्थस्य कामयोगे कामस्य वाग्योगे धर्मज्ञानादेः सर्वयोगे सर्वस्य सिद्धिरित्यर्थः ॥ १ ॥

केवलस्यापि सकलपुरुषार्थसाधनत्वमाह—दुरितापह इति ॥ २ ॥

बोधस्वरूपवाचीति । बोधस्वरूपं परमात्मानं वक्ति प्रकाशयतीति बोधस्वरूपवाची ब्रह्मात्मैकत्वविद्या निरूढा संविदित्यर्थः । गुरुभिः प्रोक्तेति । श्रीदुर्गादिमन्त्रदेवताः सूचिताः ॥ ३ ॥

जातिविभिन्नेनेति । हृदयाय नम इत्यादियुक्तेनेत्यर्थः । अपिना सर्वज्ञादियोग उक्तः । ह्रं बीजम् । ईं शक्तिः ॥ ४ ॥

अग्नीन्दुयोगविकृता लिपयो हि सृष्टा-
स्ताभिर्विलोमपठिताभिरिदं शरीरम् ।
भूतात्मकं त्वगसृगादियुतं समस्तं
संव्यापयेन्निशितधीर्विधिना यथावत् ॥ ५

अन्त्यावुष्मस्वमून् वादिषु मलिपिषु तांस्तांश्चतुर्वर्गवर्णे-
ष्वेतानस्यम्यदस्तद्दति तदपि परेषु क्रमेणाऽवचिन्त्य ।
संहृत्य स्थानयुक्तं क्षपितसकलदेहो ललाटस्थितान्तः-
प्राप्तिव्याप्तद्विसप्ताधिकभुवनतलो यातु मद्भावमेव ॥ ६

दिग्बन्धाद्यनन्तरं भूतशुद्धिक्रममाह—अग्नीन्दुरिति । अग्नीन्दुशब्दाभ्यां प्रकृतिपुरुषावुच्येते । योगस्तयोः सम्बन्धः । तेन परापश्यन्तीतदर्थादिरूपेण विकृता लिपयो वैखरीतदर्थरूपेण सृष्टा हि यस्मात् तस्मात्ताभिः सहेदं शरीरं तदर्थात्मकं तत्र व्यापयेत् संहरेत् । कथमित्याह—प्रतिलोमपठिताभिरिति । प्रतिलोमेन न्यस्ताभिरित्यर्थः । शरीरस्य अशुद्धत्वेन संहरणीयत्वमाह—भूतात्मकमिति । प्रतिलोममातृकान्यासेन वैखरीतदर्थात्मकं स्थूलं बिन्दुं मध्यमात्मके सूक्ष्मे संहृत्य बुद्ध्यैव सूक्ष्मादिकं संहर्तव्यमित्याह—निशितधीरिति । विधिनेति । प्राणायामैरित्यर्थः । तत्र प्रथमप्राणायामेन बिन्दुं सूक्ष्मात्मकं नादे कारणे पश्यन्त्यां विलापयेत् । द्वितीयेन नादं कारणं सामान्ये परायां शक्तौ । तृतीयेन शक्तिं शान्तौ इति विधिनेति सूचितम् । यथावदिति । नादाद्यन्तं मूलोच्चारणेनेत्यर्थः ॥ ५ ॥

प्रकारान्तरेण भूतशुद्धिमाह—अन्त्यावुष्मस्विति । मूलाधार लिङ्गमूल नाभि· हृदय गल तालु भ्रूमध्य ललाट मस्तकेषु द्विचतुश्चतुःपञ्चपञ्चपञ्चपञ्चषोड़श-दलानि पद्मानि अष्टप्रकृतीश्वराधिष्ठितानि स्मृत्वा तत्संहारेण स्वयं परो भवेदिति श्लोकार्थः ।

तत्र मूलाधारपद्मे क्षली दलत्वेन स्मृत्वा । तद्दलद्वयं पृथिवीविकारात्मकं क्षं स्वाहा लं स्वाहेति कर्णिकागतपृथिव्यां विलाप्य । साऽपि लिङ्गमूलस्थहसषश-चतुर्दलपद्मकर्णिकागतापसु संहार्या इत्याह—अन्त्यावुष्मस्विति । तत्रापि दलात्मकाब्विकारान् पूर्ववत् अपसु हुत्वा ता अपि नाभिस्थवादिचतुर्दलपद्म-कर्णिकास्थतेजसि संहार्या इत्याह—अमून् वादिष्विति । तदपि तेजः सविकारं हृद्गते पञ्चदले पवर्गात्मके वायुरूपे संहार्यमित्याह—मलिपिषु तानिति ।

मूलाधारात् स्फुरिततड़िदाभा प्रभा सूक्ष्मरूपोद्-
गच्छन्त्यामस्तकमणुतरा तेजसां मूलभूता ।
सौषुम्नाध्वाचरणनिपुणा सा सविचानुबद्धा
ध्याता सद्योऽमृतमथ रवेः स्रावयेत् सार्धसोमात् ॥ ७

शिरसि निपतिता या बिन्दुधारा सुधाया
भवति लिपिमयी सा ताभिरङ्गं मुखाद्यम् ।
विरचयतु समस्तं पातितान्तश्च तेज-
स्यनल इव घृतस्योद्दीपयेदात्मतेजः ॥ ८

अनेनैव क्रमेणोत्तरं पद्मचतुष्कं तवर्गाद्यात्मकं पञ्चपञ्चदलं साधिष्ठात्रकं मूर्धस्थे षोड़शदले स्वरात्मनि ईश्वरात्मके संहरणीयमित्याह—तांश्चतुरिति । एतान् असि विसर्गे विसर्गात्मनीश्वर इत्यर्थः । ईश्वरैश्वर्यात्मक दलषोड़शकमीश्वरे संहार्य-मित्याह—अम्यद इत्यादिना । अमि बिन्दौ । अदः विसर्गम् । बिन्द्वात्मनि ईश्वरे विसर्गदलं संहरेदित्यर्थः । तद् दति दन्तसम्बन्धिन्यौकारे तदात्मके ईश्वर इत्यर्थः । एवमुत्तरत्रापि । स्थानयुक्तमिति । प्रथमं संहारन्यासेन स्थूलं संहृत्य पश्चादनेन योगेन सूक्ष्माणि स्थानानि संहरेदित्यर्थः । ललाटस्थित इति । ललाटे प्रकृत्यन्ते तदभिन्नतया स्थितो जीवः । अतोऽकारार्थस्येश्वरस्य मूर्धस्थस्य प्राप्त्या व्याप्तद्विसप्ताधिकभुवनतलः संहृतसकलसंसारः स मङ्गावं प्रत्यगीश्वरतामेव यातिति शार्ङ्गिणो वचनमेतत् ।

स्रष्टृत्व स्थापकत्व संहर्तृत्व तिरोधायकत्वानुग्राहकत्व सर्वज्ञत्व सर्वेश्वरत्व सर्व-शक्तित्व सर्वान्तर्यामित्व सर्वात्मत्व सदानन्दचित्पूर्णात्मत्वाद्यत्वानि ईश्वरगुणाः स्व-रार्थभूताः । सत्त्वरजस्तमःसाम्यबीजानि प्रकृतेर्गुणाः । शब्दादिपञ्चकनिश्चयाः महतः । तन्निश्चयकर्तृत्वाभिमानपञ्चकम् अहङ्कारस्य । पञ्चविधशब्दपरिणाम-सामर्थ्यमाकाशस्य । पञ्चस्पर्शरूपेण परिणामसामर्थ्यं वायोः । आकाशवायुरूपा-वेकीकृत्य चतुर्विधरूपपरिणामसामर्थ्यं तेजसः । तथा चतुर्विधरसपरिणाम-सामर्थ्यमपाम् । सुरभ्यसुरभिगन्धरूपेण परिणामसामर्थ्यं पृथिव्याः गुणद्वयम् । पृथिव्यादीनामेवंविधगुणविभागमभिसन्धाय द्विदलादिपद्मकल्पना कृता इत्यव-गन्तव्यम् ॥ ६ ॥

ततो दिव्यदेहसृष्टिक्रममाह—मूलाधारादिति । अधिष्ठानमेव मूलाधारः । प्रभा कुण्डलिनीमस्तकम् । मस्तकमपि परब्रह्मैव । तदेव ब्रह्म संविद्रूपिण्या

संहृत्य चोत्पाद्य शरीरमेवं
तेजोमयं व्याप्तसमस्तलोकम् ।
सङ्कल्प्य शक्त्यात्मकमात्मरूपं
तच्चिह्नमात्मन्यथ संदधीत ॥ ९

प्रकृत्या सह सार्धसोमो रविश्च मायित्वात् । प्रणवशक्त्युच्चारणेन पूर्ववत्तेजः-सुषुम्नापद्मामृतपिण्डान् स्मृत्वा निरवद्यादिमन्त्रैर्व्याप्य अक्षरन्यासेन शरीरं रचयेदित्यर्थः ॥ ७ ॥ ८ ॥

व्याप्तसमस्तलोकमिति । व्यापिन्यादिक्रमेण स्वरूपपर्यन्तं व्याप्तमित्यर्थः । सङ्कल्प्य शक्त्यात्मकमिति । शक्त्यात्मकत्वसिद्धये सामान्यपटले कथिता इह वक्ष्यमाणाश्च न्यासाः सूचिताः । तच्चिह्नमिति । भूषणायुधादिन्यासः सूचितः ।

अयं न्यासक्रमः । पीठन्यासमूर्तिन्यासानन्तरम् आवाहनाद्यवगुण्ठनान्तं विधाय । मातृकां विन्यस्य । मूलेन करन्यासं कृत्वा । मूलतदक्षरमूल-तदङ्गहृल्लेखादिकम् अङ्गुलिषु विन्यस्य । मूलेन देहे त्रिशो व्याप्य । मूलपुटितां मातृकां विन्यस्य । शैवतत्त्वन्यास शक्तिश्रीसन्नतिरित्यादिन्यास-बुभुक्षादिन्यास श्रीकण्ठादिन्यासमूलतद्वर्णैः मूर्धहृदयनाभिषु सृष्ट्यादिन्यास शाक्त-तत्त्वन्यासाहोरात्रादित्रिलिङ्गाजपापरमात्मप्रणवन्यासान् विधाय । अष्टमात्रया शक्त्याष्टाक्षरदशाङ्गन्यासवत् दशाङ्गन्यासाङ्गर्ष्यादिकन्यासान् कृत्वा । त्रिपुरोक्त-क्रमेण भूषणन्यासमाचरेत् ।

अथ आवरणन्यासः । क्लीं क्लैं क्लुं क्लिं क्लूं इति बीजसहिता हृल्लेखाद्या मूर्धादिषु भूतस्थानेषु ऊर्ध्वादिवक्त्रेषु च विन्यस्य । गायत्र्यादित्रयं ललाटवाम-दक्षिणगण्डेषु न्यसित्वा । ब्रह्मादित्रयं सव्यकर्णास्यवामकर्णेषु न्यसित्वा । गलसव्यस्तनवामस्तनेषु गायत्र्याद्या अपि विन्यस्य । सव्यांस हृदय वामांसेषु ब्रह्मादिकं न्यसेत् । पुनर्नाभिवामदक्षिणोरुषु गायत्र्याद्यान् न्यसित्वा । वामस्फिगाधारदक्षिणस्फिक्षु ब्रह्मादिकं न्यसेत् । ह्रां ह्रीं ह्रूं इति गायत्र्यादीनां बीजानि । ह्रं ह्रिं ह्रुं इति ब्रह्मादीनाम् । पुनरलिकादिषु मातृभैरवन्यासः सबीजः । पुनर्ध्यात्वा संपूज्य पुनर्जपित्वा संयोगान् वक्ष्यमाणान् न्यासानाचरेत् । गुणितयोग षड्ध्वयोग लवादियुतराशि नक्षत्र तिथि करणन्यासयोग कुण्डलिनीहंस-हरिहरादिचतुःप्रणवप्राणापानयोः अहोरात्रमासंवत्सरदेवाः सम्पुतयः स्वरा इत्यादियोग चतुर्दशयोगाजपापरमात्मप्रणवयोगन्यासान् विधायाऽणयोगेन जप्त्वा बाह्यपूजां कुर्यादिति न्यासक्रमः ॥ ९ ॥

उद्यद्भास्वत्समाभां विजितनवजवामिन्दुखण्डावनद्ध-
द्योतन्मौलिं त्रिनेत्रां विविधमणिलसत्कुण्डलां पद्मगाञ्च ।
हारग्रैवेयकाञ्चीगुणमणिवलयाद्यैर्विचित्राम्बराढ्या-
मम्बां पाशाङ्कुशेष्टाभयकरकमलामम्बिकां तां नमामि ॥ १०

धातू द्वौ स्तो रक्षणव्यापकार्थौ पाद्योऽश्वाद्यस्तत्प्रभावात्तयोश्च ।
सर्वं संरक्ष्याऽथ सर्वात्मना यो व्याप्नोत्यंशः स्यादसौ पाशवाची ॥ ११
अं स्यादात्मा कुर्धरा कुस्तनुर्वा भागार्थः स्याच्छोऽथवाऽऽवृत्तिवाची ।
भूश्चेद्भूतान्यन्यथा चेच्छरीराण्याकृष्यात्मन्याहरेदङ्कुशाख्यः ॥ १२
स्मृते यथा संसृतिचक्रचङ्क्रमोद्भवाद्भनापायसमुत्थितादपि ।
वियोजयत्यात्मतनुं नरं भयात्तथाऽभयस्याऽभयसंज्ञिता विभोः ॥ १३
मुख्यार्थवाची वरशब्द उक्तः स्याद्वाञ्छितार्थश्च वराभिधानः ।
मुख्यं त्वभीष्टं स्मृतिमात्रकेण ददाति योऽसौ वरदोऽवगम्यः ॥ १४

दीक्षाकृष्टैः पुरोक्ते रचयतु विधिवन्मण्डलं मण्डपे तद्-
व्यक्तं युक्तञ्च कान्त्या त्रिगुणितविलसत्कर्णिकं वर्णवीतम् ।
आवीतं केसरेष्वारचितहरिहरार्णैश्च मध्ये समायै-
स्तैरग्रे माययाऽऽढ्यं कमलमथ बहिः प्रोक्तचिह्नैरुपेतम् ॥ १५

पद्मगां चेति । पद्ममध्यगत्रिकोणगां चेत्यर्थः । वलयाद्यैः सह विचित्राम्बराढ्यामित्यन्वयः । अम्बिकामिति सूक्ष्मध्यानमुक्तम् । तामिति परध्यानम् ॥१०॥

पा रक्षण इति पाद्यः । अशू व्याप्ताविति अश्वाद्यः तयोर्निष्पन्नः पाशशब्दः स्यात् । तत्प्रभावात् सर्वं संरक्षेदिति । अंशिन्याः शक्तेः प्रभावादित्यर्थः । पाशवाची पाशस्मारक इत्यर्थः ॥ ११ ॥

अङ्कुशावयवार्थमाह—अं स्यादिति । आवृत्तिः पौनःपुन्यम् । भूश्चेत् कुशब्दार्थं इति शेषः । अन्यथा चेदिति तन्वर्थपक्षोऽनूदितः ॥ १२ ॥

यथातथाशब्दौ यस्मात्तस्मादर्थौ ॥ १३ ॥ १४ ॥

वर्णवीतमिति । उत्तरश्लोके वक्ष्यमाणप्रकारेण वीतमित्यर्थः । आवीतं केसरेष्विति । मध्ये समायैर्मध्ये मायासहितैः हरिहरार्णैः हरिहर इत्येतैरर्णैः केसरेषु वेष्टितमित्यर्थः । ह रि ईं ह र ईं इत्येवं लेखनप्रकारः । मध्ये समायैस्तैरिति । मध्ये दलमध्ये समायैरोकारसहितैः तैर्हरिहरार्णैः आवीत-

शक्त्याविःसाध्यमिन्द्रानिलनिर्ऋतिगबीजाभिबद्धं पुरोऽग्ने-
स्त्रिकोणोल्लासिमायं हरिहरविलसद्गण्डमेभिः समायैः ।
वर्णैश्चावेष्टितं तत्त्रिगुणितमिति विख्यातमेतत् सुयन्त्रं
स्यादायुष्यञ्च वश्यं धनकरममितश्रीप्रदं कीर्तिदञ्च ॥ १६
हृल्लेखाख्यां गगनां रक्तां च करालिकां महोच्छ्रुष्माम् ।
मूर्धनि वदने हृदये गुह्ये पदयोर्न्यसेत्तदङ्गेश्च ॥ १७
गायत्रीं न्यसतु गले स्तने तु सव्ये सावित्रीं पुनरपरे सरस्वतीञ्च ।
सव्येऽंसे सरसिजसम्भवं मुकुन्दं हृद्देशे पुनरपरांसके शिवञ्च ॥ १८
अलिकांसपार्श्वकुक्षिषु पार्श्वांसापरगलहृत्सु च क्रमशः ।
ब्रह्माण्याद्या विधिवन्न्यस्तव्या मातरोऽष्ट मन्त्रितमैः ॥ १९
सजया विजया तथा जिताह्वया चाऽपराजिता नित्या ।
तदनु विलासिनीदोग्ध्री साघोरा मङ्गला नव प्रोक्ताः ॥ २०
एवं संपूज्य पीठं तदनु नव घटान् पञ्च वा कर्णिकायां
पत्राग्रेषु न्यसेत् काञ्चनरजतताम्रोद्भवान्मार्त्तिकान् वा ।

मित्यर्थः । तैरग्रे माययाऽऽव्यमिति । तैर्हरिहरार्णैः । अग्रे दलाग्रे मायया ईकारेणाऽऽव्यं यथा भवति तथा आवीतमिति योजना । एतत्त्रयं षड्गुणित-द्वादशगुणितयोरपि समानम् ॥ १५ ॥

शक्त्याविःसाध्यमिति पूर्वश्लोकस्य व्याख्या । शक्तिस्त्रिकोणमध्यस्था हृल्लेखा । तस्यामग्निविभागे आविर्भूतसाध्यम् । लिखितसाध्यनामेत्यर्थः । साधककर्मनाम्नो-र्मायाभागादौ लेखनस्योपलक्षणमेतत् । बीजानि शक्तिबीजानि । तत्-कोणोल्लासिमायमिति । त्रिकोणकोणेषु ईकारलेखनमुक्तम् । एभिः समायैरा-वेष्टितमिति । ह रि ई ह र ई इति शक्तिवेष्टनाद् बहिर्वेष्टितं तद्बहिर्वर्णै-र्मातृकाक्षरैश्चावेष्टितमित्यर्थः । आयुष्ये मध्यमबीजं मृत्युञ्जयेन वेष्टयेत् । वश्ये शक्त्या । धनश्रियोः श्रिया । कीर्त्तावजपया । यन्त्रजीवादिलेखनं तु सर्वत्र समानम् ॥ १६ ॥ १७ ॥ १८ ॥

ब्रह्माण्याद्या विधिवदिति । भैरवयोगः सूचितः । मन्त्रितमैरिति । आं चां अं चम् इत्यादिबीजयोगः सूचितः ॥ १९ ॥

नवशक्तीराह—सजयेति । क्लीं श्रीं भुवनेश्वर्यासनाय नम इति पीठमन्त्रः ।

एकं वा कर्णिकायां सुमतिरथ विनिःक्षिप्य कुम्भं यथावत्
संपूर्याऽऽवाहयेत्त्रिष्वपि विधिषु पुनर्वक्ष्यमाणक्रमेण ॥ २१
मधुना महता रवेण साकं विधिना मध्यगतं प्रपूर्य कुम्भम् ।
अभिवाह्य कलाः प्रवेष्टयीत प्रवराभ्यामथ तं नवांशुकाभ्याम् ॥
ऐन्द्रं घृतेन यमदिक्प्रभवञ्च दध्ना
क्षीरेण वारुणमथो तिलजेन सौम्यम् ।
क्षीरद्रुचर्मदशमूलकपुष्पसिद्ध-
क्वाथेन कोणनिहितानपि पूरयेच्च ॥ २३
मूत्रेणैन्द्रं गोमयेनापि याम्यं क्षीरेणाप्यं सौम्यजञ्चैव दध्ना ।
मध्यप्रोत्थं सर्पिषा पञ्च कुम्भाः स्युश्चेदेवं पूरणीयाः क्रमेण ॥ २४
गोमूत्रगोमयोदकपयोदधिघृतांशकाः क्रमात् प्रोक्ताः ।
एकार्धधातुसत्त्वाद्येकि सर्वाणि वा समानि स्युः ॥ २५
तारभवाभिरथर्भिः क्रमेण संयोजयेत् पञ्चगव्यानि ।
आत्माष्टाक्षरमन्त्रैरथ वा योज्यानि पञ्चभिः पञ्च ॥ २६
यद्येककलशकृप्तौ विधिरपि पञ्चाशदोषधिक्वाथैः ।
पूरयतु पञ्चभिर्वा गव्यैस्तोयात्मकैऽष्टगन्धाद्भिः ॥ २७
अत्रोत्तरस्यां दिशि पङ्कजे च पलाशचर्मक्वथितैः पयोभिः ।
सम्पूरणीयः कलशो यथावत् सुवर्णवस्त्रादियुतः सुशुद्धः ॥ २
द्वारेषु मण्डपस्य द्वौ द्वौ कुम्भौ सुशुद्धजलपूर्णौ ।
संस्थाप्य च वसनाद्यैः प्रवेष्टयित्वा हि पूजनीयाः स्युः ॥ २९
ऊर्ध्वेन्द्रयाम्यसौम्यप्रत्यग्दिक्षु च भूतवर्णकाः क्रमशः ।
हृल्लेखाद्यास्तदनु च पूर्ववदङ्गानि पूजनीयानि ॥ ३०

क्लीं भुवनेश्वरीमूर्तये नम इति मूर्तिमन्त्रः ॥ २० ॥

सुमतिरिति । एकस्मिन्नेव कुम्भेनैककुम्भशक्त्यापादनसमर्थ इत्यर्थः । यथावदिति पूर्वोक्तपूरणक्रमः सूचितः ॥ २१ ॥

नवघटपक्षे पूरणमाह—मधुनेति ॥ २२ ॥ २३ ॥

पञ्चकुम्भपक्षे पूरणक्रममाह—मूत्रेणेति ॥ २४ ॥

पञ्चगव्ययोजनप्रकारमाह कलशान्तरार्थं—गोमूत्रेति । सर्वाणि वेति

गायत्रीं शतमखजे निशाचरोत्थे
सावित्रीं पवनगते सरस्वतीञ्च ।
ब्रह्माणं हुतभुजि वारुणे च विष्णुं
बीजेऽस्त्रे समभियजेत् तथेशमैशे ॥ ३१

रक्ता रक्ताकल्पा चतुर्मुखी कुण्डिकाक्षमालेऽब्जे ।
दधती प्राग्बीजस्था गायत्री तादृशोऽग्निगो ब्रह्मा ॥ ३२
अरिदरगदाब्जहस्ता किरीटकेयूरहारसम्भिन्ना ।
निशिचरबीजसमुत्था सावित्री वरुणगस्तथा विष्णुः ॥ ३३
टङ्काक्षाभयवरान् दधती च वीक्षणेन्दुकलितजटा ।
वाणी वायव्यस्था विशदाकल्पा तथेश्वरस्त्वैशे ॥ ३४
ब्रह्माण्याद्यास्तद्बहिरनन्तरं वासवादिकाशेशाः ।
पूज्याः पूर्वप्रोक्तैरुपचारैः सम्यगिति निजेष्टास्त्रे ॥ ३५
यदि नव कलशास्तेष्वथ संपूज्या मातरोऽष्ट दिक्क्रमशः ।
हृल्लेखाद्याः पूज्या मध्यादिषु पञ्च चेद्भवन्ति घटाः ॥ ३६
प्रथमं घृतजं ततः कषायं दधि पश्चात् क्वथितं पयः कषायम् ।
अथ तैलकषायकौ मधूत्थं द्विजवृक्षात् क्वथितं ततोऽभिषिञ्चेत् ॥ ३७
द्वारगकुम्भधृतैरथ सलिलैः पुनरन्तरान्तरा सेकम् ।
कुर्यान्मुखकरचरणक्षालनमपि साचमादिकं मन्त्री ॥ ३८
विधिवदिति कृताभिषेको द्वात्रिंशल्लक्षमथ जपेन्मन्त्रम् ।
निजकरदत्तार्घ्यामृतजलपोषितभानुमत्प्रभोऽनुदिनम् ॥ ३९

पक्षान्तरोक्तिः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

बीजेऽस्त्रे समभियजेदिति । बीजानि त्रिकोणबहिष्ठानि वेष्टनबीजानि । तेषु गायत्र्याद्याः पूज्याः । अस्त्रेषु त्रिकोणकोणेषु ब्रह्मादिकं पूजनीयमित्यर्थः । ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

अभिषेकक्रममाह—प्रथमं घृतजमिति ॥ ३७ ॥

साचमादिकं मन्त्रीति । मन्त्राचमनमुक्तम् ॥ ३८ ॥

निजकरदत्तार्घ्यामृत इति । स्वस्य करे रश्मिभिः सर्वनाड़ीद्वारा निःसृताभिरर्घ्यामृतविभक्ताभिः आदित्यमण्डलपर्यन्तं व्याप्ताभिरादित्याय दत्तानि यान्यर्घ्यं-

भूत्वा शक्तिः स्वयमथ दिनेशेन्दुवैश्वानराणा-
मैक्यं कुर्वन् प्रणवमनुना शक्तिबीजेन भूयः ।
आकृष्याऽन्तर्बहिरपि समाधाय बुद्ध्यैव तेजो
जप्यान्मन्त्रं ज्वलनहुतशिष्टान्नभुक् प्रोक्तसंख्यम् ॥ ४०
अथ तु हविष्यप्राशी नक्ताशी वा जपेन्मनुञ्चैवम् ।
परिपूर्णायां नियमितजपसंख्यायां समारभेद्धोमम् ॥ ४१
जपाद्दशांशं जुहुयादथाऽष्टद्रव्यैर्गुडक्षौद्रघृतावसिक्तैः ।
वर्णौषधीसिद्धजलाभिषेकं कृत्वा द्विजानभ्यवहारयेच्च ॥ ४२
ततोऽस्य प्रत्ययास्त्वेवं जायन्ते जपतो मनुम् ।
अधिष्ठितं निश्चयदीपं निस्तमिस्रं गृहं भवेत् ॥ ४३
ततः कृत्वा जपक्षासं समुपासीत शक्तितः ।
युक्तात्मा नित्ययोगेन प्रागुक्तविधिनाऽर्चयेत् ॥ ४४
अश्वत्थविप्राङ्घ्रिपबिल्वनाम्नां तर्कारिकम्लक्षकसेव्यकानाम् ।
प्रसारणीकाश्मरिरोहिणीनामुडुम्बरीपाटलिडुण्डुकानाम् ॥ ४५
पलं पलार्धं त्वथ कर्षमर्धं तेषान्तु भागः कथितः क्रमेण ।
एतैः सृतेनाथ जलेन चासौ संपूरणीयः कलशो यथावत् ॥ ४६

जलामृतानि तैरादित्यभावमापन्नैरादित्येच्छया पुनरपि प्रत्यामृतैः पोषितः सन् स्वयमपि भानुवत् प्रभ इत्यर्थः । अर्घ्यदानप्रकारस्तु सौरपटले द्रष्टव्यः ॥ ३९ ॥

जपकाले ध्यानप्रकारमाह—भूत्वा शक्तिरिति । भूत्वा शक्तिः स्वयमिति विग्रहध्यानमुक्तम् । दिनेशेन्दुवैश्वानराणामैक्यं कुर्वन्नित्यान्तरं सूक्ष्मध्यानम् ।

व्यापिन्यादिध्यानमाह—शक्तिबीजेनेति । अन्तःस्थिततेजस्त्वयात्मकं तत् तेजः शक्तिबीजजपसमये बुद्ध्यैव आकृष्य बहिरपि व्यापिन्याद्यात्मना समाधाय जपेदित्यर्थः ॥ ४० ॥ ४१ ॥

अष्टभिर्द्रव्यैरिति । प्रपञ्चयागोक्तैरित्यर्थः ॥ ४२ ॥

जायन्त इति बहुवचनेन प्रतिभादिकमुक्तम् ॥ ४३ ॥

समुपासीतेति । युञ्जगादित्यर्थः । योगो नाम परापरशक्त्यैक्यद्वारा पूर्णभावः ।

योगिना बाह्यपूजाः परित्यज्याऽन्तरेव पूजा कार्येत्याह—युक्तात्मेति । परेण युक्तः संयुक्त एकीभूत आत्माऽन्तःकरणं यस्य स तथोक्तः । स नित्ययोगेन प्रत्यग्-

प्रत्यब्दसेकाद्भविता शतायुर्मेधेन्दिरावान् रहितश्च रोगैः ।
मासेषु जन्मस्वभिषेकतः स्यादुर्वीपतिर्मङ्क्षु महापृथिव्याः ॥ ४७
अर्काभस्तेजसाऽसौ भवति नलिनजा सन्ततं किङ्करी स्या-
द्रोगा नश्यन्ति दृष्ट्या तमथ च धनधान्याकुलं तत्समीपम् ।
देवा नित्यं नमोऽस्मै विदधति फणिनो नैव दंशन्ति पुत्राः
सम्पन्नाः स्युः सपुत्रास्तनुविपदि परं धाम विष्णोः स भूयात् ॥ ४८
शक्तिप्रग्रस्तसाध्यं हरशरकलमायावृतं वह्निगेह-
द्वन्द्वास्त्रिप्राप्तमायं प्रतिविवरलसच्छक्तिवह्नं बहिश्च ।
कोणोद्यद्दण्डादण्डत्रिलिपिहरिहरावह्नगण्डं विलोमा-
र्णावीतं कोर्युगाष्टोदरगनृहरिचिन्ताश्मकं षड्गुणाख्यम् ॥ ४९
षड़ङ्गुलप्रमाणेन वर्तुलं कर्तुरालिखेत् ।
षड़ङ्गुलावकाशेन तद्बहिश्च प्रवर्त्तयेत् ॥ ५०

ब्रह्मयोगरूपेण । प्रागुक्तविधिना विधीयत इति विधिः क्रम उपकरणजातं च सर्वं तेनाऽर्चयेत् अमृतमयैश्चित्पर्यन्तं व्याप्तैरुपहारैरन्तरेवाऽर्चयेदित्यर्थः ॥ ४४ ॥ ४५ ॥ ॥ ४६ ॥ ४७ ॥ ४८ ॥

बहिरर्चनस्य पूर्वमेव विहितत्वेन इहाऽविधेयत्वात् षड्गुणितं संगृह्णाति— शक्तिप्रग्रस्तेति । शक्तिर्मध्यस्था ह्रल्लेखा तया प्रग्रस्तसाध्यम् । तस्यां लिखितसाध्य-मित्यर्थः । साध्यलेखनमुपलक्षणं साधककर्मलेखनस्यापि । हरशरकलमायाः क्लीं श्रीं क्लींकाराः तैरावृतं पूर्वोक्तं शक्तिबीजम् । तत्र क्लींबीजेन पञ्चधाऽऽवृत्तेनैका आवृत्तिः । पुनस्तदन्तराल एव श्रीबीजेन । तथैव तदन्तराले क्लींबीजेन । वह्निगेहद्वन्द्वास्त्रिप्राप्तमायमिति । षट्कोणस्याऽवशिष्टांशे ईकारलेखनमुक्तम् । प्रतिविवरेति । षट्कोणान्तरालेष्वित्यर्थः । बहिरिति । द्वितीयवर्तुलाद् बहिरित्यर्थः । कोणोद्यदिति । कोणशब्देन षट्कोणान्युच्यन्ते । शक्तिश्रीकामाः त्रिलिपयः । दण्डित्वं सबिन्दुत्वम् । दण्डिबीजत्रयमूर्ध्वकोणत्रये । अदण्डिबीज-त्रयमधःकोणत्रये । गण्डशब्देन षटकोणान्तरालषट्कं विवक्षितम् । विलोमार्णा-वीतमिति । तृतीयवृत्तान्तर्बाह्यभागयोः अनुलोमविलोममातृकावर्णैः वेष्टित-मित्यर्थः । विगता विलोमेन गता वर्णा अनुलोमगताश्च वर्णा विलोमार्णाः । कोर्युगं पृथिवीमण्डलद्वयं पुटितं तस्याष्टोदरेषु कोणाष्टकेषु गतनृहरिचिन्ताश्मकं दिक्षु नृसिंहबीजं विदिक्षु चिन्तारत्नमिति विभागः ॥ ४९ ॥

वर्तुलं तावता भूयस्तद्बहिश्च तृतीयकम् ।
मध्यवर्तुलमध्ये तु हृल्लेखाबीजमालिखेत् ॥ ५१
द्वितीयवर्तुलाश्लिष्टमीषच्छ्लिष्टषड़स्रकम् ।
पुटितं मण्डलं वह्नेरस्पृशन्मध्यवर्तुलम् ॥ ५२
इन्द्राग्निरक्षोवरुणवायूशान्तास्त्रकं लिखेत् ।
षट्सु कोणान्तरालेषु हृल्लेखाषट्कमालिखेत् ॥ ५३
एकैकान्तरितास्तास्तु सम्बध्युरितरेतरम् ।
शिखाभिरन्तराभिस्तु बाह्याबाह्याभिरान्तराः ॥ ५४
मध्यवर्तुलसंस्थाया हृल्लेखायाः कपोलयोः ।
अधरे साध्यनामार्णं साधकस्योत्तरे लिखेत् ॥ ५५
अन्तराग्निश्रियोः कर्म साधकांशे समालिखेत् ।
हरमायाः पञ्चकृत्वः स्युर्बहिर्गर्भवर्तुलम् ॥ ५६
तद्बहिः शरमायाश्च कलमायाश्च तद्बहिः ।
लिखेन्मायां बिन्दुमतीं वह्नेः कोणेषु षट्स्वपि ॥ ५७
वह्नेः कोणत्रये श्रीमत्पक्षीये त्रितयं लिखेत् ।
शक्तिश्रीकामबीजानां सदण्डं साधकार्णवत् ॥ ५८
वह्नेस्तु वह्निपक्षीये तान्येवाऽदण्डवन्ति च ।
ससाध्यनामवर्णानि स्पष्टनिष्ठानभाञ्जि च ॥ ५९
बाह्यरेखामन्तरा स्युर्वर्णाः क्रमगताः शुभाः ।
तद्बहिः प्रतिलोमाश्च ता स्युर्लेखकपाटवात् ॥ ६०
ततो विदर्भितं भूमेर्मण्डलद्वयमालिखेत् ।
महादिक्षु नृसिंहार्णं चिन्तारत्नाश्रितास्त्रकम् ॥ ६१
बहिः षोड़शशूलाङ्कं शोभनं व्यक्तवर्णवत् ।
एतद्द्वयन्त्रं समालिख्य पद्ममारचयेत्ततः ॥ ६२
रुचिरं द्वादशदलं षट्त्रिंशत्कैसरोज्ज्वलम् ।
त्रिवृत्तराशिवीथ्याद्यैः पार्थिवान्तश्च मण्डलम् ॥ ६३

अस्य श्लोकस्य व्याख्यानं—षड़ङ्गुलेत्यादि । बहिर्गर्भवर्तुलमिति । गर्भवर्तुलं

पूर्वोक्तलक्षणोपेतं शुभं दृष्टिमनोहरम् ।
एवं कृते षड्गुणिते मण्डले सुमनोहरे ।
प्राग्वत् सङ्कल्प्य कलशमर्चयेत् सुसमाहितः ॥ ६४

अभ्यर्च्य पीठं नवशक्तिकान्तमङ्गानि बीजेषु च षट्सु भूयः ।
गायत्रसावित्रसरस्वतीश्च यजेदथ श्रीरतिपुष्टिसंज्ञाः ॥ ६५

ब्रह्माणमथ च विष्णुं महेश्वरं धनदमदनगणनाथान् ।
अभ्यर्चयेत् षट्स्वपि वह्नेः कोणेषु तद्बहिः क्रमशः ॥ ६६

रक्तामनङ्गकुसुमां कुसुमातुरां च
नित्यामनङ्गमदनां मदनातुराख्याम् ।
गौरीं तथैव गगनां गगनस्य रेखां
पद्मां भवप्रमथिनीं शशिशेखराञ्च ॥ ६७

एता द्विषट् प्रतिदलं प्रतिपूज्य शक्ती-
स्तद्बाह्यतो यजतु मातृगणं क्रमेण ।
इन्द्रादिकान् बहिरतश्च तदायुधानि
संपूज्य पूर्वविधिनाऽमुमथाऽभिषिञ्चेत् ॥ ६८

योऽमुमर्चयति मुख्यविधानं सिद्धशक्तिरपि संजपहोमैः ।
स श्रियो निलयनं त्रिदशानां वन्द्यतां व्रजति विष्णुसमानः ॥ ६९

इति श्रीप्रपञ्चसारे दशमः पटलः ।

बहिर्यथा भवति तथा स्युरित्यर्थः ॥ ५०—६४ ॥

षड्गुणितविधाने षट्कोणन्यासे प्रथमं गायत्र्यादिषट्कं न्यसित्वा एष्वेव कोणेषु ब्रह्मादिकमपि विन्यस्य शङ्ककपोलगलजत्रुस्तनपार्श्वेषु प्रादक्षिण्येन रक्तानङ्गकुसुमादिकां विन्यस्य मातृरक्तमार्गेण न्यसेदिति ॥ ६५॥६६॥६७॥६८ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
दशमः पटलः ।

एकादशः पटलः ।

अथ वक्ष्ये संग्रहतो द्वादशगुणिताख्यमहायन्त्रवरम् ।
संपूज्य येन शक्तिं भुक्तेर्मुक्तेर्व्रजेन्नरोऽनुभवम् ॥ १

व्याहृत्यावीतशक्तिज्वलनपुरयुगद्वन्द्वसन्ध्युत्थशक्त्या-
वीतं कोणान्तदुर्बीजकमनु च कपोलान्तगायत्रिमन्त्रम् ।
आग्नेय्यावीतमर्णैर्वृतमनुविगतैर्भूपुराभ्याञ्च रन्ध्रे
ह्रीं चिन्तारत्नकं द्वादशगुणितमिदं यन्त्रमिष्टार्थदायि ॥ २

पूर्वोक्तमानकुम्भा मन्त्री त्रितयं विलिख्य वृत्तानाम् ।
विलिखेदन्तर्वर्तुलमनु शक्तिं स्पष्टबिन्दुनिष्ठानाम् ॥ ३

द्वादशमध्यमवर्तुलरेखाया बहिरालिखेच्च शक्तीनाम् ।
हरियमवरुणधनाधिपदिक्षु द्वे द्वे च ताः क्रमेण स्युः ॥ ४

ईशाग्निनिर्ऋतिमरुतां दिक्ष्वेकैकं विलिख्य भूयश्च ।
बीजान्तरालनिर्गतशूलाङ्कितकोणषट्कयुगमग्नेः ॥ ५

मण्डलयुगयुगलं स्यादस्पृशदान्तरितवर्तुलं विशदम् ।
शक्तिं प्रवेष्टयेच्च प्रतिलोमव्याहृतिभिरन्तःस्थाम् ॥ ६

रविकोणेषु दुरन्तां मायां विलिखेदथाऽत्र बिन्दुमतीम् ।
एकैकान्तरितास्ताः परस्परं शक्तयश्च सम्बध्युः ॥ ७

षड्गुणितविधानानन्तरं द्वादशगुणितविधानमाह—अथ वक्ष्य इति । आद्येति पाठेऽयमर्थः । श्रीबीजप्रधानषड्गुणितपूजया प्राप्तविभूतेः पुरुषस्य दुर्गाबीजप्रधानं रक्षायां प्रशस्तं विधानमुच्यत इति । मुक्तेः प्रणवयोगः ॥ १ ॥

व्याहृत्यावीतशक्तीति । प्रतिलोमसप्तव्याहृतिवेष्टितमध्यशक्तीत्यर्थः । कोणान्त-दुर्बीजकमिति । द्वादशकोणानामवशिष्टांशे लिखितदुर्गाबीजम् अन्तर्गतांशे लिखितमायाबीजं चेत्यर्थः । कपोलयोर्गायत्रीमन्त्रद्वयं प्रतिलोमतो लेख्यम् । शक्तिवेष्टनाद् बहिराग्नेयेनापि प्रतिलोमेनावीतम् अनुविगतवर्णवेष्टनं पूर्ववत् ॥२॥

अस्य पद्यस्य व्याख्या—पूर्वोक्तेति । मन्त्रीति । स्थानशोधनादिमन्त्रज्ञ इत्यर्थः । स्पष्टबिन्दुनिष्ठानामिति । स्पष्टबिन्दवयवसंस्थानामित्यर्थः ॥ ३—७ ॥

गायत्रीं प्रतिलोमतः प्रविलिखेद्वह्नेः कपोलं बहि-
र्द्वे द्वे चैव लिपी बहिश्च रचयेद् भूयस्तथा त्रिष्टुभम् ।
वर्णान् प्रानुगतांश्च भूपुरयुगे सिंहाख्यचिन्तामणिं
लिख्याद् यन्त्रमशेषदुःखशमनायोक्तं पुरा देशिकैः ॥ ८
बहिरथ षोड़शपत्रं वृत्तविचित्रं च राशिवीथियुतम् ।
विरचय्य मण्डलं पुनरत्र यथोक्तं निधापयेत् कलशम् ॥ ९
आदावङ्गावरणमनु हृल्लेखिकाद्याश्चतस्रो
ब्राह्म्याद्याः षोड़श च विकृतीर्बिन्दुसंख्याः क्रमेण ।
सार्धं भूयश्चतसृभिरथो षष्टिभिर्लोकपालै-
र्वज्राद्यैरष्टममपि समभ्यर्चयेद्भक्तिनम्रः ॥ १०
कराली विकराली च उमा देवी सरस्वती ।
दुर्गा शची उषा लक्ष्मी श्रु[र]तिः स्मृतिधृती तथा ॥ ११
श्रद्धा मेधा मतिः कान्तिरार्या षोड़श शक्तयः ।
विद्याक्रीपुष्टयः प्रज्ञा सिनीवाली कुहुस्तथा ॥ १२
रुद्रवीर्या प्रभा नन्दा पोषणी ऋद्धिदा शुभा ।
कालरात्रिर्महारात्रिर्भद्रकाली कपालिनी ॥ १३
विकृतिर्दण्डिमुण्डिन्यौ सेन्दुखण्डा शिखण्डिनी ।
निशुम्भशुम्भमथिनी महिषासुरमर्दिनी ॥ १४
इन्द्राणी चैव रुद्राणी शङ्करार्धशरीरिणी ।
नारी नारायणी चैव त्रिशूलिन्यपि पालिनी ॥ १५
अम्बिका ह्लादिनी चैव द्वात्रिंशच्छक्तयो मताः ।
पिङ्गलाक्षी विशालाक्षी समृद्धिर्बुद्धिरेव च ॥ १६
श्रद्धा स्वाहा स्वधाख्या च मायाभिख्या वसुन्धरा ।
त्रिलोकधात्री गायत्री सावित्री त्रिदशेश्वरी ॥ १७

बहिरिति । शक्तिवेष्टनाद् बहिरित्यर्थः । भूयस्तथा त्रिष्टुभमिति । प्रतिलोमेनेत्यर्थः ॥ ८ ॥ ९ ॥

हृल्लेखिकाद्याश्चतस्र इति । हृल्लेखा तदाद्याश्चतस्रश्चेत्यर्थः ॥ १०—२६ ॥

सुरूपा बहुरूपा च स्कन्दमाताऽच्युतप्रिया ।
विमला सामला चैव अरुणी वारुणी तथा ॥ १८
प्रकृतिर्विकृतिः सृष्टिः स्थितिः संहृतिरेव च ।
सन्ध्या माता सती हंसी मर्दिका वज्रिका परा ॥ १९
देवमाता भगवती देवकी कमलासना ।
त्रिमुखीसप्तमुख्यौ च सुरासुरविमर्दिनी ॥ २०
सुलम्बोष्ठूर्ध्वकेश्यौ च बहुशिश्ना वृकोदरी ।
रथरेखाह्वया चैव शशिरेखा तथाऽपरा ॥ २१
पुनर्गगनवेगाख्या वेगा च पवनादिका ।
भूयो भुवनपालाख्या तथैव मदनातुरा ॥ २२
अनङ्गाऽनङ्गमदना भूयश्चाऽनङ्गमेखला ।
अनङ्गकुसुमा विश्वरूपाऽसुरभयङ्करी ॥ २३
अक्षोभ्यासत्यवादिन्यौ वज्ररूपा शुचिव्रता ।
वरदा चैव वागीशी चतुःषष्टिः प्रकीर्त्तिताः ॥ २४

इष्ट्वा यथोक्तमिति तं कलशं निजं वा
पुत्रं तथाऽऽप्तमपि शिष्यमथाऽभिषिञ्चेत् ।
आस्तिक्ययुक्तमथ सत्यरतं वदान्यं
विप्रप्रियं कुलकरञ्च नृपोत्तमं वा ॥ २५

विधानमेतत् सकलार्थसिद्धिकरं परं पावनमिन्दिरादम् ।
आयुःप्रदं वश्यकरं रिपूणां भुक्तिप्रदं मुक्तिफलप्रदञ्च ॥ २६
पाशाङ्कुशमध्यगया शक्त्याऽथ जपार्चनहुतादियुतम् ।
वक्ष्ये यन्त्रविधानं त्रैलोक्यप्राभृतायमानमिदम् ॥ २७

शक्तेर्विधानमभिधाय तस्या एव स्वायुधबीजपुटितायाः विधानं वक्तुमारभते—पाशाङ्कुशेति । चतुरस्रद्वयात्मकमष्टकोणं लिखित्वा कोणाष्टकगतमृजुरेखाद्वयमृजु प्रसारयेत् । यथा रेखाद्वयं मध्ये परस्परलग्नं क्षुद्रदुन्दुभ्याकारं भवति तथा प्रसार्य दुन्दुभिमध्योभयभागयोः वृत्तद्वयं विधाय बहिष्ठवृत्तस्पृष्टदुन्दुभ्यग्ररेखाद्वयादारभ्य अर्गलसमाग्राण्यष्टदलानि विरच्य वृत्तद्वयात् बहिरम्बुजपुटितं घटं च रचयेत् । इति यन्त्रशरीरनिर्माणप्रकारः ॥ २७ ॥

अष्टाशात्तार्गलाविर्हलयवरयुताच्पूर्वपाश्चात्यषट्कं
कोष्ठोद्यत्स्वाङ्गसाष्टाक्षरयुगयुगलाष्टाक्षराख्यं बहिश्च ।
मायोपेतात्मयुग्मस्वरमिलितलसत्कीसरं साष्टपत्रं
पद्मं तन्मध्यपङ्क्तित्रितयपरिलसत्पाशशक्त्यङ्कुशार्णम् ॥ २८

पाशाङ्कुशाष्टतमनुप्रतिलोमकौश्च
वर्णैः सरोजपुटितेन घटेन चापि ।
आवीतमिष्टफलभद्रघटं तदेतद्-
यन्त्रोत्तमं त्विति घटार्गलनामधेयम् ॥ २९

प्राक्प्रत्यगर्गले हलमथ पुनराग्नेयमारुते च हयम् ।
दक्षोत्तरे हवार्णं नैर्ऋतशैवे हरं द्विपङ्क्तिशो विलिखेत् ॥ ३०
विलिखेच्च कर्णिकायां पाशाङ्कुशसाध्ययुतां शक्तिम् ।
अभ्यन्तराष्टकोष्ठेष्वङ्गान्यवशेषितेषु चाऽष्टार्णौ ॥ ३१
कोष्ठेषु षोड़शस्वथ षोड़शवर्णं मनुं तथा मन्त्री ।
पद्मस्य कीसरेषु च युगस्वरात्मान्वितां तथा मायाम् ॥ ३२
एकैकेषु दलेषु त्रिशस्त्रिशः कर्णिकागतान्मन्त्रान् ।
पाशाङ्कुशबीजाभ्यां प्रवेष्टयेद्बाह्यतश्च नलिनस्य ॥ ३३

तत्राक्षरलेखनक्रममाह—अष्टाशेति । अर्गलशब्देन बहत्कोष्ठाष्टकमुच्यते । तेष्वाविर्भवतां हलहयहवहरैः युतानामचां पूर्वषट्कं क्रं क्लां क्लिं क्लीं क्लुं क्लूं इत्यादि । पाश्चात्यषट्कं क्लें क्लैं क्लों क्लौं क्लं क्लः इत्यादि । कोष्ठोद्यदिति । चतुरस्रसम्बन्धाष्टकोष्ठेषु अङ्गानि तदनन्तरकोष्ठेषु पाशाद्यष्टाक्षरम् । तदनन्तर-कोष्ठेषु कामिन्याद्यष्टाक्षरम् । तदनन्तरकोष्ठद्वन्द्वेषु दुन्दुभ्याकारेषु युगलाष्टाक्षरं षोड़शाष्टाक्षरमित्यर्थः । बहिश्चेति । कर्णिकाबहिरित्यर्थः । मायोपेतात्मयुग्म-स्वरमिलितलसत्कीसरमिति । माया ह्रीं । आत्मा हंसः । मायोपेतात्मना युग्मस्वरेण चेत्यर्थः । तत्र युग्मस्वरा दलमूलग्रन्थिषु लेखनीयाः । यन्त्रोर्मध्ये हकारसकारौ तयोर्मध्ये मायेति लेखनप्रकारः । पद्मबाह्ये पाशाङ्कुशाष्टतिः । इष्टं फलं भद्रं घटयतीति इष्टफलभद्रघटम् ॥ २८ ॥ २९ ॥

प्राक् प्रत्यगिति व्याख्यानम् ॥ ३० ॥ ३१ ॥

तथा मन्त्रीति यन्त्रजीवादिसूचनम् ॥ ३२ ॥ ३३ ॥ ३४ ॥

अनुलोमविलोमगतैः प्रवेष्टयेदक्षरैश्च तद्बाह्ये ।
तदनु घटेन सरोजस्थितेन तद्वक्त्रेऽम्बुजञ्च लिखेत् ॥ ३४
बिन्दुन्तिका प्रतिष्ठा सन्दिष्टा पाशबीजमिति मुनिभिः ।
निजभूर्दहनाप्यायिनीशशधरखण्डान्वितोऽङ्कुशो भवति ॥ ३५
पाशश्रीशक्तिस्मरमन्मथशक्तीन्दिराङ्कुशाश्चेति ।
एकं कामिनि रञ्जिनि ठद्वयमपरं त्विहाष्टवर्णं स्यात् ॥ ३६
अथ गौरि रुद्रदयिते योगेश्वरि सकवचास्त्रठद्वितयैः ।
बीजादिकमिदमुक्तं शाक्तेयं षोड़शाक्षरं मन्त्रम् ॥ ३७
इति कृतदलसुभूषितमतिरुचिरं लोकनयनचित्तहरम् ।
कृत्वोज्ज्वलमथ मण्डलमपि पीठाद्यं पुरेव परिपूज्य ॥ ३८
पूर्वप्रोक्तैः क्वाथैरेकेनापूर्य पूजयेत् कलशम् ।
हृल्लेखाद्यङ्गाद्यौ मातृसुरेशादिकौ सकुलिशादी ॥ ३९
एवं संपूज्य देवीं कलशमनु शुभैर्गन्धपुष्पादिकैस्तां
दध्याज्यक्षौद्रसिक्तैस्त्रिशतमथ पृथग् दुग्धवीरुत्समिद्भिः ।
हुत्वा दत्त्वा सुवर्णांशुकपशुधरणीर्दक्षिणार्थं द्विजेभ्यः
संपूज्याऽऽचार्यवर्यं वसुभिरमलधीः संयतात्माऽभिषिञ्चेत् ॥ ४०

इति कृतकलशोऽयं सिच्यते येन पुंसा
स भवति करिरेनं नित्यमालिङ्गति श्रीः ।
धनदिनरजनीशैस्तुल्यतेजा महिम्ना
निरुपमचरितोऽसौ देहिनां स्यात् पुरोगः ॥ ४१

निजभूः ककारः ॥ ३५ ॥ ३६ ॥

बीजादिकमिति शक्तिबीजादिकमित्यर्थः ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

इति कृतकलशोऽयमिति । इत्थं कृतकलशोऽयमाचार्यो येन साधकेन सिच्यते सेच्यते इत्यर्थः । अन्तर्भाविण्यर्थत्वात् । अथवा इति इत्थं कृतः आवाहितः कलशो यस्मिन् घटे स तथोक्तः । कलाः शेरते यस्मिन् परे संविद्रूपे तेजसि स कलशः । इत्थं कृतकलशोऽयं घटः सिच्यते स्वाङ्गानि येन पुंसा स भवति करिरित्यादिक्रमेण योज्यम् । शिष्यस्यैव चाभिषेककर्तृत्वम् । आचार्यस्तु तेन प्रयुक्तः करोति ॥ ४१ ॥

जपेच्चतुर्विंशतिलक्षमेवं सुयन्त्रितो मन्त्रवरं यथावत् ।
हविष्यभोजी परिपूर्णसंख्ये जपे पुनर्होमविधिर्विधेयः ॥ ४२
पयोद्रुमाणाञ्च समित्सहस्रषट्कं दधिक्षौद्रघृतावसिक्तम् ।
तिलैश्च तावज्जुहुयात्पयोक्तैर्द्विजोत्तमानभ्यवहारयेच्च ॥ ४३

गुरुमपि परिपूज्य काञ्चनाद्यै-
र्जपतु च मन्त्रमथो सहस्रमात्रम् ।
भजतु च दिनशोऽमुमर्चनाया
विधिविहितं विधिमादरेण भूयः ॥ ४४
संक्षेपतो निगदितो विधिरर्चनायाः
शक्तेरयं सकलसंसृतिमोचनाय ।
कान्त्यै श्रिये च यशसे जनरञ्जनाय
सिद्ध्यै प्रसिद्धमहसोऽस्य परस्य धाम्नः ॥ ४५

गजमृगमदकाश्मीरैर्मन्त्रितमः सुरभिरोचनोपेतैः ।
विलिखेद्लक्तकरसालुलितैर्यन्त्राणि सकलकार्यार्थी ॥ ४६
राज्या पटुसंयुतया सपाशशक्त्यङ्कुशेन मन्त्रेण ।
साद्भक्तयाऽभिजुह्वन् निश्युर्वशीमथो वशी वशयेत् ॥ ४७
एभिर्विधानैर्भुवनेश्वरीं तां समर्च्य सिद्ध्यै तु जपंश्च मन्त्री ।
स्तुत्याऽनया स्तौतु सदा समग्रप्रीत्यै समस्तार्त्तिविभञ्जिकायाः ॥ ४

सुयन्त्रितो नियतः । मन्त्रवरं यथावदिति । प्रणवादित्वम् अतिद्रुतत्वादिवर्जनं चोक्तम् ॥ ४२॥४३ ॥

जपतु च मन्त्रमथो सहस्रमात्रमिति नित्यजप उक्तः । विधिविहितं शास्त्रविहितम् ॥ ४४ ॥ ४५ ॥

यन्त्रलेखनद्रव्याण्याचष्टे—गजमृगेति । मृगमदः कस्तूरिका । काश्मीरं कुङ्कुमम् । मन्त्रितम इति द्रव्याणि संयोज्य मूलेन जपपूजादिकमुक्तम् ॥ ४६॥४७ ॥

इति समीरितविधानानन्तरं सकलदुःखनाशिनीं परसंविद्रूपां शक्तिमचलया भक्त्या समर्च्य मन्त्री स्तुतिमपि पठेदित्याह—एभिर्विधानैरिति । मन्त्रीति प्रतिश्लोकं बीजयोगः सूचितः ॥ ४८—७० ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
एकादशः पटलः ।

प्रसीद प्रपञ्चस्वरूपे प्रधाने प्रकृत्यात्मिके प्राणिनां प्राणसंज्ञे ।
प्रणोतुं प्रभो प्रारभे प्राञ्जलिस्त्वां प्रकृत्याऽप्रतर्क्ये प्रकामप्रवृत्ते ॥ ४९

स्तुतिर्वाक्यबद्धा पदात्मैव वाक्यं
पदं त्वक्षरात्माऽक्षरं त्वं महेशि ।
ध्रुवं त्वां त्वमेवाऽक्षरैस्त्वन्मयैस्तो-
ष्यसि त्वन्मयी वाक्प्रवृत्तिर्यतः स्यात् ॥ ५०

अजाधोक्षजक्षीक्षणाश्चाऽपि रूपं
परं नाभिजानन्ति मायामयं ते ।
स्तुवन्तीशि तां त्वाममी स्थूलरूपां
तदेतावदम्बेह युक्तं ममापि ॥ ५१

नमस्ते समस्तेशि बिन्दुस्वरूपे
नमस्ते रव[पर]त्वेन तत्त्वाभिधाने ।
नमस्ते महत्त्वं प्रपन्ने प्रधाने
नमस्ते त्वहङ्कारतत्त्वस्वरूपे ॥ ५२

नमः शब्दरूपे नमो व्योमरूपे
नमः स्पर्शरूपे नमो वायुरूपे ।
नमो रूपतेजोरसाम्भःस्वरूपे
नमस्तेऽस्तु गन्धात्मिके भूस्वरूपे ॥ ५३

नमः श्रोत्रचर्माक्षिजिह्वाख्यनासा-
स्यवाक्पाणिपत्पायुसोपस्थरूपे ।
मनोबुद्ध्यहङ्कारचित्तस्वरूपे
विरूपे नमस्ते विभो विश्वरूपे ॥ ५४

रवित्वेन भूत्वाऽन्तरात्मा दधासि
प्रजाश्चन्द्रमस्त्वेन पुष्णासि भूयः ।
दहस्यग्निमूर्तिं वहन्त्याहुतिं वा
महादेवि तेजस्त्वयं त्वत्त एव ॥ ५५

चतुर्वक्त्रयुक्ता लसद्धंसवाहा
रजःसंश्रिता ब्रह्मसंज्ञां दधाना ।
जगत्सृष्टिकार्या जगन्मातृभूते
परं त्वत्पदं ध्यायसीशि त्वमेव ॥ ५६

विराजत्किरीटा लसच्चक्रशङ्खा
वहन्ती च नारायणाख्यां जगत्सु ।
गुणं सत्त्वमास्थाय विश्वस्थितिं यः
करोतीह सोऽंशोऽपि देवि त्वमेव ॥ ५७

जटाबद्धचन्द्राहिगङ्गा त्रिनेत्रा
जगत्संहरन्ती च कल्पावसाने ।
तमःसंश्रिता रुद्रसंज्ञां दधाना
वहन्ती परश्वक्षमाले विभासि ॥ ५८

सचिन्ताक्षमाला सुधाकुम्भलेखाधरा वीक्षणार्धेन्दुराजत्कपर्दा ।
सुशुक्लांशुकाकल्पदेहा सरस्वत्यपि त्वन्मयैवेशि वाचामधीशा ॥ ५९

लसच्छङ्खचक्रा चलत्खड्गभीमा
नदत्सिंहवाहा ज्वलत्तुङ्गमौलिः ।
द्रवद्दैत्यवर्गा स्तुवत्सिद्धसङ्घा
त्वमेवेशि दुर्गाऽपि सर्गादिहीने ॥ ६०

पुरारातिदेहार्धभागा भवानी
गिरीन्द्रात्मजात्वेन यैषा विभाति ।
महायोगिवन्द्या महेशा सुनाथा
महेश्यम्बिका तत्त्वतस्त्वन्मयैव ॥ ६१

लसत्कौस्तुभोद्भासिते व्योमनीले
वसन्तीव वक्षःस्थले कैटभारेः ।
जगद्वल्लभां सर्वलोकैकनाथां श्रियं
तां महादेव्यहं त्वामवैमि ॥ ६२

अजाद्रीड्गुहाजाचपोवीन्द्रकाणां
महाभैरवस्यापि चिह्नं वहन्त्यः ।
विभो मातरः सप्त तद्रूपरूपाः
स्फुरन्त्यस्त्वदंशा महादेवि ताश्च ॥ ६३

समुद्यद्दिवाकृत्सहस्राभभासा सदा सन्ततानेषविश्वावकाशे ।
लसन्मौलिवद्वेन्दुलेखे सपाशाङ्कुशाभीत्यभीष्टाप्तहस्ते नमस्ते ॥ ६४

प्रभा कीर्तिकान्ती दिवारात्रिसन्ध्याः
क्रियाशा तमिस्रा क्षुधाबुद्धिमेधाः ।
धृतिर्वाङ्मतिः सन्नतिः श्रीश्च भ[श]क्ति-
स्त्वमेवेशि येऽन्ये च शक्तिप्रभेदाः ॥ ६५

हरे बिन्दुनादैः सशक्त्याख्यशान्तैर्नमस्तेऽस्तु भेदप्रभिन्नैरभिन्ने ।
सदा सप्तपातालललोकाचलाब्धिग्रहद्वीपधातुस्वरादिस्वरूपे ॥ ६६

नमस्ते समस्ते समस्तस्वरूपे समस्तेषु वस्तुष्वनुस्यूतशक्ते ।
श्रितस्थूलसूक्ष्मस्वरूपे महेशि स्मृते बोधरूपेऽप्यबोधस्वरूपे ॥ ६७

मनोवृत्तिरस्तु स्मृतिस्ते समस्ता
तथा वाक्प्रवृत्तिः स्तुतिः स्यान्महेशि ।
शरीरप्रवृत्तिः प्रणामक्रिया स्यात्
प्रसीद क्षमस्व प्रभो सन्ततं मे ॥ ६८

हृल्लेखाजपविधिमर्चनाविशेषा-
नेतांस्तां स्तुतिमपि नित्यमादरेण ।
योऽभ्यस्येत् स खलु परां श्रियञ्च गत्वा
शुद्धं तद् व्रजति पदं परस्य धाम्नः ॥ ६९

इति हृल्लेखाविहितो विधिरुक्तः संग्रहेण सकलोऽयम् ।
योऽस्मिन्नियतमना मन्त्री योगी स्यात् स एव भोगी च ॥ ७०

इति श्रीप्रपञ्चसारे एकादशः पटलः ।

द्वादशः पटलः ।

अथ श्रियो मन्त्रविधिः समासतो जगद्धिताय प्रतिवच्यतेऽधुना ।
सहाऽङ्गभेदैः सजपार्चनाहुतक्रमैः समभ्युद्धरणाय दुर्गतेः ॥ १

वियत्तुरीयस्तु विलोमतोऽनलप्रदीपितो वामविलोचनान्वितः ।
सचन्द्रखण्डः कथितो रमामनुर्मनोरथावाप्तिमहासुरद्रुमः ॥ २

ऋषिर्भृगुश्छन्दसि चोदिता निवृत्
समीरिता श्रीरपि देवता पुनः ।
दृगक्षिकर्णेनमनुस्वरानला-
न्वितेन चाऽस्त्रा विहितं षड़ङ्गकम् ॥ ३

भूयाद् भूयो द्विपद्माभयवरदकरा तप्तकार्तस्वराभा
शुभ्राभ्राभेभयुग्मद्वयकरधृतकुम्भाद्भिरासिच्यमाना ।
रत्नौघाबद्धमौलिर्विमलतरदुकूलार्तवालेपनाढ्या
पद्माक्षी पद्मनाभोरसि कृतवसतिः पद्मगा श्रीः श्रिये वः ॥ ४

संदीक्षितोऽथ गुरुणा मनुवर्यमेनं
सम्यग् जपेन्निशितधीर्दिननाथलक्षम् ।

इच्छाशक्तिप्रधानभुवनैश्वर्यनन्तरं पुनरपि क्रियाशक्तिप्रधानामेकबीजात्मिकां पूर्वविधानेषु प्रसक्तां च श्रियं वक्तुमारभते—अथेति । अथाऽनन्तरम् । कस्य । समासतोऽनन्तरम् । समासशब्देन सर्वत्रानुगम्यमानाः प्रणवशक्तिवाक्कामाः सूचिताः । समासतः संक्षेपत इत्यनेन सामान्यपटलोक्तन्यासादिविस्तारः शक्तिवदस्यापि सूचितः । सहाङ्गभेदैरिति । शक्तिकामयोगे तद्दीर्घयोगं वाक्प्रणवयोगे तद्योगं चाङ्गानामाह । विनियोगमाह—समभ्युद्धरणायेति । अधर्मनिःस्वतादयो दुर्गतयः ॥ १ ॥

केवलस्यापि सर्वपुरुषार्थेषु विनियोगमाह—मनोरथावाप्तिरिति ॥ २ ॥

श्रीरपि देवतेति । प्रणवादियोगे तद्देवतानामुपसर्जनत्वं श्रियः सूचितम् । परमात्मस्वरूपिणी श्रीर्देवतेत्यादिप्रकारेण । श्रं बीजम् । ईं शक्तिः ॥ ३ ॥ ४ ॥

सम्यग् जपेदिति । कामानुसारेण उक्तबीजपुटिततया जप उक्तः ।

अभ्यर्चयन्नहरहः श्रियमादरेण
मन्त्री सुशुद्धचरितो रहितो वधूभिः ॥ ५
जपावसाने दिनकृत्सहस्रसंख्यैः सरोजैर्मधुरत्रयाक्तैः ।
हुनेत्तिलैर्वा विधिनाऽथ बैल्वैः समिद्वरैर्मन्त्रिवरस्त्रिभिर्वा ॥ ६
रुचिराष्टपत्रमथ वारिरुहं गुणवृत्तराशिचतुरस्रयुतम् ।
प्रविधाय पीठमपि तत्र यजेन्नवशक्तिभिः सह रमाञ्च ततः ॥ ७
विभूतिरुन्नतिः कान्तिः सृष्टिः कीर्त्तिश्च सन्नतिः ।
व्युष्टिरुत्कृष्टिर्ऋद्धिश्च रमाया नव शक्तयः ॥ ८
आवाह्य सम्यक् कलशे यथावत् समर्चनीया विधिना रमा सा ।
जप्त्वा यथाशक्ति पुनर्गुरुस्तु तं सेचयेत् संयतमात्मशिष्यम् ॥ ९
अङ्गैः प्रथमावृतिरपि मूर्तीभिचतुष्कनिधियुगैरपरा ।
शक्त्यष्टकेन चाऽन्या चरमा ककुबीश्वरैः समभ्यर्च्या ॥ १०
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चाऽनिरुद्धकः ।
दमकः सलिलश्चैव गुग्गुलुश्च कुरुण्टकः ॥ ११
वलाकी विमला चैव कमला वनमालिका ।
विभीषिका मालिका च शङ्करी वसुमालिका ॥ १२

निश्चितधीरिति। तत्तद्बीजदेवतानुसारेण ध्यानम्। श्रियमादरेण मन्त्रीति। तच्छेषतया अष्टाक्षर जप उक्तः ॥ ५ ॥

तिलैर्वा विधिनेति। अग्निसंस्कारो विधिः। मन्त्रिवरस्त्रिभिरिति। कमलवासिनीमहालक्ष्मीश्रीसूक्तैः सकृत् सकृत् हुत्वा पुनः मूलेन होतव्यमित्युक्तम् ॥ ६ ॥

रुचिराष्टपत्रमिति। कर्णिकामध्ये श्रीबीजयोगो रुचिरत्वम्। तत्र यजेदिति। पीठमन्त्रः सूचितः। रमाञ्चेति। मूर्तिपूजा सूचिता। श्रीं श्रीदेव्यासनाय नमः। श्रीं श्रीदेवीमूर्तये नमः। इति पीठमूर्तिमन्त्रौ ॥ ७ ॥

रमाया नव शक्तय इति। तासु श्रीबीजयोग उक्तः ॥ ८ ॥

आवाह्य सम्यगिति। मूर्तिं हृदयकमले तदभेदेनेत्यर्थः। यथावदिति। आवाहनादिश्लोकेषु स्त्रीलिङ्गयोगो मुद्रायोगश्चोक्तः। विधिनेति। विश्वमपूजादिकमुक्तम् ॥ ८ ॥ १० ॥ ११ ॥ १२ ॥

अनयैव च पूर्वसेवया परितुष्टा कमला प्रसीदति ।
धनधान्यसमृद्धिसंकुलामचिरादेव च मन्त्रिणे श्रियम् ॥ १३
अम्भस्युरोजद्वयसेऽभितिष्ठंस्त्रिलक्षमेनं प्रजपेच्च मन्त्री ।
श्रियं विचिन्त्याऽर्कगतां यथावद् दरिद्रताया भवति प्रमुक्तः ॥ १४
वसतावुपविश्य कैटभारेः कमलाद्वक्षतले तथा त्रिलक्षम् ।
जपतोऽपि भवेच्च काङ्क्षितार्थादधिको वत्सरतो वसुप्रपञ्चः ॥ १५
जुहुयादशोकदहने सघृतैरपि तण्डुलैः सकलवश्यतमम् ।
खदिरानले त्रिमधुरैरपि तैर्धनदञ्च राजकुलवश्यमपि ॥ १६
समधुरनलिनानां लक्षहोमादलक्ष्मी-
परिगतमपि जन्तुं प्राप्नुयाच्छ्रीः समग्रा ।
धनविभवसमृद्ध्या नित्यमाह्लादयन्ती
त्यजति न करुणार्द्रा तस्य सा सन्ततिञ्च ॥ १७
बिल्वं श्रीसूक्तजापी निजभुवि मुखजो वर्द्धयित्वाऽस्य पूर्वं
पत्रैस्त्रिस्वादुयुक्तैः कुसुमफलसमिद्भिस्ततः स्कन्धभेदैः ।
तन्मूलैर्मण्डलात् प्राक् सुनियतचरितोऽसौ हुतान्निर्मलात्मा
रूपं पश्येद्रमायाः कथमपि च पुनस्तत्कुले स्यादलक्ष्मीः ॥ १८
हृदयकमलवर्णतः परस्तादमृतमनन्तयुतं ततश्च सिन्ये ।
हुतवहदयितेत्यसौ रमायाः प्रवरधनार्थिभिरर्थितो हि मन्त्रः ॥ १९

मन्त्रभेदेष्वपि समानेयं पूजेत्याह—अनयैवेति । मन्त्रिणे श्रियमिति । तत्तन्मन्त्रानुरूपां श्रियमित्यर्थः ॥ १३ ॥

प्रजपेच्च मन्त्रीति । श्रीं रत्नगर्भायै नमः इति मन्त्रस्य शतांशजप उक्तः । चशब्देन तर्पणादिकमुक्तम् । अर्कगतां यथावदिति । अभयवरदकराभ्यां रत्नकुम्भधरामित्यर्थः ॥ १४ ॥ १५ ॥

जुहुयादशोकेति । सकामेन प्रयोगः । खदिरानलेऽपि तेनैव केवलेन वा । ॥ १६ ॥ १७ ॥

मुखज इति । ब्राह्मणस्यैव श्रीसूक्ते विधानेऽधिकारः सूचितः ॥ १८ ॥

प्रवरधनार्थिभिरिति । सर्वपुरुषार्थेषु विनियोग उक्तः । श्रीं श्रीं बीजम् । स्वाहा शक्तिः ॥ १९ ॥ २० ॥

दक्षोऽस्य स्याद्दृषिश्छन्दसि सुमतिभिरुक्ता विराड् देवता च
श्रीर्देवीपद्मिनीभ्यां हृदयकशिरसी विष्णुपत्न्या शिखा च ।
मेदोरेफाङ्गदार्णैरपि च कमलरूपाक्षरैर्वर्म चाऽस्त्रं
ताराद्याभिर्नमोऽन्ताभिरपि निगदितं जातियुक्ताभिरङ्गम् ॥ २०
पद्मस्था पद्मनेत्रा कमलयुगवराभीतियुग्दोःसरोजा
देहोत्थाभिः प्रभाभिस्त्रिभुवनविवरं भास्वरा भासयन्ती ।
मुक्ताहाराभिरामोन्नतकुचकलशा रत्नमञ्जीरकाञ्ची-
ग्रैवेयोर्म्यङ्गदाढ्या धृतमणिमुकुटा श्रेयसे श्रीर्भवेद्वः ॥ २१

ध्यात्वैवं श्रियमपि पूर्वक्लृप्तपीठे
पत्रादौ प्रथममथाऽर्चयेत्तदङ्गैः ।
अष्टाभिर्दलमनु शक्तिभिस्तदन्ते
लोकेशैरिति विधिनाऽर्चयेत् समृद्ध्यै ॥ २२
दीक्षातो जपतु रमारमेशभक्तो
लक्षाणां दशकममुं मनुं नियत्या ।
स श्रीमान् बहुधनधान्यसङ्कुलः स-
न्मेधावी भवति च वत्सरेण मन्त्री ॥ २३

इति मन्त्रजपाहृतधीर्मधुरत्रितयैरयुतं जुहुयात् कमलैः ।
परिशुद्धमना न चिरात् स पुनर्लभते निजवाञ्छितमर्थचयम् ॥ २४
समुद्रगायामवतीर्य नद्यां स्वकण्ठमात्रे पयसि स्थितः सन् ।
त्रिलक्षजाप्याढ्यतमोऽब्दमात्रान्मन्त्री भवेन्नात्र विचारणीयम् ॥ २५

नन्द्यावर्तैर्जुहुत भगभेऽभ्यर्च्य लक्ष्मीं सहस्रं
तावद्बिल्वैस्त्रिमधुरयुतैर्वा फलैः पौर्णमास्याम् ।
पञ्चम्यां वा सितसरसिजैः शुक्रवारेऽच्छपुष्पै-
रन्यैर्मासं प्रतिहुतविधिर्वत्सरात् स्याद्धनाढ्यः ॥ २६

श्रियमपीति । बीजविशेषयोगे ध्यानविशेषः सूचितः । अथवा श्रीपतिमपीत्यर्थः । अत्रापि अष्टाक्षरस्य जप्तव्यत्वात् ॥ २१ ॥ २२ ॥

वत्सरेण मन्त्रीति । दशांशेन अष्टाक्षरजप उक्तः ॥ २३ ॥ २४ ॥

तारारमामायाः श्रीः कमले कमलालये प्रसीदद्वयम् ।
बीजानि तानि पुनरपि समहालक्ष्म्यै हृदिन्दिरामन्त्रः ॥ २७
त्रिभिस्तु वर्णैर्हृदयं शिरोऽपि स्यात् पञ्चभिश्चाऽथ शिखा त्रिवर्णैः ।
त्रिभिस्तथा वर्म चतुर्भिरस्त्रं पृथक् त्रिबीजापुटितैस्तदङ्गम् ॥ २८

हस्तोद्यद्वसुपात्रपङ्कजयुगादर्शा स्फुरन्नूपुरा
ग्रैवेयाङ्गदहारकङ्कणमहामौलिर्ज्वलत्कुण्डला ।
पद्मस्था परिचारिकापरिवृता शुक्लाङ्गरागांशुका
देवी दिव्यगणार्चिता भवदघप्रध्वंसिनी स्याद्रमा ॥ २९

लक्षं जपेन्मनुमिमं मधुरत्रयाक्तै-
र्बल्वैः फलैः प्रतिहुनेद्दयुतं तदन्ते ।
आराधयेदनुदिनं प्रतिवक्ष्यमाण-
मार्गेण दुर्गतिभयाद्रहितो भवेत् सः ॥ ३०

श्रीधरश्च हृषीकेशो वैकुण्ठो विश्वरूपकः ।
वासुदेवादयश्चाऽङ्गावरणात् समनन्तरम् ॥ ३१
भारतीपार्वतीचान्द्रीशचीभिरपि संयुता ।
दमकादिभिस्तृतीयाऽनुरागाद्यैश्चतुर्थ्यपि ॥ ३२
अनुरागो विसंवादो विजयो वल्लभो मदः ।
हर्षो बलश्च तेजश्चेत्यष्टौ बाणा महाश्रियः ॥ ३३
अनन्तब्रह्मपर्यन्तैः पञ्चमीन्द्रादिभिर्मता ।
चक्रपद्मान्तिकैः षष्ठी वज्राद्यैराहतिः श्रियः ॥ ३४
संपूज्यैवं श्रियमनुदिनं यो जपेन्मन्त्रमेनं
प्रोक्तां संख्यां सहुतविधिमप्युच्छ्रितां प्राप्य लक्ष्मीम् ।
द्विचादर्वागवनिपशुपुत्रादिभोगैः समृद्धो
वर्षाद्देहापदि च पदमप्येति नित्यं स विष्णोः ॥ ३५

मन्त्री भवेदिति । रत्नगर्भामन्त्रजपः सूचितः ॥ २५ ॥ २६ ॥
महालक्ष्मीमन्त्रस्य श्रीं बीजम् ह्रीं शक्तिः । पूर्ववद्दृष्यादि पीठमूर्तिश्च ॥२७॥
॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

श्रीमन्त्रेष्विति गदितेषु भक्तियुक्तः
श्रीसूक्तान्यपि च जपेद् यजेद्धुनेच्च ।
सूक्तेषु प्रथमतरे स्वयं मुनिः स्या-
दन्येषां मुनय इमे भवन्ति भूयः ॥ ३६
आनन्दः कर्दमश्चैव चिक्लीतश्चेन्दिरासुतः ।
ऋचामथो तदन्यासामृषयः समुदीरिताः ॥ ३७
आद्ये सूक्तत्रये छन्दोऽनुष्टुप् कांसि बृहत्यपि ।
तदन्त्ययोस्त्रिष्टुबाख्यं परस्तादष्टके पुनः ॥ ३८
अनुष्टुबन्त्ये प्रस्तारपङ्क्तिश्छन्दांसि वै क्रमात् ।
अग्नी स्यातां देवते च न्यासाङ्गविधिरुच्यते ॥ ३९
मूर्धाक्षिकर्णनासामुखगलदोर्हृदयनाभिगुह्येषु ।
पायूरुजानुजङ्घाचरणेषु न्यसतु सूक्तकैः क्रमशः ॥ ४०
सहिरण्मयी च चन्द्रा रजतहिरण्यस्रजे हिरण्याख्या ।
अङ्गानि जातियुक्ति त्वथ च हिरण्यवर्णाह्वया तथाऽस्त्वं स्यात् ॥ ४
अरुणकमलसंस्था तद्रजःपुञ्जवर्णा-
करकमलधृतेष्टाभीतियुग्माम्बुजा च ।
मणिमुकुटविचित्रालङ्कृताऽऽकल्पजातै-
र्भवतु भुवनमाता सन्ततं श्रीः श्रिये वः ॥ ४२
आरभ्याच्छां प्रतिपदमथ प्राप्तदीक्षो वियुक्त-
स्तन्वङ्गीभिस्तनुविमलवासाः सुधौतद्विजाढ्यः ।
एकादश्यामथ परिसमाप्याऽर्कसाहस्रिकान्तं
जापं मन्त्री प्रयजतु रमां प्राक्तनप्रोक्तपीठे ॥ ४३

प्राकरणिकश्रीमन्त्रशेषत्वेन श्रीसूक्तं विनियुङ्क्ते—श्रीमन्त्रेष्विति । जपहोमादिकं सकृत् सकृत् कार्यम् । यजेदिति । पुष्पाञ्जलिश्च कार्य इत्यर्थः । स्वप्रधानत्वेनापि जपादिकं सूक्तानां विवर्चस्तेषामृष्यादिकमाह—सूक्तेष्विति । स्वयं श्रीरित्यर्थः । हिरण्यवर्णामिति ऋग्बीजम् । कांसीऽस्मीति ऋक्शक्तिः । [सूक्तमिदं पञ्चदशर्चात्मकं श्रौतम्] ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

मन्त्रीति । प्रत्यृचं श्रीबीजयोग उक्तः ॥ ४३ ॥ ४४ ॥ ४५ ॥

पद्मा सपद्मवर्णा पद्मस्थार्द्रा च तर्पयन्त्यभिधा ।
तप्ता ज्वलन्त्यभिख्या स्वर्णप्राकारसंज्ञका चेति ॥ ४४
मध्ये दिशाधिपाङ्गावृत्त्योरेतास्ततश्च वज्रादीन् ।
प्रयजेच्चतुरावरणं निगदितमिति सूक्तकल्पितं विधानम् ॥ ४५
अन्नघृताभ्यां जुहुयादनुदिनमष्टोत्तरं शतं मन्त्री ।
आवाहनासनार्घ्यकपाद्याचमनमधुपर्कसेकानि ॥ ४६
वासोभूषणगन्धान् सुमनोयुतधूपदीपभोज्यानि ।
सोद्वासनानि कुर्याद्भक्तियुक्तः पञ्चदशभिरथ मनुभिः ॥ ४७
व्यस्तैरपि च समस्तैः पूजायां संयतात्मकः सिद्ध्यै ।
पद्मैर्बिल्वसमिद्भिः पयोऽम्बसा सर्पिषा क्रमाज्जुहुयात् ॥ ४८
एकैकं त्रिस्त्रिशतं द्वादश्यां भोजयीत विप्रांश्च ।
मन्दारकुन्दकुमुदकनन्द्यावर्ताख्यमालतीजात्यः ।
कह्लारपद्मरक्तोत्पलकेतकचम्पकादयो ग्राह्याः ॥ ४९
परिषिञ्चेत्त्रिशो नित्यं सूक्तैस्तैः स्नानकर्मणि ।
आदित्याभिमुखो जप्याद् यावत्तावच्च तर्पयेत् ॥ ५०
अर्चयेद्विधिनाऽनेन दिनशो जुहुयात्त्रिशः ।
एवं करोति षण्मासं योऽसौ स्यादिन्दिरापतिः ॥ ५१
उद्बुद्धमात्रे नलिने नवनीतं विनिक्षिपेत् ।
सकर्णिके सकिञ्जल्कोदरे पत्रान्तरालये ॥ ५२
पुनस्तत् पद्ममुद्धृत्य सुसमिद्धे विभावसौ ।
जुहुयादन्वयाऽथर्चा शतमष्टोत्तरं जपन् ।

अष्टोत्तरशतं मन्त्रीति । सूक्तानां सप्तवारजपान्तेऽन्त्यस्य सूक्तस्य चिरावृत्तिर्विवक्षिता । मन्त्रीति । प्राकरणिकमन्त्रैः सकृत् सकृत् प्रथमतो होमश्च सूचितः ॥ ४६ ॥ ४७ ॥

व्यस्तैः समस्तैरित्यत्र व्यस्तैश्चतुर्दशभिः निवेद्यान्तं दत्त्वा श्रीबीजेन चतुर्दशेनैव वा गण्डूषोपचारादिकं समर्प्य समस्तेन सूक्तेन प्रदक्षिणस्तुतिनमस्कारान् विधाय शेषं श्रीबीजेन कृत्वा अन्त्ये चोद्वासयेदित्यर्थः । पद्महोमेऽष्टोत्तरशतजपः ।

चत्वारिंशच्छुक्रवारैर्महाश्रीस्तस्य जायते ॥ ५३
कांसोऽस्मीत्यनया सम्यगेकादश घृताहुतीः ।
षण्मासं जुह्वतो नित्यं भूयात् प्रायो महेन्दिरा ॥ ५४
सूक्तैरेतैर्जपतु जुहुयादर्चयीताऽवगाहेत्
सिञ्चेद्वक्त्रे दिनमनु तथा संयतस्तर्पयीत ।
संशुद्धात्मा विविधधनधान्याकुलाभ्यन्तरोऽसौ
मन्त्री सर्वैर्भुवि बहुमतः श्रीमतां स्यात् पुरोगः ॥ ५५
श्रीर्लक्ष्मीर्वरदा विष्णुपत्नी च सवसुप्रदा ।
हिरण्यरूपा सस्वर्णमालिनी रजतस्रजा ॥ ५६
समुवर्णगृहा[प्रभा] स्वर्णप्राकारा पद्मवासिनी ।
पद्महस्ता पद्मपूर्वप्रिया मुक्तापदादिका ॥ ५७
अलङ्कारा तथा सूर्या चन्द्रा बिल्वप्रियेश्वरी ।
भुक्तिः प्रपूर्वा मुक्तिश्च विभूत्यृद्धिसमृद्धयः ॥ ५८
तुष्टिः पुष्टिश्च धनदा तथाऽन्या तु धनेश्वरी ।
शु[श्र]द्धा सम्भोगिनी भोगदात्री धात्रविधात्रके ॥ ५९
द्वात्रिंशदेताः श्रीदेव्या ये मन्त्राः समुदीरिताः ।
तारादिका नमोऽन्ताश्च तैरर्चासु बलिं हरेत् ।
तर्पयेच्च महादेवीं दिनादौ मन्त्रवित्तमः ॥ ६०

नाभ्यक्तोऽद्यान्न नग्नः सलिलमवतरेन्न स्वपेद्वाऽशुचिः स-
न्नाऽभ्यञ्जग्रान्नैव चाऽद्यात्तिलरुहलवणे केवलेनैव दोषाम् ।
वक्त्रे लिम्पेद्वदेन्नाऽनृतमपि मलिनः स्यान्न बिल्वाम्बुजन्म-
द्रोणान्नो धारयेत् के भुवमपि न वृथैवाऽऽलिखेदिन्दिरार्थी ॥ ६१

पूर्ववत् सर्वाणि वा सूक्तान्यष्टोत्तरशतं जप्यानि ॥ ४८—५३ ॥

सम्यगेकादशेति । प्रणव व्याहृति प्राकरणिक मन्त्राद्यन्तत्वं मन्त्रस्योक्तम् ॥५४॥

मन्त्री सर्वैरिति । ऋचः श्रीबीजपुटितत्वं होमतर्पणादौ स्वाहा तर्पयाम्यन्तत्वं चोक्तम् ॥ ५५॥५६॥५७॥५८॥५९ ॥

दिनादौ मन्त्रवित्तम इति । प्राकरणिकमन्त्राणामेकं साङ्गं जानन्नित्यर्थः ।

सुविमलचरितः स्याच्छुद्धमाल्यानुलेपा-
भरणवसनदेहो मुख्यगन्धोत्तमाङ्गः ।
सुविशदनखदन्तः शुद्धधीर्विष्णुभक्तो
विमलरुचिरशय्यः स्याच्चिरायेन्दिरार्थी ॥ ६२

दुष्टां कष्टान्ववायां कलहकलुषितां मार्गदुष्टामनिष्टा-
मन्यासक्तामसक्तामतिविपुलकृशाङ्गीमतिह्रस्वदीर्घाम् ।
रोगार्तां भोगलोलां प्रतिपुरुषचलां राजकान्तामकान्तां
काकाक्षीमेकचारां ग[य]हकुसुमयुतां न स्पृशेदिन्दिरार्थी ॥ ६

शान्तः शश्वत्स्मितमधुरपूर्वाभिभाषी दयार्द्रो
देवाचार्यातिथिदहनपूजारतः पुण्यशीलः ।
नित्यस्नायी नियमनिरतः प्रत्यगाशामुखाशी
मन्त्री वर्णाश्रमदृढरतिः स्याच्चिरायेन्दिरार्थी ॥ ६४

श्रीमन्त्रभक्तः श्रितविष्णुदीक्षः श्रीसूक्तजापी सितधीः सुशीलः ।
स्वदारतुष्टो मितभाषणाशी लोकप्रियः स्याच्चिरमिन्दिरार्थी ॥ ६५

इति श्रीप्रपञ्चसारे द्वादशः पटलः ।

॥ ६०॥६१॥६२॥६३॥६४॥६५ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
द्वादशः पटलः ।

त्रयोदशः पटलः ।

अथ रमाभुवनेशिमनोभवैस्त्रिपुटसंज्ञकमन्त्रमुदीरितम् ।
सकलवर्गफलाप्तियशस्करं जगति रञ्जनदं कविताकरम् ॥ १
बीजैस्त्रिभिर्द्विरुक्तैः कुर्यादङ्गानि साधकः सिद्ध्यै ।
पूर्वतरेरितयोर्वा द्वयोरप्येकं तदङ्गयोः प्रभजेत् ॥ २
नवकनकभासुरोर्वीविरचितमणिकुट्टिमे सकल्पतरौ ।
रत्नवरवज्रसिंहासननिहितसरोरुहे समासीनाम् ॥ ३
आबद्धरत्नमुकुटां मणिकुण्डलोद्यत्-
केयूरकोर्मिरसनाह्वयनूपुराढ्याम् ।
ध्यायेद्धृताब्जयुगपाशवराङ्कुशेक्षु-
चापां सपुष्पविशिखां नवहेमवर्णाम् ॥ ४
चामरमुकुरसमुद्गकताम्बूलकरङ्कवाहिनीभिश्च ।
दूतीभिः समभिवृतां पश्यन्तीं साधकं प्रसन्नदृशा ॥ ५
लोकेश्वरीमिति विचिन्त्य जपेच्च मन्त्र-
मादित्यलक्षमथ मन्त्रितमो जपान्ते ।

क्रियाशक्तिप्रधानानामेव केषाञ्चिन्मन्त्राणां विधिं वक्तुमारभते—अथ रमेति । तत्र प्रथमं भुवनेशीपटले प्रस्तुतायास्त्रिपुटाया विधानमुच्यते । विनियोगमाह—सकलेति । रमादित्वे सकलवर्गफलाप्तिः । शक्त्यादित्वे यशस्करम् । कामादित्वे रञ्जनदम् । वाग्भवयोगे कविताकरमिति द्रष्टव्यम् ॥ १ ॥

अङ्गानि साधक इति । त्रिबीजसंयुतैः सामान्यपटलोक्तन्यासैरात्मानं देवतारूपत्वेन साधयतीति साधकः इति न्यासाः सूचिताः । मन्त्रविशेषाणामङ्गविशेषं सूचयति—पूर्वतरेति । पूर्वतरवक्ष्यमाणकामबीजाङ्गानामेकं वा कुर्यादित्यर्थः । यद्बीजादिको मन्त्रस्तस्याऽङ्गानि कुर्यादिति भावः । संमोहन ऋषिः । गायत्री छन्दः । त्रिपुटादेवी देवता । श्रीं बीजं क्लीं वा । ह्रीं शक्तिः । मूलेन सह पीठमूर्तिपूजा । घृणिनी सूर्याऽऽदित्या प्रभावती इत्येता दूत्यः ॥ २ ॥

मन्त्रितमो जपान्त इति । श्रीवृक्षसमिदादिहोमेषु मन्त्रस्य श्रीबीजाद्यादित्व-

श्रीराजवृक्षसमिधां सजवार्त्तवानां
तावत् सहस्रसमितं मधुरैर्जुहोतु ॥ ६
अङ्गैर्लक्ष्मीहरिगिरिसुताशर्वरत्यङ्गजातैः
षट्कोणस्थैर्निधियुगयुतैस्तद्बहिर्मातृभिश्च ।
योषिद्रूपैर्बहिरपि यजेल्लोकपालैस्तदेतत्
प्रोक्तं देव्या अपि सुरगणैः पूजनीयं विधानम् ॥ ७
लक्ष्मीगौरीमनसिशयबीजानि कृत्वा कलायां
तां वा बिन्दौ तमपि गगने तच्च सिन्दूरवर्णम् ।
स्मृत्वा बुद्ध्वा भुवनमखिलं तन्मयत्वेन मन्त्री
देवान् वश्यानपि वितनुते किं पुनर्मर्त्यजातीन् ॥ ८
य इमं भजते मनुं मनस्वी विधिना वा पुनरर्चयेद्विधानम् ।
स तु सम्यगवाप्य दृष्टभोगान् परतस्तत्परमेशमेति धाम ॥ ९
सहृदयभगवत्यै दान्तरण्यैधराणाः
सणिधरशिवधार्णारेद्विठान्ता ध्रुवाद्याः ।
गदितमिति धराया मन्त्रमुत्कृष्टधात्री-
सुखसुतधनधान्यप्राप्तिदं कीर्त्तिदञ्च ॥ १०
ऋषिरपि वराह उक्तश्छन्दो निवृदस्य देवता धरणी ।
मनुनाऽमुनैव च पदैः षोढ़ाभिन्नेन निगदितोऽङ्गविधिः ॥ ११

सुक्तम् । [योगेश्वरीमिति वा पाठः] ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

योगमाह—लक्ष्मीगौरीति । कला ईकारः सर्वबीजानुगतः त्रिशक्त्यात्मा । तां वा बिन्दाविति । तां च कलां निविड़तेजोबिन्दौ कृत्वा तं बिन्दुं गगने नादे प्रभारूपे । तच्च गगनं सिन्दूरवर्णं शक्तितत्त्वं स्मृत्वेत्यर्थः । मन्त्रीति । एवं मन्त्रवीर्यात्मतां प्राप्त इत्यर्थः । अथवाऽमुकं वशयेति क्रमोत्क्रममन्त्रमध्ये योजयेदिति मन्त्रीशब्दार्थः ॥ ८ ॥ ९ ॥

क्रियाशक्तिप्रधानायाः श्रियः श्रीबीजप्रधानायाः त्रिपुटायाश्च विधानमभिधाय इच्छाशक्तिप्रधानाया भुवो मन्त्रमाह—सहृदयेति । विनियोगमाह—उत्कृष्टेति । ग्लौं भूबीजयोगे धात्रीदम् । प्रणवयोगे परमसुखदम् । कामयोगे सुतदम् । श्रीबीजयोगे धनधान्यदम् । क्लींयोगे कीर्तिदमित्यर्थः । षोढ़ाभिन्नेनेति । त्रिचतुस्त्रि-

मुख्याम्भोजे निविष्टारुणचरणतला श्यामलाङ्गी मनोज्ञा
चञ्चच्छाल्यग्रचुम्बच्छुकलसितकरा प्राप्तनीलोत्पला च ।
रत्नाकल्पाभिरामा मणिमयमुकुटा चित्रवस्त्रा प्रसन्ना
दिश्याद्विश्वम्भरा वः सततमभिमतं वल्लभा कैटभारेः ॥ १२

लक्षायता च सदशांशहुतावसाना
प्रोक्ता धराहृदयमन्त्रजपक्रिया स्यात् ।
सर्पिष्मता सुविमलेन पयोऽम्बुसाऽस्य
होमे विधिः सकलसिद्धिकरः किलाऽयम् ॥ १३

पीठे विष्णोः पूजयेत् पूर्वमङ्गैर्भूवह्न्यम्बुप्राणसंज्ञैश्च भूतैः ।
शान्त्यन्ताभिः शक्तिभिः साकमाशापालैः पृथ्वीं संयतात्मोपचारैः ॥
पुष्पैः प्रियङ्गोर्मधुरत्रयाक्तैर्नीलोत्पलैर्वाऽपि तथाऽरुणैस्तैः ।
सहस्रमानं प्रतिजुह्वतः स्याद्गौर्गीमती शस्यकुलाकुला च ॥ १५
पिञ्जरां पृथुलशालिमञ्जरीं यो जुहोति मधुरत्रयोक्षिताम् ।
नित्यशः शतमथाऽस्य मण्डलाद्वस्तगा भवति विस्तृता मही ॥ १६

भृगोस्तु वारे निजसाध्यभूमृद्विलोड़िताम्भःपरिपक्वमन्थः ।
पयोघृताक्तं जुहुयात् सहस्रं दुग्धेन वाऽन्नेन दिनावतारे ॥ १७

षण्मासादनुभृगुवारमेष होमः
सम्पन्नान् समुपनयेद्वराग्रदेशान् ।
पुत्रान् वा पशुमहिषेष्टजुष्टपुष्टा-
मिष्टामप्यनुदिनमिन्दिरां समग्राम् ॥ १८

संक्षेपतो हृदयमन्त्रविधिर्धरायाः
प्रोक्तो हिताय जगतां रहितक्षमाणाम् ।

पञ्चद्विद्विवर्णैः षोढ़ाभिन्नेनेत्यर्थः । ग्लौं बीजम् । स्वाहा शक्तिः । न्यासास्तु ग्लौंबीजेन सह सामान्यपटलोक्ताः कर्तव्याः ॥ १० ॥ ११ ॥

रत्नाम्भोजं मुख्याम्भोजम् । ग्लौं पृथिवीमूर्तये नमः इति मूर्तिमन्त्रः ॥ १२ ॥ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

भृगोस्तु वार इति । प्रयोगो वराहपटलोक्तक्रमेण द्रष्टव्यः । तद्बीजयुतश्च । ॥ १७ ॥ १८ ॥ १९ ॥

एनं भजन्निति धराकमलासमृद्धः
स्यादत्र सिद्धिमपरत्र परां प्रयाति ॥ १९

अथ पुरुषार्थचतुष्टयसिद्धिकरी मन्त्रजापनिरतानाम् ।
त्वरिताख्येयं विद्या निगद्यते जपहुतार्चनविधिभिः ॥ २०
भक्तियुतानां त्वरया सिद्धिकरी चेति मन्त्रिणां सततम् ।
देव्यास्त्वरिताख्या स्यात्त्वरितं च्छेलग्रहादिहरणतया ॥ २१
वर्मदृर्ध्वे च तदन्त्यः शिवयुक् चरमाङ्गनाद्युसार्धिलवम् ।
अन्त्यः सयोनिरस्त्रान्तिकः सतारो मनुर्दशार्णयुतः ॥ २२
तारान्तेऽस्त्रादावपि मायाबीजं प्रयोजयेन्मन्त्री ।
तेन हि काङ्क्षितसिद्धिर्भूयादचिरेण मन्त्रविदाम् ॥ २३
कूर्मादिभ्यां द्वाभ्यां द्वाभ्यामपि पूर्वपूर्वहीनाभ्याम् ।
कुर्यात् सप्तभिरर्णैरङ्गानि च षट् क्रमेण मन्त्रज्ञः ॥ २४
कालिकगलहृन्नाभिकगुह्योरुषु जानुजङ्घयोः पदयोः ।
देहन्यासं कुर्यान्मन्त्रेण व्यापकं समस्तेन ॥ २५

पुनरपि क्रियाशक्तिप्रधानायास्त्वरिताया विधानं वक्तुमारभते—अथेति । विनियोगमाह—पुरुषार्थेति । वक्ष्यमाणशक्तियोगवत् प्रणवयोगे मुक्तिकरी तद्वत् कामयोगे कामकरी श्रीयोगेऽर्थकरी वाग्योगे धर्मज्ञानकरी शक्तियोगे सर्वकरीति विभागः ॥ २० ॥

मन्त्रिणां सततमिति । किङ्करमन्त्रजपः सूचितः । प्रणवशक्तिनमोऽन्ते चतुर्थ्या भगवच्छ्वरमहाकिरातरूपकङ्कालधरपदान्ते कवचास्त्रठद्वययुक्तः किरातमन्त्रः ॥ २१ ॥

वर्म हुं । ऋद्धिः खं । ए ए एव । च इति च एव । तदन्त्यश्छकारः । शिव एकारः । चरमः चकारः । अङ्गना स्त्री । सार्धिलवोद्युः हूं । मायाबीजं प्रयोजयेन्मन्त्रीति । कुण्डलिनीबीजरूपमायाप्रयोग उक्तः । क्लीमिति कुण्डलिनीबीजम् । मन्त्रविदामित्यस्त्रादौ क्लीमिति मायाबीजप्रयोग उक्तः ॥ २२ ॥ २३ ॥

मन्त्रज्ञ इत्यङ्गेषु मायादीर्घयोग उक्तः । उपरितनमायां विना सप्तभिरक्षरैरङ्गमन्त्रज्ञ इति चार्थः । अथवा सर्वज्ञादियोगः सूचितः । अत्र शक्तिबीजेन सार्धं सामान्यपटलोक्ता न्यासाः कर्तव्याः । अर्जुनविराट्त्वरिता ऋष्यादयः । हुं बीजम् । क्लीं शक्तिः ॥ २४ ॥ २५ ॥

श्यामलतनुमरुणपङ्कजचरणतलां वृषलनागमञ्जीराम् ।
पर्णांशुकपरिधानां वैश्याहिद्वन्द्वमेखलाकलिताम् ॥ २६
तनुमध्यनतां पृथुलस्तनयुगलां करविराजदभयवराम् ।
शिखिपिच्छनालवलयां गुञ्जाफलगुणितभूषितारुणिताम् ॥ २७
नृपफणिकृतकेयूरां तां गलविलसद्विविधमणियुताभरणाम् ।
द्विजनागविहितकुण्डलमण्डितगण्डद्वयीमुकुरशोभाम् ॥ २८
शोणतराधरपल्लवविद्रुममणिभासुरां प्रसन्नाञ्च ।
पूर्णशशिबिम्बवदनामरुणायतलोचनत्रयीनलिनाम् ॥ २९
कुञ्चितकुन्तलविलसन्मुकुटाघटिताहिवैरिपिञ्छयुताम् ।
कैरातीं वनकुसुमोज्ज्वलां मयूरातपत्रकेतनिकाम् ॥ ३०
सुरुचिरसिंहासनगां विभ्रमसमुदायमन्दिरां तरुणीम् ।
तामेनां त्वरिताख्यां ध्यात्वा कुर्याज्जपार्चनाहोमान् ॥ ३१
दीक्षां प्राप्य गुरोरथ लक्षं जप्याद्दशांशकं जुहुयात् ।
बिल्वसमिद्भिस्त्रिमधुरसिक्ताभिः साधकः सुसंयतधीः ॥ ३२
अष्टहरिविधृतसिंहासने समावाह्य सरसिजे देवीम् ।
अङ्गैः सह प्रणीतां गायत्रीं पूजयेद्दिशां क्रमतः ॥ ३३
हुङ्काराख्या खेचरिचण्डे सच्छेदनी तथा क्षपणी ।
भूयः स्त्रियाह्वयाङ्कारीसक्षेमकारिकाः पूज्याः ॥ ३४
सश्रीबीजा लोकेशायुधभूषान्विता दलाग्रेषु ।
फट्कारी चाप्यग्रे शरा सशरधारिणी च तद्बाह्ये ॥ ३५
सस्वर्णवेत्रयष्ट्यौ द्वाःस्थे पूज्ये पुनर्जयाविजये ।
कृष्णो वर्वरकेशो लगुडधरः किङ्करश्च तत्पुरतः ॥ ३६
अरुणैश्चन्दनकुसुमैर्वनजैरपि धूपदीपनैवेद्यैः ।
प्रवरैश्च नृत्यगीतैः समर्चयेद्भक्तिभरावनम्रतनुः ॥ ३७

कर्कोटकपद्मौ शूद्रौ । तक्षकमहापद्मौ वैश्यौ । वासुकिशङ्खपालौ नृपौ । अनन्तकुलिकौ ब्राह्मणौ । शाक्ते पीठे पूजा । दीर्घपटलोक्त आसनमन्त्रः । मूलेन मूर्तिपूजा ॥ २६—३७ ॥

जपहुतपूजाभेदैरिति सिद्धे मन्त्रजापिनो मन्त्रे ।
नारीनरनरपतयः कुर्वन्ति सदा नमस्क्रियामस्मै ॥ ३८
विद्याधर्यो यक्ष्यः ससुरासुरसिद्धचारणप्रमदाः ।
अप्सरसश्च विशिष्टाः साधकसक्तेन चेतसाकुलिताः ॥ ३९
स्मरशरविह्वलिताङ्ग्यो रोमाञ्चितगात्रवल्लरीललिताः ।
घनघर्मबिन्दुमौक्तिकविलसत्कुचगण्डमण्डलद्युतयः ॥ ४०
विष्पष्टजघनवक्षोरुहदोर्मूलाः प्रस्खलत्पदन्यासाः ।
मुकुलितनयनसरोजाः प्रस्यन्दितदशनवसनसंभिन्नाः ॥ ४१
श्लथमानांशुकचिकुरा मदविवशस्खलितमन्दभाषिण्यः ।
मृदुतरमस्तकविरचितनत्यञ्चलयः प्रसादकाङ्क्षिण्यः ॥ ४२
ईक्षस्व देहि वाचं परिरम्भणपरमसौख्यमस्माकम् ।
एहि सुरोद्यानादिषु रंस्यामः स्वेच्छया निरातङ्कम् ॥ ४३
इत्यादिवादि[णि]नीभिः प्रलोभ्यमानो यदा न विक्रियते ।
मन्त्री तदैव वाञ्छितमखिलं तस्मै ददाति सा देवी ॥ ४४
योनिं कुण्डस्यान्तः प्रकल्प्य तत्राऽनलं समाधाय ।
संपूज्य पूर्वविधिना जुहुयात् सर्वार्थसिद्धये मन्त्री ॥ ४५
इक्षुशकलैः समृद्ध्यै दूर्वाभिस्त्वायुषे श्रिये धान्यैः ।
धान्याय यवैः पुष्ट्यै गोधूमैर्ऋद्धये तिलैर्जुहुयात् ॥ ४६
जम्बूभिः स्वर्णाप्त्यै राजीभिः शत्रुशान्तये तथाऽक्षतकैः ।
अक्षयसिद्ध्यै वकुलैः कीर्त्यै कुमुदैर्महोदयाय तथा ॥ ४७
अरुणोत्पलैश्च पुष्ट्यै मधूकजैरिष्टसिद्धयेऽशोकैः ।
पुत्राप्त्यै पाटलजैः स्त्रीसिद्ध्यै निम्बजैश्च विद्विष्ट्यै ॥ ४८
तुष्ट्यै नीलोत्पलकैः सचम्पकैः कनकसिद्धये पद्मैः ।
सहकिंशुकैश्च सर्वोपद्रवशान्त्यै स साधको जुहुयात् ॥ ४९

मन्त्रजापिन इति । ओं ह्रीं नमो नित्ये स्वाहेति त्वरितामन्त्रस्य दशाङ्ग उक्तः । मन्त्री तदेत्येति चोभनिवृत्त्यर्थं पञ्चाक्षरस्य किङ्करस्य च जपः सूचितः ॥ ३८—४४॥

योनिं कुण्डस्येति । योनिकुण्डं विरच्येत्यर्थः । सर्वार्थसिद्धये मन्त्रीति । तत्तत्-प्रयोगानुरूपबीजयोगः किङ्करपञ्चाक्षराभ्यां होमश्चोक्तः ॥ ४५॥४६॥४७।४८॥४९ ॥

हुतसंख्या साहस्रो त्रियुता वाथाऽयुतान्तिकी भवति ।
यावत्संख्यो होमस्तावज्जप्यश्च मन्त्रिणा मन्त्रः ॥ ५०
मनुमन्त्रितैश्च वारिभिरासेकः क्ष्वेलशान्तिकृद्भवति ।
तज्जप्तयष्टिघातो मन्त्रितचुलुकोदकाहृतिश्च तथा ॥ ५१
तत्कर्णरन्ध्रजापात् सद्यो नश्युर्विषग्रहादिरुजः ।
तद्यन्त्रस्थापनमपि विषभूतादिप्रशान्तिकृत् प्रोक्तम् ॥ ५२
आख्यां मध्ये सतारे मनुमथ शतसंयुक्तविंशत्पुटेषु
प्रादक्षिण्येन शर्वादिकमनुविलिखेद् द्वादशावृत्ति मन्त्री ।
विंशद्वन्द्वाष्टशूलाकलितविरचितं यन्त्रमेतत् सुजप्तं
वह्नं क्ष्वेलग्रहार्त्तिं हरति विजयलक्ष्मीप्रदं कीर्त्तिदञ्च ॥ ५३
आख्यां मध्यगतानले लिखतु दिक्पंक्तिष्वथ स्युः सङ्कूं
चं चं छं करणादिषष्टिपदके शैवादि कालीमनुम् ।
नैर्ऋत्यादि तथा क्रमाद्यमवृतं बाह्येऽनलेनावृतं
प्रोक्तं निग्रहचक्रमन्तकपुरप्राप्तिप्रदं वैरिणाम् ॥ ५४
कालीमाररमालीका लीनमोक्षक्षमोनली ।
मामोदेततदेमोमा रक्षतक्ष्वक्ष्वतक्षर ॥ ५५
यमापाटटपामाय माटमोटटमोटमा ।
पामोभूरिरिभूमोपा टटरीस्वस्वरीटट ॥ ५६
वह्नेर्विण्निम्बनिर्यासकविषमसिभिः सीसपट्टेऽंशुके वा
शावे पाषाणके वा विलिखतु मतिमान् काकपक्षेण यन्त्रम् ।

मन्त्रिणा मन्त्र इत्यनुजपेऽपि तदेवोक्तम् ॥ ५० ॥ ५१ ॥ ५२ ॥

आख्यां मध्य इति । द्वादशरेखात्मकं यन्त्रम् । साधकसाध्यकर्मणामाख्या आख्याशब्दार्थः । त्वरिते अमुकस्याऽमुकं वशयेत्याद्या आख्या । द्वादशावृत्ति मन्त्रीति । क्ष्वेलहरणे गरुडबीजाक्षराणि लिखेत् । ग्रहार्तिहरणे नारसिंहे विजये दीर्घे लक्ष्म्यां श्रीबीजे कान्तौ कामे सर्वार्थे शक्तौ ॥ ५३ ॥

आख्यां मध्यगतानल इति । दशरेखायन्त्रम् । अनललेखनं सर्वपङ्क्तिषु समानम् ॥ ५४ ॥ ५५ ॥ ५६ ॥

वह्नेर्विडङ्गारः शावः । सूरण चित्रक लोण पिण्डोन्मत्त त्रिकटुक गृहधूमा विषाः ।

वल्मीके चत्वरे वाऽक्षतरुविवरे वा निदध्यादराति-
र्मृत्युं प्राप्नोति भूयादवयवविकलो व्याधितः पातितो वा ॥ ५७
चक्रे चाऽष्टाष्टपदे कालीशिवयातुधानखण्डाद्यम् ।
यमदहनानिलवीतं विलिख्य विषदण्डिमर्कटीलिप्तम् ॥ ५८
जप्तमधोमुखमेतद् यन्त्रं यत्र तु देशे विनिक्षिपेन्मन्त्री ।
तत्रोपद्रवमखिलं दिनशः सर्वात्मना भवति ॥ ५९

खण्डेष्वेकाशीतिषु मध्येन्दुगसाध्यं
जूंसः पूर्वं दिक्स्थचतुःपङ्क्तिषु शैखम् ।
लिख्याल्लक्ष्मीं शिष्टचतुःषष्टिषु विद्वा-
नीशाद्यं कन्यादि च बाह्ये त्वरिताख्याम् ॥ ६०
दिग्दिक्संस्थामस्त्रपदाविर्वषड्न्तां
मेदोमालावेष्टितबिम्बं घटवीतम् ।
पद्मस्थं तत्पङ्कजराजद्वदनान्तं
प्रोक्तं चक्रं सम्यगथाऽनुग्रहसंज्ञम् ॥ ६१

तैर्नरादितैलेन शूलारूढशवपटवर्त्या मसिः कार्या । सीसोऽपि देवताजातिहस्तगतो ग्राह्यः । शावांशुकः शूलारूढस्य ग्राह्यः । पाषाणो रजकपाषाणः । मतिमानिति । देशकालादिश्च इत्यर्थः । अर्धरात्रिसन्ध्यादयः कालाः । देशः शावाङ्गणादिः । वल्मीकेऽवयववैकल्यं भवति । चत्वरे व्याधिः । अक्षतरुविवरे मरणमिति भेदाः ॥ ५७ ॥

चक्रे चेति । नवरेखायन्त्रम् । दण्डी ब्रह्मदण्डी । विनिक्षिपेत् मन्त्रीति । मन्त्राक्षरशक्तीनां काकोलूकपाषाणाङ्गारद्वयात्मना ध्यानं सूचितम् ॥ ५८ ॥ ५९ ॥

खण्डेष्वेकाशीतिष्विति । दशरेखायन्त्रमनुग्रहाख्यम् । इन्दुः ठकारवकारौ सर्वखण्डेषु च समानावेतौ । जूंसः पूर्वं दिक्स्थचतुःपङ्क्तिषु शैखमिति । मध्यसन्निहितदिक्पङ्क्तिषु जूं तदन्तरासु सः ततो वं ततो षडित्येकः प्रकारः । सर्वं सर्वत्रेत्यपरः । शैखं शिखासम्बन्धि वषडित्यर्थः । विद्वानिति । अक्षराणां श्रीबीजमध्यस्थत्वमुक्तम् ॥ ६० ॥

अस्त्रपदाविर्वषड्न्तामिति । फडिति परित्यज्य तत्र वषडन्वितामित्यर्थः । मेदोवेष्टितबिम्बमिति । मेदसा वेष्टितं बिम्बं यस्य स तथोक्तः । यन्त्रस्य बहिश्चन्द्रबिम्बं लिखित्वा तद्गतमेदोभिः वकारैः वेष्टयेदित्यर्थः ॥ ६१ ॥

श्री सा माया यामा सा श्री सा नो याञ्चे ज्ञेया नो सा ।
माया लीला लाली यामा याञ्चे लाली लीला ज्ञेया ॥ ६२
लाक्षाभिः कुङ्कुमैर्वा विलिखतु धवले चांऽशुके स्वर्णपट्टे
लेखन्या स्वर्णमय्या दृढ़मपि गुलिकीकृत्य सम्धारयेद् यः ।
कृत्यातो मृत्युतो वा ग्रहविषदुरितेभ्योऽपि मुक्तः स धन्यो
जीवेत् स्वैः पुत्रपौत्रैरपरिमितमहासम्पदा दीर्घकालम् ॥ ६३
चतुःषष्ठ्यंशे वा क्रमविदथ लक्ष्मीमनुममुं
शिवाद्यं नैर्ऋत्यादिकमपि च तूर्णामृतवृतम् ।
बहिः स्वच्छे पट्टे कनकविहिते पूर्वविधिना
लिखित्वा जप्त्वा निक्षिपतु शितधीर्यत्र तदिदम् ॥ ६४
चक्रमनुग्रहसंज्ञं मन्त्री देशेऽत्र सम्पदोऽविरतम् ।
शुभतरफलदायिन्यो भवन्ति शस्यर्द्धिकालवृष्ट्याद्याः ॥ ६५
हुङ्कारे साध्यसंज्ञां विलिखतु तदधः कर्णिकायाञ्च शिष्टा-
नष्टौ वर्णान् दलेष्वारचयतु हरमायां विशो वेष्टयीत ।
कुम्भस्थं यन्त्रमेतत् सरसिजपुटितं सर्वरक्षाप्रसिद्ध्यै
कृष्णं रक्षोपसर्गप्रशमनफलदं श्रीकरं वश्यकारि ॥ ६६
इति निगदितकृष्णा पूजयेत्तोतलाया
मनुमनुदिनमेनमानयेन्मानवो यः ।
स तु जगति समग्रां सम्पदं प्राप्य देहा-
पदि मुदिततरात्मा युक्तधीर्मुक्तिमेति ॥ ६७

चतुःषष्ठ्यंश इति । नवरेखायन्त्रम् । क्रमविदिति । अमृतबीजयोः श्रीबीजस्य च लेखने प्रोक्तक्रमविदित्यर्थः । तूर्णा त्वरिता । अमृतं ठवौ ताभ्यां बहिर्वृतमित्यर्थः । शितधीरिति । मन्त्राक्षरशक्तीनामक्षतरत्नपुष्पादिवृष्टितया ध्यानमुक्तम् ॥ ६२ ॥ ६३ ॥ ६४ ॥

मन्त्रीति । वषड़न्तत्वमुक्तम् ॥ ६५ ॥

कुम्भस्थयन्त्रमाह—हुंकार इति । तारे शक्तौ हुंकारो लेख्यः । पद्मबाह्ये वृत्तेषु हकाररेफमायावेष्टनं रक्षोपसर्गप्रशमनयोस्तारं दुर्गाबीजेन वेष्टयेत् । श्रीवेष्टितं श्रीकरम् । शक्तिवेष्टितं वश्यकारि ॥ ६६ ॥ ६७ ॥

स्मरदीर्घेऽधरकाग्न्यौ दीर्घे त्यच्चेलदद्रलान्त्यशिवाः ।
अभितः शक्तिनिरुद्धो द्वादशवर्णोऽयमीरितो मन्त्रः ॥ ६८
द्वाभ्यां वा चैकेन द्वाभ्यां द्वाभ्यां तथा पुनर्द्वाभ्याम् ।
मन्त्राक्षरैर्विदध्यादङ्गविधिं जातिसंयुतैर्मन्त्री ॥ ६९
इन्दुकलाकलितोज्ज्वलमौलिर्मारमदाकुलिताऽयुगनेत्रा ।
शोणितसिन्धुतरङ्गितपोतद्योतितभानुदलाम्बुजसंस्था ॥ ७०
दोर्धृतदाडिमसायकपाशा साङ्कुशचापकपालसमेता ।
शोणदुकूलविलेपनमाल्या शोणतरा भवतोऽवतु देवी ॥ ७१
स्मृत्वा नित्यां देवीमेवं प्रजपेन्मनुं शतसहस्रम् ।
अयुतं जुहुयादन्ते नृपतरुसमिधा घृतेन वा सिद्ध्यै ॥ ७२
शक्तिपीठे पूज्या देवी कुसुमानुलेपनैररुणैः ।
स्वयमप्यलङ्कृताङ्गः सधूपदीपैर्निवेद्यताम्बूलैः ॥ ७३
हृल्लेखा क्लेदिनी नन्दा क्षोभणी मदनातुरा ।
निरञ्जना रागवती क्लिन्ना च मदनावती ॥ ७४
मेखला द्राविणी चैव तथाऽन्या वेगवत्यपि ।
सस्मरा द्वादश प्रोक्ताः शक्तयः पत्रसंस्थिताः ॥ ७५
अङ्गैः शक्तिभिराभिर्मातृभिराशाधिपैः क्रमात् पूज्याः ।
भक्तिभरानतवपुषा भवभयभङ्गाय मन्त्रिणाऽहरहः ॥ ७६

स्मरं कामबीजम् । दीर्घा नकारः । दीर्घा च एकारश्च दीर्घैकारः । ततश्च क्लिन्ने इति सिद्धं भवति । अधर ऐकारः । को बिन्दुः ककारश्च । अग्नी रेफः । ओमिति स्वरूपम् । अतः ऐं क्रोमिति सिद्धं भवति । दीर्घा च इश्च दीर्घे । त्य इति स्वरूपम् । ततश्च नित्य इति सिद्धम् । च्चेलो मकारः । दद्रेति स्वरूपग्रहणम् । लान्त्यो वकारः । शिव एकारः । ततश्च मदद्रवे इति सिद्धम् ॥ ६८ ॥

मन्त्रीति । क्षामादियोग उक्तोऽङ्गेषु । अङ्गिरात्रिष्टुब्वज्रप्रस्तारिण्य ऋष्याद्याः । क्लीं बीजम् । ऐं शक्तिः । न्यासः सामान्यपटलोक्तः ॥ ६८॥७० ॥ ॥ ७१॥७२॥७३॥७४॥७५ ॥

मन्त्रिणेति । प्रणवादित्वमुक्तम् । दारिद्र्यास्यर्थे श्रीयोगः । रोगास्यर्थे

दारिद्र्यरोगदुःखैर्दौर्भाग्यजरापमृत्युदोषैश्च ।
अस्पृष्टो निरपायो जीवति मन्त्री भजन्निमं मनुजः ॥ ७७
इतीरिता लोकहिताय वज्रप्रस्तारिणी मन्दिरमिन्दिरायाः ।
या सर्वनारीनरराजवर्गसम्मोहिनी मोहनबाणभूता ॥ ७८
निद्रयोरन्तरा त्यक्तिन्नेमदाः स्युश्च वै शिरः ।
मायादिकस्तथा वर्णद्वन्द्वैश्चाऽङ्गविधिः स्मृतः ॥ ७९
रक्ता रक्तांशुककुसुमविलेपादिका सेन्दुमौलिः
स्विद्यद्वक्त्रा मदविवशसमाघूर्णितत्रीक्षणा च ।
दोर्भिः पाशाङ्कुशयुतकपालाभया पद्मसंस्था
देवी पायादभिमतफलदा नित्यशः पार्वती वः ॥ ८०
दीक्षितः प्रजपेल्लक्षं मनुमेनं हुनेत्ततः ।
मधूकपुष्पैः स्वाद्वक्तैरयुतं हविषाऽथवा ॥ ८१
पीठं पूर्ववदभ्यर्च्य तत्रावाह्याऽभिपूजयेत् ।
अङ्गैश्च शक्तिभिर्लोकपालैर्देवीं समाहितः ॥ ८२
नित्या निरञ्जना क्लिन्ना क्लेदिनी मदनातुरा ।
मदद्रवा द्राविणी च द्रविणा शक्तयो मताः ॥ ८३
प्रजपेत् प्रमदां विचिन्त्य यां वा
शयनस्थो मनुवित् सहस्रमानम् ।
निशि मारशिलीमुखाहताङ्गी
न चिरात् सा मदविह्वला समेति ॥ ८४
नित्याभिः सदृशतरा न सन्ति लोके
लक्ष्मीदा जगदनुरञ्जनाश्च मन्त्राः ।

दुर्गायोगः । दुःखदौर्भाग्यास्पर्शे कामयोगः । जरापमृत्युरोगास्पर्शे मृत्युञ्जय-योगः ॥ ७६ ॥ ७७ ॥ ७८ ॥

नित्यक्लिन्नायाः संमोहननिद्रनित्यक्लिन्नादेव्य ऋष्याद्याः । क्लीं बीजं स्वाहा शक्तिः । वर्णद्वन्द्वैश्चेति । क्लामादियोगः उक्तः ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥

मनुविदिति । मदद्रवे इत्यस्मात् पूर्वं साध्यनामयोग उक्त इति ॥ ८४॥८५ ॥

तस्मात्ताः शुभमतयो भजन्तु नित्यं
जापार्चाहुतसमुपासनाविशेषैः ॥ ८५

स्वर्णपट्टेऽथवा भूर्जे पाशबीजेन वेष्टयेत् ।
शक्तिबीजं साध्यनाम तन्मध्ये परिकल्पयेत् ॥ ८६

केसरेषु लिखेत् पाशशूलिबीजे प्रदक्षिणम् ।
मन्त्रवर्णांशनित्यादीन् दलमध्येषु बाह्यतः ॥ ८७

वृत्ते स्वाहापदेनापि षोड़शाक्षरविद्यया ।
पाशाङ्कुशाढ्यया पूर्वं प्रोक्तया वेष्टयेदपि ॥ ८८

एतद्यन्त्रं मदालिप्तं मृगमातङ्गयोः परम् ।
सर्वार्थसाधकं मूर्ध्नि करे वा विधृतं भवेत् ॥ ८९

अङ्कुशस्मरबाणानां बीजाद्यं शक्तिपाशयोः ।
सहस्रं प्रजपेदेनां विद्येशीं वीरमानसः ॥ ९०

इति श्रीप्रपञ्चसारे त्रयोदशः पटलः ।

[स्वर्णेत्यादि वीरमानस इत्यन्तं श्लोकपञ्चकं क्वचिन्न दृश्यते ।] ॥ ८६—९० ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
त्रयोदशः पटलः ।

चतुर्दशः पटलः ।

अथ वक्ष्यामि दुर्गाया मन्त्रान् साङ्गान् सदैवतान् ।
सजपार्चाहुतविधीन् प्रीत्यर्थं मन्त्रजापिनाम् ॥ १

तारो मायाऽमरेशोऽद्रिपीठो बिन्दुसमन्वितः ।
स एव च विसर्गान्तो गाये नत्यन्तिको मनुः ॥ २

दुर्गाऽस्य देवता छन्दो गायत्रं नारदो मुनिः ।
तारो माया च दुर्गायै ङामाद्यन्ताङ्गकल्पना ॥ ३

शङ्खारिचापशरभिन्नकरां त्रिनेत्रां
तिग्मेतरांशुकलया विलसत्किरीटाम् ।
सिंहस्थितां सकलसिद्धनुताञ्च दुर्गां
दूर्वानिभां दुरितवर्गहरां नमामि ॥ ४

कृताभिषेकदीक्षस्तु वसुलक्षं जपेन्मनुम् ।
तदन्ते जुहुयात् सर्पिः संयुतेन पयोऽम्बसा ॥ ५

अष्टसाहस्रसंख्येन तिलैर्वा मधुराप्लुतैः ।
पीठार्चायां प्रयष्टव्याः क्रमात्तच्छक्तयो नव ॥ ६

प्रभा माया जया सूक्ष्मा विशुद्धा नन्दिनी तथा ।
सुप्रभा विजया सर्वसिद्धिदा नवमी तथा ॥ ७

अर्च्या ह्रस्वत्रयक्लीबरहितैश्च स्वरैरिमाः ।
तारान्ते वक्त्रमाभाष्य नखदंष्ट्रायुधाय च ॥ ८

महासिंहाय चेत्युक्त्वा वर्मास्त्रनतयः क्रमात् ।
सिंहमन्त्रोऽयमित्येवं संप्रोक्ता पीठकल्पना ॥ ९

इच्छोपसर्जनां क्रियाशक्तिमभिधाय ज्ञानोपसर्जनक्रियाशक्तिरूपाया दुर्गाया विधानं वक्तुमारभते— अथेति । दुं बीजम् । ह्रीं शक्तिः । मूलेन मूर्तिकल्पना । ह्रींकारसहिता न्यासाः । कर्णिकायां बीजम् । दलेषु वर्णाष्टकम् । मातृकया च बहिर्वेष्टनम् । भूबिम्बकोणेषु नृसिंहबीजमित्यस्मिन्

अङ्गैः स्यादावृतिः पूर्वा द्वितीया शक्तिभिः स्मृता ।
अष्टायुधैस्तृतीया स्याल्लोकपालैश्चतुर्थ्यपि ॥ १०
तदायुधैः पञ्चमी च दुर्गायजनमीदृशम् ।
जया च विजया कीर्तिः प्रीतिश्चाथ प्रभाह्वया ॥ ११
श्रद्धा मेधा श्रुतिरपि शक्तयः स्वाक्षरादिकाः ।
चक्रशङ्खगदाखड्गपाशाङ्कुशशरा धनुः ॥ १२
क्रमादष्टायुधाः प्रोक्ता दौर्गा दुर्गतिहारिणः ।
इत्थं दुर्गामनौ जापहुतार्चाभिः प्रसाधिते ॥ १३
मन्त्रीन्द्रियावान् भवति दीर्घायुर्दुरितान् जयेत् ।
यान् यानिच्छति कामान् स तांस्तानाप्नोत्ययत्नतः ॥ १४
विधाय विधिना तेन कलशं त्वभिषेचयेत् ।
यमसौ भूतवेतालपिशाचाद्यैर्विमुच्यते ।
राजाऽभिषिक्तो विधिना सपत्नानमुना जयेत् ॥ १५
अमुना विधिना कृताभिषेका ललना पुत्रमवाप्नुयाद्विनीतम् ।
हवनात्तिलसर्षपैः सहस्रद्वितयैराशु भवेच्च गर्भरक्षा ॥ १६
अनयैव जपाभिषेकहोमक्रियया स्यादनुरञ्जनं जनानाम् ।
भजतां सकलार्थसाधनार्थं मुनिवर्यैः परिकल्पितोऽयमादौ ॥ १७
उत्तिष्ठपदं प्रथमं पुरुषि ततः किंपदं स्वपिषियुतम् ।
भयमपि मेऽन्ते समुपस्थितमित्युच्चार्य यदिपदं प्रवदेत् ॥ १८
शक्यमशक्यं वोक्त्वा तन्मे भगवति निगद्य शमयपदम् ।
प्रोक्त्वा ठद्वितययुतं सप्तविंशाक्षरो मनुः प्रोक्तः ॥ १९
आरण्यकोऽत्यनुष्टुब्वनदुर्गाख्याः क्रमेण भगवत्याः ।
ऋष्यादिकाः स्वमनुना विहितान्यङ्गानि वाक्यभिन्नेन ॥ २०

यन्त्रे पूजयेत् ॥ १—१२ ॥

मन्त्रीन्द्रियावान् भवतीति । इन्द्रियायोगः सूचितः । मृत्युञ्जययोगे दीर्घायुः । शक्त्यनन्तरं तु योगः । सिंहयोगे दुरितां जयेत् । शक्तिपुटितत्वे सर्वकामाप्तिः । कामयोगे पुत्रावाप्तिः ॥ १४॥१५॥१६॥१७ ॥

वनदुर्गायाः दुं बीजम् । स्वाहा शक्तिः । वा तन्मे इत्यक्षराणि कीलानि ।

षड्भिश्चतुर्भिरष्टभिरष्टार्णैः षड्भिरपि च पञ्चार्णैः ।
जातियुतैश्च विदध्यादङ्गान्यपि षट् क्रमेण विशदमतिः ॥ २१
पद्मयसन्धिगुदाम्बाधारोदरपार्श्वहृत्स्तनेषु गले ।
दोःसन्धिवदननासाकपोलदृक्कर्णयुग्भ्रुवि न्यस्येत् ॥ २२
हेमप्रख्यामिन्दुखण्डात्तमौलिं शङ्खारीष्टाभीतिहस्तां त्रिनेत्राम् ।
हेमाब्जस्थां पीतवस्त्रां प्रसन्नां देवीं दुर्गां दिव्यरूपां नमामि ॥ २३
अरिशङ्खकृपाणखेटबाणान् सधनुःशूलकतर्जनीर्दधाना ।
भवतां महिषोत्तमाङ्गसंस्था नवदूर्वासदृशी श्रियेऽस्तु दुर्गा ॥ २४
चक्रदरखड्गखेटकशरकार्मुकशूलसंज्ञककपालैः ।
ऋष्टिमुसलकुन्तनन्दकवलयगदाभिन्दिपालशक्त्याख्यैः ॥ २५
उद्यद्विकृतिभुजाढ्या माहिषके सजलजलदसङ्काशा ।
सिंहस्था वाऽग्निनिभा पद्मस्था वाथ मरकतश्यामा ॥ २६
व्याघ्रत्वक्परिधाना सर्वाभरणान्विता त्रिनेत्रा च ।
अहिकलितनीलकुञ्चितकुन्तलविलसत्किरीटशशिशकला ॥ २७
सर्पमयवलयनूपुरकाञ्चीकेयूरहारसम्भिन्ना ।
सुरदितिजाभयभयदा ध्यया कात्यायनी प्रयागविधौ ॥ २८
संयतचित्तो लक्षचतुष्कं जप्त्वा हुनेद्दशांशेन ।
व्रीहितिलाज्यहविर्भिः सम्यक् संचिन्त्य भगवतीमनले ॥ २९

हुं दुं दुर्गे इति अकौलाक्षराणि । क्रमेण विशदमतिरिति । सामान्यपटलोक्त-न्यासक्रमस्मरणकुशल इत्यर्थः । अथवा प्रणवशक्ति नरसिंहदुर्गाबीजादियोगेऽङ्गेषु विशेषज्ञ इत्यर्थः । अथवा विष्णुदैवत्यपक्षे नेत्रमन्त्रस्य पञ्चार्णत्वज्ञ इत्यर्थः ॥ १८॥१९॥२०॥२१॥२२ ॥

हेमप्रख्येति । साधने ध्यानम् । अरिशङ्खेति । रक्षादौ । चक्रदरेति । युद्धमारणादौ । सिंहस्थाऽप्यष्टभुजा रक्षादौ प्रशस्ता । पद्मस्थापि द्विभुजा वरदाभयकरा । सहस्राक्षी शाकम्भरी ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

षोडशभुजाया विशेषणं व्याघ्रत्वगित्यादि । प्रयोगविधाविति मारणोच्चाटन-योरित्यर्थः । प्रतिलोमयोगविधाविति चार्थः ॥ २७॥२८ ॥

सम्यक् संचिन्त्येत्यग्निभेदेनेत्यर्थः । पूर्वविधानवदथोदितं शेषमिति । यक्षीणां

पीठे पूर्वप्रोक्ते पूज्याऽङ्गैः शक्तिभिस्तथाऽष्टाभिः ।
अष्टायुधैश्च मातृभिराशैशैः क्रमश एव दुर्गेयम् ॥ ३०

आर्या दुर्गा भद्रा सभद्रकाली तथाऽम्बिकाख्या च ।
क्षेमा सवेदगर्भा क्षेमङ्करी चेति शक्तयः प्रोक्ताः ॥ ३१

अरिदरक्तपाणखेटकबाणधनुःशूलपाण्डरकपालाः ।
अष्टायुधाः क्रमेणोक्ताः पूर्वविधानवदथोदितं शेषम् ॥ ३२

इत्थं जपार्चनाहुतसिद्धमनोर्मन्त्रिणः प्रयोगविधिः ।
विहितो जपः प्रतिदिनं निजरक्षायै शतं सहस्रं वा ॥ ३३

उद्दिश्य यद्यदेनं मनुं जपेदथ सहस्रमयुतं वा ।
तत्तन्मन्त्री लभ्येदचिरात्तदनुग्रहादसाध्यमपि ॥ ३४

स्नात्वार्काभिमुखः सन्नाभिसमकेऽम्भसि स्थितो मन्त्री ।
अष्टोर्ध्वशतं प्रजपेन्निजवाञ्छितसिद्धये च लक्ष्म्यै च ॥ ३५

ध्यात्वा त्रिशूलहस्तां ज्वरसर्पग्रहविपत्सु जन्तूनाम् ।
संस्पृश्य शिरसि जप्यात्तज्जन्योपद्रवं द्रुतं शमयेत् ॥ ३६

अयुतं तिलैर्वनोत्थै राजीभिर्वा हुनेत् समिद्भिर्वा ।
मायूरकीभिरचिरात्सापस्मारादिकांश्च नाशयति ॥ ३७

स्वाचरादित्वं संकोचविकाशादिकं मातॄणां बीजसाहित्यमित्याद्यतिदिष्टमिति द्रष्टव्यम् । कर्णिकायां बीजम् । पत्रेषु पदद्वयम् । त्रिष्टुभा मातृकया च बहिर्वेष्टनं बहिः पार्थिवबिम्बे दुंबीजमित्यस्मिन् पूजयेत् ॥ २९॥३०॥३१॥३२ ॥

मन्त्रिणः प्रयोगविधिरिति । तत्तत्प्रयोगौचित्येन बीजयोग उक्तः । तत्तन्मन्त्री लभ्येदिति । चोरभयं मे समुपस्थितं व्याघ्रभयं मे समुपस्थितं रोगभयं मे समुपस्थितमित्यादियोगः सूचितः ॥ ३३ ॥ ३४ ॥

अम्भसि स्थितो मन्त्रीत्यनेनादौ चतुरक्षरयोगः सूचितः । लक्ष्म्यै चेत्यनेन योगः कार्यः ॥ ३५ ॥

ध्यात्वा त्रिशूलेति । प्रतिलोमप्रयोगः । एवमन्यत्रापि निग्रहप्रयोगाः प्रतिलोमेनेति ज्ञातव्याः । दुंबीजप्रधानेनाऽनुलोमेनैव वा क्रूरकर्म कुर्यात् ॥३६॥ ॥ ३७ ॥

जुहुयाद्रोहिणसमिधामयुतं मन्त्री पुनः सशुङ्गानाम् ।
सर्वापदां विमुक्त्यै सर्वसमृद्ध्यै ग्रहादिशान्त्यै च ॥ ३८
आर्कैः समित्सहस्रैः प्रतिजुहुयादर्कवारमारभ्य ।
दशदिनतोऽर्वाग्वाञ्छितसिद्धिर्देव्याः प्रसादतो भवति ॥ ३९
शुद्धैः सारैरिध्मैस्त्रिदिनं वा सप्तरात्रकं वापि ।
प्रतिशकलं प्रतिजुहुयान्मनुना निजवाञ्छिताप्तये मन्त्री ॥ ४०
विशिखानां विंशत्कं पुरो निधायाऽथ तीक्ष्णतैलेन ।
जुहुयात् सहस्रकं वाऽयुतमपि संख्यासु पूरितासु पुनः ॥ ४१
सम्पातिततैलेन च शरान् समभ्युक्ष्य पूर्ववज्जुहुयात् ।
तानथ शूरो धन्वी शुद्धाचारः प्रवेश[ध]येद् बाणान् ॥ ४२
प्रतिसेनाया मध्ये सा धावति सद्य एव सम्भ्रान्ता ।
भूयो गुरुं धनैरपि धान्यैः परिपूजयेच्च कारयिता ॥ ४३
अष्टोत्तरशतजप्तं यच्छिरसि प्रक्षिपेच्चिताभस्म ।
स तु विद्विष्टो लोकैर्देशाद्देशान्तरं परिभ्रमति ॥ ४४
कारस्करस्य पत्रैरष्टसहस्रैर्निपातितैर्मरुता ।
जुहुयात् सपादपांशुभिरुच्चाटकरं भवेद्रिपोः सद्यः ॥ ४५
सेनां संस्तम्भयितुं विषतरुसुमनःसहस्रकं जुहुयात् ।
तावद्भिस्तत्पत्रैर्मन्त्री च तां निवर्त्तयति ॥ ४६
विषतरुमयीञ्च शत्रोः प्रतिकृतिमसकृत्प्रतिष्ठितप्राणाम् ।
छित्त्वा छित्त्वा काकोलूकवसाक्तैः सहस्रमष्टौ च ॥ ४७

मन्त्री पुनः सशुङ्गानामिति । प्राकरणिकैरन्यैर्मन्त्रैः प्रतिलोमतो होम उक्तः ॥ ३८ ॥ ३९ ॥

शुद्धैः सारैरिध्मैरिति । असनसारोत्थैरिध्मैरित्यर्थः । प्रतिशकलं प्रतिलोमशकलम् । प्रतिजुहुयात् । पृष्ठाग्रं प्रतिलोमेन जुहुयात् । अथवा प्रतिशकलमिध्महोमं कुर्यादित्यर्थः । शकलं शकलं प्रत्येकैकेन प्रतिलोमेन जुहुयादिति वा । निजवाञ्छिताप्तये मन्त्रीति । गायत्र्या जप उक्तः ॥ ४०॥४१॥४२॥४३॥४४॥४५ ॥

तत्पत्रैर्मन्त्रीति । वायुबीजयोग उक्तः । संस्तम्भने पृथिवीबीजयोगः । ॥ ४६—५६ ॥

असितचतुर्दश्यां तद्भावैर्जुहुयादरण्यकोऽर्द्धनिशि ।
त्रिचतुर्दशीप्रयोगादर्वाङ्म्रियते रिपुर्न सन्देहः ॥ ४८
खवसारक्तोपेतैर्जुहुयात्पक्षैरुलूकवायसयोः ।
म्रियतेऽरातिर्मत्तः स्यादुन्मत्तसमित्सहस्रहोमेन ॥ ४९
संस्थापितानिलां तां प्रतिकृतिमुष्णोदके विनिःक्षिप्य ।
प्रजपेदुन्मादः स्याच्छत्रोर्दुग्धाभिषेकतः शान्तिः ॥ ५०
रविबिम्बगतामरुणां करयुगपरिकृष्टशूलतर्जनिकाम् ।
ध्यात्वाऽयुतं प्रजप्यान्मारयितुं सद्य एव रिपुनिवहम् ॥ ५१
असिखेटकराऽर्कस्था क्रुद्धा मारयति सैव जपविधिना ।
सिंहस्था बाणधनुःकरा समुच्चाटयेदरीनचिरात् ॥ ५२
विषतरुसमिदयुतहुतादथ करिणो रोगिणो भवन्त्यचिरात् ।
तत्पर्णैश्च विनाशस्तेषामुच्चाटनञ्च तत्पुष्पैः ॥ ५३
आनिल्यकसमिद्धोमाद्रोगा नश्यन्ति दन्तिनामचिरात् ।
तत्पुष्पैर्मधुराक्तैर्होमाच्च वशीभवन्ति मातङ्गाः ॥ ५४
त्रिमधुरयुतैरानिल्यकपत्रैर्मत्ता भवन्ति ते सद्यः ।
रक्षाकरस्तु करिणां तज्जापितपञ्चगव्यलेपः स्यात् ॥ ५५
आज्यतिलराज्यानिल्यकदुग्धौदनपञ्चगव्यतण्डुलकैः ।
सघृतैश्च प्रत्येकं सहस्रहवनं गजाश्ववर्धनकृत् ॥ ५६
द्विजभूरुहं महान्तं छित्त्वा निर्भिद्य पञ्चधा भूयः ।
आशाक्रमेण पञ्चायुधा विधेयाश्च साधु शिल्पविदा ॥ ५७
शङ्खः सनन्दकोऽरिः शार्ङ्गः कौमोदकी दिशां क्रमशः ।
पञ्चेति पञ्चगव्ये निधाय जप्याच्च पञ्चसाहस्रम् ॥ ५८
तावद्घृतेन जुहुयात्तेष्वथ सम्पात्य साधु सम्पातम् ।
पुनरपि तावज्जप्त्वा मध्याद्यवटेषु पञ्चगव्ययुतम् ॥ ५९
संस्थाप्य समीकृत्य च बलिं हरेत्तत्र तत्र तन्मन्त्रैः ।
पुरराष्ट्रग्रामाणां कार्या रक्षैवमेव मन्त्रविदा ॥ ६०

तत्र तत्र तन्मन्त्रैरिति । विष्णुपञ्जरसिद्धैः शङ्खादिमन्त्रैरित्यर्थः । रक्षैवमेव

यस्मिन् देशे विहिता रक्षेयं तत्र वर्धते लक्ष्मीः ।
धनधान्यसमृद्धिः स्याद्रिपुचोराद्याश्च नैव बाधन्ते ॥ ६१
पद्मोत्पलकुमुदहुतैर्नृपपत्नीर्ब्राह्मणान् वशीकुरुते ।
कह्लारलवणहोमैर्विट्शूद्रौ जातिभिस्तथा ग्रामम् ॥ ६२
अथ वारिदरगदाम्बुजकरं मुकुन्दं विचिन्त्य रविबिम्बे ।
व्यत्यस्तपुरुषभगवत्पदं मनुं भजतु सर्वसिद्धिकरम् ॥ ६३
साध्याख्याक्षरदर्भितं मनुमिमं पत्रे लिखित्वा च त-
च्चक्रीहस्तमृदा कृतप्रतिकृतेर्विन्यस्य मन्त्री हृदि ।
सप्ताहं त्वथ पुत्तलीमभिमुखे संस्थाप्य सन्ध्यात्रये
जप्यादष्टशतं चिराय वशतां गच्छत्यसौ निश्चयः ॥ ६४
व्रीहीणां जुहुयान्नरोऽष्टशतकं सम्वत्सराद् व्रीहिमान्
गोदुग्धैः पशुमान् घृतैः कनकवान् दध्ना च सर्वर्द्धिमान् ।
अन्नैरन्नसमृद्धिमांश्च मधुभिः स्याद्रत्नवान् दूर्वयाऽ-
प्यायुष्मान् प्रतिपङ्कजेन महतीं सद्यः श्रियं प्राप्नुयात् ॥ ६५

क्षान्तं मरुत्तुरियवर्णयुतं सवाद्यं
संवीक्ष्य शूलिनिपदञ्च सदुष्टशब्दम् ।
पञ्चान्तकं सदहनं परिभाष्य हान्तं
हूं फट् द्विठान्तमिति शूलिनिमन्त्रमेव ॥ ६६

मन्त्रविदेति । मूलमन्त्रवत्तेषामायुधानां ध्यानपूजादिकं सूचितम् ॥ ५७॥५८ ॥ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥

साध्याख्याक्षरदर्भितमिति । मन्त्राक्षराभ्यामेकैकनामाक्षरयोजनं विदर्भः । वश्याकर्षणपौष्टिकेषु विनियोगोऽस्य । सर्वत्रैवमेव प्रयोगः कर्तव्यः । समस्तमन्त्रान्ते समस्तनामयोजनं पल्लवः । मारणेऽस्य विनियोगः । नामान्ते मन्त्रयोजनं योगः । संस्तम्भनोच्चाटनविद्वेषेषु विनियोगः । मन्त्राद्यन्तयोर्नामयोजनं रोधः । संमोहने विनियोगः । मन्त्रनामाक्षरयोरेकैकान्तरितयोः योजनं ग्रथनम् । शान्तिके विनियोगः । नामाद्यन्तयोर्मनुयोजनं संपुटम् । कीलने विनियोगः । विन्यस्य मन्त्रीति । प्रतिकृतौ प्रातिलोम्येन मन्त्रन्यासादिकं सूचयति ॥६४॥६५॥

शूलिन्या हुं बीजं स्वाहा शक्तिः ॥ ६६ ॥

ऋषिर्दीर्घतपाश्छन्दः ककुब्दुर्गा च देवता ।
दुर्गा हृद्वरदा शीर्षं शिखा स्याद्विन्ध्यवासिनी ॥ ६७
वर्माऽसुरमर्दिनि च युद्धपूर्वप्रिये तथा ।
त्रासयद्वितयञ्चाऽस्त्रं देवसिद्धसुपूजिते ॥ ६८
नन्दिन्यन्ते रक्षयुगं महायोगेश्वरीति च ।
शूलिन्याद्यन्तु पञ्चाङ्गं हुं फड्न्तमितीरितम् ।
अङ्गकर्मैव रक्षाकृत् प्रोक्तं ग्रहनिवारणम् ॥ ६९
विभ्राणा शूल बाणास्यरि सदर गदा चाप पाशान् कराब्जै-
र्मेघश्यामा किरीटोल्लसितशशिकला भीषणा भूषणाढ्या ।
सिंहस्कन्धाधिरूढ़ा चतसृभिरसिखेटान्विताभिः परीता
कन्याभिर्भिन्नदैत्या भवतु भवभयध्वंसिनी शूलिनी वः ॥ ७
एवं विचिन्त्य पुनरक्षरलक्षमेनं
मन्त्री जपेत् प्रजुहुयाच्च दशांशतोऽन्ते ।
प्राज्येन साज्यहविषा प्रयजेच्च देवी-
मङ्गाष्टशक्तिनिजहेतिदिशाधिनाथैः ॥ ७१
दुर्गा च वरदा विन्ध्यवासिन्यसुरमर्दिनी ।
युद्धप्रिया देवसिद्धपूजिता नन्दिनी तथा ।
महायोगेश्वरी चाष्ट शक्तयः समुदीरिताः ॥ ७२
रथाङ्गशङ्खासिगदाबाणकार्मुकसंज्ञकाः ।
सशूलपाशा यष्टव्या दिक्क्रमादष्ट हेतयः ॥ ७३
दीक्षाजपहुतार्चाभिः सिद्धः कर्म समाचरेत् ।
आमयोन्मादभूतापस्मारक्लेशमादिकम् ॥ ७४

असुरमर्दिनि युद्धप्रिये त्रासय त्रासयेति कवचम्। अस्त्रं देवसिद्धेत्यादि। शूलिन्याद्यं त्विति। शूलिनि दुर्गे हुं फट् हृदयाय नमः। शूलिनि वरदे हुं फट् शिरसे स्वाहा। इत्याद्यमित्यर्थः। त्विति। बीजान्तरयोगेऽङ्गविशेषं सूचयति ॥ ६७ ॥ ६८ ॥ ६९ ॥

चतसृभिरिति। जया विजया भद्रा शूलिनीकात्यायन्याख्याभिरित्यर्थः ॥७०॥

मन्त्री जपेदिति। प्रणवशक्तिनृसिंहदुर्गाबीजपुटितं जपेदित्यर्थः ॥७१—७६॥

उद्गूर्णैः प्रहरणकैरुदीर्णवेगैः
शूलाद्यैर्निजमथ शूलिनीं विचिन्त्य ।
आविश्य क्षणमिव जप्यमानमन्त्र-
स्याहत्या द्रुतमपयान्ति भूतसङ्घाः ॥ ७५

अन्तराऽथ पुनरात्मरोगिणोरम्बिकामपि निजायुधाकुलाम् ।
संविचिन्त्य जपतोऽरिमुद्रया विद्रवन्त्यवशविग्रहा ग्रहाः ॥ ७६
अहिमूषिकवृश्चिकादिजं वा बहुपात्कुक्कुरलूतिकोद्भवं वा ।
विषमाशु विनाशयेन्नराणां प्रतिपक्ष्यैव च विन्ध्यवासिनी सा ॥ ७७
आधाय वाणे निशिते च देवीक्षेमङ्करीमन्त्रमिमं जपित्वा ।
तद्वेधनादेव विपक्षसेना दिशो दिशो धावति नष्टसंज्ञा ॥ ७८
आत्मानमार्यां प्रतिपद्य शूलपाशान्वितां वैरिबलं प्रविश्य ।
मन्त्रं जपन्नाशु परायुधानि गृह्णाति मुष्णाति च बोधमेषाम् ॥ ७९
तिलसिद्धार्थैर्जुहुयाल्लक्षं मन्त्री सपल्लवनामयुतम् ।
स तु रोगाभिहतात्मा मृतिमेति न तत्र सन्देहः ॥ ८०
क्षिमधुरसिक्तैश्च तिलैरष्टसहस्रं जुहोति योऽनुदिनम् ।
अप्रतिहताऽस्य शक्तिर्भूयात् प्रागेव वत्सरतः ॥ ८१
सर्पिषाऽष्टशतहोमतोऽमुना वाञ्छितं सकलमब्दतो भवेत् ।
दूर्वया क्षिकयुजेप्सितं लभेत् सम्यगष्टशतसंख्यया हुतात् ॥ ८२
क्षुरिकाक्षुमाणनखरा मन्त्रेणाऽनेन साधु संजप्ताः ।
सम्पाताज्यमुसिक्ता अप्रतिहतशक्तयो भवन्ति युधि ॥ ८३
गोमयविहितां गुलिकां जुहुयाच्छतमष्टपूर्वकं मन्त्री ।
दिवसैः सप्तभिरिष्टौ द्विष्टौ मिथो वियोगिनौ भवतः ॥ ८४
अस्पृष्टकं गोमयमन्तरिक्षे संगृह्य जप्त्वा विसहस्रमानम् ।
यियासतां वै निखनेन्नराणां संस्तम्भनं द्वारि चमूमुखे च ॥ ८५

प्रतिपक्ष्यैवेति । अमृताभिषेकप्रतिपक्ष्येत्यर्थः ॥ ७७॥७८॥७९ ॥
मन्त्री सपल्लवेति । पल्लवः सूचितः ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥
शतमष्टपूर्वकं मन्त्रीति । वायुबीजसम्बन्धयोगप्रयोगश्च सूचितः ॥ ८४ ॥
॥ ८५ ॥

पानीयाम्भःपाणिमार्यां प्रसन्नां ध्यात्वा ग्रामं वा पुरं वापि गच्छन् ।
जप्त्वा मन्त्रं तर्पयित्वा प्रविष्टो मृष्टं भोज्यं प्राप्नुयाद्भृत्यवर्गैः ॥ ८६

आर्कैर्मन्त्री त्रिमधुरयुतैरर्कसाहस्रमिध्मै-
राश्वत्थैर्वा त्वतिविशदचेतास्तिलैर्वा जुहोति ।
यानुद्दिश्य त्ववहितमनास्तन्मये सम्यगग्नौ
ते वश्याः स्युर्विधुरितधियो नात्र कार्यो विचारः ॥ ८७

कुर्यात् प्रयोगानपि दावदुर्गाकल्पोदितान् वै मनुनाऽमुना च ।
मन्त्री जपार्चाहुततर्पणान्तान्नाल्पो हि मन्त्रोरनयोर्विशेषः ॥ ८८

इति श्रीप्रपञ्चसारे चतुर्दशः पटलः ॥

आर्कैर्मन्त्रीति । शक्तियोगो विदर्भप्रयोगश्च सूचितः । अतिविशदचेता इति पाशाङ्कुशधनुर्धराया रक्तवर्णाभायाः ध्यानं सूचितम् । अवहितमना इति । पाशेन बद्ध्वाऽङ्कुशेनाकर्षणादिकं सूचितम् । तन्मये अर्कक्राष्ठमय इत्यर्थः ॥ ८६॥८७ ॥

अमुना चेति । अत्रोक्तानमुना च कुर्यादित्यर्थः । मन्त्रीति । शान्तिप्रयोगेषु गुलिन्या वषड्न्तत्वमुक्तमिति ॥ ८८ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
चतुर्दशः पटलः ।

पञ्चदशः पटलः ।

अथ कथयिष्ये मन्त्रं चतुरक्षरसंज्ञकं समासेन ।
प्रणवो भुवनाधीशादण्डिखमस्यादिको विसर्गान्तः ॥ १
ऋषिरस्याऽजश्छन्दो गायत्रश्च देवता च भुवनेशी ।
अङ्गानि षट् क्रमेण प्रोक्तानि प्रणवशक्तिबीजाभ्याम् ॥ २
भास्वद्रत्नौघमौलिस्फुरदमृतरुचो रञ्जयच्चारुरेखां
सद्यः सन्तप्तकार्त्तस्वरकमलजवाभासुराभिः प्रभाभिः ।
विश्वाकाशावकाशं ज्वलयदशिशिरं धर्तृ पाशाङ्कुशेष्टा-
भीतीनां भङ्गितुङ्गस्तनमवतु जगन् मातुरार्कं वपुर्वः ॥ ३
संदीक्षितोऽथ प्रजपेच्च मन्त्रं मन्त्री पुनर्लक्षचतुष्कमेनम् ।
पुष्पैस्तदन्ते द्विजवृक्षजातैः स्वादुप्लुतैर्वा जुहुयात् सरोजैः ॥ ४
मनोरथार्कात्मतया त्वनेन प्रवर्त्यतेऽर्घ्योपहिता प्रपूजा ।
समे सुमृष्टे रचयेद्विविक्ते शुद्धे तले स्थण्डिलमङ्गणस्य ॥ ५
प्रयजेदथ प्रभूतां विमलां साराह्वयां समाराध्याम् ।
परमसुखामग्न्यादिष्वस्त्रिषु मध्ये च पीठकृप्तेः प्राक् ॥ ६
ह्रस्वत्रयक्लीबवियोजिताभिः क्रमात् कृशान् बिन्दुयुताभिरज्भिः ।
सहाऽभिपूज्या नव शक्तयः स्युः प्रद्योतनाः प्राज्यतरप्रभावाः ॥ ७

एवं त्रिशक्त्यात्मकान् मन्त्रानभिधाय त्रिगुणात्मकानां सूर्यसोमाग्नीनां मन्त्रान् वदन् सत्त्वात्मकस्य सूर्यस्य मन्त्रं वक्तुमारभते—अथेति । ओं बीजम् । ह्रीं शक्तिः । हंसो वा बीजशक्ती ॥ १ ॥

अङ्गानि षट्क्रमेणेति । शक्तिदीर्घाणामङ्गेषु क्रमेण शक्तियोगः सूचितः । अत्रापि शक्तिबीजेन सह सामान्यन्यासाः कर्तव्याः । आदित्यादीनां पञ्चानां धात्रादीनां द्वादशानां नवसप्तग्रहाणां च न्यासाः कर्तव्याः ॥ २

समनीव्यापिन्यादिशक्तयः कार्तस्वरादिवर्णाः । अशिशिरमित्याग्ने[दिते]-यमित्यर्थः । स्तनयोर्भङ्गित्वं निरन्तरत्वम् ॥ ३ ॥

मन्त्री पुनरिति । अजपान्ते परमात्ममन्त्रयोग उक्तः ॥ ४॥५॥६॥७॥८ ॥

दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा ।
अमोघा विद्युता चैव नवमी सर्वतोमुखी ॥ ८
ब्रह्मविष्णुशिवात्मकं समीर्यं सौराय योगपीठाय ।
प्रोक्त्वेति नतिमपि पुनः समापयेत् पीठमन्त्रमहिमरुचेः ॥ ९
आवाह्य हार्लेखिकमर्कमर्घ्यपाद्याचमाद्यैर्मधुपर्कयुक्तैः ।
प्रपूजयेदावरणैः समस्तसम्पत्त्यवाप्तौ तदधीनचेताः ॥ १०
हृल्लेखाद्याः पञ्च यष्टव्यास्त्वङ्गैस्तदनु मातृभिः पश्चात् ।
अङ्गारादैराशापालैरभ्यर्चयेत् क्रमान्मन्त्री ॥ ११
प्रतिपूज्य शक्तिमपि तत्र पुरः प्रणिधाय ताम्ररचितं चषकम् ।
प्रजपन्मनुं प्रतिगतक्रमतः प्रतिपूरयेत् सुविमलैः सलिलैः ॥ १२
अक्षतयवकुशदूर्वातिलसर्षपकुसुमचन्दनोपेतैः ।
प्रस्थयाह्यच्छिद्रं स्वैक्यं सम्भावयन् समाहितधीः ॥ १३
दृष्ट्वा दिनेशमथ पीठगतं तथैव
व्योमस्थितं परिवृतावरणं विलोक्य ।
अष्टोत्तरशतमथ प्रजपेन्मनुं तं
पूर्णोदकं निजकरेण पिधाय पात्रम् ॥ १४
भूयोऽभ्यर्च्य सुधामये जलमथो तद्गन्धपुष्पादिभि-
र्जानुभ्यामवनिं गतश्चषकमप्यामस्तकं प्रोद्धरन् ।
दद्यान्मण्डलबद्धदृष्टिहृदयो भक्त्याऽर्घ्यमोजोबल-
ज्योतिर्दीप्तियशोधृतिस्मृतिकरं लक्ष्मीप्रदं भास्वते ॥ १५

नतिमपि पुनः समापयेदिति । हृल्लेखार्कासनाय नमः इत्येवं मन्त्रसमापनमुक्तम् । मूर्तिर्मूलेन खं खखो[घं घर्षी]ल्काय नमः इत्यन्तेन देया ॥ ८ ॥

हार्लेखिकमर्कमिति । हृल्लेखार्को देवतेति देवताविशेष उक्तः ॥ १० ॥

अर्चयेत् क्रमान्मन्त्रीति । सोम बुध बृहस्पति शुक्राङ्गारक शनैश्चर राहु केतुक्रमं ग्रहमन्त्राणां स्वाक्षरबीजाद्यत्वं चाह ॥ ११ ॥

प्रतिपूज्य शक्तिमपीति । पूर्वमेव मण्डलाकारस्यादित्यस्यापि पूजनमुक्तम् । प्रतिपूरयेत् सुविमलैरिति । अर्घ्यपूरणक्रमेण पूरणमवगन्तव्यम् । ओजो मानसं बलम् । ज्योतिः शरीरकान्तिः । दीप्ती रश्मयः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

अथ कृतपुष्पाञ्जलिरपि पुनरष्टशतं जपेन्मनुमिमं मन्त्री ।
यावद्रश्मिषु भानोर्व्याप्नोत्यम्भः सुधामयं तदपि ॥ १६
अमृतमयजलावसिक्तगात्रो दिनपतिरप्यमृतत्वमातनोति ।
धनविभवसुदारपुत्रमित्रपशुगणजुष्टमनन्तभोगयोगि ॥ १७
तस्मादिनाय दिनशो ददताद्दिनादौ
दैन्यापनोदितनवे दिनवल्लभाय ।
अर्घ्यं समग्रविभवस्त्वथ वाऽर्कवारे
पारं स गच्छति भवाह्वयवारिराशेः ॥ १८
अनुदिनमर्चयितव्यं पुंसां विधिनाऽमुनाऽथवा रवये ।
दद्यादर्घ्यद्वयमपि कुर्याद्वाञ्छितार्थसमवाप्तौ ॥ १९
एकीकृत्य समस्तवस्त्वनुगतानादित्यचन्द्रानलान्
वेदाद्येन गुणात्मकेन सगुणानाकृष्य हृल्लेखया ।
सर्वं सत्प्रतिमथ्य तामपि समावष्टभ्य हंसात्मना
नित्यं शुद्धमनन्यमक्षरपदं मन्त्री भवेद् योगतः ॥ २०
अथ वदाम्यजपामनुमुत्तमं सकलसंसृतियापनसाधनम् ।
दुरितरोगविषापहरं नृणामिह परत्र च वाञ्छितसिद्धिदम् ॥ २१
विष्णुपदं ससुधाकरखण्डं चन्द्रयुगावधिकं चतुरीयम् ।
क्षेत्रविदो मनुरेष समुक्तो यं प्रजपत्यपि सन्ततमात्मा ॥ २२
ऋष्याद्या ब्रह्मदेव्यादिगायत्रीपरमात्मकाः ।
हसाऽक्लीबकलादीर्घयुजाऽङ्गानि समाचरेत् ॥ २३

अष्टोत्तरशतं मन्त्रीति । सोऽहमन्तत्वमुक्तम् । जपकाले ध्यानप्रकारमाह—यावदिति । अपिशब्द आत्मनोऽपि व्याप्तिं सूचयति ॥ १६ ॥

धनविभवेत्यादि । दृष्टं फलम् ॥ १७ ॥ १८ ॥ १९ ॥

योगमाह—एकीकृत्येति । तामपि शक्तिमात्मत्वेनाऽवष्टभ्य प्रतिपद्येत्यर्थः । प्रतिपत्तिप्रकारस्तु प्रपञ्चयागे कथितः । मन्त्री भवेदिति । सोऽहं योग उक्तः ॥२०॥

अजपाविनियोगमाह—सकलसंसृतीति । यापनं समापनं निर्वाहश्च । तत्रापि तत्तत्कार्यानुगुणबीजयोगोऽवगन्तव्यः ॥ २१ ॥

विष्णुपदमाकाशं हकारः । क्षेत्रज्ञबीजत्वमुपपादयति—यं प्रजपत्यपीति । हं

अरुणकनकवर्णं पद्मसंस्थञ्च गौरी-
हरनियमितचिह्नं सौम्यतानूनपातम् ।
भवतु भवदभीष्टप्राप्तये पाशटङ्का-
भयवरदविचित्रं रूपमङ्गाम्बिकेशम् ॥ २४

प्रजपेद्द्वादशलक्षं मनुमिममाज्यान्वितैश्च दौग्धान्नैः ।
तावत् सहस्रमानं जुहुयात् सौरे समर्चनापीठे ॥ २५

निक्षिप्य कलशमस्मिन् पूर्वोक्तानामपामयैकेन ।
आपूर्य चोपचर्य च विद्वानङ्गैः प्रपूजयेत् पूर्वम् ॥ २६

ऋतवसुवरनरसंख्यास्तथर्तगोऽबद्रिपूर्विका जान्ताः ।
आशोपाशास्त्रेयास्ततो दिशापास्ततश्च वज्राद्याः ॥ २७

इति परिपूज्य च कलशं पुनरभिषिच्याऽथ नियमतोऽर्घ्यमपि ।
दद्यादिनाय चैहिकपारत्रिकसिद्धये चिरं मन्त्री ॥ २८

इन्दुद्वयोदितसुधारसपूर्णसार्ण-
सम्बद्धबिन्दुसुसमेधितमादिबीजम् ।
संचिन्त्य यो मनुमिमं भजते मनस्वी
स्वात्मैक्यतोऽथ दुरितैः प्रतिमुच्यतेऽसौ ॥ २९

व्योमानुगेन वसुधाम्बुमुचा सदाऽमा
प्रद्योतमानसविनिःसृतशीतरुग्भ्याम् ।
आराधिता दहनचन्द्रलसन्महोभ्यां
रोगापमृत्युविषदाहरुजः प्रयान्ति ॥ ३०

बीजम् । सः शक्तिः । चिरं मन्त्रीति । सोऽङ्गयोग उक्तः ॥ २२ ॥ २३ ॥ २४ ॥ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

योगमाह—इन्दुद्वयेति । इन्दुद्वयं विसर्गस्थबिन्दुद्वयं द्वादशान्तस्थं तस्मादुद्गतेन सुधारसेन पूर्णो यः सार्णः भ्रूमध्यस्थः तेन सम्बद्धो यो बिन्दुः हृत्स्थः तेन सुष्ठु दीपितमादिबीजं हकारो मूलाधारस्थ इति न्यासक्रमोऽप्यनेनैव सूचितः । विसर्गात्मने नम इत्यादयो न्यासमन्त्राः ॥ २९ ॥

अनुलोमयोगमाह उक्तेष्वेव स्थानेषु—व्योमानुगेनेति । अमा बिन्दुना । सविनिःसृतेति । सकारात्रिःसृतविसर्गशीतरुग्भ्यामित्यर्थः । दहनचन्द्र-

हंसाण्डाकाररूपं स्रुतपरमसुधं मूर्धचन्द्राङ्कलग्नं
नीत्वा सौषुम्नमार्गं निशितमतिरथ व्याप्तदेहोपगात्रम् ।
स्मृत्वा संजप्य मन्त्रं पलितविषशिरोरुग्ज्वरोन्मादभूता-
पस्मारादींश्च मन्त्री हरति दुरितदौर्भाग्यदारिद्र्यदोषैः ॥ ३१

विधाय लिपिपङ्कजं मनुयुतोल्लसत्कर्णिकं
निधाय घटमत्र पूरयतु वारिणा तन्मुखम् ।
पिधाय शशिनात्ममन्त्रयुतवामदोष्णा पुनः
सुधायितरसैः स्वसाध्यमभिषिचयेत्तज्जलैः ॥ ३२

नारी नरो वा विधिनाऽभिषिक्तो मन्त्रेण तेनेति विषद्वयोत्थैः ।
रोगैस्तथाधिप्रभवैर्विमुक्तश्चिराय जीवेत् करणैर्विशुद्धैः ॥ ३३
करेण तेनैव जलाभिपूर्णं प्रजप्य मन्त्री करकं पिधाय ।
सुधायितैस्तैर्विषिणं निषिञ्चेद्विषं निहन्यादपि कालकूटम् ॥ ३४

गदितं निजपाणितलं विषिणः
शिरसि प्रविधाय जपेज्जलैः शितधीः ।
अचिरात् प्रतिमोचयते विषतो
मतिमानथ तक्षकदष्टमपि ॥ ३५

इत्यजपामन्त्रविधिः सम्प्रोक्तः संग्रहेण मन्त्रिवराः ।
यं प्राप्य सकलवसुसुखधर्मयशोभुक्तिमुक्तिभाजः स्युः ॥ ३६
अरुणा शिखिदीर्घयुता हृल्लेखा श्वेतया युताऽनन्ता ।
प्रोक्तः प्रयोजनानां तिलकस्तु यथार्थवाचको मन्त्रः ॥ ३७

लसन्महोभ्यामिति । चिदानन्दामृतात्मत्वमुक्तम् ॥ ३० ॥

पिण्डयोगमाह—हंसाण्डेति । भूतापस्मारादींश्च मन्त्रीति । योग्यबीजयोग उक्तः ॥ ३१॥३२॥३३ ॥

उक्तमेव प्रयोगं निर्यन्त्रमाह—जलाभिपूर्णमिति । मन्त्रीति । गरुड़बीजयोग उक्तः ॥ ३४ ॥

शितधीरिति । पाणितलद्वयेऽप्यमृतध्यानकुशल इत्यर्थः । मतिमानिति । जीवरक्षा हंसःसोहंपुटमध्यस्थसंस्थापनलक्षणा सूचिता ॥ ३५॥३६ ॥

प्रयोजनतिलकमन्त्रमाह—अरुणेति ॥ ३७ ॥

गुह्यादाचरणतलं कण्ठादागुह्यमागलं कान्तात् ।
विन्यस्य मन्त्रवर्णान् क्रमेण मन्त्री करोतु चाऽङ्गानि ॥ ३८
मन्त्रस्य मध्यमनुना दीर्घयुजाऽङ्गानि चेह कथितानि ।
ध्यायेत् पुनरहिमकरं मन्त्री निजवाञ्छितार्थलाभाय ॥ ३९
अरुणसरोरुहसंस्थस्त्रिदृगरुणोऽरुणसरोजयुगलधरः ।
करकलिताभयवरदो द्युतिबिम्बोऽमितभूषणस्त्विनोऽवतु वः ॥ ४
कृतसन्दीक्षो मन्त्री दिनकरलक्षं मनुं जपेज्जुहुयात् ।
तावत्सहस्रमन्नैः सघृतैर्वा विमधुराप्लुतैश्च तिलैः ॥ ४१
प्रागभिहितेन विधिना पीठाद्यं प्रतिविधाय तत्र पुनः ।
विन्यस्य कलशमस्मिन् प्रपूजयेत्तरणिमपि सावरणम् ॥ ४२
अङ्गैः प्रथमावरणं ग्रहैर्द्वितीयं तृतीयमाशेशैः ।
मुख्यतरगन्धसुमनोधूपाद्यैः कृतभक्तिनम्रमनाः ॥ ४३
प्रागादिदिशासंस्थाः शशिबुधगुरुभार्गवाः क्रमेण स्युः ।
आग्नेयादिष्वस्त्रिषु धरणिजमन्दाहिकेतवः पूज्याः ॥ ४४
शुभ्रसितपीतशुक्ला रक्तासितधूम्रकृष्णकाः क्रमशः ।
चन्द्राद्याः कीलन्ता वामोरुन्यस्तवामकरलसिताः ॥ ४५
अपरकराभयमुद्रा विकृतमुखोऽहिः कराहिताङ्गुलियुक् ।
दंष्ट्रोग्रास्यो मन्दः सवर्णसदृशांशुकादिभूषश्च ॥ ४६
संपूज्येवं विधिना विधिवद् गोरोचनादिकैर्द्रव्यैः ।
दद्यादर्घ्यं रवये मन्त्री निजवाञ्छिताप्तये मुक्त्यै ॥ ४७

क्रमेण मन्त्री करोतु चाङ्गानीति । हृल्लेखादि आदित्यादि पञ्चमूर्तिद्वादशादित्यग्रहन्यासाः सूचिताः ॥ ३८ ॥

मन्त्री निजवाञ्छितेति । बीजविशेषयोगे ध्यानविशेषाः सूचिताः । क्रीं बीजम् । सं शक्तिः ॥ ३९॥४० ॥

मन्त्री दिनकरलक्षमिति । जपे प्रणवादित्वं सूचितम् ॥ ४१॥४२॥४३॥४४ ॥ ॥ ४५॥४६ ॥

मन्त्री निजवाञ्छितप्तये इत्यर्घ्येऽपि बीजविशेषः हंसःसोहंयोगावुक्तौ । ॥ ४७॥४८ ॥

गोरोचनासतिलवैणवराजिरक्त-
शीताख्यशालिकरवीरजवाकुशाग्रान् ।
श्यामाकतण्डुलयुतांश्च यथाप्रलाभं
संयोज्य भक्तिभरतोऽर्घ्यविधिर्विधेयः ॥ ४८

कृत्वा मण्डलमष्टपत्रलसितं तत्कर्णिकायां तथा
पत्राग्रेषु विधाय कुम्भनवकं तत्पूरयित्वा जलैः ।
आवाह्य क्रमशो ग्रहानभिसमाराध्याऽभिषेकक्रियां
कुर्याद् यो ग्रहवैकृतानि विलयं यान्त्यस्य लक्ष्मीर्भवेत् ॥ ४९

ग्रहपरिवृतमिष्ट्वा पूर्वकृत्प्रा दिनेशं
प्रतिजुहुत निजर्क्षे वैकृते वै ग्रहाणाम् ।
शुभमतिरुपरागे चन्द्रभान्वोः खभे वा
रिपुनृपजभये वा घोररूपे गदे वा ॥ ५०

अर्कद्विजाङ्घ्रिपमयूरकपिप्पलाह्वाः
सोदुम्बराः खदिरशम्यभिधाः सदूर्वाः ।
दर्भाह्वयाश्च समिधोऽष्टशतं क्रमेण
सर्पिर्हविर्घृतयुताः पृथगेव च स्युः ॥ ५१

सोमादीनां दिशि दिशि समाधाय वह्निं यथाव-
द्धोमे सम्यक्कृतवति मुदं यान्ति सर्वे ग्रहाश्च ।
युद्धे सम्यग्जयमपि रुजः शान्तिमायुश्च दीर्घं
कृत्याशान्तिं व्रजति पुनरेकत्र वा सर्वहोमः ॥ ५२

ग्रहशान्तिमाह—कृत्वा मण्डलमिति ॥ ४९ ॥

उक्त एव प्रयोगे कालविशेषं होमविशेषं च विवक्षन्नाह—ग्रहपरिवृतमिति । शुभमतिरुपराग इति । पूर्वोक्तग्रहमन्त्राविस्मरणमुक्तम् ॥ ५० ॥

होमे समिन्नियममाह—अर्केति । सर्पिर्हविर्घृतयुता इति । प्रथमं सर्पिः । ततः समित् । ततो घृतम् । ततो हविः । ततो घृतमिति क्रमः । अष्टशतमेव होमसंख्या । आज्याहुत्या त्वादावन्ते च व्याहृतिभिरपि जुहुयात् ॥ ५१ ॥

सर्वेषां सोमादीनां यथावद्धोमे कृत इति । वरुणवायुमध्यस्थे सूर्यकुण्डेऽग्नि-जननादिकं कृत्वा सोमादिककुण्डेषु प्रागादिदिक्स्थेषु अग्निं विहृत्य तत्राऽग्नि-

अमुना विधिनाऽर्चनाहुताद्यैः प्रभजेद्यो दिनशो नरो दिनेशम् ।
मणिभिः स धनैश्च धान्यवर्गैः परिपूर्णावसथो भवेच्चिराय ॥ ५३

त्यद्यन्त आर्यसूण्यर्णा मेधा रेचिकया गुणः ।
व्यत्ययोऽष्टाक्षरः प्रोक्तः सौरः सर्वार्थसाधकः ॥ ५४
देवभाग ऋषिस्तस्य गायत्री छन्द उच्यते ।
आदित्यो देवता चाऽस्य कथ्यन्तेऽङ्गान्यतो मनोः ॥ ५५
सत्यब्रह्मविष्णुरुद्रैः साग्निभिः सर्वसंयुतैः ।
तेजोज्वालामणिहुंफट्स्वाहान्तैरङ्गमाचरेत् ॥ ५६
आदित्यं रविभानू भास्करसूर्यौ न्यसेत् स्वरैर्लघुभिः ।
सशिरोमुखहृद्गुह्यकचरणेषु क्रमश एव मन्त्रितमः ॥ ५७
सशिरोमुखगलहृदयोदरनाभिशिश्नाङ्घ्रिषु प्रविन्यस्येत् ।
प्रणवाद्यैरष्टार्णैः क्रमेण सोऽयं तदक्षरन्यासः ॥ ५८
अरुणोऽरुणपङ्कजे निषण्णः कमलेऽभीतिवरौ करैर्दधानः ।
स्वरुचाहितमण्डलस्त्रिनेत्रो रविराकल्पशताकुलोऽवताद्वः ॥ ५९

संदीक्षितोऽथ मन्त्री मन्त्रं प्रजपेच्च वर्णलक्षान्तम् ।
जुहुयात्तिमधुरसिक्तैर्दुग्धतरुसमिद्वरैर्वसुसहस्रम् ॥ ६०
अथवा सघृतैरन्नैः समर्चयेन्नित्यशोऽर्घ्यमपि दद्यात् ।
पूर्वोक्त एव पीठे कुम्भं प्रणिधाय साधु संपूर्य ॥ ६१
शुद्धाद्भिररुणवासोयुगेन संवेष्ट्य पूजयेत् क्रमशः ।
अङ्गाहृतैः परस्तादादित्याद्यैरुषादिशक्तियुतैः ॥ ६२

मुखमात्रं कृत्वा होमे कृत इत्यर्थः । एकत्र होमपक्षेऽपि प्रथमं सूर्यहोमं कृत्वा तं कुम्भे विसृज्य सोममावाह्य तद्धोमं विधाय तद्विसृज्य बुधादि होममप्येवमेव कुर्यात् ॥ ५२॥५३ ॥

अष्टाक्षरस्य श्रीं बीजम् । ह्रीं शक्तिः ॥ ५४॥५५॥५६ ॥

क्रमश एव मन्त्रितम इति । ह्रोमित्यादिक्रमेणादित्यादिबीजानां सम्बन्ध उक्तः । द्वादशादित्यादिन्यासश्च ॥ ५७॥५८॥५९ ॥

मन्त्री मन्त्रमिति । शक्तियोग उक्तः ॥ ६०॥६१ ॥

आदित्याद्यैरुषादिशक्तियुतैरिति । आदित्यं मध्ये संपूज्य रव्यादिचतुष्टयं

मातृभिररुणान्ताभिः सग्रहैः सुरैश्चाऽन्ते सूर्यपार्षद्भिः ।
सोषा सप्रज्ञा सप्रभा सन्ध्या च शक्तयः प्रोक्ताः ॥ ६३

संपूज्यैवं दिनेशं पटुमतिरथ जप्त्वा च हुत्वाऽभिषेकं
कृत्वा दत्त्वेनसंख्यं वसुमपि गुरवे सांशुकं भोजयेच्च ।
विप्रानादित्यसंख्यानिति विहितमनुर्नित्यशोऽर्घ्यञ्च दद्यात्
वारे वा भास्करीये शुभतरचरितो वल्लभाय ग्रहाणाम् ॥ ६४

इतीह दिनकृन्मनुं भजति नित्यशो भक्तिमान्
य एष निचितेन्द्रियो भवति नीरुजो वत्सरात् ।
समस्तदुरितापमृत्युरिपुभूतपीड़ादिका-
नपास्य स सुखी स जीवति परञ्च भूयात् पदम् ॥ ६५

इति श्रीप्रपञ्चसारे पञ्चदशः पटलः ॥

दिक्षु उषादिचतुष्टयं कोणेषु पूजयेदित्यर्थः ॥ ६२ ॥

अरुणान्ताभिरिति । मन्त्रानन्तरमग्रेऽरुणमपि पूजयेदित्यर्थः ॥६३॥६४॥६५॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
पञ्चदशः पटलः ।

षोड़शः पटलः ।

अथ चन्द्रमनुं वक्ष्ये सजपार्चाहुतादिकम् ।
हिताय मन्त्रिणां सार्घ्यविधानञ्च समासतः ॥ १

भृगुः ससद्यः सार्द्धेन्दुर्बिन्दुहीनः पुनश्च सः ।
विषानन्तौ मान्तनतौ मन्त्रोऽयं सोमदैवतः ॥ २

दीर्घभाजा स्वबीजेन कुर्यादङ्गानि वै क्रमात् ।
विचिन्तयेत् पुनर्मन्त्री यथावन्मन्त्रदेवताम् ॥ ३

विमलकमलसंस्थः सुप्रसन्नाननेन्दु-
र्वरदकुमुदहस्तश्चारुहारादिभूषः ।
स्फटिकरजतवर्णो वाञ्छितप्राप्तये वो
भवतु भवदभीष्टद्योतिताङ्कः शशाङ्कः ॥ ४

दीक्षितः प्रजपेन्मन्त्री रसलक्षं मनुं वशी ।
पञ्चमी दशमी पञ्चदशीषु तु विशेषतः ॥ ५

अयुतं प्रजपेन्मन्त्री सायाह्नेऽभ्यर्च्य भाधिपम् ।
पयोऽन्नेन हुनेद्भूयः सघृतेन सहस्रकम् ॥ ६

ससर्पिषा पायसेन षट्सहस्रं हुनेत् पुनः ।
पीठकृत्तौ तु सोमान्तं परिपूज्याऽर्चयेद्विधुम् ॥ ७

सात्त्विकसूर्यविधिमभिधाय राजसस्य सोमस्य विधिमाह—अथ चन्द्रेति ॥१॥

अत्रिः ऋषिः । पङ्क्तिश्छन्दः । सोमो देवता । सौं बीजम् । आय शक्तिः ॥ २ ॥

पुनर्मन्त्रीति । प्रणवादित्वमुक्तम् । यथावदिति । सोममण्डल इत्यर्थः । ॥ ३॥४ ॥

प्रजपेन्मन्त्रीति । ओं सौं खौं] पुटत्वमुक्तम् ॥ ५ ॥ ६ ॥

पीठकृत्तौ सोमान्तमिति । अं सूर्यमण्डलाय नमः । मं वह्निमण्डलाय नमः । उं सोममण्डलाय नमः । इति पीठपूजायां मण्डलं पूजयेदित्यर्थः ।

राका कुमुद्वती नन्दा सुधा संजीवनी क्षमा ।
आप्यायिनी चन्द्रिका च ह्लादिनी नव शक्तयः ॥

केसरेष्वङ्गपूजा स्याच्छक्तीस्तद्बहिरर्चयेत् ।
रोहिणीं कृत्तिकाख्याञ्च रेवतीं भरणीं तथा ।
रविमार्द्राह्वयां ज्योत्स्नां कलाञ्च क्रमतोऽर्चयेत् ॥ ८
दलाग्रेषु ग्रहानष्टौ दिशानाथाननन्तरम् ।
सुसितैर्गन्धकुसुमैः पात्रे रूप्यमयैस्तथा ॥ ९
शक्तयः फुल्लकुन्दाभास्तारहारविभूषणाः ।
सितमाल्याम्बरालेपा रचिताञ्जलयो मताः ॥ १०
इति सिद्धमनुर्मन्त्री शशिनं मूर्ध्नि चिन्तयन् ।
त्रिसहस्रं जपेद्रात्रौ मासान्मृत्युञ्जयो भवेत् ॥ ११
हृदयाम्भोजसंस्थं तं भावयन् प्रजपेन्मनुम् ।
राज्यैश्वर्यं वत्सरेण प्राप्नुयादप्यकिञ्चनः ॥ १२
आहाराचारनियतो जपेल्लक्षचतुष्टयम् ।
असंशयतरं तेन निधानादि च लभ्यते ॥ १३
घोरज्वरगराः शीर्षरोगाः कृत्याश्च कामलाः ।
तन्मन्त्रायुतजापेन नश्यन्ति सकलापदः ॥ १४
नित्यशः प्रजपेन्मन्त्रं पूर्णासु विजितेन्द्रियः ।
जपेन्मनुं यथाशक्ति लक्ष्मीसौभाग्यसिद्धये ॥ १५
त्रितयं मण्डलानान्तु कृत्वा पाश्चात्यपौर्विकम् ।
आसीनः पश्चिमे मध्यसंस्थे द्रव्याणि विन्यसेत् ॥ १६
पूर्वस्मिन् पङ्कजोपेते पूर्ववत् सोममर्चयेत् ।
राकायामुदये राज्ञो निजकार्यं विचिन्तयेत् ॥ १७
संस्थाप्य राजतं तत्र चषकं परिपूरयेत्
गव्येन शुद्धपयसा स्पृष्टपात्रो जपेन्मनुम् ॥ १८

पूर्वादिक्रमतो मन्त्री नत्यन्ताः पूजयेदिमाः ॥ ७॥८॥९॥१० ॥

सिद्धमनुर्मन्त्रीति । ओं सौं पुटितं मन्त्रमित्यर्थः । राज्यैश्वर्यं श्रीपुटो मन्त्रः ॥ ११॥१२॥१३॥१४॥१५ ॥

अर्घ्यदानप्रकारमाह—त्रितयमिति ॥ १६॥१७॥१८ ॥

अष्टोत्तरशतावृत्त्या दद्यादर्घ्यमथेन्दवे ।
विद्यामन्त्रेण मन्त्रज्ञो यथावत्तद्गतात्मना ॥ १९
विद्येविद्यापदे प्रोक्त्वा मालिनीति च चन्द्रिणि ।
चन्द्रमुख्यग्निजायाञ्च निगदेत् प्रणवादिकम् ॥ २०
प्रतिमासञ्च षण्मासात् सिद्धिमेष्यति काङ्क्षिताम् ।
इष्टाय दीयते कन्या कन्यां विन्देन्निजेप्सिताम् ॥ २१
अमितां श्रियमाप्नोति कान्तिं पुत्रान् यशः पशून् ।
सोमार्घ्यदाता लभते दीर्घमायुश्च विन्दति ॥ २२
इति सोममन्त्रविधिः प्रणिगदितः संग्रहेण मन्त्रविदाम् ।
उपकृतयेऽमितलक्ष्म्यै मेधायै प्रेत्य चेह सम्पत्त्यै ॥ २३
अथाऽग्निमन्त्रानखिलार्थसिद्धिप्रदान् प्रवक्ष्ये जगतो हिताय ।
सर्घ्यादिकृत्तीनपि साङ्गभेदान् सार्चाविशेषान् सजपादिकांश्च ॥ २४
वियतो दशमोऽर्विसर्गयुक्तो भुवसर्गौ भृगुलान्तषोड़शाचः ।
हुतभुग्दयिता ध्रुवादिकोऽयं मनुरुक्तः सुसमृद्धिदः कृशानोः ॥ २५
भृगुरपि तदृषिश्छन्दो गायत्री देवताऽग्निरुद्दिष्टः ।
प्राक्प्रोक्तान्यङ्गानि द्विशः समुक्तैश्च मन्त्रवाक्यैर्वा ॥ २६
शक्तिस्वस्तिकपाशान् साङ्कुशवरदाभयान् दधत्त्रिमुखः ।
मुकुटादिविविधभूषोऽवताच्चिरं पावकः प्रसन्नो वः ॥ २७

जपेदिमं मनुमृतुलक्षमादरा-
दृशांशतः प्रतिजुहुयात् पयोऽम्बसा ।
ससर्पिषाऽप्यसिततरैश्च षाष्टिकैः
समर्चयेदथ विधिवद्विभावसुम् ॥ २८

मन्त्रज्ञो यथावदिति । विद्यामन्त्रस्य प्रणवबीजादित्वं मूलमन्त्रान्त्यत्वमात्ममण्डलस्थदिविष्ठसोमार्घ्यामृतानामैक्यध्यानं चोक्तम् । अन्यच्च जपादिकम् ॥ १९ ॥

विद्यामन्त्रमुद्धरति—विद्येविद्येति । संग्रहेण मन्त्रविदामिति । अमितलक्ष्म्यै श्रीयोगं मेधायै वाग्भवयोगं लोकद्वयसम्पदे प्रणवयोगं चाह ॥ २०॥२१॥२२॥२३ ॥

तमोगुणप्रधानानाग्नेयान् मन्त्रान् सविनियोगानाह—अथाऽग्नीति । ओं बीजम् । स्वाहा शक्तिः । प्राक्प्रोक्तानीत्यग्निजनने प्रोक्तानि । सहस्रार्चिः

पीता श्वेताऽरुणा कृष्णा धूम्रा तीव्रा स्फुलिङ्गिनी ।
रुचिरा ज्वालिनी चेति कृशानोर्नव शक्तयः ॥ २९
पीठे तनूनपातः प्रागङ्गैरष्टमूर्तिभिस्तदनु ।
भूयश्च शतमखाद्यैर्विधिनाऽथ हिरण्यरेतसं प्रयजेत् ॥ ३०
आज्यैरष्टोर्ध्वशतं प्रतिपदमारभ्य मन्त्रविद्दिनशः ।
चतुरो मासान् जुहुयात् लक्ष्मीरत्यायता भवेत्तस्य ॥ ३१
शुद्धाभिः शालीभिर्दिनमनुजुहुयादथाऽब्दमात्रेण ।
शालीशालि गृहं स्याद्गोमहिष्याद्यैश्च संकुलं तस्य ॥ ३२
शुद्धान्नैर्घृतसिक्तैः प्रतिदिनमग्नौ समेधिते जुहुयात् ।
अन्नसमृद्धिर्महती स्यादस्य निकेतनेऽब्दमात्रेण ॥ ३३
जुहुयात्तिलैः सुशुद्धैः षण्मासाज्जायते महालक्ष्मीः ।
कुमुदैः सकह्लारैरपि जातीकुसुमैश्च जायते सिद्धिः ॥ ३४
पालाशैः पुनरिध्मकैः सरसिजैर्बिल्वैश्च रक्तोत्पलै-
र्दुग्धैर्वीरुहसम्भवैः खदिरजैर्व्याघातवृक्षोद्भवैः ।
दूर्वाख्यैश्च शमीविकङ्कतभवैरष्टोर्ध्वयुक्तं शतं
नित्यं वा जुहुयात् प्रतिप्रतिपदं मन्त्री महासिद्धये ॥ ३५
तारव्याहृतयश्चाऽग्ने जातवेद इहावह ।
सर्वकर्माणि चेत्युक्त्वा साधयाऽग्निवधूर्मनुः ॥ ३६
ऋष्याद्याः पूर्वोक्ता मन्त्रेणाऽङ्गानि वर्णभिन्नेन ।
भूतर्तुकरणसेन्द्रियगुणयुग्मैर्मन्त्रवर्णकैस्तदपि ॥ ३७
अथवा शक्तिस्वस्तिकदर्भाक्षस्रक्स्रुवस्रुगभयवरान् ।
दधदमिताकल्पो वो वसुरवतात् कनकमालिकालसितः ॥ ३

स्वस्तिपूर्णं इत्यादिनेत्यर्थः । जिह्वासप्तकमूर्त्यष्टकन्यासौ सामान्यपटलोक्तन्यासाश्च कर्तव्याः । मूलेनैव पीठमूर्तिकल्पना ॥ २४॥२५॥२६॥२७॥२८॥२९॥३० ॥

मन्त्रविद्दिनश इति । श्रीबीजयोग उक्तः । मन्त्री महासिद्धय इत्यपि श्रीबीजयोग एव । प्रतिदिनमेकैकेन द्रव्येण षण्मासं जुहुयात् । कह्लार-कुमुदाववशिष्टौ द्रव्यौ प्रतिपदि वा सर्वैर्जुहुयात् ॥ ३१॥३२॥३३॥३४॥३५ ॥

तारं व्याहृतय इति । ओं बीजम् । स्वाहा शक्तिः ॥ ३६॥३७ ॥

वत्सरादेश्चतुर्दश्यां दिनादावेव दीक्षितः ।
मन्त्रं द्वादशसाहस्रं जपेत् सम्यगुपोषितः ॥ ३९
अर्चयेदङ्गमूर्तीश्च लोकेशकुलिशादिभिः ।
समिदाज्यसमायां हि परिशोध्य यथाविधि ॥ ४०
ब्राह्मणान् भोजयित्वाऽथ स्वयं भुक्त्वा समाहितः ।
परेऽह्नि प्रतिपद्येतैर्जुहुयादर्चितेऽनले ॥ ४१
मन्त्री वटसमिद्व्रीहितिलराजीहविर्घृतैः ।
अष्टोत्तरशतावृत्त्या हुनेदेकैकशः क्रमात् ॥ ४२
दशाहमेवं हुत्वा तु पुनरेकादशीतिथौ ।
शक्त्या प्रतर्प्य विप्रांश्च प्रदद्याद् गुरुदक्षिणाम् ॥ ४३
सुवर्णवासोधान्यानि शोणां गाञ्च सतर्णकाम् ।
पुनरष्टोत्तरं मन्त्री सहस्रं दिनशो जपेत् ॥ ४४
विधिनेति विधातुरग्निपूजामचिरेणैव भवेन्महासमृद्धिः ।
धनधान्यसुवर्णरत्नपूर्णा धरणी गोवृषपुत्रमित्रकीर्णा ॥ ४५
प्रजपेदथवा सहस्रसंख्यं दिनशो वत्सरतो भवेन्महाश्रीः ।
जुहुयात् प्रतिवासरं शताख्यं हविषाऽब्देन भवेन्महासमृद्धिः ॥ ४६
पालाशैः कुसुमैर्हुनेद्दधिघृतक्षौद्राप्लुतैर्मण्डलं
नित्यं साष्टशतैस्तथैव करवीरोत्थैः समृद्ध्यै हुनेत् ।
षण्मासं कपिलाघृतेन दिनशोऽप्यष्टौ सहस्रं तथा
होतव्यं लभते स राज्यसदृशीं लक्ष्मीं यशो वा महत् ॥ ४७
उत्पूर्वात्तिष्ठशब्दात् पुरुषहरिपदे पिङ्गलान्ते निगद्य
प्रोच्याऽथो लोहिताक्षं पुनरपि च वदेत् देहिमेदान् क्रमेण ।
भूयो ब्रूयात्तथा दापयशशियुगलार्णाश्चतुर्विंशदर्णः
प्रोक्तो मन्त्रोऽखिलेष्टप्रतरणसुरसद्माङ्घ्रिपः स्यात् कृशानोः ॥ ४८

अथवेति । पूर्वमन्त्रोक्तध्यानविकल्पार्थः ॥ ३८॥३९॥४०॥४१ ॥
मन्त्री वटसमिदिति । होमे मन्त्रान्त्येऽपि व्याहृतित्रययोगार्थः ॥ ४२॥४३ ॥
अष्टोत्तरं मन्त्रीति । प्रणवशक्तिपुटितत्वमुक्तम् ॥ ४४॥४५॥४६॥४७ ॥

ऋष्याद्याः स्युः पूर्ववद्दतुभूतदिशाविकरणयुगलार्णैः ।
मूलमनुनाऽथ कुर्यादङ्गानि क्रमश एव मन्त्रितमः ॥ ४९
हेमाश्वत्थसुरद्रुमोदरभुवो निर्यान्तमश्वाकृतिं
वर्षन्तं धनधान्यरत्ननिचयान् रम्यैः स्वकैः सन्ततम् ।
ज्वालापल्लवितस्वरोमविवरं भक्तार्तिसम्भेदनं
वन्दे धर्मसुखार्थमोक्षफलदं दिव्याकृतिं पावकम् ॥ ५०
जप्याच्च लक्षमानं मन्त्री संदीक्षितोऽथ मनुमेनम् ।
जुहुयाच्च तदवसाने घृतसिक्तैः पायसैर्दशांशेन ॥ ५१
अङ्गैर्हुतवहमूर्तिभिराशेशैः संयजेत्तदस्त्रैश्च ।
पावकमिति मन्त्रितमो गन्धाद्यैरनुदिनं तमुपहारैः ॥ ५२
दिनावतारं मनुमेनमन्वहं जपेत् सहस्रं नियमेन मन्त्रवित् ।
अधृष्यतायै यशसे श्रिये रुजां विमुक्तये युक्तमतिस्तथाऽऽयुषे ॥ ५३
शालीतण्डुलकैः सितैश्च पयसा हुत्वा हविः पावकं
गन्धाद्यैः परिपूज्य तेन हविषा संवर्त्य पिण्डं महत् ।
आज्यालोड़ितमेकमेव जुहुयाज्जप्त्वा मनुं मन्त्रवित्
साष्टोर्ध्वं प्रतिपद्यथो शतमतः स्यादिन्दिरा वत्सरात् ॥ ५४
अष्टोत्तरं शतमथो मृगमुद्रयैव
मन्त्री प्रतिप्रतिपदं जुहुयात्पयोऽन्नैः ।
साज्यैर्भवेन्न खलु तत्र विचारणीयं
संवत्सरात् स च निकेतनमिन्दिरायाः ॥ ५५

उत्पूर्वादिति । ओं बीजम् । स्वाहा शक्तिः ॥ ४८ ॥

क्रमश एव मन्त्रितम इति । बीजान्तरयोगेऽङ्गविशेषाः कथिताः ॥ ४८॥५० ॥

लक्षमानं मन्त्रीति । प्रणवयोग उक्तः ॥ ५१ ॥

पावकमिति मन्त्रितम इति । पुष्पाञ्जल्यादिमन्त्रश्च इत्यर्थः ॥ ५२ ॥

नियमेन मन्त्रविदिति । अधृष्यतायै नृसिंहबीजयोगं यशसेऽजपायोगं श्रिये तद्योगं रुजां विमुक्तये दुर्गायोगमायुषे मृत्युञ्जययोगं चाह । युक्तमतिरिति । तत्तद्बीजोदितध्यानमाह ॥ ५३ ॥

जप्त्वा मनुं मन्त्रविदिति श्रीयोगं देहि मे इत्यत्र साध्ययोगं चाह ।

अष्टोर्ध्वं शतं हविषा मन्त्रेणाऽनेन नित्यशो जुहुयात् ।
षण्मासादाढ्यतमो भवति नरो नात्र सन्देहः ॥ ५६

शालीभिः शुद्धाभिः प्रतिदिनमष्टोत्तरं शतं जुहुयात् ।
धनधान्यसमृद्धः स्यान्मन्त्री संवत्सरार्द्धमात्रेण ॥ ५७

आज्यैरयुतं जुहुयात् प्रतिमासं प्रतिपदं समारभ्य ।
अतिमहती लक्ष्मीः स्यात्तस्य तु षण्मासतो न सन्देहः ॥ ५८

अरुणैः पुनरुत्पलैः शतं यो मधुराक्तैः प्रजुहोति वत्सरार्द्धम् ।
मनुनाऽप्यमुना शताधिकं स प्रलभेन्मङ्क्षु महत्तराञ्च लक्ष्मीम् ॥ ५९

जातीपलाशकरवीरजवाख्यबिल्व-
व्याघातकेसरकुरण्टभवैः प्रसूनैः ।
एकैकशः शतमथो मधुरत्रयाक्तै-
र्जुह्वन् प्रतिप्रतिपदं श्रियमेति वर्षात् ॥ ६०

खण्डैश्च सप्तदिनमप्यमृताललोत्थै-
र्मन्त्री हुनेद्गुणसहस्रमथो पयोऽक्तैः ।
सम्यक् समर्च्य दहनं त्वचिरेण जन्तु-
श्चातुर्थिकादिविषमज्वरतो वियुञ्ज्यात् ॥ ६१

क्षीरद्रुमत्वगभिषक्कजलैर्यथाव-
त्संपूर्य कुम्भमभिपूज्य कृशानुमत्र ।
जप्त्वा मनुं पुनरमुं त्रिसहस्रमात्रं
सेकक्रिया ज्वरहरी ग्रहवैकृतघ्नी ॥ ६२

पयसि हृदयदघ्ने भानुमालोक्य तिष्ठन्
प्रजपतु च सहस्रं नित्यशो मन्त्रमेनम् ।
स दुरितमपमृत्युं रोगजातञ्च हित्वा
व्रजति नियतसौख्यं वत्सराद्दीर्घमायुः ॥ ६३

उक्तमन्त्रद्वयग्रहणेऽप्ययमेवार्थः ॥ ५४॥५५॥५६॥५७॥५८॥५९॥६० ॥

मन्त्री हुनेद् गुणसहस्रमिति । अमृतबीजयुतत्वमुक्तम् ॥ ६१॥६२॥६३॥६४ ॥

मनुनाऽमुनाऽष्टशतजप्तमथ प्रपिबेज्जलं ज्वलनदीपनकृत् ।
गुरुभुक्तमप्युदरगं त्वमुना परिजापितं पचति कुक्ष्यनलः ॥ ६४

हुनेदरुणपङ्कजैस्त्रिमधुराप्लुतैर्नित्यशः
सहस्रमृतुमासतः पृथुतरा रमा जायते ।
प्रतिप्रतिपदं हुनेदिति बुधोऽथवा संवत्सरं
विनष्टवसुरप्यसौ भवति चेन्दिरामन्दिरम् ॥ ६५

इति श्रीप्रपञ्चसारे षोड़शः पटलः ॥

बुधोऽथवेति । प्रतिपन्मात्रहोमे होमसंख्याधिक्यं सूचितम् ॥ ६५ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
षोड़शः पटलः ।

सप्तदशः पटलः ।

अथ संग्रहेण कथयामि मनुमपि महागणेशितुः ।
यं समवहितधियः सुधियः समुपास्य सिद्धिमधिकां प्रपेदिरे ॥ १

तारः श्रीशक्तिमारावनिगणपतिबीजानि दण्डीनि चोक्त्वा
पश्चाद्विघ्नं चतुर्थ्या वरवरदमथो सर्वयुक्तं जनञ्च ।
आभाष्य क्ष्वेलमेन्तं वशमिति च तथैवाऽऽनयेति द्विठान्तः
प्रोक्तोऽयं गाणपत्यो मनुरखिलविभूतिप्रदः कल्पशाखी ॥ २

ऋषिरपि गणकोऽस्य स्याच्छन्दो निवृदन्विता च गायत्री ।
सकलसुरासुरवन्दितचरणयुगो देवता गणाधिपतिः ॥ ३

प्रणवादिबीजपीठस्थितेन दीर्घस्वरान्वितेन सता ।
अङ्गानि षड्विदध्यान्मन्त्री विघ्नेश्वरस्य बीजेन ॥ ४

समृद्धिमन्त्रानन्तरं महासमृद्धिदस्य विधानं वक्तुमारभते—अथेति । समवहितधियः स्वाश्रमधर्मादप्रमत्ताः सुधियो मन्त्रज्ञा ध्यानविशेषज्ञाः ॥ १॥२॥३ ॥

मन्त्री विघ्नेश्वरस्य इति । अङ्गमन्त्रेषु सर्वज्ञादियोग उक्तः । न्यासविशेषैः मन्त्रात्मत्वमपि सूचितम् । प्रणवपुटितैः पञ्चबीजैरङ्गुलीषु विन्यस्याऽवशिष्टेन करयोः व्याप्य अङ्गान्यङ्गुलीषु विन्यस्य मूलेन देहे त्रिशो व्याप्य प्रणवपुटितं बीजपञ्चकं मूर्धादिषु विन्यस्याऽवशिष्टेन तत्रैव व्याप्य तथैव पञ्चवक्त्रेषु दोःपत्सन्ध्यग्रेषु कटिद्वयांसद्वयहृत्सु च प्रादक्षिण्येन न्यसित्वा पदाष्टकमष्टाधारेषु न्यसेत् । पदचतुर्दशकं चेत् चतुर्दशाधारेषु । नवकं चेत् नवाधारेषु । दशकं चेद् दशाधारेषु । मूलाधार वृषण लिङ्गमूल जठर नाभ्युदर हृदयोरो गललम्बिका भ्रूमध्य ललाटकेशान्त मूर्धानः चतुर्दशाधाराः । वृषणजठरोदरोरोवर्ज्या दशाधाराः । केशान्तवर्ज्या नवाधाराः । ललाटवर्ज्या अष्टाधाराः । बीजषट्कं पदषट्कम् । वरदेत्यन्तं सप्तमम-वशिष्टम् अष्टममित्यष्टपदपक्षः । नवपदपक्षे गणपतये इत्यन्तं सप्तमं वरदान्तमष्टमम् अवशिष्टं नवमम् । दशपदपक्षे सर्वजनं मे इत्यन्तं नवममवशिष्टं दशमम् । चतुर्दशपदपक्षे वरवरदेति च पदद्वयमवगन्तव्यम् । मूर्ध्नि भ्रूमध्याक्षिद्वयास्य करपत्सन्ध्यग्र गलहृत्सु वर्णन्यासः पदन्यासात् पूर्वमेव । मूर्ध्नि भ्रूमध्याक्षिद्वयास्येषु बीजपञ्चकं सर्वजनं मे वशमानय स्वाहेति अनेन सहितं न्यसेत् । तथा करपत्-

मन्दाराद्यैः कल्पकवृक्षविशेषैर्विशिष्टतरफलदैः ।
शिशिरितचतुराशेऽन्तर्बालातपचन्द्रिकाकुले च तले ॥ ५
ऐक्षवजलनिधिलहरीकणजालकवाहिना च गन्धवहेन ।
संसेविते च सुरतरुसुमनःश्रितमधुपपक्षचलनपरेण ॥ ६
रत्नमये मणिवज्रप्रवालफलपुष्पपल्लवस्य सतः ।
महतोऽधस्तादृतुभिर्युगपत्संसेवितस्य कल्पतरोः ॥ ७
सिंहमुखपादपीठगलिपिमयपद्मे त्रिषट्कोणोल्लसिते ।
आसीनस्त्वेकरदो बृहदुदरो दशभुजोऽरुणो गजवदनः ॥ ८
बीजापूरगदेक्षुकार्मुकरुजाचक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः ।
ध्येयो वल्लभया च पद्मकरयाश्लिष्टो ज्वलद्भूषया
विश्वोत्पत्तिविनाशसंस्थितिकरो विघ्नो विशिष्टार्थदः ॥ ९
करपुष्करधृतकलशस्रुतमणिमुक्ताप्रवालवर्षेण ।
अविरतधारां विकिरन् परितः साधकसमयसम्पत्त्यै ॥ १०
मदजललोलुपमधुकरमालां निजकर्णतालताड़नया ।
निर्वासयन् मुहुर्मुहुरमरैरसुरैश्च सेवितो युपगत् ॥ ११
अग्रेऽथ बिल्वमभितश्च रमारमेशौ
तद्दक्षिणे वटजुषौ गिरिजावृषाङ्कौ ।
पृष्ठेऽथ पिप्पलजुषौ रतिपुष्पबाणौ
सव्ये प्रियङ्गुमभितश्च महीवराहौ ॥ १२

सव्यग्रेष्वपि कव्यं सद्वयवृत्स्वपि जानुद्वयगुल्फद्वयनाभिष्वपि स्तनद्वयकण्ठपृष्ठ-ककुत्स्वपि । एष विभूतिन्यासः । पुनः बीजपञ्चकमेव मूर्धभ्रूमध्याक्षिवदनेषु सर्वजनमित्यादि व्यापकत्वेन न्यसेत् । रमारमेशादिकं मूर्धादिपञ्चभूतस्थानेषु नाभितत्पार्श्वकण्ठतत्पार्श्वेषु विघ्नषट्कं सशक्तिकं निधिद्वयं च स्तनद्वयाधः पुनः ब्रह्माण्यादिकमलिकादिषूक्तेषु स्थानेषु च । सामान्यपटलोक्तन्यासाश्च कार्या इति । गं बीजम् । क्लीं शक्तिः ॥ ४ ॥

लिपिमयपद्मे त्रिषडिति । त्रिकोणमध्ये प्रणवे गमिति साध्याख्यादियुतं लिखित्वा श्रीं क्लीं क्लीं ग्लौं बीजैस्तत् संवेष्ट्य षट्कोणेषु बीजषट्कं तदन्तरालेषु

ध्येयौ च पद्मयुगचक्रदरैः पुरोक्तौ
पाशाङ्कुशाख्यपरशुत्रिशिखैरथाऽन्यौ ।
युग्मोत्पलेक्षुमयचापशरैस्तृतीया-
वन्यौ शुकाङ्कुकलमाग्रगदारथाङ्गैः ॥ १३

ध्येयाः षट्कोणास्त्रिषु परितः पाशाङ्कुशाभयेष्टकराः ।
सप्रमदा गणपतयो रक्ताकाराः प्रभिन्नमदविवशाः ॥ १४
अग्रास्त्रावामोदः प्रमोदसुमुखौ च तमभितोऽस्त्रियुगे ।
पृष्ठे च दुर्मुखाख्यस्त्वमुमभितो विघ्नाविघ्नकर्तारौ ॥ १५
सव्यापसव्यभागे तस्य ध्येयौ च शङ्खपद्मनिधी ।
मौक्तिकमाणिक्याभौ वर्षन्तौ धारया धनानि सदा ॥ १६
सिद्धिसमृद्धी चान्या कान्तिर्मदनावती मदद्रवया ।
द्राविणिवसुधाराख्ये वसुमत्यपि विघ्ननिधियुगप्रमदाः ॥ १७
ध्यात्वैवं विघ्नपतिं चत्वारिंशत्सहस्रसंयुक्तम् ।
प्रजपेल्लक्षचतुष्कं चतुःसहस्रञ्च दीक्षितो मन्त्री ॥ १८
दिनमनु सचतुश्चत्वारिंशत्संख्यं सन्तर्पयेद्विघ्नम् ।
उक्तजपान्ते मन्त्री जुहुयाच्च दशांशतोऽष्टभिर्द्रव्यैः ॥ १९
मोदकपृथुकसलाजाः सशक्तवः सेक्षुनारिकेलतिलाः ।
कदलीफलसहितानीत्यष्ट द्रव्याणि संप्रदिष्टानि ॥ २०
अनुदिनमर्चयितव्यो जपता मनुमपि च मन्त्रिणा गणपः ।
प्राक्प्रोक्तपद्मपीठे सशक्तिके सासिकामनौ विधिना ॥ २१

अङ्गषट्कम् अष्टदलेषु पदाष्टकं तद्बहिर्वृत्तत्रये मातृकापाशाङ्कुशार्णान् विलिख्य तद्बहिःभूपुरद्वये आं क्लीं इति लिखेदित्यर्थः ॥ ५—१३ ॥

सप्रमदा इति । सिद्धि समृद्धि कान्ति मदनावती मदद्रवा द्राविणीभिः सहिता इत्यर्थः । वसुधारावसुमत्यौ निध्योः शक्तिः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

दीक्षितो मन्त्रीति । चतुर्थीं परित्यज्य सम्बुद्धिस्वीकार उक्तः । मिथुन-मन्त्राणां दशांशजपश्च उक्तः । मन्त्री जुहुयादित्यपि तथा ॥ १८ ॥ १९ ॥ २० ॥

जपता मनुमपि मन्त्रिणेति । विभूतिमन्त्रजप उक्तः । पूर्वोक्तार्चनामन्त्राश्च । आसिकामनुरासनमन्त्रः । विधिनेति । इक्षुसमुद्रादियोगः ॥ २१॥२२॥२३॥२४ ॥

तीव्रा ज्वालिनी नन्दा सभोगदा कामरूपिणी चोग्रा ।
तेजोवती च स[नि]त्या संप्रोक्ता विघ्ननाशिनी नवमी ॥ २२
सर्वयुतं शक्तिपदं प्रोक्त्वा कमलासनाय नम इति च ।
आसनमन्त्रः प्रोक्तो नवशक्त्यन्ते समर्चयेदमुना ॥ २३
आद्या मिथुनैरावृतिरपरा सनिधिभिरपि च षड्विघ्नैः ।
अङ्गैरन्या मातृभिरपरेन्द्राद्यैश्च पञ्चमी पूज्या ॥ २४
दीक्षाभिषेकयुक्तः प्रजपेत् संपूजयेदिति गणेशम् ।
अभिधीयतेऽस्य च पुनर्गुर्वादेशेन मन्त्रिणो दीक्षा ॥ २५
मध्ये च दिग्दलानां चतुष्टयाग्रे प्रविन्यसेत् कलशान् ।
क्षीरद्रुबिल्वरोहिणपिप्पलफलिनीत्वगुद्भवैः क्वाथैः ॥ २६
संपूरयेद्यथावत् क्रमात् समावाह्य गणपतिमिथुनानि ।
अभ्यर्च्य चोपचारैर्हुत्वा विधिवत् पुनः समभिषिञ्चेत् ॥ २७
इति जपहुतार्चनाद्यैः सिद्धो मन्त्रेण कर्म कुर्वीत ।
अष्टद्रव्यैर्वाऽन्यैर्हुनेच्च तत्तत्प्रयोजनावाप्त्यै ॥ २८

स्वर्णाप्त्यै मधुना च गव्यपयसा गोसिद्धये सर्पिषा
लक्ष्म्यै शर्करया जुहोतु यशसे दध्ना च सर्वर्द्धये ।
अन्नैरन्नसमृद्धये च सतिलैर्द्रव्याप्तये तण्डुलै-
र्लाजाभिः पतये कुसुम्भकुसुमैः साम्राज्यारिभिर्वाससे ॥ २९
पद्मैर्भूपतिमुत्पलैर्नृपवधूं तन्मन्त्रिणः कौरवै-
रम्बुत्यादिसमिद्भिरग्रजमुखान् वर्णान् वधूः पिष्टजैः ।
पुत्तल्यादिभिरन्वहं च वशयेज्जुह्वन्नवाप्तये
लोणैर्वृष्टिसमृद्धये च जुहुयान्मन्त्री पुनर्वेतसैः ॥ ३०
मन्त्रेणाऽथ पुराऽमुनैव चतुरावृत्त्या समातर्प्य च
श्रीशक्तिस्मरभूविनायकरतीर्नाम्नैव बीजादिकम् ।

गुर्वादेशेन मन्त्रीति । दीक्षाया असाधारण्यमाह ॥ २५ ॥
यथावत् क्रमादिति । कलावाहनादिकम् । विधिवदित्यभिषेकक्रमम् ॥२६॥२७॥
मन्त्री पुनर्वेतसैरित्यमृतबीजयोगमाह ॥ २८ ॥ २९ ॥ ३० ॥

आमोदादिनिधिद्वयञ्च सचतुःपूर्वं चतुर्वारकं
मन्त्री तर्पणतत्परोऽभिलषितं संप्राप्नुयान्मण्डलात् ॥ ३१

बीजानन्तरञ्चतुराहुतितर्पणमाह—मन्त्रेणाऽथेति। मन्त्रेणेति। मूलमन्त्र उक्तः। अथ अनन्तरम्। पुरा शक्तिमन्त्रेणेत्यर्थः। चतुराहुत्येति जले पीठमूर्तिपूजादिपूर्वकं देवमावाह्य निवेद्यान्तानुपचारान् दत्त्वा निवेद्यकाले साष्टद्रव्यत्रिमधुररूपेणाऽमृतबीजेनाऽमृतीकृतेन पीठमन्त्रैः सकृत् सकृत् सन्तर्प्य मूलेन चतुःपूर्वं चतुर्वारं देवाय सन्तर्प्य पुनरपि मूलेन चतुर्वारं देवाय सन्तर्प्य विभूतिमन्त्रेण देवीं चतुर्वारं तर्पयेत्। एवं वक्ष्यमाणमन्त्रैरपि मूलेन देवाय चतुर्वारपूर्वकं तर्पयेदिति भावः। श्री शक्ति स्मर भू विनायक रतीरिति। श्रीबीजादिबीजचतुष्टयसंबन्धा विनायकाः स्वामिनः रतयश्च ते तथोक्ताः। रमारमेशादय इत्यर्थः। तान् नान्नैव स्वस्वबीजादिकं चतुःपूर्वं चतुर्वारं तर्पयेत्। श्रीं रमारमेशौ तर्पयामि। ह्रीं उमामहेश्वरौ तर्पयामि। क्लीं रतिपुष्पबाणौ तर्पयामि। ग्लौं महीवराहौ तर्पयामीति मन्त्राः। तत ईशानभागे स्वबीजसम्बन्धि मिथुनतर्पणमिति सूचयितुञ्च विनायकरतिग्रहणम्। गं पुष्टिविनायकौ तर्पयामीति तन्मन्त्राङ्गं बीजदेवतातर्पणमपि चतुःपूर्वं कार्यम्। पुनरामोदादिकं निधिद्वयं च चतुःपूर्वकं चतुर्वारं सन्तर्प्य। मूलेन देवाय चतुर्वारं तर्पयेत्। एवं तर्पिते चतुर्विंशत्यधिकं शतं भवति।

अथ प्रकारान्तरेण तर्पणमुच्यते—मन्त्रेणेति। देवस्य मूलमन्त्रेणेत्यर्थः। तेन च दशधा विभज्य तर्पणीयम्। अथानन्तरम्। पुरा शरीरेण देवस्य शरीरसम्बन्धिभिः बीजापूरादिभिरित्यर्थः। बीजापूरादिरत्नकलशान्तैर्मन्त्रैरेकादशभिः बीजापूरं तर्पयामीत्याद्यैः तर्पयेदित्यर्थः। तत एकविंशन्मन्त्रा आगताः। अमुनेति। क्षिप्रमन्त्रे विघ्नादिदशनामयुतेन मूलेनेत्यर्थः। गणपत इत्यस्मात् पूर्वं तु योगः। तत एकविंशन्मन्त्रा आगताः। श्रीशक्तिस्मरभूविनायकरतीर्नान्नैव बीजादिकमित्यष्टौ मन्त्राः कथिताः। तत एकोनचत्वारिंशन्मन्त्रा आगताः। आमोदादिनिधिद्वयं चेति। षोड़शमन्त्रा उक्ताः। ततः पञ्चपञ्चाशन्मन्त्राः सिद्धाः। तैश्चतुःपूर्वं चतुर्वारं सन्तर्प्य मूलेन चतुर्वारं तर्पयेत्। आरम्भकाल एव वा मूलेन चतुर्वारं तर्पयेत्। ततश्चतुश्चत्वारिंशदधिकं चतुःशतं भवति। ततोऽवशिष्टानामावरणानामेकैकवारं सन्तर्प्य पूजाशेषं समापयेदिति।

अथवा सशक्तिकं निधिद्वयं परित्यज्य मूलं विभूतिमन्त्रं पुष्टिविनायकमन्त्रौ च स्वीकृत्य प्रकृतां संख्यां पूरयेत्। अथवा सर्वमप्येतत् स्वीकृत्य षट्सप्तत्यधिकं

अथ गजलिप्सुर्नृपतिर्गजवनमध्ये प्रसाधयेद्वारि ।
तन्निकटे सुविशालं चतुरस्रं कारयेच्च गृहवर्यम् ॥ ३२
परिवीतदृढावरणं तच्च चतुर्द्वारतोरणोल्लसितम् ।
तस्मिन्मण्डपवर्ये चतुरस्रामुन्नतां स्थलीं कृत्वा ॥ ३३
उत्तरभागे तस्याः कुण्डं रचयेद्यथा पुरा तत्र ।
चापजहरिभवमेषजचक्रप्रोक्तानथाऽक्षरान्मन्त्री ॥ ३४
ऊर्ध्वादिमेखलासु क्रमेण विलिखेन्निजेष्टसमवाप्तैः ।
संप्रोक्तलक्षणयुतं प्रविरचयेन्मण्डलं स्थलीमध्ये ॥ ३५
आवाह्य विघ्नेश्वरमर्चयित्वा प्रागुक्तया तन्त्रविधानकृप्त्या ।
निवेद्य चाथो सह भक्ष्यलेह्यैः प्राज्यैश्च साज्यैरपि भोज्यजातैः ॥ ३६
आधाय वैश्वानरमत्र कुण्डे समर्च्य मन्त्रैः क्रमशः कृशानोः ।
तैरेव पूर्वं जुहुयाद्घृतेन मन्त्री समृद्ध्या च ततस्त्रिवारम् ॥ ३७
तारेण लक्ष्म्यद्रिसुतास्मरक्ष्माविघ्नेशबीजैः क्रमशोऽनुवद्यैः ।
पदत्रयेणापि च मन्त्रराजं विभज्य मन्त्री नवधा जुहोतु ॥ ३८
पुनः समस्तेन च मन्त्रवर्णसंख्यं प्रजुह्वन्नपि सर्पिषैव ।
पूर्वप्रदिष्टैर्जुहुयादथाऽष्टद्रव्यैः प्रसिक्तैर्मधुरत्रयेण ॥ ३९
सचतुश्चत्वारिंशत्सहस्रसंख्यैश्चतुःशतैश्चतुर्भिश्च ।
दशकैश्चतुर्भिरपि हुताच्चतुश्चत्वारिंशद्दिनैरतो हि ॥ ४०
करिकलभाः करिणीभिः संपाद्य[त्य]न्तेऽवटेऽत्र गणपतिना ।
प्रतिदिनमभ्यवहार्यं च विप्रान् संवर्धितस्तदाशीर्भिः ॥ ४१

चतुःशतं तर्पयेत् । मन्त्री तर्पणेति । तर्पणमन्त्रा उक्ताः ॥ ३१ ॥

वारि अवटम् । चापजेति । चापादिवृश्चिकान्तराश्यक्षराणि ऊर्ध्वमेखलायां सिंहादिकर्कटान्तराश्यक्षराणि मध्यमेखलायां मेषादिमीनान्तराश्यक्षराणि अधोमेखलायां लिखेदित्यर्थः । मन्त्रीति । तत्तद्राशिनामसंयोगः सूचितः ॥ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

समर्च्य मन्त्रैः क्रमशः कृशानोरिति । षष्ठपटलोक्तमूलजिह्वाष्टमूर्तिमन्त्रैरित्यर्थः । मन्त्री समृद्ध्या चेति । अग्निप्रकरणोक्तसमृद्धिमन्त्रत्रयेणेत्यर्थः ॥ ३६॥३७ ॥

मन्त्री नवधेति । विभूतिमन्त्रेणाऽपि नवधा होम उक्तः ॥ ३८— ४२ ॥

तेषां मातङ्गानां दद्यात् पञ्चाशद्दक्षिणां गुरवे ।
तद्विक्रीतं वसु वा प्रसादितायाऽथ तद्दशांशं वा ॥ ४२
मिथुनानां गणपानां निध्योश्च तथाऽङ्गमातृलोकेशानाम् ।
मन्त्रैर्घृतेन हुत्वाऽभ्यर्च्य च होमं समाप्य सम्यङ्मन्त्री ॥ ४३
पुनरुद्धृत्य निवेद्यादिकं समभ्यर्च्य गणपतिं सावरणम् ।
उद्वास्य स्वे हृदये विहरेदित्यर्चनाक्रमो निर्दिष्टः ॥ ४४
प्रोक्तस्त्वेवं दशभुजमनुः संग्रहेणाऽत्र भक्तो
दीक्षां लब्ध्वा विधिवदभिजप्याथ हुत्वाऽर्चयित्वा ।
नत्वा नुत्वा दिनमनु तथा तर्पयित्वा स्वकामान्
लब्ध्वा चान्ते व्रजति मुनिभिः प्रार्थनीयं पदं तत् ॥ ४५

स्मृतिपीठः पिनाकी सानुग्रहो बिन्दुसंयुतः ।
बीजमेतत् भुवः प्रोक्तं संस्तम्भनकरं परम् ॥ ४६
च-तुरीयो विलोमेन तारादिर्बिन्दुसंयुतः ।
वैघ्नो मन्त्रो हृदन्तोऽर्चाविधौ होमे द्विठान्तकः ॥ ४७
गणकः स्याद्दृषिश्छन्दो निवृद्विघ्नोऽस्य देवता ।
बीजेन दीर्घयुक्तेन दण्डिनाऽङ्गक्रियेरिता ॥ ४८

रक्तो रक्ताङ्गरागांशुककुसुमयुतस्तुन्दिलश्चन्द्रमौलि-
नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणो बीजपूराक्षनासः ।
हस्ताग्राक्लृप्तपाशाङ्कुशरदवरदो नागवक्त्रोऽहिभूषो
देवः पद्मासनो वो भवतु सुरनतो भूतये विघ्नराजः ॥ ४९

दीक्षितः प्रजपेल्लक्षचतुष्कं प्राक्समीरितैः ।
जुहुयादष्टभिर्द्रव्यैर्यथापूर्वं दशांशतः ॥ ५०
पीठे तीव्रादिभिः पद्मकर्णिकायां विनायकम् ।
आवाह्य पूजयेद्दिक्षु चतुर्ष्वपि यजेत् पुनः ॥ ५१
गणाधिपं गणेशञ्च गणनायकमेव च ।
गणक्रीडं कर्णिकायामङ्गैः किञ्जल्कसंस्थितैः ॥ ५२

मन्त्री पुनरुद्धृत्येति । तत्र तत्रापेक्षिता मन्त्रविशेषाः सूचिताः ॥४३—४६॥

वक्रतुण्डैकदंष्ट्रौ च महोदरगजाननौ ।
लम्बोदराख्यविकटौ विघ्नराड्धूम्रवर्णकौ ॥ ५३
समर्चयेन्मातृवर्गं बाह्ये लोकेश्वरानपि ।
इति प्रोक्ता संग्रहेण गाणेशीयसमर्चना ॥ ५४
नारिकेलान्वितैर्मन्त्री शक्तुलाजतिलैर्हुनेत् ।
आरभ्याच्छां प्रतिपदं चतुर्थ्यन्तं चतुःशतम् ॥ ५५
दिनशः सर्ववश्यं स्यात् सर्वकामप्रदं नृणाम् ।
तिलतण्डुलकैर्लक्ष्मीवश्यकृच्च यशस्करम् ॥ ५६
मधुरत्रयसिक्ताभिर्लाजाभिः सप्तवासरम् ।
जुहुयात् कन्यकार्थी वा कन्यका वा वरार्थिनी ॥ ५७
चतुर्थ्यां नारिकेलैस्तु होमः सद्यः श्रियावहः ।
हविषा घृतसिक्तेन सर्वकार्यार्थदो हुतः ॥ ५८
दध्यक्तलोणमुद्राभिर्हुनेन्निशि चतुर्दिनम् ।
इष्टार्थसिद्ध्यै मतिमान् सद्यः संवादसिद्धये ॥ ५९
ईदृशं गणपं ध्यात्वा मन्त्री तोयैः सुधामयैः ।
दिनादौ दिनशस्तस्य तर्पयेन्मस्तके सुधीः ॥ ६०
चत्वारिंशच्चतुःपूर्वं तत्पूर्वं वा चतुःशतम् ।
चत्वारिंशद्दिनात्तस्य काङ्क्षिता सिद्धिरेष्यति ॥ ६१
नवनीते नवे लिख्यादनुलोमविलोमकम् ।
उदरस्थितसाध्याख्यं तद्बीजं तत्प्रवेष्टितम् ॥ ६२

बीजस्य अं बीजम् । गं शक्तिः ॥ ४७—५५ ॥

नारिकेलान्वितैः मन्त्रीति । शक्तियोग उक्तः ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

मतिमानिति । विपरीतबुद्धिं पाशेन बद्ध्वा अङ्कुशेनानयन् ध्यायेत् । शक्तिबीजं च योजयेदित्युक्तम् । ईदृशमित्युक्तलक्षणमित्यर्थः । मन्त्री तोयैरिति । पीठावरणमन्त्रैः सकृत् सकृत् तर्पणमुक्तम् । मस्तके प्रथमतश्चतुर्वारं तर्पयेत् । सुधीरिति । चतुर्वारतर्पणे देवस्य बोधनप्रतिपत्तिरुक्ता ॥ ५९ ॥ ६० ॥ ६१ ॥

अनुलोमविलोमगमिति । कर्णिकायां षट्कोणमध्ये परस्परविमुखं गकारद्वयमालिख्य मध्ये बिन्दुभागयोः साध्यादिकं विलिख्य बीजैः संवेष्ट्य षट्कोणेष्वङ्ग-

समीरणं प्रतिष्ठाप्य जप्त्वाऽष्टशतसंख्यकम् ।
तूष्णीं प्रभक्षयेदेतत् सप्तरात्राद्वशीकरम् ॥ ६३
अन्यासनोऽथ सूक्ष्मो लोहितगोऽग्निः पुनः स एव स्यात् ।
सादान्ते नायार्णौ नत्यन्तो मनुरयं स्वबीजाद्यः ॥ ६४
ऋषिदेवते तु पूर्वे छन्दस्तु विराडमुष्य संप्रोक्तम् ।
बीजेन दीर्घभाजा कथितोऽङ्गविधिः क्रमेण बिन्दुमता ॥ ६५
धृतपाशाङ्कुशकल्पलतिकास्वरदश्च बीजपूरयुतः ।
शशिशकलकलितमौलिस्त्रिलोचनोऽरुणतनुश्च गजवदनः ॥ ६६
भासुरभूषणदीप्तो बृहदुदरः पद्मविष्टरो ललितः ।
ध्येयोऽनायतदोःपत्सरसिरुहः सम्पदे सदा मनुजैः ॥ ६७
दीक्षायुक्तः प्रजपेल्लक्षं मनुमेनमथ तिलैरयुतम् ।
त्रिमधुरयुक्तैर्जुहुयात् पूर्वोक्तैर्वाथवाऽष्टभिर्द्रव्यैः ॥ ६८
विघ्नविनायकवीराः सशूरवरदेभवक्त्रैकरदाः ।
लम्बोदरश्च मात्रङ्गाबृत्त्योरन्तराथ लोकेशाः ॥ ६९
पूज्याः सितघृतपायसहवनात्सञ्जायते महालक्ष्मीः ।
केवलघृतहुतमुदितो विघ्नः सद्यो वशीकरोति जगत् ॥ ७०
एकमपि नारिकेलं सचर्मलोष्टेन्धनं हुनेन्मन्त्री ।
दिनशश्चत्वारिंशद्दिनतः स तु वाञ्छितार्थमभ्येति ॥ ७१
सपृथुकशक्तुकलाजातिलैरभीष्टार्थसिद्धये जुहुयात् ।
सापूपनारिकेलेक्षुकदलीभिस्तथा समधुराभिः ॥ ७२

षट्कं लिखित्वा केसरेषु स्वरान् दलेषु गायत्रीवर्णत्रयं बाह्ये व्यञ्जनावेष्टितं चतुरस्रद्वये भूबीजं लिखित्वा यन्त्रसामान्यमन्त्रांश्च लिखित्वा प्राणप्रतिष्ठादिकं कुर्यादित्यर्थः ॥ ६२॥६३ ॥

क्षिप्रस्य गं बीजम्। नमः शक्तिः। कर्णिकायां षट्कोणे बीजसाध्यादिकं लिखेत्। तेनैव वेष्टयेत्। केसरेषु स्वरान् क्षिप्रेति पूर्वदले प्रप्र इत्याग्नेये प्रसा इति दक्षिणे इत्यादिक्रमेण लिखित्वा तद्बहिः गायत्रीव्यञ्जनादिकं पूर्ववल्लिखेत्। एकदंष्ट्राय विद्महे वक्रतुण्डाय धीमहि तन्नो विघ्नः प्रचोदयादिति गायत्री। अस्मिन् यन्त्रे देवं पूजयेत् ॥ ६४—७० ॥

अष्टभिरेतैर्विहितो होमः सर्वार्थसाधको भवति ।
दिनशः सघृताग्नहुतो गृहयावाप्रापको गृहस्थानाम् ॥ ७३
अन्वहमङ्गामादौ गणपं सन्तर्पयेच्चतुःपूर्वम् ।
चत्वारिंशद्वारं सशुद्धजलैरिन्दिराप्तये मन्त्री ॥ ७४
समहागणपतियुक्तैर्विघ्नाद्यैर्दशभिराह्वयैर्दिनशः ।
तर्पणपूजाहुतविधिरपि वाञ्छितसिद्धिदायको भवति ॥ ७५
बिम्बादम्बुदवत् समेत्य सवितुः सोपानके राजतै-
स्तोयं तोयजविष्टरं ध्रुतलतादन्तं समाशाङ्कुशम् ।
नासां साध्यनृके निधाय सुधया तद्रन्ध्रनिर्यातया
सिञ्चन्तं पुनरन्वहं गणपतिं स्मृत्वाऽमृतैस्तर्पयेत् ॥ ७६
प्राग्भाषितानपि विधीन् विधिवद्विदध्या-
न्मन्त्री विशेषविदथाऽन्वहमादरेण ।
एकत्र वा गणपतौ मनुजाः स्वरुच्या
नामानुरूपमनुमेनममी भजन्तु ॥ ७७
इति जपहुतपूजातर्पणैर्विघ्नराजं
प्रभजति मनुजो यस्तस्य सिद्धिर्विशाला ।
भवति सधनधान्यैः पुत्रमित्रादियुक्ता
विगतसकलविघ्ना विश्वसंवादिनी च ॥ ७८

इति श्रीप्रपञ्चसारे सप्तदशः पटलः ।

पुनेन्मन्त्रोति । श्रीबीजादियोग उक्तः ॥ ७१ ॥ ७२ ॥ ७३ ॥

इन्दिराप्तये मन्त्रोति । इन्दिरायोगः । दशभिरिति । त्रिप्रेण सहाभिधान-दशकं भवति ॥ ७४ ॥ ७५ ॥

तर्पणप्रकारमाह—बिम्बादम्बुदवदिति ॥ ७६ ॥

विधिवद् विदध्यादिति । महागणपतिप्रकरणोक्तध्यानादिपूर्वकं विदध्यादित्यर्थः । मन्त्रोति । अत्रापि बीजषट्कादियोग उक्तः । विशेषविदिति । कार्यानुगुणबीजादित्वमिहोक्तम् । मन्त्रान्तरेऽपि कुर्यादित्याह—एकत्र वेति । अनेकमन्त्र कथनतात्पर्यमाह—नामानुरूपेति ॥ ७७ ॥ ७८ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे सप्तदशः पटलः ।

अष्टादशः पटलः ।

अथ मन्मथमन्त्रविधिं विधिना कथयामि सहोमविधिं सजपम् ।
मथनस्य पुरामपि मोहकरं व्यथिताखिलसिद्धसुरादिगणम् ॥ १
अजकलाप्रथमावनिशान्तिभिर्युतसुधाकरखण्डविकाशिभिः ।
निगदितो मनुरेष मनोभुवः सकलधर्मसुखार्थयशोवहः ॥ २
ऋष्यादिकाश्च सम्मोहनगायत्रीमनोभुवः प्रोक्ताः ।
बीजेन दीर्घभाजा विहितान्यङ्गान्यमुष्य जातियुजा ॥ ३
अरुणमरुणवासोमाल्यदामाङ्गरागं
स्वकरकलितपाशं साङ्कुशास्त्रेषुचापम् ।
मणिमयमुकुटाद्यैर्दीप्तमाकल्पजातै-
ररुणनलिनसंस्थं चिन्तयेदङ्गयोनिम् ॥ ४
तरणिलक्षममुं मनुमादरात् समभिजप्य हुनेच्च दशांशतः ।
तदनु किंशुकजैः प्रसवैः शुभैस्त्रिमधुरार्द्रतरैर्निजसिद्धये ॥ ५
मोहनी क्षोभणी त्रासी स्तम्भन्याकर्षणी तथा ।
द्राविण्याह्लादिनी क्लिन्ना क्लेदिनी स्मरशक्तयः ॥ ६
आशान्तिद्वयवामश्रुतिसर्गान् द्वयुगकलबलैश्च ससैः ।
शोषणमोहनसन्दीपनतापनमादनान् यजेत् क्रमशः ॥ ७
अनङ्गरूपा सानङ्गमदनाऽनङ्गमन्मथा ।
अनङ्गकुसुमाऽनङ्गकुसुमातुरसंज्ञका ॥ ८
अनङ्गशिशिराऽनङ्गमेखलाऽनङ्गदीपिका ।
अङ्गाशापालयोर्मध्ये बाणानङ्गाद्वतीर्यजेत् ॥ ९
आलिख्यात् कर्णिकायामनलपुरयुगे मारबीजं ससाध्यं
तद्रन्ध्रेष्वङ्गषट्कं बहिरपि गुणशो मारगायत्रिवर्णान् ।

पूर्वमन्त्रे प्रस्तुतस्य कामप्रधानत्वेन च गतमन्त्रसदृशस्य काममन्त्रस्य विधिं वक्तुमारभते—अथ मन्मथेति ॥ १ ॥

कं बीजम् । ईं शक्तिः ॥ २—१५ ॥

मालामन्त्रं दलाग्रेष्वपि गुहमुखशः पार्थिवास्त्रिष्वनङ्गं
कुर्याद्यन्त्रं तदेतद्भुवनमपि वशे का कथा मानवेषु ॥ १०
प्रोक्त्वाऽथ कामदेवाय विद्महे तदनु पुष्पबाणाय ।
तथा धीमह्यन्ते तन्नोऽनङ्गः प्रचोदयाच्च गायत्री ॥ ११
नत्यन्ते कामदेवाय चोक्त्वा सर्वजनं वदेत् ।
प्रियायेति तथा सर्वजनसंमोहनाय च ॥ १२
वीप्सयित्वा ज्वलपदं प्रज्वलञ्च प्रभाषयेत् ।
पुनः सर्वजनस्येति हृदयं मम चेत्यथ ॥ १३
वशमुक्त्वा कुरु वीप्सा कथयेद्वह्निवल्लभाम् ।
प्रोक्तो मदनमन्त्रोऽष्टचत्वारिंशद्भिरक्षरैः ॥ १४
इति यन्त्रकृप्तकलशो बहुशः कृतमं नरं न परिमोहयति ।
प्रमदावनीश्वरसभानगरादिकमीश्वरानपि वशीकुरुते ॥ १५
वक्ष्ये विधानमन्यन्मनोभवस्याऽथ मोहनं जगतः ।
येनार्चितः स देवो वाञ्छितमखिलं करोति मन्त्रविदाम् ॥ १६
अमृतोद्भवो मकरकेतनः सङ्कल्पजन्माह्वयाक्षतरूपौ ।
इक्षुधनुर्धरपुष्पशराख्यावङ्गानि च वह्निजायान्तानि ॥ १७
अरुणतरवसनमाल्यानुलेपनाभरणमिक्षुशरासनधरम् ।
न्यस्तशरबीजदेहो ध्यायेदात्मानमङ्गजं रुचिरम् ॥ १८
अङ्गबाणावृतेरूर्ध्वं पूज्याः षोड़श शक्तयः ।
युवतिर्विप्रलम्भा च ज्योत्स्ना सुभ्रूर्मदद्रवा ॥ १९
सुरता वारुणी लोला कान्तिः सौदामिनी तथा ।
कामच्छत्रा चन्द्रलेखा शुकी च मदनाह्वया ॥ २०
योनिर्मायावती चेति शक्तयः स्युर्मनोभुवः ।
शोको मोहो विलासश्च विभ्रमो मदनातुरः ॥ २१
अपत्रपो युवा कामी चूतपुष्पो रतिप्रियः ।
ग्रीष्मस्तपान्त ऊर्जश्च हेमन्तः शिशिरो मदः ॥ २२

करोति मन्त्रविदामिति । इक्षोमिति मन्त्र उक्तः ॥ १६—२६ ॥

चतुर्थ्यामाहृतौ पूज्याः स्युर्मारपरिचारकाः ।
परभृत्सारसौ चैव शुकमेघाह्वयौ तथा ॥ २३
अपाङ्गभ्रूविलासौ च हावभावौ स्मरप्रियाः ।
माधवी मालती चैव हरिणाक्षी मदोत्कटा ।
एताश्चामरहस्ताः स्युः पूज्याः कोणेषु संस्थिताः ॥ २४
हृल्लेखया स्वनाम्ना च शक्त्यादीनां समर्चनम् ।
इन्द्राद्यैः सप्तमी पूज्या स्मरार्चाविधिरीदृशः ॥ २५
मदनविधानमितीत्थं प्रोक्तं योऽनेन पूजयेद्विधिना ।
स तु सकललोकपूज्यो भवेन्मनोज्ञश्च मन्दिरं लक्ष्म्याः ॥ २६
विलसदहङ्कारतनुर्मनःशिवो विभ्रमास्पदीभूतः ।
बुद्धिशरीरां नारीं नरः सदा चित्तयोनिमधिगच्छेत् ॥ २७
इति मदनयोगकृप्ता यो रमयेन्नित्यशो निजां वनिताम् ।
स तु भुक्तिमुक्तिगामी वनिताजनहृदयमोहनो भवति ॥ २८
आत्मानं मदनं ध्यायेदाशुशुक्षणिरूपकम् ।
तद्बीजाग्रं शिवज्वालातनुं तन्वीतनुं तथा ॥ २९
सुधामयीञ्च तद्योनिं नवनीतमयीं स्मरेत् ।
संगच्छेच्च शिवज्वालालीढं तद्धृदयादिकम् ॥ ३०

विलसदहङ्कारतनुरिति । समनीपर्यन्तं व्याप्याहङ्कारतनुः समनीस्थक्रिया शक्त्यात्मकसूर्यशरीरस्थ इत्यर्थः । मनोऽध्यात्ममवस्थितं परिच्छिन्नं शिवो लिङ्गं यस्य स तथोक्तः । तात्कालिकं शिवं विशिनष्टि—विभ्रमेति । विविधं भ्रमणं विभ्रमः । समन्यामेव ज्ञानशक्त्यात्मकः सोमांशः पत्न्याः शरीरं कल्पनीयमित्याह—बुद्धीति । चित्ताध्यात्मपरिच्छिन्नं योनिर्यस्या सा तथोक्ता । तामधिगच्छेदिति । अधोऽपहासं कुर्यादित्यर्थः ॥ २७ ॥

एवं विदुषोऽधोऽपहासकर्तुः फलमाह—इतीति ॥ २८ ॥

अहङ्कारशब्देनाऽग्न्यात्मा सूर्यो विवक्षित इत्येतदाह—आत्मानमिति । मदनं मदनबीजात्मकमित्यर्थः । मदनाकारमिति चार्थः । तद्बीजाग्रं मदनबीजाग्रं बिन्दुरूपं शिवज्वालातनुं लिङ्गलक्षणज्वालाशरीरं ध्यायेत् । तन्वीतनुं पत्नीशरीरम् । सुधामयीं चन्द्रमयीं ध्यायेत् । शिवज्वालालीढं तद्धृदयादिकं यथा

आलिङ्गेदग्निसंस्पर्शद्रुतं तद्रूपकामृतम् ।
रसनाशिखयाकर्षेत् तद्दन्तरसनामृतम् ।
कुसुमास्त्रधिया बाहौ स्पृशेत् कररुहैरपि ॥ ३१
हानिं न कुर्याज्जीवस्य मन्त्री विशदमानसः ।
रतावथोऽधोमध्योर्ध्वक्रमेणैवं समाहितः ॥ ३२
निजां प्रियां भजेदेवं सा मारशरविह्वला ।
छायेवाऽनुगता तस्य भवेदपि भवान्तरे ॥ ३३
साध्याख्याकामवर्णैः प्रतिपुटितलसत्कर्णिकं पत्रराज-
त्तारर्त्विक्पक्षजाष्टादशसमिदृतुगण्डान्तगान्ताक्षराढ्यम् ।
आशाशूलाङ्कितं तद्विपतिरिपुदले सम्यगालिख्य सेरं
मारं जाप्त्वाऽस्य यामाशयति वशगता सा भवेत् सद्य एव ॥ ३४
हंसारूढो मदनस्त्रैलोक्यक्षोभको भवेदाशु ।
दु[ह]युतो रञ्जनकृत् स्याज्जीवोपेतस्तथाऽऽयुषे शस्तः ॥ ३५
तारयुजा त्वमुनाऽग्नौ हुत्वा सम्पातितेन चाज्येन ।
सम्भोजयेत् पतिं स्वं वनिता स नितान्तरञ्जितो भवति ॥ ३६

भवति तथा संगच्छेदिति । क्रियाविशेषणमेतत् ॥ २८ ॥ ३० ॥

आलिङ्गेदग्निसंस्पर्शद्रुतं तद्रूपकामृतमिति । स्वलिङ्गाग्निसंस्पर्शेन द्रुतं द्रवीभूतं तत्तद्रूपकममृतं यथा भवति तथाऽऽलिङ्गेदित्यर्थः ॥ ३१ ॥

हानिं न कुर्याज्जीवस्य इति । सहसा रेतोविसर्गं न कुर्यादित्यर्थः । तदुपायं मन्त्रध्यानं च सूचयति—मन्त्री विशदमानस इति । सोष्मणो घोषवतो नादवतो ओंकारस्य बिन्द्वाद्युन्मन्यन्तमात्रायुतस्योच्चारणमुपाय इत्यर्थः । ह्रस्व-मध्यमातिप्रमाणलिङ्गसाध्या रतयोऽधोमध्यमोर्ध्वरतय इत्यवगन्तव्यम् ॥ ३२॥३३ ॥

प्रयोगयन्त्रमाह—साध्याख्येति । तारः ईकारः । ऋत्विक् षोड़शस्वरः । पक्षः पञ्चदशस्वरः । जाष्टादशो मकारः । समिदेकविंशवर्णः ङकारः । ऋतुः षष्ठस्वरः । गण्डान्त एकारः । गान्तो घकारः । एतान् पत्रेषु लिखेत् । आशाशूलाङ्कित-मिति । पत्राग्रेषु त्रिशूलान् रचयेदित्यर्थः । सम्यगिति । यन्त्रहृदयादिकं सूचितम् ॥ ३४ ॥ ३५ ॥

तारयुजेति । ईकार एव भवति ॥ ३६ ॥ ३७ ॥ ३८ ॥

दध्यक्ताभिर्जुहुयाल्लाजाभिः कन्यकां समाकाङ्क्षन् ।
कन्याऽपि वरं लभते विधिना नित्यानुरक्तममुनैव ॥ ३७
अभिनवैः सुमनोभिरशोकजैर्दधियुतैर्विहिता हवनक्रिया ।
परमवश्यकरी परिकाङ्क्षितामभिवहेदचिरादिव कन्यकाम् ॥ ३८
अभीष्टदायी स्मरणादपि स्मरस्तथा जपादर्चनया विशेषतः ।
प्रसादतोऽस्याखिललोकवर्तिनश्चिराय वश्याश्च भवन्ति मन्त्रिणः ॥ ३९
छन्दामध्यगताः षण्णायगोव्यर्णा यल्लमध्यगाः ।
गोपीजनवकाराः स्युर्भाय स्वाहा स्मरादिकाः ॥ ४०
ऋषिश्च नारदोऽस्य स्याद्गायत्रं छन्द उच्यते ।
मन्त्रस्य देवता कृष्णस्तदङ्गविधिरुच्यते ॥ ४१
मूलमन्त्रचतुर्वर्णचतुष्केण द्विकेन च ।
प्रोक्तान्यङ्गानि भूयोऽमुं चिन्तयेद्देवकीसुतम् ॥ ४२
अव्यान्मीलत्कलापद्युतिरहिरिपुपिच्छोल्लसत्केशजालो
गोपीनेत्रोत्पलाराधितललितवपुर्गोपगोवृन्दवीतः ।
श्रीमद्वक्त्रारविन्दप्रतिहसितशशाङ्काकृतिः पीतवासा
देवोऽसौ वेणुवाद्यक्षपितजनधृतिर्देवकीनन्दनो वः ॥ ४३
अयुतद्वितयावधिर्जपः स्यादरुणैरम्बुरुहैर्हुनेद्दशांशम् ।
मुरजिद्विहिते तु पीठवर्ये दिनशो नन्दसुतः समर्चनीयः ॥ ४४
अङ्गाशेड्वज्रादयैः परिपूज्य च पायसेन सुसितेन ।
हैयङ्गवीनकदलीफलदधिभिः प्रीणयेच्च गोविन्दम् ॥ ४५
जुहुयाद्दुग्धहविर्भिर्विमलैः सर्पिः सितोपलोपेतैः ।
इष्टां तुष्टो लक्ष्मीं समावहेत् सद्य एव गोविन्दः ॥ ४६
बालं नीलाम्बुदाभं नवमणिविरणत्किङ्किणीजालबद्ध-
श्रोणीजङ्घान्तयुग्मं विपुलरुरुनखप्रोल्लसत्कण्ठभूषम् ।
फुल्लाम्भोजाभवक्त्रं हतशकटपतत्पूतनाद्यं प्रसन्नं
गोविन्दं वन्दितेन्द्राद्यमरवरमजं पूजयेद्वासरादौ ॥ ४७

मन्त्रिण इति । शक्तियोग उक्तः ॥ ३८ ॥

स्मरानुविद्धं कामपितुः कृष्णस्य मन्त्रमाह—छन्देति । क्लीं बीजम् ।

वन्द्यं देवैर्मुकुन्दं विकसितकरविन्दाभमिन्दीवराक्षं
गोगोपीवृन्दवीतं जितरिपुनिवहं कुन्दमन्दारहासम् ।
नीलग्रीवाग्रपिच्छाकलनसुविलसत्कुन्तलं भानुमन्तं
देवं पीताम्बराढ्यं यजतु च दिनशो मध्यमेऽङ्को रमायै ॥ ४८
विक्रान्त्या ध्वस्तवैरिव्रजमजितमपास्तावनीभारमाद्यै-
रावीतं नारदाद्यैर्मुनिभिरनुदिनं तत्त्वनिर्णीतिहेतोः ।
सायाह्ने निर्मलं तं निरुपममजरं पूजयेन्नीलभासं
मन्त्री विश्वोदयस्थित्यपहरणपरं मुक्तिदं वासुदेवम् ॥ ४९
त्रिकालमेवं परिचिन्त्य शार्ङ्गिणं प्रपूजयेद्यो मनुजो महामनाः ।
स धर्ममर्थं ससुखं श्रियं परामवाप्य देहापदि मुक्तिमाप्नुयात् ॥ ५
ग्रामं गच्छन्नगरमपि वा मन्त्रजापी मनुष्यो
देवेशं तं मुखमनु मुहुस्तर्पयेद्दुग्धबुद्ध्या ।
शुद्धैस्तोयैः स तु बहुरसोपेतमाहारजातं
दद्यान्नित्यं प्रचुरधनधान्यांशुकाद्यैर्मुकुन्दः ॥ ५१
भिक्षावृत्तिर्दिनमनु तमेवं विचिन्त्यात्मरूपं
गोपस्त्रीभ्यो मुहुरपहरन्तं मनोभिः सहैव ।
लीलावृत्त्या ललितललितैश्चेष्टितैर्दुग्धसर्पि-
र्दध्यन्नाद्यं स पुनरमितामेति भिक्षां गृहेभ्यः ॥ ५२
ध्यानी मन्त्री मन्त्रजापी च नित्यं यद्यद्वाञ्छन् यत्र यत्र प्रयाति ।
तत्तल्लब्ध्वा तत्र तत्र प्रकामं प्रीतः क्रीडेद्देववन्मानुषेषु ॥ ५३
एवं देवं पूजयन्मन्त्रमेनं जप्यान्मन्त्री सर्वलोकप्रियः स्यात् ।
इष्टान् कामान् प्राप्य सम्पन्नवृत्तिर्नित्यं शुद्धं तत्परं धाम भूयात् ॥ ५४

इति श्रीप्रपञ्चसारे अष्टादशः पटलः ।

स्वाहा शक्तिः ॥ ४०॥४१॥४२॥४३॥४४॥४५॥४६॥४७॥४८ ॥

मन्त्री विश्वेति । प्रणवपुटितत्वमुक्तम् ॥ ४८॥५०॥५१॥५२ ॥

ध्यानी मन्त्रीति । प्रयोगानुसारेण ध्यानभेदा मन्त्रभेदाश्चोक्ताः ॥ ५३ ॥

मन्त्री सर्वलोकेति । त्रिपुटापुटितत्वमुक्तमिति ॥ ५४ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे अष्टादशः पटलः ।

एकोनविंशः पटलः ।

अथ प्रणवसंज्ञकं प्रतिवदामि मन्त्रं परं
सजापमपि सार्चनं सहुतकृप्ति सोपासनम् ।
अशेषदुरितापहं विविधकामकल्पद्रुमं
विमुक्तिफलसिद्धिदं विमलयोगिसंसेवितम् ॥ १

आद्यः स्वरः समेतोऽमरेण सधसप्तमार्णबिन्दुयुतः ।
प्रोक्तः स्यात्प्रणवमनुस्त्रिमात्रकः सर्वमन्त्रसमवायी ॥ २

मन्त्रस्याऽस्य मुनिः प्रजापतिरथ छन्दश्च देव्यादिका
गायत्री गदिता जगत्सु परमात्माख्यस्तथा देवता ।

कामप्रधानं मन्त्रमभिधाय मोक्षप्रधानं मन्त्रमाह—अथ प्रणवेति । परत्वमुपपादयन् विनियोगमाह—अशेषेति । ह्रस्वस्य पापक्षये विनियोगः । स च मकारान्तः । तत्र च केवलाग्निशिखावत् ध्यानम् । स एव ह्रस्वः । कामप्रदो भवति । दीपशिखामध्ये तं तं काममस्तेनाभिषिञ्चतः स एव त्रयाचरात्मको ह्रस्वो मोक्षप्रदोऽपि भवति । समन्युन्मनीपरलक्षणसाक्ष्यसाक्षिब्रह्मार्थत्वे दीर्घप्लुतयोरेवमेव सर्वार्थत्वमगन्तव्यम् । अकारोकारमकारबिन्दुनादान्तो दीर्घः पूर्ववत् पापक्षयकाममोक्षार्थत्वे ध्यानभेदोऽवगन्तव्यः । मकारान्तः समनीवाचकः बिन्दुः साक्षिवाचकः नादो ब्रह्मवाचक इति मोक्षहेतुत्वे स्थितिः । शक्तिशान्तौ प्लुतिः । मकारान्तः समनीवाचकः । बिन्दुनादौ साक्षिवाचकौ शक्तिशान्तौ ब्रह्मण इति मोक्षार्थत्वे प्रतिपत्तिः । अस्य मन्त्रस्य मोक्षप्रधानत्वेन तद्धेतुत्वमुपपादयति—विमलेति ॥ १ ॥

बिन्दुयुत इति । नादादेरपि उपलक्षणार्थः । त्रयीमात्रसिद्धः प्रणवः त्रिमात्रक इत्युक्तः । तस्मिन् पक्षे तिसृष्वेवाऽवशिष्टमात्रान्तर्भावो ज्ञातव्यः । सर्वमन्त्रसमवायीति । सर्वमन्त्राधारत्वं वदन् मन्त्रन्यासमाह । अं अं नमो ब्रह्मणे नमः । आं उं नमो विष्णवे नमः । इं मं नमः शिवाय नमः । ईं अं नमो ब्रह्मणे नमः इत्यादि क्षकारान्तमेवं द्रष्टव्यम् । पुनरेवमेवाऽष्टाक्षरैः द्वादशाक्षरैरन्यैश्च मन्त्रैः संयोज्य मातृकास्थान एव मन्त्रन्यासः कार्यः । अं बीजम् । उं शक्तिः ॥ २ ॥

अक्लीबैर्युगमध्यगध्रुवयुतैरङ्गानि कुर्यात् स्वरै-
र्मन्त्री जातियुतैश्च सत्यरहितैर्वा व्याहृतीभिः क्रमात् ॥ ३
विष्णुं भास्वत्किरीटाङ्गदवलययुगाकल्पहारोदराङ्घ्रि-
श्रोणीभूषं सवक्षोमणिमकरमहाकुण्डलामण्डितांसम् ।
हस्तोद्यच्चक्रशङ्खाम्बुजगदममलं पीतकौशेयमाशा-
विद्योतद्भासमुद्यद्दिनकरसदृशं पद्मसंस्थं नमामि ॥ ४
दीक्षितो मनुमिमं शतलक्षं प्रजपेत्प्रतिहुनेच्च दशांशम् ।
पायसैर्घृतयुतैश्च तदन्ते विप्रभूरुहभवाः समिधो वा ॥ ५
सर्पिःपायसशालीतिलसमिदाज्यैरनेन यो जुहुयात् ।
ऐहिकपारत्रिकमपि स तु लभते वाञ्छितं फलं न चिरात् ॥ ६
अभ्यर्च्य वैष्णवमथो विधिनैव पीठ-
मावाह्य तत्र सकलार्थकरं मुकुन्दम् ।
अङ्गैः समूर्तियुगशक्तियुगैः सुरेन्द्र-
वज्रादिकैर्यजतु मन्त्रितमः क्रमेण ॥ ७
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चाऽनिरुद्धकः ।
स्फटिकस्वर्णदूर्वेन्द्रनीलाकाराश्च वर्णतः ॥ ८
चतुर्भुजाश्चक्रशङ्खगदापङ्कजधारिणः ।
किरीटकेयूरिणश्च पीताम्बरधरा अपि ॥ ९
सशान्ती श्रीसरस्वत्यौ रतिश्चास्त्रिदलाश्रिताः ।
अच्छपद्मरजोदुग्धदूर्वावर्णाः स्वलङ्कृताः ॥ १०
आत्मान्तरात्मपरमज्ञानात्मानस्तु मूर्तयः ।
निवृत्तिश्च प्रतिष्ठाद्या विद्या शान्तिश्च शक्तयः ॥ ११
ज्वलज्ज्वालारुचः प्रोक्ता आत्माद्या मूर्तिशक्तयः ।
इति पञ्चावरणकं विधानं प्रणवोद्भवम् ॥ १२

स्वरैर्मन्त्रीति न्यासविशेषैः मन्त्रात्मा सन्नित्यर्थः । सत्यरहितैर्वा व्याहृतिभिरिति । वाशब्देन सत्यसहितैर्वा व्याहृतिभिरिति पञ्चाङ्गपक्षः सूचितः ॥३॥४॥५॥६॥ मन्त्रितमः क्रमेणेत्यावाहनादिमन्त्रक्रम इत्यर्थः ॥ ७॥८॥९॥१०॥११॥१२ ॥

इत्थं मन्त्री तारमनुं जापहुतार्चा-
भेदैरङ्गीकृत्य च युञ्जन्नादपि योगान् ।
यैः संलब्ध्वा चेह समग्रां श्रियमन्ते
शुद्धं विष्णोर्धाम परं प्राप्नुयाति योगी ॥ १३

करपादमुखादिविहीनमनारतदृश्यमनन्यगमात्मपदम् ।
यमिहात्मनि पश्यति तत्त्वविदस्तमिमं किल योगमिति ब्रुवते ॥ १४
योगाग्निदूषणपरं त्वथ कामकोपलोभप्रमोहमदमत्सरतेति षट्कम् ।
वैरं जयेत्सपदि योगविदेनमङ्गैर्योगस्य धीरमतिरष्टभिरिष्टदैश्च ॥ १५

यमनियमासनपवनायामाः प्रत्याहृतिश्च धारणया ।
ध्यानञ्चापि समाधिः प्रोक्तान्यङ्गानि योगयोग्यानि ॥ १६
सत्यमहिंसा समता धृतिरस्तेयं क्षमाऽऽर्जवञ्च तथा ।
वैराग्यमिति यमः स्यात् स्वाध्यायतपोऽर्चनाव्रतानि तथा ॥ १७
सन्तोषश्च सशौचो नियमः स्यादासनञ्च पञ्चविधम् ।
पद्मस्वस्तिकभद्रकवज्रकवीराह्वयाः क्रमात्तदपि ॥ १८
रेचकपूरककुम्भकभेदात्त्रिविधः प्रभञ्जनायामः ।
मुञ्चेद्दक्षिणयाऽनिलमथानयेद्वामया च मध्यगया ॥ १९

इत्थं मन्त्रीति । वासुदेवादिद्वादशाक्षराण्युक्तानि । अथवा बिन्दुनाद-शक्त्यादियुतस्य प्रणवस्य योगशेषत्वमुक्तम् । जपभेदा वाचिकादयः । बाह्याध्यात्मिकभेदात् हुतार्चनयोर्भेदः । योगप्रयोजनमाह—यैरिति ॥ १३॥१४ ॥

स्वशाखाजपः स्वाध्यायः । पद्मस्वस्तिकेति ।

ऊर्वोरुपरि विन्यस्य सम्यक् पादतले उभे ।
अङ्गुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्यत्क्रमेण तु ॥ इदं पद्मासनम् ।
जानूर्वोरन्तरा सम्यक् कृत्वा पादतले उभे ।
ऋजुकायो विशेदेतदासनं स्वस्तिकं विदुः ॥
सीवन्याः पार्श्वयोर्न्यस्येत् गुल्फयुग्मं सुनिश्चलम् ।
वृषणाधः पार्श्वपादौ पाणिभ्यां परिबन्धयेत् ॥ इदं भद्रासनम् ।
ऊर्वोः पादौ क्रमान्न्यस्येत् जान्वोः प्रत्यङ्मुखाङ्गुलिः ।
करौ निदध्यादाख्यातं वज्रासनमनुत्तमम् ॥

संस्थापयेच्च नाड्येत्येवं प्रोक्तानि रेचकादीनि ।
षोड़शतद्द्विगुणचतुःषष्टिमात्रकाणि तानि च क्रमशः ॥ २०
चित्तात्मैक्यधृतस्य प्राणस्य स्यात् संहृतिः स्थानात् ।
प्रत्याहारो ज्ञेयश्चैतन्ययुतस्य सम्यगनिलस्य ॥ २१
स्थानस्थापनकर्म प्रोक्ता स्याद्धारणेति तत्त्वज्ञैः ।
यो मनसि देवताया भावः स्यादस्य मन्त्रिणः सम्यक् ॥ २२
संस्थापयेच्च तत्रेत्येवं ध्यानं विदन्ति तत्त्वविदः ।
सत्तामात्रं शुद्धं नित्यमपि निरञ्जनञ्च यत्प्रोक्तम् ॥ २३
तत्प्रविचिन्त्य च तस्मिंश्चित्तलयः स्यात् समाधिरुद्दिष्टः ।
अष्टाङ्गैरिति कथितैः पुनराशु निगृह्यतेऽरिरात्मविदा ॥ २४
अथवा शोषणदाहनप्लावनभेदेन शोधिते देहे ।
पञ्चाशद्भिर्मात्राभेदैर्विधिवत् समायमेत्प्राणान् ॥ २५
पञ्चाशदात्मकोऽपि च कलाप्रभेदेन तार उद्दिष्टः ।
तावन्मात्रायमनात्कलाश्च विधृता भवन्ति तत्त्वविदा ॥ २६

एकं पादमधः कृत्वा विन्यस्योरौ तथेतरम् ।
ऋजुकायो विशेद्योगी वीरासनमुदाहृतम् ॥ १५—२० ॥

चैतन्ययुतस्येति । चैतन्यशब्देन पूर्वोक्तौ चित्तात्मानावुच्येते ॥ २१ ॥

अस्य मन्त्रिण इति । समन्त्रकं ध्यानमुक्तम् ॥ २२ ॥

संस्थापयेदिति । निर्मन्त्रकं ध्यानमुक्तम् ॥ २३ ॥

तत् प्रविचिन्त्येति । संप्रज्ञातसमाधिरनायासेन वृत्तिसातत्यलक्षण उक्तः । सायाससातत्यं तु ध्यानमाहुः । तस्मिंश्चित्तलय इत्यसंप्रज्ञातसमाधिरुक्तः ॥ २४ ॥

भूतशुद्ध्यर्थं प्राणायामे पक्षान्तरं दर्शयति—अथवेति । पूर्वोक्तप्राणायामेनापि भूतशुद्धिर्भवति । तत्स्थरेचकादीनां सृष्टिसंहारस्वात्मस्थितिरूपत्वात् । भूतशुद्ध्यनन्तरं संग्रहेण सकलीकरणप्रकारमाह—पञ्चाशद्भिरिति । विधिवदिति । अकारादित्रयं प्रत्येकं दशमात्रं धारयेत् । बिन्दुं चतुर्मात्रम् । नादं षोड़शमात्रमित्यर्थः । तत्र बिन्दुनादावर्तनार्थं तदन्तं प्रणवमावर्तयेत् ॥ २५ ॥

पञ्चाशन्मात्राधारणे प्रतिपत्तिमाह—पञ्चाशदात्मक इति । तत्त्वविदा तत्त्वसंख्यायमनात् तत्त्वानि च विधृतानि भवन्तीति सूचितम् । तत्त्वधारणायां

पूर्वमिड़ाया वदने विचिन्तयेद्धूम्रमानिलं बीजम् ।
तेनागतेन देहं प्रशोषयेत् सान्तराधिकरचरणम् ॥ २७
पिङ्गलया प्रतिमुञ्चेत्तथैव कार्शानवेन रक्तरुचा ।
प्रतिदह्य पूर्वविधिना मुञ्चेन्नैशाकरेण सुसितेन ॥ २८
संपूरयेत् सुधामयजलशीकरवर्षिणा तनुं सकलाम् ।
निर्माय मानसेन च परिपूर्णमनाश्चिरं भूयात् ॥ २९
सुजीर्णमितभोजनः सुखसमाप्तनिद्रादिकः
सुशुद्धतलसद्गृहे विरहिते च शीतादिभिः ।
पटाजिनकुशोत्तरे सुविशदे च भद्रासने
निमीलितविलोचनः प्रतिविशेत्सुखं प्राङ्मुखः ॥ ३०
प्रसारितं वामकरं निजाङ्के निधाय तस्योपरि दक्षिणञ्च ।
ऋजुः प्रसन्नोऽवहितेन्द्रियः सन्नाधारमत्यन्तसमं स्मरेत् स्वम् ॥ ३१
तन्मध्यगतं प्रणवं प्रणवस्थं बिन्दुमपि च बिन्दुगतम् ।
नादं विचिन्त्य तारं यथावदुच्चार्य तन्नयेत् सुषुम्नान्तम् ॥ ३२
तन्मध्यगतं शुद्धं शब्दब्रह्माऽतिसूक्ष्मतन्तुनिभम् ।
तेजः स्मरेच्च तारात्मकमपि मूलं चराचरस्य सदा ॥ ३३

पृथिव्यादिसंबन्धतत्त्वसंख्यानुसारेण अकारादिकमावर्तनीयम् ॥ २६ ॥

शोषणादिप्रकारमाह—पूर्वमिति । तेनागतेनेति । नाभिगतवायुमण्डलं प्राप्तेनेत्यर्थः ॥ २७ ॥

तथैव कार्शानवेनेति । पिङ्गलाद्वारेण हृदयदेशस्थाग्निमण्डलं प्राप्तेनेत्यर्थः ।

एवं कुक्षिमध्यगतं महापातकपञ्चाङ्गं पातकोपाङ्गसंयुतम् उपपातकरोमाणं कृष्णवर्णं पापपुरुषं स्वतनुं वा संशोष्य संदह्य वंकारेण प्लावनं कार्यमित्याह—नैशाकरेणेति । इड़ामार्गेण द्वादशान्तस्थामृतमण्डलेन पूरककाले बीजस्य मण्डलस्य वं बीजस्यैक्यं सञ्चिन्त्य कुम्भककाले प्लावयेदित्यर्थः ॥ २८ ॥ २९ ॥

योगप्रयोगेऽवस्थादेशादिनियममाह—सुजीर्णेति ॥ ३० ॥ ३१ ॥

प्रणवस्थं बिन्दुमिति । दीपशिखाकारं बिन्दुं नादं च तत्प्रभाकारं संचिन्त्येत्यर्थः । यथावदुच्चार्येति । अलिविरुतिवत् उन्मन्यन्तमुच्चार्य इत्यर्थः । सुषुम्नान्तं सुषुम्नाग्रं मध्यं वा सर्वथाप्युत्तरश्लोकः ॥ ३२ ॥

ॐकारो गुणबीजं प्रणवस्तारो ध्रुवश्च वेदादिः ।
आदिरुमध्यो मपरो नामान्यस्य त्रिमात्रकश्च तथा ॥ ३४
अस्य तु वेदादित्वात् सर्वमनूनां प्रयुज्यतेऽथादौ ।
योनिश्च सर्वदेहे भवति च स च ब्रह्म सर्वसंवादः ॥ ३५
ऋक् च तदाद्यादिः स्यात्तन्मध्यान्तं यजुश्च मान्तादिः ।
सामापि तस्य भेदा बहवः प्रोक्ता हि वेदलोकेषु ॥ ३६

सुषुम्नामध्यगतस्य प्रणवस्य ध्यानमाह—तन्मध्येति ॥ ३३ ॥

इदानीं प्रणवविभूतिं वदन्नामन्यासं प्रणवपुटितविन्यासानन्तरं प्रणवपुटितलिपिन्यासस्थान एव विधेयमाह—ओंकार इति । ॐकारादीनि दश नामानि । तत्र वेदादिरिति नामोपपादयन्न्यासमन्त्रान् सूचयति ॥ ३४ ॥

अस्य त्विति । न्यासमन्त्राणामादावन्ते च प्रणवः प्रयोक्तव्य इत्यर्थः । योनिश्चेति । नामचतुष्टयमुक्तम् । सर्वयोनये सर्वदेहाश्रयाय ब्रह्मणे सर्वसंवा[पा]दकायेति नामचतुष्टयमवगन्तव्यम् ॥ ३५ ॥

पूर्वोक्तं वेदादित्वमुपपादयति—ऋक् चेति । अग्निमीळ इत्यकारः ऋग्वेदादिः । समुद्रो बन्धुरित्युकारो यजुरन्तरः । मान्तादिः सामापीति । मान्तः मकारान्तः आदिः अकारादिश्च सामवेद इत्यर्थः । ज्योतिरुत्तममिति हि सामसमाप्तिः । अग्न आयाहीति च तस्यादिः । अवशिष्टानि नामान्तराणि न्यासाय सूचयति । तस्य भेदा इति । अव रक्षण गति प्रीति तृप्त्यवगम कान्ति प्रवेश श्रवण स्वाम्य सामर्थ्य याचन क्रियेच्छा दीप्त्यवाप्त्यालिङ्गन हिंसा दहन भाव वृद्धिष्विति धातुनिष्पन्नानि लौकिकनामानि य उत्तरतः स ओंकार इत्यादि श्रुतिसिद्धानि वैदिकनामानीति विभागः ।

अयमत्र न्यासक्रमः । ओं अं ब्रह्मणे नमः । ओं आं विष्णवे नमः । ओं इं रुद्राय नमः । ओं ईं ओंकाराय नमः । ओं उं प्रणवाय नमः । इत्यादि ऋकारान्ता ऊह्याः । नाममात्रं तूच्यते । प्रणवः । सर्वव्यापी । अनन्तः । तारम् । सूक्ष्मः । शुक्लः । वैद्युतः । परं ब्रह्म । एकः । एकरुद्रः । ईशानः । भगवान् । महेश्वरः । महादेवः । सदाशिवः । सर्वरक्षिता । सर्वगतः । सर्वप्रियतमः । नित्यतृप्तः । सर्वावगमः । सर्वकान्तः । सर्वप्रविष्टः । सर्वश्रोता । सर्वस्वामी । सर्वसमर्थः । सर्वयाचकः । सर्वक्रियः । सर्वेच्छः । सर्वदीप्तः । सर्वावाप्तः । सर्वालिङ्गितः । सर्वहिंसकः ।

उच्चार्योच्चार्य च तं क्रमान्नयेदुपरि षड्द्वयान्तान्तम् ।
मनसा स्मृते यदाऽस्मिन्मनो लयं याति तावदभ्यस्येत् ॥ ३७
अथवा बिन्दुं वर्तुलमावर्त्तैस्त्रिभिरुपेतमेवमिव ।
प्रोतं रविबिम्बेन च समभ्यसेत् स्रुतसुधामयं तेजः ॥ ३८
अपमृत्युरोगपाप्मजिदचिरेण नृणां सिद्धिदो योगः ।
अथवा मूलाधारोत्थिता प्रभा बिसविभेदतन्तुनिभा ॥ ३९
वदनामृतकरबिम्बस्यूता ध्याताऽमृताम्बुलवलुलिता ।
स्थावरजङ्गमविषहृद्योगोऽयं नात्रसन्देहः ॥ ४०
अथवा त्रिवलयबिन्दुगधाम प्रणवेन समुन्नयेदूर्ध्वम् ।
पीतोर्णातन्तुनिभं सौषुम्नेनैव वर्त्मना योगी ॥ ४१
तस्मिन्निधाय चित्तं विलयं गमयेद्दिनेशसंख्याते ।
पुनरावृत्तिविहीनं निर्वाणपदं व्रजेत् समभ्यासात् ॥ ४२
अथवादिबीजमौ पुनरुमपि विषि तमपि संहरेद्बिन्दौ ।
बिन्दुं नादे तमपि शक्तौ शक्तिं तथैव शान्ताख्ये ॥ ४३

सर्वदाहकः । सर्वभावः । सर्वहृद्यः । गुणबीजम् । ध्रुवः । वेदादिः । उमध्वः । मपरः । त्रिमात्रकः । योनिः । सर्वदेहाश्रयः । सर्वसंवाहकः । सर्वात्मेति नामानीति ॥ ३६ ॥

एवं नामविभेदैः प्रणवविभूतिं स्मृत्वोच्चार्य तं क्रमेण तं प्रणवं नयेदित्याह—उच्चार्येति ॥ ३७ ॥

बिन्दोः सूक्ष्मतन्तुनयनात्मकं योगमभिधाय बिन्दुस्वरूपनयनात्मकमप्याह—अथवा बिन्दुं वर्तुलमिति । प्रोतं रविबिम्बेनेति । द्वादशान्तस्थचिदर्क-बिम्बेनेत्यर्थः ॥ ३८ ॥

पाप्मादिजयार्थं सौरं योगमभिधाय विषनिर्हरणार्थं सौम्यं योगतन्तू-नयनात्मकमाह—अथवा मूलाधारेति । वदनशब्देन कारणमुच्यते । तद्गतेना-नन्दलक्षणेनाऽमृतबिम्बेन स्यूतेत्यर्थः ॥ ३९ ॥ ४० ॥

रक्तसूत्रोन्नयनात्मकमावृत्तिहीनं मोक्षप्रधानं योगमाह--अथवा त्रिवलयेति । ॥ ४१ ॥ ४२ ॥

स्थूल सूक्ष्म कारण सामान्य बीज संविदभाव तद्वाचिकाकारादिमात्राणां च क्रमसंहारलक्षणं मोक्षसाधनयोगमाह—अथवादिबीजमिति ॥ ४३ ॥

तेजस्यनन्यगे चिति निर्द्वन्द्वे निष्कले सदानन्दे ।
सूक्ष्मे च सर्वतो मुखकरपदनयनादिलक्षणेऽलक्ष्ये ॥ ४४
स्वामिनि संहृत्यैवं करणेन्द्रियवर्गनिर्गमापेतः ।
विलीनपुण्यपापो निरुच्छ्वसन् ब्रह्मभूत एव स्यात् ॥ ४५
अथवा योगोपेताः पञ्चावस्थाः क्रमेण विज्ञाय ।
ताभिर्युञ्जीत सदा योगी सद्यः प्रसिद्ध्ये मुक्तेः ॥ ४६
जाग्रत् स्वप्नसुषुप्ती तुरीयतदतीतके च तासासु ।
स्वैरिन्द्रियैर्यदात्मा भुङ्क्ते भोगान् स जागरो भवति ॥ ४७
संज्ञारहितैरपि तैरस्याऽनुभवो भवेत् पुनः स्वप्नः ।
आत्मनिरुद्युक्ततया नैराकुल्यं भवेत् सुषुप्तिरपि ॥ ४८

इतरतेजसो वैलक्षण्यमाह—अनन्यग इति। अनन्यगत्वे हेतुश्चितीति। ज्ञानत्वेन प्राप्तं विषयजन्मादियोगं निराचष्टे—निर्द्वन्द्व इति। तत्र हेतुर्निष्कल इति। ततः सदानन्दत्वमस्ति चेत् एवंविधमानन्दं कुतो नोपलभ्यते सर्वैरिति। तत्राह—सूक्ष्म इति। कथं तर्हि अस्तित्वसिद्धिरिति। तत्राह—सर्वत इति। एवमप्यविषयत्वमाह—अलक्ष्य इति। करणेन्द्रियवर्गो यस्मादबोधान्निर्गच्छति उत्पद्यते स अपेतः अपगतो यस्य स तथोक्तः। अत एव विलीनपुण्यपापादित्वमपि संभवति ॥ ४४ ॥ ४५ ॥

सर्वव्यवहारेष्वपि कर्तुं बीज बिन्दु नाद शक्ति शान्तात्मक प्रणवसाधनम् उच्चारणादिरहितं स्वाभाविकं योगमाह—अथवा योगेति। योगोपेता समाधानविशेषोपेता इत्यर्थः ॥ ४६ ॥

अवस्था दर्शयति—जाग्रदिति। तासां विविच्य स्वरूपमाह—तास्वित्यादिना। बुद्ध्यादि विषयव्याप्ति बीजरूपा जाग्रदवस्था विषयप्राधान्यपरित्यागेन बुद्धिप्राधान्यावस्था बिन्दुस्वप्नात्मिका सविषयाया बुद्धेः कारणात्मत्वावस्था नादसुषुप्त्यात्मिका कारणात्मिकाया बुद्धेः साक्ष्याकारावस्था शक्तितुरीयात्मिका ततस्तस्याः साक्षिणि लयावस्था शान्ततुरीयातीतेत्यर्थः ॥ ४७ ॥

संज्ञारहितैरिति। संज्ञाशब्देनेन्द्रियाणि उच्यन्ते। संज्ञायन्ते एभिरिति। जाग्रद्विवेकसामर्थ्यरहितैः इन्द्रियैः वासनात्मकैरित्यर्थः। मनोरूपैरिति भावः। आत्मनिरुद्युक्ततयेति। आत्मनो मनसो निःसंकल्पतया आत्मनो यन्नैराकुल्यं

पश्यति परं यदात्मा निस्तमसा चेतसा तुरीयं तत् ।
आत्मपरमात्मपदयोरभेदतो व्याप्नुयाद्यदा योगी ॥ ४९
तच्च तुरीयातीतं तस्यापि भवेन्न दूरतो मुक्तिः ।
अथवा सूक्ष्माख्यायां पश्यन्त्यां मध्यमाख्यवैखर्यीः ॥ ५०
ससुषुम्नाग्रगयोरपि युञ्जीताज्जाग्रदादिभिः पवनम् ।
बीजोच्चारो जाग्रद्बिन्दुः स्वप्नः सुषुप्तिरपि नादः ॥ ५१
शक्त्यात्मकं तुरीयं शान्ते लय आत्मनस्तुरीयान्तम् ।
अङ्गुष्ठगुल्फजानुद्वितयं च गुदञ्च सीवनी मेट्रम् ॥ ५२
नाभिर्हृदयं ग्रीवा सलम्बिकाग्रं तथैव नासा च ।
भ्रूमध्यललाटाग्रं सुषुम्नाग्रं द्वादशान्तमित्येवम् ॥ ५३
उत्क्रान्तौ परकायप्रवेशने चाऽऽगतौ च पुनः स्वतनौ ।
स्थानानि धारणायाः प्रोक्तानि मरुत्प्रयोगविधिनिपुणैः ॥ ५४
स्थानेष्वेष्वात्ममनःसंयोगसमीकरकर्मणोऽभ्यासात् ।
अचिरेणोत्क्रान्त्याद्या भवन्ति संसिद्धयः प्रसिद्धतराः ॥ ५५
कण्ठे भ्रूमध्ये हृदि नाभौ सर्वाङ्गके स्मरेत् क्रमशः ।
लवरसमौरहवर्णैरनिलममा कालवह्नेयं स्यात् ॥ ५६
अवनिजलानलमारुतविहायसां शक्तिभिश्च तद्बीजैः ।
सारूप्यमात्मनश्च प्रतिनीत्वा तत्तदाशु जयति सुधीः ॥ ५७

तत्सुषुप्तिरित्यर्थः ॥ ४८ ॥ ४९ ॥ ५० ॥

जपकाले प्रतिपत्तव्यं योगमाह—अथवा सूक्ष्माख्यायामिति । तत्र सूक्ष्मशब्देन सूक्ष्मा वागुक्ता । स्वमहिमस्था निश्चला । आख्याशब्देन परा किंचिच्चलिता मूलाधारस्था । पश्यन्ती सामान्यज्ञानरूपिणी नाभिस्था । मध्यमा विशेषज्ञानरूपा हृदि स्थिता । वैखरीशब्दरूपिणी मुखस्था । इति मन्त्रोत्पत्तिक्रमयोगमभिधाय लयक्रमयोगमभिदधाति—ससुषुम्नाग्रगयोरिति । सुषुम्नाया अग्रं सुषुम्नाग्रं तं गच्छन्तीति सुषुम्नाग्रगाः । वैखरीमध्यमापश्यन्तीपरा-सूक्ष्माख्याः । आस्यभ्रूमध्यमूर्ध्वद्वादशान्तषोड़शान्तस्थाः वाग्भेदाः । तैः सहितयोः मध्यमाख्यवैखर्योरित्यर्थः । योगक्रममाह—बीजोच्चार इति । सृष्टिसंहारयोः जाग्रदवस्था एकैव अवगन्तव्या । बिन्दुः स्वप्न इति । भ्रूमध्यहृदयस्थमध्यमा-

एवं प्रोक्तैर्योगैरायोजयतोऽन्वहं तथाऽऽत्मानम् ।
अचिरेण भवति सिद्धिः समस्तसंसारमोचनी नित्या ॥ ५८
इति योगमार्गभेदैः प्रतिदिनमारूढयोगयुक्तधिया ।
सिद्धय उपलभ्यन्ते मुक्तिपुरीसंप्रवेशनद्वाराः ॥ ५९
कम्पः पुलकानन्दौ वैमल्यस्थैर्यलाघवानि तथा ।
सकलप्रकाशवित्ते इत्यष्टावस्थाः प्रसूचिकाः सिद्धेः ॥ ६०
त्रैकाल्यज्ञानोहौ मनोज्ञता च्छन्दतो मरुद्रोधः ।
नाड़ीसंक्रमणविधिर्वाक्सिद्धिर्देहतश्च देहाप्तिः ।
ज्योतिःप्रकाशनं चेत्यष्टौ स्युः प्रत्यया युजः सिद्धेः ॥ ६१
अणिमा महिमा च तथा गरिमा लघिमेशिता वशित्वञ्च ।
प्राप्तिः प्राकाम्यञ्चेत्यष्टैश्वर्याणि योगयुक्तस्य ॥ ६२
अष्टैश्वर्यसमेतो जीवन्मुक्तः प्रवच्यते योगी ।
योगानुभवमहामृतरसपानानन्दनिर्भरः सततम् ॥ ६३

इत्येवं प्रणवविधिः समीरितोऽयं
भक्त्या तं प्रभजति यो जपादिभेदैः ।
स प्राप्नोत्यनुततनित्यशुद्धबुद्धं
तद्विष्णोः परमतरं पदं नराग्र्यः ॥ ६४

इति श्रीप्रपञ्चसारे एकोनविंशः पटलः ।

द्वयात्मकबिन्दुद्वयात्मकं स्वप्रद्वयमित्यर्थः । एवमुत्तरत्रापि योज्यम् ॥ ५०—५८ ॥

सकलप्रकाशः सर्वस्य तेजोमयत्वेन प्रकाशः वित्ता वेत्तृता याथात्म्येत्यर्थः ॥ ॥ ५८ ॥ ६० ॥

ज्योतिःप्रकाशनमिति । परं प्रत्यपि सर्वस्य ज्योतिर्मयत्वप्रकाशनमित्यर्थः ॥ ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
एकोनविंशः पटलः ।

विंशः पटलः ।

अथ पुनरभिवक्ष्ये मन्त्रमष्टाक्षराख्यं
सकलदुरितदुःखध्वान्तसम्भेदभानुम् ।
प्रणवहृदयनारावर्णतोऽन्ते यणार्णौ
मपर इति समुद्दिष्टोऽयमिष्टार्थदायी ॥ १

तारः शक्त्युत्थतया निर्दिष्टः सोऽहमर्थकः पूर्वम् ।
नार्णः प्रतिषेधार्थो मोकारश्चायमर्थको भवति ॥ २

सलिलानलपवनधराः क्रमेण नारायणाक्षराः प्रोक्ताः ।
चरमो यस्तु विभक्तिव्यक्त्यर्थं दर्शितस्तदर्थार्थे ॥ ३

ऋषिरस्य मनोः साध्यनारायण इतीरितः ।
छन्दश्च देवी गायत्री परमात्मा च देवता ॥ ४

अथ क्रुद्धमहावीरद्युसहस्रपदादिकैः ।
उल्कैर्जातियुतैः कुर्यात् पञ्चाङ्गानि मनोः क्रमात् ॥ ५

अष्टाक्षरेण व्यस्तेन कुर्यादष्टाङ्गकं सुधीः ।
सहृच्छिरःशिखावर्मनेत्रास्त्रोदरपृष्ठके ॥ ६

अर्कौघाभं किरीटान्वितमकरलसत्कुण्डलं दीप्तिराज-
त्केयूरं कौस्तुभाभाशबलरुचिरहारं सपीताम्बरञ्च ।
नानारत्नांशुभिन्नाभरणशतयुतं श्रीधराश्लिष्टपार्श्वं
वन्दे दोःसक्तचक्राम्बुरुहदरगदं विश्ववन्द्यं मुकुन्दम् ॥ ७

प्रणवमभिधाय प्रणवस्याष्टमात्रात्मकाष्टवर्णविशिष्टाक्षरविधिं वदन् विनियोगमाह --अथ पुनरिति। पूर्वमप्यष्टभेदप्रणवात्मना अष्टाक्षरस्यैवोक्तत्वात् पुनःशब्दः।

अष्टाक्षरस्यार्थमाह—तार इति। शक्त्युत्थतयेति। शक्त्युत्थोऽजपोत्थः। परमात्ममन्त्रसारतयेत्यर्थः। सोऽहं न तु पञ्चभूतसम्बन्धीदमिति मन्त्रार्थ इत्यर्थः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

मनोः क्रमादित्युल्कान्ते स्वाहापदं प्रयोज्य पञ्चाज् जातिः प्रयोक्तव्येति सूचितम् ॥ ५ ॥

अष्टाङ्गकं सुधीरिति। न्यास एवाष्टाङ्गविनियोगः नतु पूजायामिति

संदीक्षितो मनुमिमं प्रतिजप्तुमिच्छन्
कुर्यान्निजेन वपुषैव तु योगपीठम् ।
अं सोरुयुग्मपदसाननाभिमूल-
पार्श्वद्वयैर्विहितगात्रसमुज्ज्वलञ्च ॥ ८
मध्येऽनन्ताद्यैरपि संज्ञानात्मान्तिकैर्यजेन्मन्त्री ।
पीठाख्यमन्त्रपश्चिममथ गन्धाद्यैश्च सम्यगुपचारैः ॥ ९
प्रणवं हृदयञ्चैव प्रोक्त्वा भगवते पदम् ।
विष्णवे च समाभाष्य सर्वभूतात्मनेपदम् ॥ १०
वासुदेवाय सर्वात्मसंयोगपदमुच्चरेत् ।
योगपद्मपदे चोक्त्वा ततः पीठात्मने नमः ॥ ११
अस्त्रमन्त्रप्रबद्धाशो मन्त्रवर्णांस्तनौ न्यसेत् ।
विन्यस्तैर्यैर्भवेन्मन्त्री मन्त्रवर्णात्मको हरिः ॥ १२
आधारहृद्वदनदोःपदमूलनाभौ
कण्ठे सनाभिहृदयस्तनपार्श्वपृष्ठे ।
कार्स्येक्षणश्रवणगन्धवहे च दोःपत्-
सन्ध्यङ्गुलीषु हृदि धातुषु सानिलेषु ॥ १३
मूर्धेक्षणास्यहृदयोदरसोरुजङ्घा-
पादद्वयेषु लिपिशो न्यसतु क्रमेण ।
गण्डांसकोरुचरणेषु रथाङ्गशङ्ख-
श्रीमद्गदाम्बुजपदेषु समाहितात्मा ॥ १४
ततोऽष्टाक्षरपूर्त्यर्थं स्मर्तव्यो द्वादशाक्षरः ।
मन्त्रो द्वादश मूर्तीस्तु तत्प्रभिन्नास्तनौ न्यसेत् ॥ १५

विशेषश्च इत्यर्थः । अं बीजम् । आय शक्तिः ॥ ६ ॥ ७ ॥

यजेन्मन्त्रीति । तं तमसे नमः इत्यस्यानन्तरं मं मायायै नमः विं विद्यायै नमः इति मन्त्रद्वयं सूचयति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

मन्त्री मन्त्रवर्णेति । न्यासमन्त्राणां प्रणवपुटितत्वं प्रतिपर्यायं व्यापकन्यासस्योक्तः ॥ १२ ॥ १३ ॥ १४ ॥

ततोऽष्टाक्षरपूर्त्यर्थमिति । यद्यप्यष्टाक्षराणाम् अष्टप्रकृत्यात्मकत्वेन जड़-

अष्टप्रकृत्यात्मकश्च संप्रोक्तोऽष्टाक्षरो मनुः ।
अष्टानां प्रकृतीनाञ्च चतुर्णामात्मनामपि ॥ १६
द्वादशानान्तु संयोगो मन्त्रः स्याद्द्वादशाक्षरः ।
आदित्या द्वादश प्रोक्ता युक्ता द्वादशमूर्तिभिः ॥ १७
केशवादिप्रदिष्टानां मूर्तीनां द्वादशादितः ।
आदिस्वरयुता न्यस्येत्ताः स्युर्द्वादश मूर्तयः ॥ १८
ललाटोदरहृत्कण्ठदक्षपार्श्वांसके गले ।
तथा वामत्रये पृष्ठककुदोश्च यथाक्रमम् ॥ १९
द्वादशाक्षरमन्त्रञ्च मन्त्रविन्मूर्ध्नि विन्यसेत् ।
मूर्धस्थो वासुदेवस्तु व्याप्नोति सकलां तनुम् ॥ २०
पुनस्तत्प्रतिपत्त्यर्थं किरीटादिमनुं जपेत् ।
किरीटकेयूरहारपदान्याभाष्य मन्त्रवित् ॥ २१
मकरान्ते कुण्डलञ्च शङ्खचक्रगदादिकम् ।
अब्जहस्तपदं चोक्त्वा पीताम्बरधरेति च ॥ २२
श्रीवत्साङ्कितमाभाष्य वक्षःस्थलमथो वदेत् ।
श्रीभूमिसहितं स्वात्मज्योतिर्द्वयपदं वदेत् ॥ २३

वाचकत्वम् एवेति भाति मन्दानां तथापि लक्षणया चेतनस्याऽप्युक्तत्वात् बिन्दुनादशक्तिशान्तानाम् आत्मचतुष्टयवाचिनां सद्भावाद्वा पूर्णमेव स्वतोऽष्टाक्षरं तथापि तत्र स्पष्टमिति । तत्स्पष्टीकरणाय द्वादशाक्षरमन्त्रोऽष्टाक्षरेऽन्तर्भूतः स्मर्तव्यो न्यस्यव्यश्चेत्यर्थः ॥ १५ ॥

स्वतः पूर्तिं वदन् अक्षरतत्त्वन्यासं सूचयति—अष्टेति । द्वादशाक्षरयोगी पूर्तिं वदन् बिन्द्वादिभिः सार्धमात्मचतुष्टयन्यासं व्यापकत्वेनाह—अष्टानामिति । अत्र प्रणवेन सार्धं बिन्द्वादयः प्रयोक्तव्याः । तत्त्वन्यासो द्वादशाक्षरयोगोऽनेनैव सूचितः । मूर्तिपञ्चरन्यासमाह— — इति ॥ १६ ॥ १७ ॥

कास्ताः द्वादशमूर्तयः । किं विशिष्टाश्चेति । तदाह—केशवादीति । मन्त्रविन्मूर्ध्नीत्यष्टाक्षरेण सार्धमित्यर्थः । तत्र प्रतिपत्तिमाह—मूर्धस्थ इति ॥ १८ ॥ १९ ॥ २० ॥

मन्त्रविन्मकरान्ते कुण्डलमिति । मकरकुण्डलालङ्कृत इति पदाध्याहारः

दीप्तिमुक्त्वा करायेति सहस्रादित्यतेजसे ।
हृदन्तः प्रणवादिः स्यात् किरीटादिमनुस्त्वयम् ॥ २४
कृत्वा स्थण्डिलमस्मिन्निःक्षिप्य निजासिकां समुपविश्य ।
पीठादिकं निजाङ्गे प्रपूज्य गन्धादिभिः सुशुद्धमनाः ॥ २५
सद्वादशाक्षरान्तं प्रपूज्य विधिवत् किरीटमन्त्रेण ।
कुर्यात् पुष्पाञ्जलिमपि निजदेहे पञ्चशोऽथवा त्रिशः ॥ २६
इति दीक्षितविहितविधिः संप्रोक्तोऽष्टाक्षरस्य मन्त्रस्य ।
शुद्धानां विमलधियां दीक्षा प्रतिवक्ष्यतेऽत्र संक्षेपात् ॥ २७
कृत्वा त्रिगुणितादीनामेकं मण्डलमुज्ज्वलम् ।
आत्मार्चनोक्तविधिना शक्तिभिः पीठमर्चयेत् ॥ २८
विमलोत्कर्षणी ज्ञाना क्रिया योगेति शक्तयः ।
प्रह्वी सत्या तथेशानाऽनुग्रहा नवमी स्मृता ॥ २९
निधाय कलशं तत्र पञ्चगव्येन पूरयेत् ।
पयोभिर्वा गवां प्रोक्तैः क्वाथैर्वा साष्टगन्धकैः ॥ ३०
अष्टाक्षराङ्गैरष्टार्णयुगैरष्टाक्षरान्वितैः ।
दलमूले यजेद्भूयो वासुदेवादिकान् क्रमात् ।
सशक्तिकांस्ततो बाह्ये सम्पूज्या हरिहेतयः ॥ ३१
चक्रशङ्खगदाम्बुजकौस्तुभमुसलाः सखड्गवनमालाः ।
रक्ताच्छपीतकनकश्यामलकृष्णाद्युशुक्लभासः स्युः ॥ ३२
ध्वजश्च वैनतेयश्च शङ्खपद्मौ दिशो गताः ।
विघ्नार्यकौ तथा दुर्गा विष्वक्सेनो विदिग्गताः ॥ ३३
ध्वजः श्यामो विपो रक्तो निधी शुक्लारुणप्रभौ ।
अरुणश्यामलश्यामपीता विघ्नार्यो मताः ॥ ३४

सूचितः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

सुशुद्धमना इति । गन्धादीनां चित्पर्यन्तं व्याप्तिचिन्तनमुक्तम् ।
विधिवदिति । पुष्पाञ्जलेर्जलगन्धसंपुटत्वम् ॥ २५ ॥ २६ ॥ २७ ॥
अष्टाक्षराङ्गैरिति । पञ्चाङ्गैः प्रथमावरणमुक्तम् । अष्टार्णवर्णैरित्यक्षराष्टकेन द्वितीयम् । पञ्चावरणमित्यङ्गैः विनेत्यवगन्तव्यम् ॥ २८—४१ ॥

इन्द्रादयस्तद्बहिश्च पूज्याः पूर्वादिभिः क्रमात् ।
इति विष्णोर्विधानन्तु पञ्चावरणमुच्यते ॥ ३५
एवमभ्यर्चिते विष्णावुपचारैस्तु पूर्ववत् ।
अग्निमाधाय कुण्डे तु ब्रह्मयागसमीरितैः ॥ ३६
जुहुयादष्टभिर्द्रव्यैर्मनुनाऽष्टाक्षरेण तु ।
पृथगष्टशतावृत्त्या हुत्वा दत्त्वा बलिं ततः ॥ ३७
अभिषिच्य गुरुः शिष्यं प्रवदेत् पूर्ववन्मनुम् ।
द्वात्रिंशल्लक्षमानेन स तु मन्त्रं जपेत्ततः ।
तदर्धसंख्यकं वापि शुद्धाचारो जितेन्द्रियः ॥ ३८
पद्मासनः प्राग्वदनोऽप्रलापी तन्मानसस्तर्जनिवर्जिताभिः ।
अक्षस्रजा वाङ्गुलिभिर्जपेत्तं नातिद्रुतं नातिविलम्बितञ्च ॥ ३९
प्रागीरितैरथ जुहोतु दशांशकं वा द्रव्यैः शुभैः सरसिजैर्मधुराप्लुतैर्वा ।
रत्नांशुकप्रवरकाञ्चनगोमहीभिर्धान्यैर्यथाविभवतः प्रयजेद्गुरूंश्च ॥ ४०
विप्रान् प्रतर्प्य विभवैरथ मन्त्रजापी
संन्यासयेज्जपविधिञ्च ततः क्रमेण ।
नित्यार्चना च विहिता विधिनाऽमुनैव
प्रोक्तक्रमेण विदधात्वथ चात्मपूजाम् ॥ ४१
इति जपहुतार्चनाद्यैर्मन्त्री योऽष्टाक्षरं समभ्यस्येत् ।
स त्वैहिकीञ्च सिद्धिं संप्राप्याऽन्ते प्रयाति परमं पदम् ॥ ४२
अङ्गानि पूर्वं त्वथ मूर्तिशक्तीः सकेशवादींश्च पुरन्दरादीन् ।
समर्चयेद्यस्तु विधानमेतन्नरोऽचिरात् काङ्क्षितमेति कामम् ॥ ४३
यष्टव्याः स्युर्वासुदेवादिरादौ चक्राद्याः केत्वादिकाः केशवाद्याः ।
इन्द्राद्यास्त्वेवमेव प्रदिष्टं पुष्ट्यायुःश्रीकीर्त्तिसिद्ध्यै विधानम् ॥ ४४
सवासुदेवादिकमर्चयित्वा भूयो ध्वजादींश्च पुरन्दरादीन् ।
क्रमेण विद्वान् विधिनाऽर्चयीतेत्ययं क्रमश्च विदशाभिपूज्यः ॥ ४५

अर्चनाद्यैर्मन्त्रीति। ऐहिकसिद्धौ तद्योग्यबीजयोगादिकमुक्तम् ॥ ४२ ॥
॥ ४३ ॥ ४४ ॥

इत्युक्तविधिचतुष्के पूजयितुरथैकमपि यथाशक्ति ।
अचिरेण भवति लक्ष्मीर्हस्तगता सकलवर्गसिद्धिकरी ॥ ४६
अष्टाक्षराक्षराष्टकमूर्तिविधानानि भेदभिन्नानि ।
वक्ष्याम्यर्चयितॄणां वाञ्छितसकलार्थसिद्धिदानि सदा ॥ ४७

सिन्दूरकुन्दकरविन्दकबन्धुजीव-
काश्मीरपद्ममकरन्दरुचः क्रमेण ।
नीलोत्पलाम्बुरुहरागसमानरूपाः
स्युर्मूर्तयोऽष्ट कथिता मनुवर्णजाताः ॥ ४८

अरिदरगदाब्जहस्ताः सर्वास्तु नकारमोऽर्णयोर्मूर्ती ।
शङ्खारिगदाब्जकरे लक्षणमन्यत् समानरूपं स्यात् ॥ ४९
या मूर्तिरर्च्यतेऽस्य व्रजन्ति परिवारतां तदवशिष्टाः ।
अविशिष्टेऽन्तेऽप्यंशे स्वयञ्च परिवारतां प्रयाति तदा ॥ ५०
इयमेवाकृतिरधिका ध्रुवजे ध्रुवजात् पुरा समुद्दिष्टात् ।
भवति विधानादिति पुनरेषां प्रथमविधानमुद्दिष्टम् ॥ ५१
अथ द्वितीयाक्षरजेऽङ्गतोऽन्ते वर्णाष्टमूर्तीरपि मूर्तिशक्तीः ।
यजेद्विधाने च सकेतुलोकपालादिकानन्यदथ प्रवक्ष्ये ॥ ५२

मोकारजे रतिधृती च सकान्तितुष्टि-
पुष्टिस्मृतीरपि च दीप्ताभिधाञ्च कीर्त्तिम् ।

क्रमेण विद्वानित्यङ्गावरणयोग उक्तः ॥ ४५ ॥ ४६ ॥

भेदभिन्नानीत्यावरणभेदभिन्नानीत्यर्थः ॥ ४७ ॥

अम्बुरुहरागवर्णाः सर्वविधानेष्ववशिष्टान्या मूर्तिरिति ज्ञेया ॥ ४८ ॥

अरिदरगदाब्जहस्ताः सर्वा इति । दक्षिणोर्ध्वहस्तमारभ्य प्रादक्षिण्येनेत्यर्थः । इयमेवाक्षरमूर्त्याकृतिः प्रणवजे विधानेऽधिका भवति । तस्मात् पुरा प्रणवपटले उक्तात् प्रणवविधानादित्यर्थः । अङ्गवासुदेवाद्यात्मादीन्द्रवज्रा-दिभिर्हि प्रणवविधानमुद्दिष्टम् । अत्र तु क्रुद्धोल्कादिभिरङ्गपूजा तदनन्तरमक्षर-मूर्तिपूजा ततो वासुदवादिकमिति । नकारादिविधानेषु ॐ नं ॐ नमो नारायणाय इत्यादयो मन्त्रा ज्ञातव्याः । सर्वत्र चाङ्गानन्तरं मूर्त्याकृतिद्वयं द्रष्टव्यम् ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥

केत्वादिकञ्च सशतक्रतुपूर्वकञ्च
सम्पूजयेद्विमलधीः पुनरङ्गतोऽन्ते ॥ ५३
नाकारजेऽङ्गतोऽन्ते प्रपूजयेन्मूर्तिशक्तिलोकेशान् ।
रावर्णजे तु मूर्तीः श्रीभूमायामनोन्मथनीश्च यजेत ॥ ५४
ह्रीः श्री रतिः सपुष्टिर्मोहनिमाये महादियोगाद्ये ।
माये च तृतीयावृतिरन्यदशेषं पुरैव निर्दिष्टम् ॥ ५५
यकारजेऽरिशङ्खौ च सगदाहलशार्ङ्गकाः ।
मुसलः खड्गशूलौ च तृतीया णाचरोद्भवे ॥ ५६
शेषो वासुकितक्षककर्कोटकपङ्कजमहापद्माः ।
दरपालकुलिकाख्यौ तृतीयमन्यत् समं विधानेऽन्त्ये ॥ ५७
अङ्गैः प्रथमावरणं मूर्तिभिरपि शक्तिभिर्द्वितीयमपि ।
अन्ये केशवकेत्वादिभ्यां स्यात् पञ्चमञ्च मतस्याद्यैः ॥ ५८
मत्स्यः कूर्मवराहौ नृसिंहकुब्जविरामकृष्णाश्च ।
कल्किः सानन्तात्मा पुनरमृतात्मा च षष्ठमहिपाद्यैः ॥ ५९
सप्तममपि लोकेशैरष्टममपि तदायुधैश्च संप्रोक्तम् ।
प्रागुक्तेषु विधानेष्वालक्ष्यं नोक्तमत्र यत्तदपि ॥ ६०
अष्टाक्षराक्षरविधानचतुष्कयुग्मं
प्रोक्तक्रमेण विधिनाऽभियजेद् य एनम् ।
भक्त्या मुकुन्दमनुजापरतो नराग्रः
प्राप्नोति वाञ्छितमयत्नत एव कामम् ॥ ६१
इति श्रीप्रपञ्चसारे विंशः पटलः ।

विमलधीरिति । मूर्त्यावरणमन्त्रभेदाः मूर्त्यावरणे तत्तदक्षरानन्तरमारभ्य पूजाक्रमश्च सूचितः ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥

आलक्ष्यमिति । किरीटमन्त्रपुष्पाञ्जल्यादिक्रमेष्वपि विधानेषु द्रष्टव्यमित्यर्थः ॥ ६० ॥ ६१ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
विंशतिः पटलः ।

एकविंशः पटलः ।

अथ प्रवक्ष्यामि च मासभेदभिन्नानि यन्त्राण्यपि संग्रहेण ।
रेखाक्रमद्युन्ति विचित्रवर्णलसन्ति विष्णोश्च विधानभाञ्जि ॥ १
यैः कुर्युरिष्टाभिनिविष्टचेष्टा धरण्यनन्तादिकसंज्ञकानि ।
व्रतान्यभीष्टार्थदकल्पवृक्षैरनारतेनैव च साधकेशाः ॥ २
मेषादिकं यच्च चतुष्कमादौ मासेषु तद्वायुगृहावृतं स्यात् ।
सिंहादिकं भूगृहसंवृतञ्च चापादिकं पार्थिवयुग्मवीतम् ॥ ३
मेषादिकेषु त्रिगुणात्मकानि चराणि भास्वद्गुणितात्मकानि ।
स्थिराण्यथो षड्गुणितानि तज्ज्ञैरुक्तानि यन्त्राण्युभयात्मकानि ॥ ४
तानि त्रिषड्द्वादशकात्मकोक्तैः स्युर्लक्षणैरप्यभिलक्षितानि ।
स्वैः स्वैश्च नामप्रविभक्तरूपभेदैर्बहिर्वेष्टितबिम्बकानि ॥ ५
त्रिगुणितमपि यन्त्रमष्टपत्रावृतमथ षड्गुणितं त्रिषड्दलाख्यम् ।
स्थिरगतमपि चाष्टयुग्मपत्रं तदपि षड्युगपत्रशोभितं वा ॥ ६
पद्मं चरोभस्थिरसंज्ञकेषु रक्तप्रपीताच्छदलादिवर्णम् ।
मासेषु यन्त्रोदरकृप्तमतत्तन्मासाभिधामूर्त्यभिधाक्षराढ्यम् ॥ ७
केशवमेषादीनां ये दीर्घा मूर्तिराशिवर्णानाम् ।
ते वृत्तानि भवन्ति च निगदितमिति यन्त्रकृप्तिसामान्यम् ॥ ८

अथाष्टाक्षरस्यैव मासयन्त्रभेदेन विधानभेदं वक्तुमारभते—अथ प्रवक्ष्यामीति । यन्त्रादिकथनप्रयोजनमाह—यैः कुर्युरिति ॥ १ ॥ २ ॥

मासयन्त्राणां सामान्यलक्षणं विभागश्च आह—मेषादिकमिति ॥ ३ ॥ ४ ॥

स्वैः स्वैश्च नामेति । स्वैः स्वै रूपैर्मेषवृषभादिलक्षणैः । कथंभूतैः । नामभिः मेषवृषभेत्यादिभिः ललाटलिखितैः सह प्रविभक्तं रूपं येषां ते तथोक्ताः । बिम्बशब्देन यन्त्रबाह्ये लिखितानि वाद्यादिमण्डलान्युच्यन्ते ॥ ५ ॥ ६ ॥

यन्त्रोदरकृप्तेति । मध्यबीजस्य यानि वेष्टनान्युक्तानि त्रिगुणितादिषु तद्बाह्ये यो मेषाधिपतये केशवाय नमः इत्यादिमन्त्रैर्वेष्टितानीत्यर्थः ॥ ७ ॥

वृत्तानि भवन्तीति । उक्तवेष्टनबाह्ये मेषाद्याकारबाह्य इति केचित् ॥ ८ ॥

सुवर्णगोक्षीरजवाशिलालपीतेन्द्रनीलारुणकैरवाभाः ।
काश्मीरमेघाञ्जनरोचिषश्च क्रमेण वर्णैरपि केशवाद्याः ॥ ९
इतीरिताश्चापि किरीटहारकयूरपीताम्बरकादितुल्याः ।
सचक्रशङ्खाः सगदाम्बुजाश्च संपूजनीयास्तपनैः क्रमेण ॥ १०

धात्रर्यममित्राख्यावरुणांशुभगा विवस्वदिन्द्रयुताः ।
पूषाक्षयपर्जन्यौ त्वष्टा विष्णुश्च भानवः प्रोक्ताः ॥ ११
प्रथमं केशवधात्रकमितरन्नारायणार्यमाख्यञ्च ।
अन्यन्माधवमेवं परमपि गोविन्दवारुणं प्रोक्तम् ॥ १२
पञ्चममपि विष्णवंशुं मधुसूदनभगञ्च षष्ठमपि ।
त्रिविक्रमविवस्वदाख्यं सप्तममन्यच्च वामनेन्द्रमपि ॥ १३
श्रीधरपौषां नवमं दशमञ्च हृषीकेशपार्जन्यम् ।
अम्बुजनाभं त्वाष्ट्रं दामोदरवैष्णवं विधानमिति ॥ १४

शिला मनःशिला । आलं हरितालम् । सचक्रशङ्खा इति ।

पद्मारिगदया शङ्खपद्मशङ्खगदारिभिः ।
गदारिशङ्खपद्मैश्च केशवाद्यास्त्रयोऽङ्किताः ॥
गदाचक्राब्जशङ्खैश्च गदाशङ्खारिपङ्कजैः ।
शङ्खचक्राब्जगदया गोविन्दादय अङ्किताः ॥
गदाब्जचक्रशङ्खैश्च चक्रशङ्खगदाम्बुजैः ।
चक्राम्बुजगदाशङ्खैः त्रिविक्रमपुरःसराः ॥
चक्रशैलाब्जशङ्खैश्च पद्मशैलारिशङ्खकैः ।
शङ्खचक्रगदापद्मैः हृषीकेशादयः क्रमात् ॥
उत्तराधरभेदेन दक्षवामक्रमात्तथा ।

इत्युक्तक्रमेणेत्यर्थः ॥ ८ ॥ १० ॥ ११ ॥

पूजामन्त्रान् कथयति—प्रथमं केशवेति । ॐ अं केशवाय धात्रे नमः । नं आं नारायणाय अर्यम्णे नमः । इति द्वादशाक्षरद्वादशस्वरमूर्त्यादित्यनमस्कारयुता मन्त्रा इत्यर्थः । एते च पुष्पाञ्जलिन्यासादिमन्त्राः । मूलमन्त्रास्त्वेते । ॐ ह्रीं नमो भगवतेऽन्ते केशवाय ॐ ह्रीं ॐ नम इति केशवमन्त्रः । ॐ क्रीं नमो भगवतेऽन्ते नारायणाय ॐ क्रीं ॐ नमः ।

आदौ विधानेषु समेतमूर्तीः शक्तीश्चतस्रोऽभियजेद्यथावत् ।
राशिष्वयो भानुयुताश्च मूर्तीः प्रवच्यमाणाश्च निरूप्य मन्त्री ॥ १५
हृषहरिहृश्चिककलशात्मकेष्वयो केतुकेशवाद्यैश्च ।
मत्स्यादिकशेषाद्यैः समभियजेदन्तरा समावरणम् ॥ १६

ॐ ह्स्रौं (ह्स्रैः) नमो भगवते माधवाय ॐ ह्स्रौं (ह्स्रैः) ॐ नमः । ॐ ह्र्यौं (ह्र्यैं) नमो भगवतेऽन्ते गोविन्दाय ॐ ह्र्यौं (ह्र्यैं) ॐ नमः । ॐ मुक्तिष्ठश्रीकराय स्वाहान्ते विष्णवे नमः । ॐ म्र्यौं मधुसूदनाय ॐ म्र्यौं ॐ नमः । ॐ क्रीं त्रिविक्रमाय ॐ क्रीं ॐ नमः । ॐ प्रीं वटुवामनाय ॐ प्रीं ॐ नमः । ॐ क्लीं श्रीं क्लीं नमः श्रीधराय ॐ क्लीं श्रीं क्लीं ॐ नमः । ॐ ऐं ह्रीं ह्रां हृषीकेशाय विष्णवे ॐ ऐं ह्रीं ह्रां ॐ नमः । ॐ हुं ॐ नमः पद्मनाभाय ॐ हुं ॐ नमः । ॐ ह्रं ॐ नमो दामोदराय ॐ ह्रं ॐ नम इत्यवशिष्टा मन्त्राः । एतैः सहितैनाऽष्टाक्षरेण पूजाः कार्याः ।

ॐ केशवाय विद्महे जलधराय धीमहि तन्नो भुवः प्रचोदयात् । नारायणाय विद्महे भवोद्भवाय धीमहि तन्नो विश्वः प्रचोदयात् । श्रीं माधवाय विद्महे लक्ष्मीधराय धीमहि तन्नो विश्वः प्रचोदयात् । श्रीगोविन्दाय विद्महे विश्वेश्वराय धीमहि तन्नो विश्वः प्रचोदयात् । विष्णवीश्वराय विद्महे देवश्रेष्ठाय धीमहि तन्नो व्यापी प्रचोदयात् । मधुसूदनाय विद्महे लोकपालाय धीमहि तन्नो धीरः प्रचोदयात् । वामनेशाय विद्महे मायारूपाय धीमहि तन्नश्चित्तं प्रचोदयात् । श्रीधरेशाय विद्महे लक्ष्मीधराय धीमहि तन्नो जातः प्रचोदयात् । त्रिविक्रमाय विद्महे महाम्बुजाय धीमहि तन्नो जीवः प्रचोदयात् । हृषीकेशाय विद्महे महादेवाय धीमहि तन्नः साध्यः प्रचोदयात् । पद्मनाभाय विद्महे आकर्षणानाय धीमहि तन्नो ब्रह्मा प्रचोदयात् । दामोदराय विद्महे स्तवप्रियाय धीमहि तन्नो दिव्यः प्रचोदयात् । इति गायत्रीभिर्वोपचारान् प्रयच्छेत् ॥ १२ ॥ १३ ॥ १४ ॥

आवरणेष्वपि सामान्यावरणान्याह—आदाविति । यथावदिति । अङ्गानन्तर्यम् । वासुदेवादीनां वासुदेवादिमन्त्रपूर्वकत्वं चाह—मन्त्रीति । या मूर्तिः मध्ये पूज्या तस्याः स्थाने वासुदेवमन्त्रेण पूजोक्ता । सा तु केतुकेशवाद्यैरिति । केत्वादेः पूर्वं मत्स्या[ध्या]द्यावरणं केशवादेः पूर्वं शेषाद्यावरणमित्यर्थः । अतः सर्वपूजासु केत्वाद्यावरणासितत्वमपि सिद्धम् ॥ १५ ॥ १६ ॥

प्रानुप्रोद्यत्स्वराष्टद्वितयवृतमहाबीजकं शक्तिलक्ष्मी-
कामैरात्तामिकोणं बहिरपि वृतसिंहान्वितक्रोडमन्त्रम् ।
बिन्दूनामन्तरालेष्वपि च विलिखितैः कादिवर्गैश्च युक्तं
षड्भिर्वायव्यगेहावृतमभिमतकामप्रदं मेषयन्त्रम् ॥ १७
गौरीन्दिरा रतिधृती वसुधा तुष्टिपुष्टिक्षमासरस्वत्यः ।
मूर्त्योश्च मध्यमावृतिराशेशात् प्राग्ध्वजादिभिरपि कथिता ॥ १८
हयगजरथभृत्यादीनरिपरिभवशौर्यादिसिद्धिश्च ।
तेजो यशश्च विपुलं पूजयितुर्वितनुते विधानमिदम् ॥ १९
वर्णैराद्यैरमन्त्रैः समभिवृतमहाबीजमञ्जमध्यराजत्-
पान्तक्षाद्यक्षराढ्यं गुहनयनहुताशास्त्रिराजन्मथार्णम् ।
अस्त्रेर्गण्डद्वयोद्यत्पचलिपिपरिवीतञ्च नाद्यैश्च कान्तैः
काद्यैर्नान्तैश्च यन्त्रं बहुविधफलदं पूजितं स्याद्वृषोत्थम् ॥ २०

नित्यानन्दा[न्ता] व्यापिनी व्योमरूपा
शान्तिर्विद्यारूपिणी च प्रतिष्ठा ।
कल्पामोघा चण्डिका दीर्घजिह्वे-
त्येवं प्रोक्ता ह्यावृतिः स्यात्तृतीया ॥ २१

प्रानुप्रोद्यदिति । ऋकारादिस्वराष्टकं प्रतिलोमेन ऌकाराद्यष्टकमनुलोमेन इत्यर्थः । ऋं ॠं ऋं ॠं ऌं ॡं एं ऐं इत्येवं क्रमेण पूर्वस्थितवेष्टनबाह्ये वेष्टयेदित्यर्थः । बहिरपीति । शक्तिवेष्टनाद् बहिरपीत्यर्थः । नृसिंहानुष्टुब्वराहमन्त्राभ्यां वृत्तद्वयं कार्यम् । बिन्दूनामन्तरालेष्विति । वायुमण्डलस्य बिन्दूनामन्तरालेष्वित्यर्थः । अभिमतकामप्रदमिति । मध्ये कामबीजस्य लेखनं सूचितम् । यन्त्रसामान्यमन्त्राश्चात्रापि समानाः ॥ १७ ॥

मूर्त्योरिति । वासुदेवादिकेशवाद्योरित्यर्थः । अङ्ग वासुदेव गौरी केशव-ध्वजेन्द्रवज्राद्यैः सप्तावरणा मेषयन्त्रपूजेत्यर्थः ॥ १८ ॥ १९ ॥

अञ्जमध्यराजदिति । महाबीजवेष्टनाचां मध्ये राजद्भिः पान्तक्षाद्यक्षरैराढ्यमित्यर्थः । अं क्षं आं लं इं हं इत्यादि क्रमेण वेष्टयेन्मध्यबीजमित्यर्थः । नाद्यैः कान्तैरिति । शक्तिवेष्टनाद् बाह्ये नं कं धं खं दं गमित्यादिक्रमेण वेष्टनमवगन्तव्यम् । अङ्ग वासुदेव नित्यानन्दा केशव मत्स्य शेष ध्वजेन्द्र

सुरभिहयमहिषदासीदासाभरणांशुकादिसिद्धिकरम् ।
वृषजं विधानमेतद्देहान्ते सिद्धिकृत् परस्य सतः ॥ २२
प्रागच्छन्नामाक्षरभिख्यालिपिभिरभिवृतं तत् स्वरायुक्तवृत्तं
शाद्यैः क्षान्तैस्तदाद्यैरपि परिवृतगण्डान्तदस्रात्तजूंसम् ।
काद्यैर्भान्तैः प्रवीतं मयरलवहयुग्बिन्दुकं वायुगेहा-
वीतं वाञ्छाप्रदानप्रसवगुणयुतं युग्मजं यन्त्रमेतत् ॥ २३

इन्द्राणी कौमारिका ब्रह्मजाया
वाराह्याख्या वैष्णवी चाथ लक्ष्मीः ।
चामुण्डा माहेश्वरी स्यात्तृतीया
रक्षा प्रक्षा श्रीप्रदं स्याद्विधानम् ॥ २४

पाशाद्यष्टाक्षरार्णप्रतिपुटितमहाष्टाक्षरार्णावृतान्त-
र्बीजं शाखान्तरूढ़ेगगनन्हरिबीजात्तकोणं वह्निश्च ।
कामिन्यष्टाक्षराद्यन्तगहरिहरबीजावृतं प्रत्यनूद्य-
द्वर्णाढ्यं वायुगेहे स्थितमिति गदितं कर्कटोत्थञ्च यन्त्रम् ॥

वज्रादिभिः नवावरणा वृषयन्त्रपूजा ॥ २० ॥ २१ ॥ २२ ॥

प्रागच्छदिति । प्रातिलोम्येनागच्छद्भिः ब्रह्माण्यादिमातॄणामभिख्यालिपिभिः नामाक्षरैरभिवृतमध्यबीजमित्यर्थः । यदेवंभूतं यन्त्रं तद्युग्मजमित्युत्तरत्र यच्छब्दस्यान्वयः । मातृकाक्षरावृतिं विशिनष्टि—स्वरायुक्तवृत्तमिति । अः अं महालक्ष्मी औं ओं चण्डिके ऐं एं इन्द्राणी इत्यादिक्रमेण वेष्टनमवगन्तव्यम् । शाद्यैः क्षान्तैरिति । षड्गुणितस्य गण्डद्वादशकं भवति । तेषु शादिक्षान्तं क्षादिशान्तं च लिखेदित्यर्थः । तत्र दक्षिणभागगण्डेषु क्षादिकं वामेषु शादिकमित्यवगन्तव्यम् । तदस्रात्तेति । षट्स्रस्रेषु जूं स इति लिखेदित्यर्थः । काद्यैर्भान्तैरिति । शक्तिवेष्टनाद् बहिः कं भं खं बं गं फमित्यादि क्रमेण च लेखनीयम् । म य र ल व ह युग्बिन्दुकमिति । वायुमण्डलबिन्दुश्चेतानि लिखेदित्यर्थः । अङ्ग वासुदेवेन्द्राणी केशव केत्विन्द्र वज्रादिभिः सप्तावरणा मिथुनयन्त्रपूजा ॥ २३ ॥ २४ ॥

पाशाद्यष्टार्णेति । महाष्टाक्षरं वैष्णवाष्टाक्षरम् । शाखान्तरूढं गगनेति । शाखान्तं प्रणवः तस्मिन् रूढं ई शाखान्तरूढे गगनं हकारः हरिः श्रीं

रक्ता रमा करालो कमला चण्डेन्दिरा महोच्छुष्मः ।
श्रीरिति मूर्तियुगलयोर्मध्यगता चाहतिरियञ्चापि ॥ २६
भूतिर्विभूतिरुन्नतिर्नतिर्धृतिरतिसंयतिद्युतयः ।
आवृतिरेषा प्रोक्ता श्रीवश्यकरं विधानमिति गदितम् ॥ २७

उष्माणाष्टाक्षरावेष्टितहृदयमथो द्वादशार्णात्तकोणं
सान्तःस्थात्माष्टवर्णैः क्रमगतविगतैरुज्जसत्तत्त्वगण्डम् ।
सिंहानुष्टुब्द्वयार्णान्तरितवृतकलालङ्कृतं चाथ वह्नि-
प्राणेशानक्षपाटास्त्रिगकचटतपत्वक्शलं सिंहयन्त्रम् ॥ २८

पुष्टिस्तुष्टिर्धृतिरपि कृतिः शान्तिकान्ती प्रमोदा
मेधा हर्षा स्मृतिरभिमता क्षान्तिका स्यात्तृतीया ।
कृष्णः सत्यो नृहरिवरदौ विश्वमूर्तिर्वरेण्यः
शौरिः शूरो नरसुरजितौ विष्णुजिष्णू चतुर्थौ ॥ २९

विपक्षनिग्रहं तेजो यशश्च धनसङ्गमम् ।
करोत्यर्चयितॄणाञ्च विधानमिति सिंहजम् ॥ ३०

एतैरात्तकोणमित्यर्थः । बहिरेति । त्रिकोणात् बहिरित्यर्थः । का हरि मि ह र नि हरि इत्यादिक्रमेण वेष्टनम् । प्रत्यनूद्यद्वर्णाद्यमिति । शक्तिवेष्टनबाह्ये । अङ्ग वासुदेव रक्ता भूति केशव केत्विन्द्र वज्रादिभिः अष्टावरणा कर्कटकपूजा ॥ २५॥२६॥२७ ॥

उष्मार्णेति । अत्रानुविगता उष्मार्णा ग्राह्याः । शं श्रीं षं नं सं मों हं नां हं रां सं यं षं णां शं यं इति वेष्टनप्रकारः । द्वादशार्णं प्रसिद्धम् । सान्तस्थेति । क्रमगतात्माष्टाक्षरवर्णद्वयान्तरं क्रमगतान्तस्थवर्णानामेकैकं लिखित्वा विगतात्माष्टाक्षरवर्णद्वन्द्वान्तरं विगतान्तस्थवर्णानामेकैकं लिखित्वा विगतात्माष्टाक्षरवर्णद्वन्द्वान्तरं विगतान्तस्थवर्णानामेकैकं चतुर्विंशतिगण्डेषु लिखेदित्यर्थः । सिंहानुष्टुबिति । शक्तिवेष्टनाद् बहिः उं ग्रं श्रं वीं रं श्रां इत्यादिप्रकारेण वेष्टनम् । वह्निप्राणेति । पृथिवीमण्डलस्य अग्निवाय्वीशाननिर्ऋतिकोणेषु कचटतवर्गान् पयशलवर्गांश्च लिखेदित्यर्थः । त्वक्शब्देन यवर्ग उक्तः । अङ्ग वासुदेव पुष्टि कृष्णानन्त केशव मत्स्य केत्विन्द्र वज्रादिभिर्दशावरणा सिंहपूजा ॥ २८ ॥ २९ ॥ ३० ॥

सर्गाद्यान्ताद्यमन्त्रैरभिहतहृदयं दण्डिभिश्चाथ हाही-
हूहैहौहोभिराक्तास्त्रिकमथ तु शिखाद्योतिवर्गान्त्यवर्णम् ।
वर्णैः प्रत्यन्वितैः प्राहृतमवनिपुरास्त्रोल्लसत्कामबीजं
क्लिन्नेस्वाहार्णयुक्तं महिततरफलं कन्यकोत्थञ्च यन्त्रम् ॥ ३१

अत्राऽर्च्यौ मधुसूदनस्त्वथ हृषीकेशाह्वयो मोहिनी
वैकुण्ठो विरजा हरिः सरसिजा शार्ङ्गी तमोहारिणी ।
ब्रध्नाख्यः कमलावती च समुकुन्दाख्यो रमेति क्रमा-
न्मत्स्याद्यैश्च सुताश्वगोमहिषसौभाग्यप्रदं पावनम् ॥ ३२

आद्यैरावीतबीजं ग्रहवलययुतं हुंफड़ा युक्तकोणं
बाह्ये पाशाङ्कुशार्णाहृतमथ युगषण्मूर्तिनामार्णमर्णैः ।
प्रत्यन्वेष्यद्भिरुद्यद्धरियुतहरवर्णैश्च वीतं धरायाः
कोणेषूद्यन्नृसिंहाक्षरमिति कथितं स्यात्तुलायन्त्रमेतत् ॥ ३३

प्राक्प्रोक्तैश्चक्राद्यैरुक्तास्य समाहृतिस्तृतीया स्यात् ।
मोतोपलब्धिमेतत्करोति वाणिज्यलाभञ्च ॥ ३४

सर्गाद्यान्ताद्यमन्त्रैरिति । विसर्गाद्याकारान्तैरकाराद्यमन्त्रैश्च वेष्टयेत् । अः अं अं औं उं इं ओं ईं इत्यादिप्रकारेण आक्तास्त्रिकमित्यस्त्रिशब्देन षट्कोणकोणान्युच्यन्ते । शिखाशब्देन षट्कोणाग्राणि । वर्गान्त्यः क्षकारः । वर्णैः प्रत्यन्वितैरिति । शक्तिवेष्टनबाह्ये अवनिपुरकोणेषु एव क्लींक्लिन्नेस्वाहार्णाः । अङ्ग वासुदेव हृषीकेश मत्स्य केशव केलिन्द्र वज्रादिभिरष्टावरणा कन्यका पूजा । ॥ ३१ ॥ ३२ ॥

आद्यैरावीतमिति । ग्रहवलययुतं यथा भवति तथाद्यैः आवीतमध्यबीजमित्यर्थः । सूर्य अं आं सोम इं ईं अङ्गारक उं ऊं शुक्र ऋं ॠं बुधः लृं ॡं बृहस्पते एं ऐं शनैश्चर ओं औं राहो अं केतो अः इति वेष्टन प्रकारः । हुं फड़ायुक्तकोणमिति । हुंफड्युक्तत्रिकोणकोणमित्यर्थः । बाह्य इति । शक्तिवेष्टनाद् बाह्य इत्यर्थः । युगषण्मूर्तयः केशवाद्याः तेषां नामार्णैरेकाहृतिः तद्बहिः प्रत्यन्वेष्यद्भिः माटकावर्णैः आहृतिद्वयं तद्बहिः हरिहरवर्णैः । अङ्गवासुदेवचक्रकेशवकेलिन्द्रवज्रादिभिः सप्तावरणा तुलापूजा ॥ ३३ ॥ ३४ ॥

अक्षीवद्वादशाज्द्वादशलिपिवृतद्वल्लेखमस्त्रिद्विषट्क-
प्रोक्तास्यष्टाक्षरोक्तार्णकमपि लिपिभिः कादिभिश्चाऽभिवीतम् ।
तद्बाह्ये चन्द्रबिम्बप्रपुटितवसुधामण्डलास्त्रिप्रराजत्-
क्लीबार्णं वृश्चिकोत्थं प्रवरतरफलप्राप्तिदं यन्त्रमेतत् ॥ ३५

चिद्रूपा चिन्मया चिन्तामणिः श्रीः क्षोणिसंज्ञका ।
रतिश्च पावनी धारा धरणी तारणी तथा ॥ ३६
द्राविणी मोहिनी चेति तृतीयेयं समावृतिः ।
अन्वयाप्तिं धर्मरतिं प्राप्नुयादस्य चाऽर्चनात् ॥ ३७
षट्कोणाबद्धबाणासनविवरलसन्नारसिंहं तदन्तः
शक्तेर्बाह्ये परानुप्ररचितलघुसन्ध्यर्णयुक्पञ्चकाढ्यम् ।
अस्त्रिष्वाबद्धशिष्टस्वरमुपरिलसच्छूलकं प्राप्तवर्गं
भूमेरष्टास्त्रिकोद्यद्यदुजहुलवकं चापयन्त्रं तदेतत् ॥ ३८
हर्षाह्वा सुनदारुणा सगगना घोरा रमा द्राविणी
वीरा वीरिणि हारिणी सहरिणी मन्दारिका द्वादश ।
प्रोक्तेयञ्च समावृतिः पुनरिदं संपूजयन् प्राप्नुया-
ल्लक्ष्मीसन्ततिबुद्धिवश्यपटुतां कान्तिञ्च भक्तिं शुभाम् ॥ ३९

अक्षीवेति । द्वादशलिपिर्द्वादशाक्षरम् । अं श्रीं आं नं उं मों इत्यादिप्रकारेण वेष्टनमवगन्तव्यम् । अस्त्रिद्विषट्केति । अष्टाक्षराक्षरद्वयं कोष्ठद्वये लिखित्वा अष्टार्णानामेकैकं तृतीयकोणे विलिख्याऽवशिष्टकोणेष्वप्येवं क्रमेण लिखेदित्यर्थः । लिपिभिः कादिभिरिति । शक्तिवेष्टनबाह्ये । चन्द्रबिम्बप्रपुटितकेति । चन्द्रमण्डलं लिखित्वा तन्मध्ये भूमण्डलं विरच्य तत्कोणेषु नपुंसकाक्षराणि लिखेदित्यर्थः । अङ्ग वासुदेव चिद्रूपानन्त केशव मत्स्य केत्विन्द्र-वज्रादिभिर्नवावरणा वृश्चिकपूजा ॥ ३५ ॥ ३६ ॥ ३७ ॥

बाणासनेति । बाणासनशब्देन धनुराकारं षट्कोणान्तरालमुच्यते । तदन्तरिति षट्कोणमध्य इत्यर्थः । युक्पञ्चकाढ्यं पञ्चकद्वयाढ्यं किं तत्पञ्चक द्वयमिति । तदाह—लघुसन्ध्यर्णेति । अ इ उ ऋ ऌ इत्येतल्लघुपञ्चकम् । ए ऐ ओ औ अं इत्येतत् सन्धिपञ्चकम् । वेष्टनक्रममाह—परानुप्ररचितेति । लृं एं ऋं ऐं उं ओं इं औं अं अं इति क्रमेण वेष्टयेदित्यर्थः । अस्त्रिष्विति ।

मध्यस्थायाः परीतौ विलसदनुपरात्तस्वरप्राक्परार्धं
सिंहार्णान्तास्त्रिगण्डस्फुरितहरिहरार्णं ग्रहार्णावृतञ्च ।
तद्बाह्ये षोडशार्णाचरवृतमुभकुद्योतितं कोणराजत्
सोऽहं हंसाचराढ्यं मकरभवमिदं यन्त्रमिष्टार्थदायि ॥ ४०

मेधा हर्षा श्रद्धा कृपा रतिर्वाक् सरस्वती प्रीतिः ।
वाणी चेति तृतीयावृतिरुक्ता मकरजे विधानेऽस्मिन् ॥ ४१

स्वक्षेत्रवर्तिनः स्युर्ग्रहा क्रमात् केशवादिभिः सहिताः ।
अर्चयितव्यामेतद्धनधान्यसमृद्धिदं विधानं स्यात् ॥ ४२

शक्तिश्रीकामबीजैः पुटितहरिहरब्रह्मभिश्चावृतान्त-
र्बीजं कोणद्विषट्कस्फुरितनृहरिबीजप्रतिद्योतितञ्च ।
आदिद्यान्तैश्च वर्णैर्वृतमवनिगृहद्वन्द्वकोणान्तकाम-
श्रीशक्तिद्यार्णचिन्तामणिमनु तदिदं श्रीकरं कुम्भयन्त्रम् ॥ ४३

अच्युतकामिनिभानुमनोज्ञा विश्वतनुर्विमला हरिभद्रे ।
सूक्ष्मसरस्वतिनन्दनसन्ध्या स्यादिति मध्यगता वृतिरेषा ॥ ४४

षट्कोणेष्वित्यर्थः । आं ईं ऊं ऋं लृं अः इत्येते शिष्टाः स्वराः । उपरि लसच्छूलप्राप्त वर्गमिति । षट्कोणाग्रान्निर्गच्छत्सु शूलेषु प्राप्त क च ट त प य वर्गमित्यर्थः । यदुजङ्घुलवकं कामबीजङ्घमित्यर्थः । अङ्ग वासुदेव ऋषीकेश-केशव केत्विन्द्र वज्रादिभिः सप्तावरणा चापपूजा ॥ ३८ ॥ ३९ ॥

अनुपरात्तस्वरप्राक्परार्धमिति । अं अः आं अं इं श्रीमित्यादिक्रमेणेत्यर्थः । सिंहार्णान्तास्त्रीति त्रीकारविशिष्टकोणत्रयमित्यर्थः । ग्रहार्णावृतिः हरिहरबाह्ये । षोडशार्णावृतिश्च तत्रैव । षोडशार्णः सुदर्शने वक्ष्यमाणो ग्राह्यः । अत्र षोडशार्णा-चराभ्यां वृतमिति । शक्तिवेष्टनात् बहिर्माढकावृतिरपि उक्ता । स्वक्षेत्रवर्तिन इत्युक्तं ग्रहावरणं सर्वत्र समानमिति केचित् । सर्वथापि तत्र पृथग्-गणनार्हम् । केशवाद्यावरण एवाऽन्तर्भूतत्वादित्यवगन्तव्यम् । अङ्ग वासुदेव-मेधा केशव केत्विन्द्र वज्रादिभिः सप्तावरणा मकरयन्त्रपूजा ॥ ४० ॥ ४१ ॥ ४२ ॥

शक्तिश्रीति । ह्रीं हरिः श्रीं हरः क्लीं ब्रह्मेति क्रमेणावृतिः कार्येत्यर्थः । आदिद्यान्तैरिति । शक्तिबाह्ये । अवनिगृहेति । दिग्गतकोणेषु कामादयो लेख्याः । कोणगतकोणेषु चिन्तामणिमनुरिति विभागः । अङ्गवासुदेवाच्युता-

अवनिपशुपुत्रसम्पदमपि पितृसौख्यञ्च हृत्प्रबोधञ्च ।
कुरुते विधानमेतत् प्रयोक्तुरन्ते च निर्वृतिं परमाम् ॥ ४५
व्यन्वेष्यद्भ्रस्वदीर्घा समभिहतमहाबीजमस्त्रेषु षट्सु
द्योतत्सौमारलक्ष्मीगिरिदुहितृधराबीजकं प्रोंसमेतम् ।
वीतं काद्यैः कषान्तैर्बहिरपि च कुकोणाष्टकोल्लासिहंसं
सर्वार्थान् साधकेभ्यो वितरति विधिवत्कल्पितं मीनयन्त्रम् ॥ ४६
हृष्टिर्व्युष्टिस्तुष्टिरिष्टा सपुष्टिः कान्तिर्मेधा मङ्गला वामसंज्ञा ।
दुर्गा प्रज्ञा भारती मध्यसंस्था वाक्सामर्थ्यश्रीकरं स्याद्विधानम् ॥
एभिर्विधानैर्धरणीव्रतादिदीक्षाविधीन् ये विधिना प्रकुर्युः ।
ते पुण्यभाजो नितरां समृद्धा सपुत्रदाराः सुखिनो भवन्ति ॥ ४८
दीर्घायुषो मुख्यतरेन्द्रियाश्च महाप्रभावास्त्वसमानवीर्याः ।
कलेवरान्ते विगताधयस्ते विष्णोरनन्यं पदमाप्नुवन्ति ॥ ४९
एभिर्विधेयाः कलशाश्च तत्तन्मासोक्तयन्त्रेषु नरैर्यथावत् ।
निजेप्सितं प्राप्य मनोरथन्ते भक्तेश्च मुक्तेरनुभावकाः स्युः ॥ ५०
कर्षोन्मिते च हाटकपट्टे यन्त्रं विलिख्य चतुरस्रे ।
तद्द्विंशकृते वा कलशेषु विनिक्षिपेच्च दीक्षासु ॥ ५१
अभिषिच्य यन्त्रकलशं गुरवे प्रददातु संयतमतिः सुमतिः ।
दुरितापनोदविधये द्युतये यशसे श्रिये च मतिसंयतये ॥ ५२

एषां यागविधीनामेकेन तु पूजयंस्तदवसाने ।
तत्तन्मूर्तिप्रीत्यै संस्तोतव्योऽनया हरिः स्तुत्या ॥ ५३
प्रसीद भगवन्मह्यमज्ञानात्कुण्ठितात्मने ।
तवाङ्घ्रिपङ्कजरजोरागिणीं भक्तिमुत्तमाम् ॥ ५४

नन्त केशव मत्स्य केत्विन्द्र वज्रादिभिर्नवावरणा कुम्भपूजा ॥ ४३ ॥ ४४ ॥ ४५ ॥

व्यन्वेष्यद्भ्रस्वेति । अं आं ओं ईं ऐं ऊं लृं ॠं ऋं लॄं उं ऐं इं औं अं अः इति क्रमेणाहुतिः कार्येत्यर्थः । विधिवत् कल्पितमिति । यन्त्रहृदादिकं सूचयति । अङ्गवासुदेव हृषीकेश केशव केत्विन्द्र वज्रादिभिः सप्तावरणा मीनपूजा ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥

अज प्रसीद भगवन्नमितद्युतिपञ्जर ।
अप्रमेय प्रसीदाऽस्मद्दुःखहन् पुरुषोत्तम ॥ ५५
स्वसंवेद्यस्वरूपात्मन्नानन्दात्मन्ननामय ।
अचिन्त्यसार विश्वात्मन् प्रसीदेश निरञ्जन ॥ ५६
प्रसीद तुङ्ग तुङ्गानां प्रसीद शिव शोभन ।
प्रसीद स्पष्ट गम्भीर गम्भीराणां महाद्युते ॥ ५७
प्रसीदाऽव्यक्त विस्तीर्ण विस्तीर्णानामणोरणो ।
प्रसीदार्द्रार्द्रजातीनां प्रसीदाऽन्तान्तयायिनाम् ॥ ५८
गुरोर्गरीयः सर्वेश प्रसीदाऽनन्त[न्य] देहिनाम् ।
जय माधव मायात्मन् जय शास्वत शङ्खभृत् ॥ ५९
जय सुन्दर सौम्यात्मन् जय केशव केशिहन् ।
जय शार्ङ्गधर श्रीमन् जय नन्दकनन्दन ॥ ६०
जय चक्रगदापाणे जयाऽजय्य जनार्दन ।
जय रत्नोत्करावद्धकिरीटाक्रान्तमस्तक ॥ ६१
जय पक्षिपतिच्छायानिरुद्धार्कंकराकर ।
नमस्ते नरकारातेे नमस्ते मधुसूदन ॥ ६२
नमस्ते नलिनापाङ्ग नमस्ते नयनाञ्जन ।
नमः पापहरेशान नमः सर्वभयापह ॥ ६३
नमः संहृतसर्वात्मन् नमः सम्भृतकौस्तुभ ।
नमस्ते नयनातीत नमोऽतिक्रान्तवाक्पथ ॥ ६४
नमो विभिन्नज्ञेयांश नमः स्मृतिपथातिग ।
नमस्त्रिमूर्तिभेदेन सर्गस्थित्यन्तहेतवे ॥ ६५
विष्णवे त्रिदशारातिजिष्णवे परमात्मने ।
चक्रभिन्नारिचक्राय चक्रिणे चक्रबन्धवे ॥ ६६
विश्वाय विश्ववन्द्याय विश्वभूतात्मने नमः ।
नमोऽस्तु योगिध्येयाय नमोऽस्त्वध्यात्मरूपिणे ॥ ६७

स्तुतिमाह—प्रसीदेत्यादि षोडशभिः ॥ ५३—६९ ॥

भुक्तिप्रदाय भक्तानां नमस्ते मुक्तिदायिने ।
मनोवाक्कायचेष्टाः स्युर्ध्यानस्तुतिनमस्क्रियाः ॥ ६८
देवेश कर्म सर्वं मे भवेदाराधनं तव ।
विषयेष्वमि सङ्गो मे हुतं विष्णो तवाऽच्युत ॥ ६९
इति हवनजपार्चासेवितो विष्णुपूजा-
निरतहृदयकर्मा यस्तु मन्त्री चिराय ।
स खलु सकलकामान् प्राप्य हृष्टान्तरात्मा
जननमृतिवियुक्तामुत्तमां मुक्तिमेति ॥ ७०

इति श्रीप्रपञ्चसारे एकविंशः पटलः ।

यस्तु मन्त्री चिरायेति । अत्रोक्तान् केशवादिमन्त्रान् सूचयति ॥ ६९ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
एकविंशः पटलः ।

द्वाविंशः पटलः ।

अथोच्यते द्वादशवर्णसंज्ञो मन्त्रस्तु साङ्गः सजपः सहोमः ।
विधानतो यं प्रतिजप्य भक्ता भुक्तेश्च मुक्तेश्च पदं भवेयुः ॥ १
तारं सहृदयं मध्ये गवते स्युर्भवार्णयोः ।
सुययोश्च तथा देवा मन्त्रोऽयं द्वादशाक्षरः ॥ २
ऋषिः प्रजापतिश्छन्दो गायत्री विष्णुरुच्यते ।
देवता हृद्ध्रुवेण स्यान्नमसा शिर उच्यते ॥ ३
चतुर्भिश्च शिखा वर्णैः पञ्चभिः कवचं भवेत् ।
प्रोक्तमस्त्रं समस्तेन पञ्चाङ्गविधिरीदृशः ॥ ४
सपादजानुयुगललिङ्गनाभ्युदरेषु च ।
हृद्दोर्गलास्यहृद्ब्रह्मशिखास्त्रक्षरतो न्यसेत् ॥ ५
शिखाललाटनेत्रास्यगलदोर्हृदयेष्वपि ।
सकुक्षिनाभिलिङ्गाख्यजानुपादेषु विन्यसेत् ॥ ६
हृत्कुक्षिनाभिषु तथा गुह्यजानुपदेष्वथ ।
करकण्ठास्यहृद्ब्रह्मशिखामूर्धसु विन्यसेत् ॥ ७
संहृतेर्दोषसंहारः सृष्टेश्च शुभपुष्टयः ।
स्थितेस्तु शान्तिविन्यासस्तस्मात्कार्यस्त्रिधा मतः ॥ ८
हरिमुज्ज्वलचक्रदराब्जगदाकुलदोःपरिघं सितपद्मगतम् ।
वलयाङ्गदहारकिरीटधरं नवकुन्दरुचं प्रणमामि सदा ॥ ९
विधिवदथ विहितदीक्षो जपेन्मनुं वर्णलक्षमानममुम् ।
शुद्धैश्च तिलैर्जुहुयाद्द्वादशसाहस्रसंख्यकं मन्त्री ॥ १०

द्वादशमूर्तिविधानानन्तरं तत्समष्टिवाचकस्य द्वादशाक्षरस्य विधानं वदन् विनियोगमाह—अथोच्यत इति । अं बीजम् । नमः शक्तिः ॥ १ ॥ २ ॥

पञ्चाङ्गविधिरीदृश इति । द्वादशाङ्गस्यापि सद्भावः सूचितः । तत्र द्वादशवर्णैः सार्धं पुरुष सत्याच्युत वासुदेवादिनारायण ब्रह्म विष्णु नरसिंह वराहाभिः षड्ङ्गोदरपृष्ठबाहूरुजानुपादेषु कार्यम् ॥ ३॥४॥५॥६॥७॥८॥९ ॥

द्वादशसाहस्रकं मन्त्रीति । विशेष होमजपेषु बीजविशेष उक्तः ॥ १० ॥

पीठे हरेरथाङ्गैः सशक्तिभिर्मूर्तिभिस्तदनु यजेत् ।
केशवसुरनाथाद्यैरपि देवं भक्तिसंयुतो विद्वान् ॥ ११
समिधामथ दुग्धवृक्षजानां जुहुयादर्कसहस्रकं सदुग्धम् ।
मनसः परिशुद्धये मनस्वी सघृतेनापि पयोऽम्बसा सितेन ॥ १२
द्वादशाक्षरजपं तु सार्चनं यो भजेन्नियमतो दिने दिने ।
ऐहिकं समुपलभ्य वाञ्छितं प्रेत्य याति पदमक्षयं हरेः ॥ १३
अथ प्रवक्ष्यामि सुदर्शनस्य विधिं मनोः संग्रहतो जपादेः ।
यत्सिद्धितः सिद्धिमवापुरग्र्यां सिद्धा मुनीन्द्रा अपि सद्य एव ॥ १४
अन्त्यतुरीयतदादिकभृगुदहनानन्तवह्निवर्मास्त्रैः ।
तारादिर्मनुरुक्तः स्यादभिमतसिद्धिदो रथाङ्गाख्यः ॥ १५
ऋषिरस्याऽहिर्ब्रह्मश्छन्दोऽनुष्टुब्देवता च विष्णुः ।
चक्रपदैराविसुधोसंज्वालाद्यैः शिरोऽन्वितैरङ्गम् ॥ १६
ऐन्द्रीं समारभ्य दिशन्त्वधस्तादन्तं समुक्त्वा क्रमशो दशानाम् ।
चक्रेण बध्नामि नमस्तथोक्त्वा चक्राय शीर्षञ्च दिशां प्रबन्धः ॥ १७
त्रैलोक्यं रक्ष रक्षेति हुं फट् स्वाहेति चोदितः ।
तारादिकोऽयं मन्त्रः स्यादग्निप्राकारसंज्ञकः ॥ १८
तारन्तु मूर्ध्नाथ सितारुणकृष्णवर्णं
मध्ये भ्रुवोश्च समथो वदने हकारम् ।
हृद्गुह्यजानुपदसन्धिषु चाऽवशिष्टान्
वर्णान्न्यसेदिति मनोः[तनौ] पुनरग्निवर्णान् ॥ १९

भक्तिसंयुतो विद्वानित्यष्टाक्षरोक्तं सर्वम् । विद्वानिति । मासयन्त्र-पूजादिकमत्रापि समानमित्युक्तम् ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

सम्यग्विज्ञानविज्ञेयस्य वासुदेवस्य पूजामभिधाय चक्रात्मकज्ञानविशिष्टस्य तस्यैव विधानं वक्तुमारभते—अन्त्येति ॥ १५ ॥

देवता विष्णुरिति । सुदर्शनविष्णुरित्यर्थः । रं बीजम् । हुं शक्तिः ॥ १६ ॥

ऐन्द्रीं दिशं चक्रेण बध्नामि नमश्चक्राय स्वाहेत्याद्याः प्रयोगेषु रक्षार्थं दिग्बन्धनमन्त्राः । सुदर्शनमुद्रया सहाऽयं दिग्बन्धः कार्यः ॥ १७ ॥ १८ ॥

तारं तु मूर्ध्नीति वर्णन्यासः । अत्रापि समानाः सामान्यन्यासाः ॥ १९ ॥

अव्याद्भास्करसप्रभाभिरखिलाभाभिर्दिशो भासयन्
भीमाक्षः स्फुरदट्टहासविकसद्दंष्ट्राग्रदीप्तानन: ।
दोर्भिश्चक्रदरौ गदाब्जमुसलप्रासांश्च पाशाङ्कुशौ
बिभ्रत् पिङ्गशिरोरुहोऽथ भवतश्चक्राभिधानो हरिः ॥ २०

प्रोक्त्वा सुदर्शनायेति विद्महेऽन्ते महापदम् ।
ज्वालाय धीमहि प्रोक्त्वा तन्नश्चक्रः प्रचोदयात् ॥ २१
सौदर्शनीयं गायत्री जप्तव्या जप्तुमिच्छता ।
सान्निध्यकारिणीं मुद्रां दर्शयेदनया सुधीः ॥ २२
नमो भगवते प्रोक्त्वा महासुदर्शनाय च ।
महाचक्राय च तथा महाज्वालाय चेत्यपि ॥ २३
दीप्तरूपाय चेत्युक्त्वा सर्वतो रक्ष रक्ष माम् ।
महाबलाय स्वाहेति प्रोक्तस्तारादिको मनुः ।
रक्षाकरः प्रसिद्धोऽयं क्रियमाणेषु कर्मसु ॥ २४

षट्कोणान्तःस्थतारं विवरलिखितमन्वाक्षरं सन्विराजत्
स्वाङ्गं बाह्ये कलाकिंसरमुदरगताष्टाक्षरञ्चाऽष्टपत्रम् ।
पद्मं वर्णैर्विराजत् विकृतिदललसत्षोड़शार्णं त्रिवीतं
व्योमान्त्यार्णं स्वनाम्ना विरचितगुणपाशाङ्कुशं चक्रयन्त्रम् ॥ २५

ध्यानमाह—अव्यादिति ॥ २० ॥

सुदर्शनगायत्रीमाह—प्रोक्तेति । सान्निध्यकारिणी मुद्रा सुदर्शनमुद्रा । सुधीरिति । सहस्रारस्य सुदर्शनस्य ध्यानमुक्तम् ॥ २१ ॥ २२ ॥

रक्षाकरमपरं मन्त्रमाह—नम इति ॥ २३ ॥ २४ ॥

पूजादौ प्रयोक्तव्यं यन्त्रमाह—षट्कोणेति । विवरशब्देन कोणषट्कमुक्तम् । बाह्य इति । वृत्तबाह्य इत्यर्थः । कलाः स्वराः । उदरं दलमध्यम् । वर्णैः विराजद्विकृतिदललसत्षोड़शार्णमिति । वर्णैः कादिसान्तैः द्विगः केसरस्थानलिखितैः विराजद्विकृतिसंख्यादलयुक्तपद्मदलस्थषोडशार्णमित्यर्थः । तद्बाह्यस्थवृत्तत्रयेति । त्रिवीतं व्योमान्त्यार्णं व्योमार्णं हकारः अन्त्यार्णः क्षकारः । तद्बाह्ये स्वनाम्ना सह विरचितगुणपाशाङ्कुशम् । गुणः प्रणवः । प्रथमं प्रणवः ततो नाम्नः प्रथममक्षरम् । ततः पाशः ततो नामद्वितीयाक्षरम् ।

प्रणवहृद्भगवद्युतङे महादिकरथाङ्गचतुर्थी हुमस्त्रकैः ।
निगदितस्त्विति षोड़शवर्णको मनुवरो मुनिभिर्विहितादरः ॥ २६
क्वाथैः पयोभूरुहचर्मसिद्धैर्दुग्धेन गव्यैरपि पञ्चभिर्वा ।
मूत्रैः पशोर्वा प्रतिपूर्यं कुम्भं समर्चयेच्चक्रहरिं क्रमेण ॥ २७
अङ्गैः प्रथमावृतिरपि च पूज्या चक्रादिभिर्द्वितीया च ।
लक्ष्म्यादिभिस्तृतीया क्रमात्तथेन्द्रादिभिश्चतुर्थी स्यात् ॥ २८
चक्रशङ्खगदापद्ममुसला धनुरेव च ।
पाशाङ्कुशौ पीतरक्तसितश्यामत्विषस्त्विमाः ॥ २९
लक्ष्मीः सरस्वती चाथ रतिः प्रीत्याह्वया ततः ।
कीर्त्तिः कान्तिस्तुष्टिपुष्टी क्रमेणैव तु शक्तयः ॥ ३०
संपूज्य चेवं विधिना हरिन्तु शिष्यं गुरुः प्रीततमोऽभिषिञ्चेत् ।
भक्त्या स्वशक्त्या विभवैर्द्विजातीन् सन्तर्प्य भूयो गुरुणाऽनुशिष्टः ॥ ३
एकाग्रचित्तो रविलक्षसंख्यं जपेन्मनुं नित्यकृताभिपूजः ।
तावत् सहस्रं तिलसर्षपाज्यबिल्वाज्यदौग्धानि जुहोतु सम्यक् ॥ ३
समुद्रतीरेऽप्यथवाऽद्रिशृङ्गे समुद्रगानां सरिताञ्च तीरे ।
जपेद्विविक्ते निज एव गेहे विष्णोर्गृहे वा पुरुषो मनस्वी ॥ ३३
यथोक्तसंख्यं विधिवत् प्रजप्ते मन्त्रे यथोक्तैश्च हुते हुताशे ।
द्रव्यैरथ स्वार्थपरार्थहेतोः कुर्यात् प्रयोगान् विधिना यथावत् ॥ ३४
पीताभा कर्णिका स्यादरुणतरमरं श्यामलञ्चाऽन्तरालं
नेमिः श्वेता च बाह्ये विरचितशिखरेखाकुलं पार्थिवान्तम् ।
चक्रद्वन्द्वं लिखित्वा विशदमतिरथो सौम्ययाम्यञ्च मन्त्रौ
कुम्भं संपूर्य सौम्ये प्ररचयतु तथा दक्षिणे होमकर्म ॥ ३५

ततोऽङ्कुशमिति विरचनाप्रकारः ॥ २५ ॥ २६ ॥

पीतरक्तादिवर्णा लक्ष्म्याद्या ज्ञातव्याः २७ ॥ २८ ॥ २९ ॥ ३० ॥

सम्यगिति । द्रव्याणां समविभागं सूचयति ॥ ३१ ॥ ३२ ॥

मनस्वीति । ब्रह्मचर्यादिनियमवानित्यर्थः ॥ ३३ ॥

विधिना यथावदिति । विधिनेत्यग्निजननादिकमुक्तम् । यथावदिति । कार्यानुगुणबीजविशेषयोगः सूचितः ॥ ३४ ॥

षड्विंशच्छतसम्मितैरथ घृतापामार्गकैर्धान्यतैः
सद्राजीतिलपायसैश्च सकलैर्गव्यैर्घृताक्तैः क्रमात् ।
हुत्वा तद्धुतशिष्टमत्र विधिवत् क्षिप्त्वा प्रतिद्रव्यकं
प्रस्थार्धान्नकृतञ्च पिण्डममलं कुम्भोदके मन्त्रवित् ॥ ३६
संस्थाप्य दक्षिणस्यां साध्यं कुम्भेन तेन नीराज्य ।
तमथ घटं सद्रव्यं बहिरारादष्टमे क्षिपेद्राशौ ॥ ३७
अग्न्यादिकमपि सर्वं क्षिपेदथ घटस्य दक्षिणे भागे ।
हुतशेषान्नेन च बलिं मन्त्रेणाऽनेन मन्त्रवित् कुर्यात् ॥ ३८
हृदयान्ते विष्णुपदं प्रोक्त्वाऽथ गणेभ्य उच्चरेत् पूर्वम् ।
शान्तिकरेभ्यश्च बलिं गृह्णन्त्विति शान्तये नमोऽन्तः स्यात् ॥ ३९
ज्वरादिकां रोगपरम्परां वा विस्मृत्यपस्मारभवां रुजं वा ।
रक्षःपिशाचग्रहवैकृतं वा विधिस्त्वयं मङ्क्षु हरेद्विकारम् ॥ ४०
पालाशैर्वा स्तनजद्रुमजैर्वा पञ्चरे कृते फलकैः ।
संपूर्य पञ्चगव्यैस्तत्र तु संस्थाप्य शुद्धमपि गदिनम् ॥ ४१
पूर्वोद्दिष्टैर्दिक्षु च सजपं जुहुयुः पृथग्द्विजा वशिनः ।
द्रव्यैः सदक्षिणं तानभ्यर्च्य च मुच्यते रुजो जन्तुः ॥ ४२

विशदमतिरथो इति । चक्रयाथात्म्यज्ञत्वमुक्तम् । मन्त्रीति । चक्रस्य मूलमन्त्रतत्त्ववित् । कुम्भं संपूर्येति । शुद्धोदकेन संपूर्य तत्र दैवमावाह्याऽभिपूज्येत्यर्थः ॥ ३५ ॥

विधिवत् क्षिप्त्वेति । दशांशं कलशे क्षिप्त्वेत्यर्थः । कुम्भोदक इति । कुम्भमुख इत्यर्थः । मन्त्रविदिति । वषडन्तमूलान्वित सुदर्शनगायत्र्या क्षिपेदित्यर्थः । मन्त्रविदित्यनेनैव दक्षिणभागस्थस्य साध्यस्य सकलीकरणं रक्षोघ्नमन्त्रेण नीराजनं चोक्तम् ।

ओं स्थाने हृषीकेश तव प्रकीर्त्याऽन्ते सह नमो जगत् प्रहृष्यत्यनुरज्यते चाऽन्ते स्रार नारा रक्षांसि भीतानि दिशो द्रवन्ति हुं फड् यणा सर्वे नमस्यन्ति च सिद्धसंघाः योमिति रक्षोघ्नमन्त्रः ॥ ३६ ॥ ३७ ॥

मन्त्रवित् कुर्यादिति । प्रणवशक्त्यादित्वं मन्त्रस्य सूचितम् ॥ ३८॥३९॥४० ॥ शुद्धमपीत्यपिना सकलीकरणमुक्तम् ॥ ४१ ॥ ४२ ॥

विप्रक्षीरद्रुमत्वङ्मलयजपुरकाश्मीरकुष्ठवियामा-
बिल्वापामार्गराजीतिलतुलसियुगक्रान्तिदूर्वाजवार्कैः ।
लक्ष्मीदेवीकुशागोमयकमलवचारोचनापञ्चगव्यैः
सिद्धेऽग्नौ कुम्भसिद्धं मनुजपसहितं भस्म सर्वार्थदायि ॥ ४३

लक्ष्म्यायुष्करमतुलं पिशाचभूता-
पस्मारादिकमचिरेण नाशयेच्च ।
क्षुद्रादीनपि विविधांस्तथोपसर्गा-
नेतस्मान्न परतरा समास्ति रक्षा ॥ ४४

जुहुयात् गुग्गुलुगुलिकासहस्रकं साष्टकं च मन्त्रितमः ।
त्रिदिनं चतुर्दिनं वा सर्वोपद्रवनिवारणं भवति ॥ ४५
खरमञ्जर्याः समिधामयुतं वा मन्त्रवित्तमो जुहुयात् ।
ज्वरभूतामयविस्मृत्यपस्मृतीः शमयितुं नियतचित्तः ॥ ४६
आज्याक्तैर्जुहुयाच्छ्रिये सरसिजैर्दूर्वाभिरप्यायुषे
मेधायै द्विजभूरुहैश्च कुमुदैः श्वेतैस्तथा वाससे ।
शुद्धाज्यैः पशवेऽप्युदुम्बरभवैः पुत्राय चाऽश्वत्थजै-
रेकाब्दं विधिवत् सहस्रसमितैरष्टोत्तरं मुक्तये ॥ ४७
चक्रस्य नाभिसंस्थं स्मृत्वाऽऽत्मानं जपेन्मनुं मन्त्री ।
स्वयमेकोऽपि न युद्धे मर्त्यैर्बहुभिः पराजितो भवति ॥ ४८
मन्त्री सुनियतचित्तश्चक्रस्थं भाव[भाम]येद्विया ग्रस्तम् ।
आविश्य सकलं मुक्त्वा मुञ्चति दग्धोऽग्निनाऽऽशु नाभिभुवा ॥ ४९

सिद्धेऽग्नौ कुम्भसिद्धमिति । पूर्वोक्तविधानेनाऽग्निं संस्कृत्य पूर्वोक्तप्रकारेणैव कुम्भे पञ्चगव्यं संयोज्य तस्मिन् प्रोक्तमौषधजातं निक्षिप्य मूलमन्त्रं जपन् भर्जयेत् । ततः कुम्भमध्यगतौषधिष्वभिव्यक्तेऽग्नौ मूलेन शतं सहस्रं वा हुत्वा जपपूजादिना घटे सिद्धं भस्म सकलाभ्युदयदायीत्यर्थः ॥ ४३ ॥ ४४ ॥

साष्टकं च मन्त्रितम इति नृसिंहबीजयोग उक्तः ॥ ४५ ॥

मन्त्रवित्तमो जुहुयादित्यपि तथा वषट्कारयोगश्च ॥ ४६ ॥ ४७ ॥

मनुं जपेन्मन्त्रीति । रक्षोघ्नमन्त्रयुतमित्यर्थः ॥ ४८ ॥

मन्त्री सुनियतचित्त इति तथा दीप्तमित्यपि सहस्रारध्यानाकारा-

दीप्तं करालदहनप्रतिमञ्च चक्रं
यस्य स्मरेच्छिरसि कस्यचिदप्रियस्य ।
सप्ताहतोऽस्य दहनप्रतिमो ज्वरः स्या-
त्त्रिंशद्दिनैश्च स परेतपुरं प्रयाति ॥ ५०

कलावृतं याहिपदाभिवेष्टितं
समक्षरं यच्छिरसि स्मरेत् सदा ।
दशाहतोऽसौ प्रति चाव्यते रिपु-
र्मृतिं तथा मण्डलतः प्रयाति ॥ ५१

सार्णं[न्तं] वायसवर्णं शत्रोः शिरसि स्मरेच्च सप्ताहम् ।
उच्चाटयति क्षिप्रं मारयति वा धियोऽस्य नैशिल्यात् ॥ ५२

स्रवत्सुधावर्षिणमिन्दुसप्रभं
समक्षरं यच्छिरसि प्रचिन्तयेत् ।
क्षणात् समाप्यायितसर्वविग्रहो
भवेत् स मर्त्यः सुचिरञ्च जीवति ॥ ५३

मध्ये तारं तदनु च मनुं वर्णशः कोणषट्के
बाह्ये चाङ्गं लिखतु कनके रूप्यके चाऽथ ताम्रे ।
पाषाणे वा विधिवदभिजप्याऽथ संस्थापितं त-
च्चक्रं चोरग्रहरिपुभयध्वंसि रक्षाकरञ्च ॥ ५४

स्थाने हृषीकेशविदर्भितं च साष्टाक्षरञ्चाप्यभिजप्तमेतत् ।
रक्षां ग्रहादेः सततं विधत्ते यन्त्रं सुकृप्तञ्च मनुत्रयेण ॥ ५५

लत्वध्यानमुक्तम् ॥ ४८ ॥ ५० ॥

कलावृतमिति । यं यामित्यादिभिरावृतमित्यर्थः । शिरसि स्थितं समक्षरं वायसाकारं हृद्गतं जीवं ग्रसति चेन्मृतिं याति । धीनैशिल्यमप्येतदेव ॥ ५१ ॥ ॥ ५२ ॥

स्रवत्सुधावर्षिणमिति प्रयोगोऽमृतमण्डले वं वामित्यादियुक्तञ्च कार्यः ॥५३॥

विधिवदभिजप्येति । होमादिपूर्वकमित्यर्थः ॥ ५४ ॥

रक्षोघ्नमन्त्रमुद्धरति—स्थानेति ॥ ५५ ॥

अष्टाक्षरान्तरितपादचतुष्ककोष्ठं
कोष्ठत्रयोल्लिखितसाध्यसुदर्शनञ्च ।
रेखाभिरप्युभयतः श्रुतिशः प्रबद्धं
तत्सप्तकोष्ठमिति यन्त्रमिदं प्रशस्तम् ॥ ५६

भूर्जे वा क्षौमपट्टे तनुमसृणतरे कर्पटे वाऽस्य यन्त्रं
मन्त्री सम्यग्लिखित्वा पुनरपि गुलिकीकृत्य लाक्षाभिवीतम् ।
कृत्वा भस्मादिहोमप्रविहितघृतसम्पातपातात्तशक्ति
जप्तं सम्यग्विदध्यात् प्रतिशममुपयान्त्येव सर्वे विकाराः ॥ ५७

इति जपहुतार्चनाभिर्यन्त्रविशेषैश्च साधु मन्त्रमिमम् ।
भजते योऽसौ मन्त्री लभते भुक्तिं सुखेन मुक्तिञ्च ॥ ५८

इति श्रीप्रपञ्चसारे द्वाविंशः पटलः ।

यन्त्ररचनाप्रकारमाह— अष्टाक्षरेति । रेखाष्टकं लिखित्वा एकान्तरितमुभयतो बद्ध्वा अष्टाक्षराक्षरद्वयान्तरितगीतात्रिष्टुप्पादचतुष्कयुतकोष्ठचतुष्कं कुर्यात् । प्रथमं पादद्वयमूर्ध्वभागस्थकोष्ठद्वये अपरद्वयमधोभागस्थकोष्ठद्वये मध्यकोष्ठोभयभागस्थकोष्ठद्वययोः सुदर्शनं मध्यकोष्ठगप्रणवे साध्यादिकं लिखेदिति यन्त्ररचनाप्रकारः । श्रुतिशः प्रबद्धमिति । तृतीयतृतीयरेखादिभिः बद्धमित्यर्थः ॥ ५६ ॥

मन्त्रीति । यन्त्रहृदयादिकमुक्तम् । भस्मादिना होमप्रविहितघृतसम्पातपातेन चात्तशक्तीत्यर्थः ॥ ५७ ॥ ५८ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
द्वाविंशः पटलः ।

त्रयोविंशः पटलः ।

धर्मवित्तसुखमोक्षफलाप्तौ योषितामपि नृणां प्रवरं यत् ।
मन्त्ररत्नमतिगुह्यमिदानीं वक्ष्यते मतिमतामपि रम्यम् ॥ १
दौर्भाग्यव्याधिदारिद्र्यजराशोकभयातुराः ।
भर्त्तृराजाभिभूताश्च स्त्रीविघ्नार्त्तास्तदीप्सवः ॥ २
पुत्रभृत्यार्थिनो युद्धजयकामान्यवञ्चिताः ।
भूतार्थाक्लिष्टसंसारवश्यसंवननार्थिनः ॥ ३
बलिसिद्ध्यर्थिनश्चैव अन्तर्धानाभिकाङ्क्षिणः ।
शत्रुभिः परिभूताश्च सर्वविघ्नैरुपद्रुताः ॥ ४
मारणोच्चाटनद्वेषस्तम्भाकर्षणकाङ्क्षिणः ।
भजेयुः सर्वथैवैनं मन्त्रं त्रैलोक्यमोहनम् ॥ ५
हृदयपुरुषोत्तमान्ते त्वप्रतिरूपेति चापि संभाष्य ।
लक्ष्मीनिवासपरतो जगदादौ सकल इत्युदाहृत्य ॥ ६
क्षोभण सर्वपदान्ते स्त्रीहृदयविदारण त्रिभुवनेति ।
समनोन्मादकरेति च सुरासुरान्ते वदेन्मनुजपदम् ॥ ७
भूयश्च सुन्दरीजनमनांस्यथो तापयादिकान् वीप्सा ।
तापय दीपय शोषय मारय भृगुकामिकालवान्ते तु ॥ ८

रक्षाप्रधानसुदर्शनमभिधाय रक्षितस्य शीघ्रं विभूतिसिद्धये श्रीपुरुषोत्तमविधिमाह—धर्मेति । अथवा चक्राधिरूढस्य भगवतो विधिमभिधाय गरुड़ाधिरूढस्य भगवतो विधिरभिधीयत इति सम्बन्धो वाच्यः । धर्मेत्यादिना विनियोग उक्तः । योषितामपीति । स्त्रीणामप्यत्राऽधिकार उक्तः । मतिमतामिति । तत्तत्पुरुषार्थविनियोगे बीजविशेषज्ञानामित्यर्थः ॥ १ ॥

भूतार्थाक्लिष्टसंसारेति । प्रभूतानां प्राणिनां प्रयोजनायाक्लिष्टसंसारनिर्वाहादिकमर्थयन्तीति तथोक्ताः ॥ २ ॥ ३ ॥ ४ ॥

मारणोच्चाटनेत्यादिना स्वार्थप्रयोगकांक्षिणामप्यधिकार उक्तः ॥ ५ ॥

मन्त्रमुद्धरति—हृदयेति । तन्त्री श्रीकण्ठाद्यं सश्रवणं कमिति अमुकमिति ।

निद्रां बालिनमाभाष्य ब्रूयादपि ततः परम् ।
मोहय द्रावयेति च भूयश्चाकर्षयेत्युदीर्यान्तः ॥ ९
समस्तपरमसुभगं सर्वप्रदयोस्तु मध्यतः प्रवदेत् ।
सौभाग्यसृष्टिवक्रीन् ससर्वादिकं कामशब्दञ्च ॥ १०
तन्द्री श्रीकण्ठाद्यं सश्रवणं कं हनद्वयञ्च वदेत् ।
चक्रेण वाऽथ गदया खड्गेन च सर्वबाणैश्च ॥ ११
भिन्दद्वयञ्च पाशेनाऽन्ते घट्टयद्वयं समाभाष्य ।
भूयोऽङ्कुशेन ताड़य तु[कु]रुयुग्मकञ्च किञ्च प्रवदेत् ॥ १२
तिष्ठसि तावद्यावत् समीहितं मे समाभाष्य ।
सिद्धं भवतु च हुंफट् नमोऽन्तिकं मन्त्रमुद्धरेन्मन्त्री ।
मन्मथबीजोपेतं ताराद्यं सर्वसिद्धिदं भवति ॥ १३
मन्त्रपदानि द्वादश विद्यादाज्ञापदानि तावन्ति ।
सम्बुद्ध्यन्ता हुंफट्पदान्विताश्चेमे मन्त्राः स्युः ।
मध्यनरान्ते च परे गदिता मुनिभिर्मनोरमुष्य पुनः ॥ १४

अमुकशब्दं परित्यज्य तत्स्थाने साध्यनामयोग उक्तः । मन्त्रमुद्धरेन्मन्त्रीति । शक्ति-श्रीबीजयोग उक्तः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

मन्त्रपदानीति । आमन्त्रणपदानि सम्बुद्ध्यन्तपदानीत्यर्थः । तानि द्वादश विद्यात् । द्वादशाङ्गन्यासपूजादिसाधनत्वेन जानीयादित्यर्थः । आज्ञापदानि प्रार्थनपदानीति भावः । तान्यपि तापयादीनि तावन्ति द्वादशसंख्यातानि विद्यात् । वश्याकर्षणक्रूरकर्मादिषु पुष्पाञ्जल्यर्थं जानीयादित्यर्थः ।

तत्र द्वादशाङ्गादिमन्त्राणां द्वादशमूर्तिसंयोगमाह—सम्बुद्ध्यन्ताः पुरुषाद्यन्ता इति सम्बुद्ध्यन्ता मन्त्रांशाः पुरुषाद्यन्ताः । सम्बुद्ध्यन्तानां पदानामुपरि पुरुषादयः प्रयोक्तव्या इत्यर्थः । पुरुष सत्याच्युत वासुदेव संकर्षण प्रद्युम्नानिरुद्ध नारायण-ब्रह्म विष्णु नरसिंह वराहाः पुरुषादयः ।

आज्ञापदान् विशिनष्टि—हुं फट्पदान्विता इति । आज्ञापदानामुपरि हुंफडिति प्रयोक्तव्यमित्यर्थः ।

पुनरपि मन्त्रणपदानां विशेषं दर्शयन् बीजप्रयोगक्रमं मन्त्रणपदानां द्वादश-संख्यानाञ्च पूरयति—मध्येति । मध्यनरान्ते परे सति मुनिभिः द्वादशमन्त्रा गदिताः स्युरित्यन्वयः । बीजत्रितये मध्यस्थो नरः पुरुषः पुरुषोत्तमः

कामबीजरूपो मध्यनरः तस्याऽन्ते पार्श्वे सति पार्श्वद्वयगतशक्तिश्रीबीजद्वये सतीत्यर्थः। अनेन बीजानां प्रयोगक्रम उक्तः। आमन्त्रणपदानां बीजत्रयेण सार्धं द्वादशसंख्या च पूरिता।

अवशिष्टं मन्त्रांशमाह—परे सतीति। सम्बुद्ध्यन्तपदानामुपरि चतुर्थ्यन्ते परपदे च सतीत्यर्थः। चशब्देन मन्त्राणामादिभूत प्रणवोपरि मन्त्रमध्यगतनमःपदयोगः सूचितः। आज्ञापदेष्वपि बीजत्रययोगं वदन् तेषामादौ पुरुषोत्तमपदसंयोगमाह—मध्यनरान्ते च पर इति। मध्यनरस्य मध्यमपुरुषस्याऽन्ते उत्तमपुरुषे पुरुषोत्तमे सति परे अन्ये आज्ञामन्त्राः स्युरित्यर्थः।

अत्रायं द्वादशाङ्गमन्त्रप्रयोगक्रमः। ओं नमो क्लीं पराय पुरुषात्मने हृदयाय नमः। ओं नमः क्लीं पराय सत्यात्मने शिरसे स्वाहा। ओं नमः श्रीं पराय अच्युतात्मने शिखायै वषट्। ओं नमः पुरुषोत्तमपराय वासुदेवात्मने कवचाय हुम्। ओं नमः अप्रतिरूपपराय संकर्षणात्मने नेत्राभ्यां वौषट्। ओं नमो लक्ष्मीनिवासपराय प्रद्युम्नात्मने अस्त्राय फट्। ओं नमः सकलजगत्क्षोभणपराय अनिरुद्धात्मने उदराय नमः। ओं नमः सर्वस्त्रीहृदयविदारणपराय नारायणात्मने पृष्ठाय नमः। ओं नमः त्रिभुवनमनोन्मादकरपराय ब्रह्मणे बाहुभ्यां नमः। ओं नमः समस्तपरमसुभगपराय विष्णवात्मने ऊरुभ्यां नमः। ओं नमः सर्वसौभाग्यकर पराय नृसिंहात्मने जानुभ्यां नमः। ओं नमः सर्वकामप्रदपराय वराहात्मने पादाभ्यां नमः। इति द्वादशाङ्गन्यासादिमन्त्राः।

द्वादशाङ्गन्यासानन्तरं लक्ष्मग्राद्याः सुदर्शनोक्ताः शक्तयो मूर्धास्यहृद्गुह्यकण्ठनाभ्यङ्घ्रिसर्वाङ्गेषु स्वां स्वीं स्वूं स्वें स्वैं स्वों स्वौं स्वं बीजयुता न्यस्तव्याः। अथाज्ञामन्त्रा वश्यादिक्रियासु पुष्पाञ्जल्यर्था उच्यन्ते। ओं क्लीं क्लीं श्रीं नमः पुरुषोत्तम अमुष्य सुरासुरमनुजसुन्दरीजनमनांसि तापय तापय हुं फट् तुरु तुरु किं तिष्ठसि तावत् यावत् समीहितं मे सिद्धं भवति हुं फट्स्वाहा इति तापनमन्त्रः। एवमेव दीपन शोषण मारण स्तम्भन द्रावणाकर्षण मन्त्रेषु प्रणवादिबीजचतुष्टयस्य नमसः पुरुषोत्तमपरस्य अमुष्य सुरासुरमनुजसुन्दरीजनमनांसीत्यस्य दीपयेत्यादिवीप्सायां हुंफट्पदयोः तुरु तुरु इत्यादेश्च प्रयोगो द्रष्टव्यः। एते च मन्त्रा वश्याकर्षणेषु प्राधान्येन प्रयोक्तव्याः। मारणमन्त्रव्यतिरिक्ताः षण्मन्त्रा एव वश्यादौ प्रयोक्तव्या इत्यन्ये।

अथ मारणादौ प्रयोक्तव्या घट्टन ताड़न भेदन हनन मारण मन्त्रा उच्यन्ते। ओं क्लीं क्लीं श्रीं नमः पुरुषोत्तम अमुकं पाशेन बध्य हिः हुं फट् तुरु तुरु किं

ऋषिस्तु जैमिनिः प्रोक्तश्छन्दश्च जगतीष्यते ।
सर्वलोकशरण्योऽसौ देवता पुरुषोत्तमः ॥ १५
पुरुषोत्तमत्रिभुवनमनोन्मादकरेति च ।
हृदयं सकलान्ते च जगत्क्षोभण इत्यपि ॥ १६
सलक्ष्मीदयितेत्येवं शिरोमन्त्र उदाहृतः ।
मन्मथोत्तमशब्दान्ते अङ्गजे कामदीपिनि ॥ १७
शिखा सुभगशब्दन्तु परमाद्यन्तदन्ततः ।
सर्वसौभाग्य इत्यन्ते करमप्रतिरूपकम् ॥ १८
केशवस्मरवर्णान्ते जातिश्च कवचं विदुः ।
सुरासुरहृदययोर्मध्ये मनुजसुन्दरी ॥ १९
विदारणपदं तस्मात् सर्वप्रहरणेति च ।
धरसर्वपदान्ते तु कामिकं हनयुग्मकम् ॥ २०
हृदयान्ते बन्धनानीत्यथाऽऽकर्षयं वीक्षयेत् ।
ततो महाबलेत्येतदस्त्रमन्त्रमुदीरितम् ॥ २१
त्रिभुवनेश्वरसर्वान्ते जनेत्युक्त्वा मनांसि च ।
हनदारययोर्युग्मं पृथङ्मे वशमानय ॥ २२
नेत्रं तारादिकाः सर्वे हुंफड़न्ता नमोऽन्तिकाः ।
त्रैलोक्यमोहनान्ते तु हृषीकेशाऽप्रतीति च ॥ २३
रूपमन्मथ सर्वस्त्रीहृदयाकर्षणेति च ।
आगच्छाऽऽगच्छ च नमो मन्त्रः स्याद्व्यापकाह्वयः ॥ २४
आवाहादिविसर्गान्तेषूक्तोऽयं चापि सूरिभिः ॥ २५

तिष्ठसीत्यादिर्घट्टनमन्त्रः । अथाऽङ्कुशेन ताड़य ताडयेत्यादिस्ताडनमन्त्रः । ओं क्लीं क्लीं क्लौं नमः पुरुषोत्तम अमुकं चक्रेण गदया खड्गेन सर्वबाणैः भिन्द भिन्द हुं फट् तुरु तुरु किं तिष्ठसीत्यादिर्भेदनमन्त्रः । तथा हनहनेत्यादि हननमन्त्रः । तथा मारय मारयेत्यादिर्मारणमन्त्रः इति ॥ १४ ॥

ऋष्यादिकमाह—ऋषिरिति ॥ १५—२४ ॥

उक्तोऽयं चापीति । पूर्वोक्तावाहनादिमन्त्रसमुच्चयार्थोऽपिशब्दः ॥ २५ ॥

सुदर्शन महाचक्रराजेत्युक्त्वा धमद्वयम् ।
सर्वदुष्टभयान्ते तु कुरुच्छिन्द्ययुगन्ततः ॥ २६
विदारयद्वयान्ते तु परमन्त्रान् ग्रस ग्रस ।
भक्षयद्वयभूतानि त्रासयद्वयवर्मफट् ॥ २७
चक्राय नम इत्येष चक्रमन्त्रः प्रकीर्तितः ।
शङ्खमन्त्रो जलचराय स्वाहेति परिकीर्तितः ॥ २८
कौमोदकि महान्ते तु बले सर्वासुरान्तकि ।
प्रसीद हुंफट् स्वाहेति गदामन्त्र उदाहृतः ॥ २९
संवर्त्तकान्ते मुसल पोथयद्वितयं ततः ।
हुंफट् स्वाहा मौसलकः शार्ङ्गाय सशराय च ॥ ३०
शार्ङ्गस्य खड्गतीक्ष्णान्ते छिन्द्ययुक् खड्गमन्त्रकः ।
अङ्कुशाद्यं घट्टयुगं चाऽङ्कुशस्य समीरितः ॥ ३१
सानन्तलोहितवर्कौ बन्धाकर्षयवीक्षकौ ।
वह्निजाया च पाशस्य स्वमुद्राभिर्न्यसेदिमान् ॥ ३२
स्वाहान्तः पक्षिराजाय तस्य मन्त्रः प्रकीर्त्तितः ।
त्रैलोक्यमोहनायान्ते विद्महे तु समुच्चरन् ॥ ३३
स्मराय धीमहीत्युक्त्वा तन्नो विष्णुः प्रचोदयात् ।
गायत्रेषा तयाऽर्चासु स्यानद्रव्याणि शोधयेत् ॥ ३४
व्यस्तैर्द्वादशभिर्मन्त्रैर्नमोऽन्तैश्चाऽर्च्यते हरिः ।
भृगुः सबिन्दुः खड्गीशो देव्या मन्त्र उदाहृतः ॥ ३५
सूक्ष्मामरमहासेनक्लीवहीनैः स्वरैरसौ ।
लक्ष्म्यादीनान्तु शक्तीनां मन्त्राः पूजाविधौ स्मृताः ॥ ३६

चक्राद्यायुधाष्टकमन्त्रानुद्धरति—सुदर्शनेति । शङ्खादिमन्त्रेष्वपि महाशब्दः । पाञ्चजन्याय नमः । कौमोदक्यै नमः । इत्यादिकमन्ते प्रयोक्तव्यम् ॥ २६ २७ ॥ ॥ २८॥२९॥३०॥३१॥३२ ॥

गरुडमन्त्रमाह—स्वाहेति ॥ ३३॥३४ ॥

व्यस्तैर्द्वादशभिरिति । नित्यपूजासु सम्बुद्धान्तैः द्वादशभिरितरत्राऽऽद्यामन्त्रैर्यथायोगमित्यर्थः । श्रीमन्त्रमाह—भृगुरिति ॥ ३५॥३६ ॥

उद्यद्दिनेन्दुपयोदभ्रमरपिकारावकुसुमसौरभ्ये ।
सुमनोहरे च कल्पकवृक्षोद्याने रमापतिं ध्यायेत् ॥ ३७
अरुणारविन्दकर्णिकामध्यगगरुड़ोपरि स्थितं देवम् ।
उद्यद्दिनकरकोटिप्रतिमं सिन्दूरनवजवाकान्तिम् ॥ ३८
दरचापमुसलपाशान् चक्रासिगदाङ्कुशान् भुजैर्दधानम् ।
अतिहृद्ययौवनोन्मुखसौन्दर्यातिशयसाम्यनिर्मुक्तम् ॥ ३९
अतिविह्वलं स्मरस्य शरैरतिरुचिरा + + ।
+ + + + ॥ ४०
औदार्यकान्तिसौरभलावण्यसुधारसैर्जगत् सकलम् ।
सिञ्चन्तमिव समस्तानुग्रहिणं श्रीमुखाब्जसक्तसुदृशम् ॥ ४१
वामोरुजङ्घगतयाऽऽलिङ्गितदेहं श्रिया मदोत्कटया ।
तद्वक्त्राम्बुरुहासवपिपासितभ्रान्तनेत्रषट्पदया ॥ ४२
रोमाञ्चहर्षनिर्गतजलमुक्तालङ्कृताङ्गया सततम् ।
वामकरस्थाम्बुजया प्रतप्तकनकाभयाऽतिसुन्दर्या ॥ ४३
अनुपमसौन्दर्येण च सर्वाभरणैरुपेतयाऽतिमुदा ।
विष्वग्बहुप्रकारानेकैः समरिच्छदैश्च देवगणैः ॥ ४४
गन्धर्वदैत्यरक्षोयक्षपन्नगैर्मुनीन्द्रैश्च ।
संसेवितं पुरस्त्रीवृन्दैश्चाऽनङ्गबाणसन्तप्तैः ॥ ४५
भावहावमधुरस्मितवक्त्रप्रेक्षणस्खलितभाषणजातैः ।
स्पष्टकञ्चजघनस्तनभारैः स्रस्तवस्त्रचिकुरैर्मदलोलैः ॥ ४६
चरितमदनवारिस्वेदकम्पैर्विवस्त्रै-
र्मदनविगतलज्जैः स्पन्दमानाधरौष्ठैः ।
मृदुतरकरपद्माकृष्टनत्यञ्जलीकैः
शिरसि मुषितधैर्यैः कम्पिताशेषगात्रैः ॥ ४७

[ध्यानमाह—उद्यदिति सार्धैस्त्रयोदशभिः । मदनलुलितघूर्णितं ताम्रं च नेत्रपद्मं यस्य तम् । अनेकैः भूषणैः दिव्याभ्यामम्बराभ्यां गन्धपुष्पाभ्यां च समुज्ज्वलम् । इति सम्बन्धदीपिकाकारः ॥ ३७—५० ॥

ज्वरार्त्तैः श्वसद्भिः पतद्भिः शरीरैः
शरैर्दारितैर्मन्मथस्याऽतिघोरैः ।
समाप्यायितैस्तस्य लावण्यदृष्ट्या
समुत्थाय विष्णोस्तमेवाऽभियातैः ॥ ४८

करतलकल्पितकोकनदैस्तत्पदयुगलं च पुनः परिपूज्य ।
नयनजलैः सगद्गदवाक्यैर्भव परमेश्वर पतिः शरणं नः ॥ ४९

इत्थं संप्रार्थितं तं सकलसुरवरस्त्रीसहस्रैरजस्रं
दिव्यैर्भोगार्थिभिश्चाऽप्यखिलमुनिवरैर्भक्तितो मुक्तिकामैः ।
ध्यात्वा लक्षार्धसंख्यं जपतु मनुमिमं प्राप्तमन्त्रा[दीक्षोऽ]भिषिक्ता
द्रव्यैरेतैश्च जुह्वन् भवति मनुवरस्याऽधिकारी क्रियासु ॥ ५०

शतं दधि घृतं पयः पृथगथाऽयुतं साज्यहविषा
शृतेन पयसा हुनेद्रविमितं तथा साक्षततिलैः ।
तथा दशदशो[शतो]न्मितं त्रिमधुभिर्वरैश्चार्त्तवफलैः
पलाशसमिधां शतं समभितोषयेत् स्वं गुरुम् ॥ ५१

ततो लक्षत्रयं जप्त्वा कुण्डे चाऽर्धेन्दुसन्निभे ।
हुनेदम्भोरुहैर्जातिकुसुमैश्च यवैरपि ।
दशांशं वैष्णवे वह्नौ ब्राह्मणांश्चैव तोषयेत् ॥ ५२

अम्भोधाराः सदा भिन्ने सेतौ संसिद्धयोऽखिलाः ।
यथाऽम्भोनिधिमायान्ति तथा यान्ति निरन्तरम् ॥ ५३

मन्त्रिणः कृतकृत्यत्वं काङ्क्षमाणाः पुनः पुनः ।
पीठे तु वैष्णवे नित्यं पूजयेत् पुरुषोत्तमम् ॥ ५४

अङ्गानि कर्णिकायामग्न्यादिदलेषु चाऽष्ट लक्ष्म्याद्याः ।
ताश्च स्युर्लसरप्रीकीकातुष्ट्याद्याः सुदर्शने ज्ञेयाः ॥ ५५

कियत्संख्यो होमस्तदाह—शतमिति ॥ ५१॥५२॥५३ ॥

प्रथमावरणं प्रागादिदलेषु लक्ष्म्याद्यावरणं पूजयेत् । ताश्च लसरप्रीकीकातुष्ट्याद्याः स्युः । लादिः लक्ष्मीः । सादिः सरस्वती । रादी रतिः । प्रादिः प्रीतिः । क्यादिः कीर्तिः । कादिः कान्तिः । त्वादिस्तुष्टिः । प्यादिः पुष्टिः । ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥

दरचक्रगदामुसलाः पूर्वाद्याशासु चाऽथ कोणेषु ।
वज्राद्दिषु शार्ङ्गखड्गाङ्कुशपाशा दिशाधिपाः पूज्याः ॥ ५६
अङ्गानि देववर्णानि मदविवशाः शक्तयोऽष्ट लक्ष्माद्याः ।
चामरहस्ताः सर्वाः स्वलङ्कृताश्चाऽथ सुन्दर्यः ॥ ५७
योऽर्चयेत् सकृदप्येवं पुरुषः पुरुषोत्तमम् ।
प्राप्य राज्येप्सितां लक्ष्मीं प्राप्नोत्यमरवन्दिताम् ॥ ५८
दुर्भगो वसुसहस्रहुतेन स्यादतीव सुभगश्च मनोज्ञः ।
दीप्तिमत्प्रभवतैलवरेण व्याधिमोक्षणपरस्तु तथैव ॥ ५९
श्रीफलैः प्रजुहुयात्कमलैर्वाऽकिञ्चनोऽपि रविसहस्रमतोऽसौ ।
स्याद्धनाधिपसमोऽयुतसंख्यं जप्तुराधिरुपयाति विनाशम् ॥ ६
यां प्रमदामभिकाङ्क्षति तस्या नामयुतं प्रजपेन्मनुमेतम् ।
पक्षमहर्वदनेऽष्टसहस्रं सा वशमेति न तत्र विचारः ॥ ६१
हयारिकुसुमैर्हरिं समभिपूज्य चाऽष्टोत्तरं
सहस्रमपि जुह्वतः शशिभवप्रसूनैः शुभैः ।
भवन्त्यवशगा नृपास्त्रिदशभिर्दिनैः किङ्कराः
परैर्हृतधनस्तथा कटुभवेन तैलेन वा ॥ ६२
समिद्भिरथ बोधिजैर्दशशतं तथाऽष्टोत्तरं
त्रिमासमथवा जपेद्दशशतं तथा नित्यशः ।
स एव पुनरेत्य तद्वसु समाहृतं मन्त्रिणं
प्रणम्य पुनरर्पयेत्समभितोष्य चोपायनैः ॥ ६३
राजीश्चाऽष्टोत्तरशतं जप्त्वा शत्रुगृहे खनेत् ।
हयारिकुसुमं वापि पक्षे शुक्लेऽसिते क्रमात् ॥ ६४
शुक्लं रक्तं वेष्टितञ्च केशैश्चाऽटनकृद्रिपोः ।
नित्यं नेत्रसमिद्भिस्तु चाऽष्टोत्तरसहस्रकम् ॥ ६५
षण्मासन्तु ततस्तेजोवत्यास्तैलं सहस्रकम् ।
जुह्वतो म्रियते शत्रुर्दृष्टा मासचतुष्टयात् ॥ ६६

होमादीनां फलभेदानाचष्टे—श्रीफलैरिति ॥ ६०—७२ ॥

अनेन विधिना वाऽथ स्तम्भनं स्यात्तथैव च ।
तथैवाज्याक्तदूर्वाणां होमतो मुच्यते भयात् ॥ ६७
पयोव्रतोऽर्चाजपतत्परश्च त्रिमासमङ्कोलघृतं सहस्रम् ।
नित्यं हुनेच्चैव ततस्त्रिमासे पूर्णे हुताशेऽपि च हूयमाने ॥ ६८
प्राप्ते च मध्ये दिवसस्य वह्नेः पार्श्वे शशाङ्कप्रतिमा सुदीप्ता ।
संदृश्यते वै गुलिका सभानुः सहस्रमष्टोत्तरमेव मन्त्रम् ॥ ६९
प्रतिमन्त्रं च तां वहतो गुलिकाममरैरपि दर्शनमस्य भवेत् ।
इह सिद्धिरथाऽस्य भवत्यखिला वडवामुखपुष्करयानमुखा ॥ ७०
इति सिद्धमुनीन्द्रयक्षविद्याधरगन्धर्वसमहाप्सरोरगाद्यैः ।
प्रतिसेवितमुत्तमं विधानं गदितं तत् पुरुषोत्तमस्य विष्णोः ॥ ७१

इति जपहुतपूजाध्यानकैः श्रीधरं यो
भजति स तु समग्रां सम्पदैश्वर्यलक्ष्मीम् ।
अधरकृतविपक्षां प्राप्य लोकैकवन्द्यो
व्रजति पदमनन्तं लोकवन्द्यस्य विष्णोः ॥ ७२

इति श्रीप्रपञ्चसारे त्रयोविंशः पटलः ।

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
त्रयोविंशः पटलः ।

चतुर्विंशः पटलः ।

अथोच्यते श्रीकरनामधेयमष्टाक्षरं लोकहिताय तावत् ।
येन प्रजप्तेन समर्चितेन हुतेन सिद्धिं समुपैति मन्त्री ॥ १
सर्गादर्कः क्षतो विंशतियुगमियुतं शान्तगं चन्द्रबिम्बं
श्रीबाहुः शुक्रमेदोहरिशयनहकारा मनुः श्रीकराख्यः ।
ऋष्याद्या वामपङ्क्तौ हरिरपि पुनरङ्गानि यान्तैर्हुमन्त्रै-
र्भीषत्वासप्रमर्दप्रसहितगदितध्वंसरक्षैर्विरक्तैः ॥ २

मूर्धाक्षिकण्ठहृदयोदरसोरुजानु-
पादद्वयेषु लिपिशो न्यसतु स्वदेहे ।
विप्रादिकान्मुखकरोरुपदेषु वर्णा-
श्चक्रादिकानपि करेषु ततस्तदस्त्रान् ॥ ३

दुग्धाब्धिद्वीपवर्यप्रविलसितसुरोद्यानकल्पद्रुमाधो-
भद्राम्भोजन्मपीठोपरिगतविनतानन्दनस्कन्धसंस्थः ।
दोर्भिर्बिभ्रद्रथाङ्गं सदरमथ गदापङ्कजे स्वर्णवर्णो
भास्वन्मौलिर्विचित्राभरणपरिगतः स्याच्छ्रिये वो मुकुन्दः ॥ ४

दिक्पत्रेषु श्रीरतिधृतिकान्तीः कोणगेषु मूर्तीश्च ।
इष्ट्वाऽभितो निधीशौ विष्वक्सेनञ्च दिक्पतीन् प्रयजेत् ॥ ५

आराध्य चैवं विधिनाऽथ विष्णुं मन्त्री पुनर्होमविधिं करोतु ।
श्रीवृक्षदुग्धोत्थसमिद्भिरब्जैः साज्येन दौग्धेन च सर्पिषा च ॥ ६

विभूतिप्रदश्रीपुरुषोत्तमानन्तरं तथाविधमेव श्रीकरं सविनियोगमाह—
अथोच्यत इति । मन्त्रीति । तत्तत्सिद्धुचितबीजयोग उक्तः ॥ १ ॥

श्रीबाहुः श्रीकरः । श्रीं बीजम् । स्वाहा शक्तिः । हरिरपीति । श्रीकरविष्णुरित्यर्थः । यान्तैर्हुमन्त्रैरिति । क्रमेणोभयान्तत्वं भीषादीनाम् विप्रादिन्यासोऽप्यक्षरैः सार्धमेव कार्यः ॥ २ ॥ ३ ॥

श्रिये वो मुकुन्द इत्यनेनैव श्रीदेव्या सह ध्यानमित्यवगन्तव्यम् ॥ ४ ॥ ५ ॥

मन्त्री पुनर्होमविधिमिति । जप पूजा होमादिषु प्रणवश्रीबीजयोग

पृथगष्टशतं क्रमेण हुत्वा कनकाद्यैरपि तर्पिते गुरौ च ।
अभिषिच्य तथाऽभिपूज्य विप्रान्मनुमेनं प्रजपेदथाऽष्टलक्षम् ॥ ७

द्रव्यैस्तैः प्रतिजुहुयाद्दशांशमानै-
राचार्यं पुनरपि पूजयेज्जपान्ते ।
स प्राप्नोत्यपरिमितां श्रियञ्च कीर्त्तिं
कान्तिञ्चाऽचिरमनुरज्यते च लोकैः ॥ ८

दूर्वां घृतप्रसिक्तां जुहुयादयुतं नरस्तु हुतशिष्टैः ।
आज्यैश्चरुमुपयुञ्जाद्दद्याद् गुरवे च दक्षिणां शक्त्या ॥ ९
परिभोजयेच्च विप्रांस्तेषु दिनेषु स्वशक्तितो भक्त्या ।
अपमृत्युरोगपापान् विजित्य स तु दीर्घमायुराप्नोति ॥ १०
अनुदिनमादित्याभिमुखः प्रजपेदूर्ध्वीकृतस्ववाहुयुगः ।
तस्य गृहेऽन्नसमृद्धिश्चिराय संजायते सुष्ठुतरा ॥ ११
एवं प्रोक्तैः प्रतिजपहुतार्चादिभिर्मन्त्रमेनं
भक्त्या यो वा भजति मनुजो नित्यशः सोऽचिरेण ।
इष्टैः पुत्रैर्धनधरणिधान्यादिभिर्हृष्टचेताः
स्यादप्यन्ते परमपरिशुद्धं परं धाम विष्णोः ॥ १२
अथ कथयामि विधानं महावाराहाभिधानमन्त्रस्य ।
साङ्गं सजपं सहुताराधनमपि मन्त्रिणामभीष्टाप्त्यै ॥ १३
वाक्यं प्रोक्त्वा हृदाख्यं तदनु भगवते युग्मराहं च रूपा-
येत्युक्त्वा व्याहृतीनामुपरि च पतये भूपतित्वञ्च मेऽन्ते ।
देहीत्याभाष्य दान्तं सुमतिरथ पुनर्दापयस्वेति हान्तं
प्रोक्त्वा तारादिकं प्रोच्चरतु मनुवरं तं त्रयस्त्रिंशदर्णम् ॥ १४

उक्तः ॥ ६ ॥ ७ ॥

द्रव्यैस्तैरिति । श्रीदुग्धसमिदादिभिः दीक्षाहोमाय कथितैरित्यर्थः ॥ ८ ॥
॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

विभूत्यतिशयार्थं वराहमन्त्रमाह—अथेति । मन्त्रिणामभीष्टाप्त्यै इति । अभीष्टविशेषेषु बीजविशेषयोगार्थः ॥ १३ ॥

सुमतिरिति । भूपतित्वमित्यत्र साध्यनामग्रहणमुक्तम् । हूं बीजम् ।

ऋषिस्तु भार्गवः प्रोक्तोऽनुष्टुप् छन्द उदीरितम् ।
वराहो देवता चाऽस्य कथ्यन्तेऽङ्गान्यतःपरम् ॥ १५
अस्येकशृङ्गो हृदयं शिरोऽपि व्योमोल्कतेजोऽधिपतौ शिखा च ।
स्याद्विश्वरूपः कवचं महादिदंष्ट्रोऽस्त्रमुक्तं स्वयमेव चाऽङ्गम् ॥ १६
ससप्तभिः पुनः षड्भिः सप्तभिश्चाऽथ पञ्चभिः ।
अष्टभिर्मूलमन्त्रार्णैर्विदध्यादङ्गकल्पनाम् ॥ १७
जान्वोरापादमुद्यत्कनकमिव हिमप्रख्यमाजानु नाभेः
कण्ठादानाभि वह्निप्रभमथ शिरसश्चागलं नीलवर्णम् ।
मौलिर्व्योमाभमाकं करलसदरिशङ्खासिखेटं गदाश-
क्त्याख्येष्टाभीतिहस्तं प्रणमत वसुधोल्लासिदंष्ट्रं वराहम् ॥ १८
सजलाम्बुवाहनिभमुद्यतदोःपरिघं धराधरसमानतनुम् ।
सितदंष्ट्रिकाधृतभुवं त्वथवा प्रविचिन्तयेत् सपदि कोलममुम् ॥ १९
हेमप्रख्यं पार्थिवे मण्डले वा नीहाराभं नीरजेऽग्नेस्तदाभम् ।
वायोः कृष्णं द्युप्रभं वा दिविष्ठं क्रोडं व्याप्तं सत्यसंस्थं यजेद्वा ॥ २०
अष्टपत्रमथ पद्ममुल्लसत्कर्णिकं विधिवदारचय्य च ।
मण्डलं रविसहस्रसन्निभं शूकरं यजतु तत्र सिद्धये ॥ २१
प्राग्दक्षिणप्रत्यगुदग्दिशासु चत्वारि चाऽङ्गानि यजेत् क्रमेण ।
अस्त्रं विदिक्षूर्ध्वमधश्च चक्राद्यस्त्राणि पूज्यानि वराहमूर्त्तेः ॥ २२
अरिशङ्खकृपाणखेटकसंज्ञान् सगदाशक्तिवराभयाङ्कयांश्च ।
अभिपूज्य दिशाधिपान् यथावद्वरगन्धाक्षतपुष्पधूपदीपैः ॥ २३

स्वाहा शक्तिः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

सजलाम्बुवाहेति । द्विभुजस्य ध्यानमुक्तम् ॥ १९ ॥

स्तम्भनशान्तिकवश्याद्युच्चाटनशून्यताकरणादिषु पृथिव्यादिबीजयुक्तस्य ध्यानविशेषानाह—हेमप्रख्यमिति । एते च ध्यानविशेषाः सर्वमन्त्रेषु समानाः । सत्यसंस्थमिति । मुमुक्षोर्ध्यानमुक्तम् । स्वस्वमहिमस्थमित्यर्थः । प्राणसंस्थमिति चार्थः ॥ २० ॥

उल्लसत्कर्णिकमिति । वराहबीजविशिष्टकर्णिकमित्यर्थः । विधिवदारचय्येति । स्वरकेसरं चतुश्चतुर्वर्णलसद्दलाष्टकं बहिर्व्यञ्जनावेष्टितं

दंष्ट्रायां वसुधा सशैलनगरारण्यापगा हुंकृतौ
वागीशौ श्वसितेऽनिलो रविविधू बाह्वोश्च दक्षान्ययोः ।
कुक्षौ स्युर्वसवो दिशः श्रुतिपथे दस्रौ दृशोः पादयोः
मध्योत्थो हृदये हरिः पृथगमी पूज्या मुखे शङ्करः ॥ २४
एवं काले कोलमभ्यर्चयित्वा जप्यो मन्त्रोऽसौ पुनर्लक्षसंख्यम् ।
होमं कृत्वा तद्दशांशैश्च मन्त्रैस्त्रिस्त्राद्भक्तैः प्राप्नुयाद्भूसमृद्धिम् ॥ २५
ध्यानादपि धनसिद्धिर्मन्त्रजपाच्चाऽधरो भवेत् सधरः ।
जपपूजाहुतविधिभिर्मङ्क्षु नरो धनधरेन्दिरावान् स्यात् ॥ २६
ध्यातः सन् भूगृहेऽसौ भुवमतुलतरां वारुणे शान्तिमुच्चै-
राग्नेये वश्यकृत्या[कीर्त्या]दिकमनिलपुरस्थोऽयमुच्चाटनादीन् ।
रक्षां व्योम्नोऽरिभूतग्रहविषदुरितेभ्योऽनिलाग्न्योश्च पीडां
युद्धे वह्नौरयोर्वै जयमपि सुतरां संविधत्ते वराहः ॥ २७
हरिस्थेऽर्केऽष्टम्यामथ सितरुचौ कोलवपुषा
सितां गव्यैः सर्वैर्युतमयुतजप्तामपि शिलाम् ।
उदग्वक्त्रो मन्त्री मनुजपरतः स्थापयतु ता-
मयत्नं चेत्रेषु द्रुतमरिनिरोधं शमयति ॥ २८
भौमे वारेऽथ भानूदयमनु जपवान् सन् गृहीत्वा मृदंशं
कोलात्मा वैरिरुद्धादपि च कुतलतस्तच्च कृत्वा गुणांशम् ।
एकं जातौ विलिम्पात् पुनरपरतरं पाकपात्रे तथाऽन्य-
त्तोये तस्मिन् सदुग्धे प्रतिपचतु हविः संस्कृते हव्यवाहे ॥ २९
आराध्य चाऽष्टोर्ध्वशतं प्रमाणं साज्येन मन्त्री हविषाऽथ तेन ।
सप्तारवारं जुहुयाद्यथावत् चेत्रोत्थितापत्प्रशमं प्रयाति ॥ ३०

भूकोणस्थबीजमारचय्येत्यर्थः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

एवं काले इति । प्रातरेवेत्यर्थः ॥ २५ ॥

ध्यानजपादीनां फलभेदमाचष्टे—ध्यानादपीति । अधरः धरारहितः ॥२६॥२७॥

सितां गव्यैरिति । दशपलमितां बिल्वादिपात्रस्थामित्यर्थः । मन्त्री मनुजपरत इति । भूबीजसाहित्यमुक्तम् ॥ २८ ॥ २९ ॥

साज्येन मन्त्रीत्यपि तथैव ॥ ३० ॥ ३१ ॥ ३२ ॥

भृगुवारे च मुखेऽङ्गः संगृह्य मृदं हविः सुसम्पाद्य ।
जुहुयादीरितविधिना बलिमपि दद्यान्महीविरोधेषु ॥ ३१
हुतक्रियैवं दिवसैश्च सप्तभिः प्रणाशयेद्भूमिविवादसङ्कटम् ।
परेतवेतालपिशाचडाकिनीसमुत्थिताञ्चाविकृतिं विधिस्त्वयम् ॥ ३२
विलोड्य तामेव मृदञ्च दुग्धे हुनेद्घृतेनाऽष्टयुतं सहस्रम् ।
द्विमण्डलादेव मही महार्घ्या स्यान्मन्त्रिणोऽस्यैव तु निःसपत्ना ॥ ३३
नृपतरुसमिधामयुतं मन्त्रेणाऽनेन यो हुनेन्मन्त्री ।
गृहयावाऽस्य न सीदेत् क्षेत्रादिकमपि वर्धते क्रमशः ॥ ३४
अष्टोर्ध्वशतं मन्त्री दिनशो यो वा जुहोति शालीभिः ।
स तु वत्सरेण मन्त्री विराजते व्रीहिपुञ्जपूर्णगृहः ॥ ३५
मन्त्रेणाऽनेन सर्पिर्जुहुत दशशतं मण्डलात् स्वर्णसिद्धिः
स्वाद्वक्तेनाञ्जलिन्या अपि कुसुमसहस्रेण वा वाससाञ्च ।
लाजानां कन्यकाया अपि च मधुयुजां होमतो वाञ्छितायाः
सिद्धी रक्तोत्पलानामपि मधुरयुजां स्याद्भुताच्छ्रीः समग्रा ॥ ३६
दण्डार्धांशो व्योमासनस्तु वाराहमुच्यते बीजम् ।
अमुना तु साधितेन प्राप्नुवन्ति नराः सिद्धिमतुलतराम् ॥ ३७
तारेऽमुमपि लिखित्वा तद्बाह्येऽनलपुरं समापुटितम् ।
तद्बाह्ये चतुर्दलमब्जं स्यात्तद्बहिस्तथाऽष्टदलम् ॥ ३८
बाह्ये षोडशपत्रं मण्डलमाखण्डलीयमपि बाह्यम् ।
शूकरबीजे साध्यक्षेत्राख्यञ्चक्रमन्त्रमस्त्रिषु च ॥ ३९
रम्भेष्वङ्गमनूनपि दलमूलेऽष्टार्णकेसराणि लिखेत् ।
अष्टावष्टौ दलमनु शूकरमन्त्रस्य चाऽक्षरान् क्रमशः ॥ ४०

स्यान्मन्त्रिण इत्यपि एवमेव । हुनेन्मन्त्रीत्यपि । तथा शतं मन्त्रीति । वराहबीजयोगमाह । मन्त्री विराजत इत्यस्मिन्नेव प्रयोगे बीजयोग उक्तः ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

अमुना तु साधितेनेति । ऋषिदेवते पूर्वोक्ते । गायत्री छन्दः । दीर्घयुजा स्वेनैवाऽङ्गानि । ऊं बीजम् । ह्रं शक्तिः । ध्यानपूजादिकं पूर्ववत् ॥ ३७ ॥ ३८ ॥ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

अन्तेऽवशिष्टमक्षरमथाऽष्टपत्रे स्वराख्यकिञ्जल्के ।
वर्णांश्चतुश्चतुरपि तथाऽष्टमे पञ्च चालिखेत् पत्रे ॥ ४१
व्यञ्जनकिञ्जल्केऽन्त्ये द्वौ द्वौ त्रयमन्त्यके दले विलिखेत् ।
तारमहीकोलार्णैः प्रवेष्टयेत् साध्यवर्णपरिपुटितैः ॥ ४२
तद्बाह्ये मनुवर्णैर्विदर्भिताभिश्च साध्यपदलिपिभिः ।
क्ष्माबिम्बचतुष्कोणे गर्भगसाध्याक्षरं भूबीजम् ॥ ४३
अष्टसु शूलेषु तथा वाराहं वायुधेन संयुक्तम् ।
लाक्षाकुङ्कुमचन्दनलघुकर्पूरैः सरोचनैर्विलिखेत् ।
गोशकृदम्भोयुक्तैर्लेखन्या हैमया दिने प्रवरे ॥ ४४
सौवर्णे राज्यसिद्धिं रजतजफलके ग्रामसिद्धिञ्च ताम्रे
साहस्रस्वर्णसिद्धिं भुजदललिखितं चाशु संसारयात्राम् ।
क्षौमे लाभं धरायाः पिचुतरुफलके कार्यसिद्धिं निजेष्टां
मन्त्रं सञ्जप्तमेतद्घृतहुतकृतसम्पातपातं करोति ॥ ४५
मन्त्री समास्थाय वराहरूपं साध्यप्रदेशे निखनेच्च यन्त्रम् ।
स्थिराख्यराशावभिवाह्य कोलमङ्गानि दिक्षु क्षिपतां यथावत् ॥ ४६
यन्त्रममुं रक्षायै रोगग्रहवैकृतेषु जन्तूनाम् ।
संयज्य शिरसि बध्यात् स तु नीरोगस्त्वयत्नतो भवति ॥ ४७

इत्येवं प्रणिगदितो वराहमन्त्रो
यस्त्वेनं प्रभजति नित्यशो जपाद्यैः ।
स प्राप्नोत्यखिलमहीसमृद्धिमस्मिन्
देहान्ते व्रजति हरेः परं पदं तत् ॥ ४८

इति श्रीप्रपञ्चसारे चतुर्विंशः पटलः ॥

तथा वराहमिति । साध्यादिनामसहितमित्यर्थः । [यन्त्रं संजप्तकृप्तमिति क्वचित्] ॥ ४४ ॥ ४५ ॥

निक्षिपतां यथावदिति । गर्तेषु सितपाषाणादिषु आवाह्य संपूजयेदित्यर्थः । ॥ ४६ ॥ ४७ ॥ ४८ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे चतुर्विंशः पटलः ।

पञ्चविंशः पटलः ।

अथ प्रवक्ष्यामि नृसिंहमन्त्रस्याऽनुष्टुभः संग्रहतो विधानम् ।
साङ्गं सजापं सहुतक्रमञ्च सार्चाविधानं निजवाञ्छितार्थ ॥ १
उग्रं वीरयुतं महान्तिकमथो विष्णुं ज्वलन्तान्वितं
संप्रोक्ताऽथ च सर्वतोमुखनृसिंहार्णांस्तथा भीषणम् ।
भद्रं मृत्युयुतं च मृत्युमपि तच्चोक्त्वा नमाम्या युतं
भूयोऽहम्पदमुद्धरेत् मनुमिमं मन्त्री समस्तार्थदम् ॥ २
ब्रह्मा प्रजापतिर्वा प्रोक्त ऋषिर्नारदश्च विद्वद्भिः ।
छन्दोऽनुष्टुबुदाहृतमथ विष्णुर्देवता नृसिंहाख्यः ॥ ३
वर्णैश्चतुर्भिरुदितं हृदयं शिरश्च
तावद्भिरष्टभिरथाऽस्य शिखा प्रदिष्टा ।
षड्भिश्च वर्म नयनञ्च चतुर्भिरस्त्रं
प्रोक्तं क्रमेण मनुनाऽक्षरशः षडङ्गम् ॥ ४
सशिरोललाटदृग्युगमुखकरपत्सन्धिकेषु साग्रेषु ।
उदरहृद्दोर्गलपार्श्वेष्वपरे ककुदि क्रमात्र्यसेद्वर्णान् ॥ ५
प्रतिपत्तिरस्य चोक्ता प्रसन्नताक्रूरताविशेषेण ।
द्विविधा प्रसन्नया स्यात् साधनपूजाऽन्यया प्रयोगविधिः ॥ ६
जान्वोरासक्ततीक्ष्णस्वनखरुचिलसद्बाहुसंस्पृष्टकेश-
स्रक्रं खड्गञ्च दोर्भ्यां दधदनलसमज्योतिषा ग्रस्तदैत्यः ।
ज्वालामालापरीतं रविशशिदहनत्रीक्षणं दीप्तजिह्वं
दंष्ट्रोग्रं धूतकेशं वदनमपि वहन् पातु वो नारसिंहः ॥ ७

वराहविधानानन्तरं नृसिंहविधानं वदन् विनियोगमाह —अथेति ॥ १ ॥

मन्त्री समस्तार्थदमिति । तत्तदर्थविशेषेषु बीजविशेषयोग उक्तः । हूं बीजम् । हूं शक्तिः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

प्रसन्नां प्रतिपत्तिमाह—जान्वोरिति । बाहुसंस्पृष्टकेश इति । कचेशश्च केशौ । को ब्रह्मा । ईशो रुद्रश्च ॥ ६ ॥ ७ ॥

उद्यद्भास्वत्सहस्रप्रभमशनिनिभं चीक्षणं विक्षरन्तं
वह्नीनक्ताय विद्युत्ततिविततसटाभीषणं भूषणैश्च ।
दिव्यैरादीप्तदेहं निशितनखलसद्बाहुदण्डैरनेकैः
सम्भिन्नं भिन्नदैत्येश्वरतनुमतनुं नारसिंहं नमामि ॥ ८
नरसिंहममुं धियैव पूर्वं प्रणिपातार्घ्यकपाद्यसाचमाद्यैः ।
प्रयजेत् सहगन्धपुष्पधूपादिभिरेवं प्रवरैश्च नृत्यगीतैः ॥ ९
सुविशदमतिरथ बहिरपि सम्यक् संपूज्य वैष्णवं पीठम् ।
तत्रावाह्य च नरहरिमुपचारैः सम्यगर्चयेत्प्रवरैः ॥ १०
अङ्गैः प्रथमावृतिरपि पक्षीन्द्रानन्तशर्वकमलभवैः ।
सहश्रीक्रीधृतिपुष्टिभिरपरोक्ता लोकपालकैरन्या ॥ ११
प्राक्प्रत्यग्यमशशिनां दिगाश्रिता मूर्तयोऽनलादिषु च ।
स्युः शक्तय इत्येवं भक्त्या परया युतोऽर्चयेद्देवम् ॥ १२
द्वात्रिंशतिकसहस्रैरधिकृतिरयुतैर्भवेत् पुरश्चरणम् ।
तावद्भिस्तावद्भिर्लक्षैः सिद्धिः समीरिता चाऽस्य मनोः ॥ १३
विकृतिद्विगुणसहस्रैर्जुहुयादाज्यान्वितैश्च दुग्धान्नैः ।
जपपरिपूर्त्तौ मन्त्री दिनशः संपूजयेच्च नरसिंहम् ॥ १४
विधाय तद्बीजविशिष्टकर्णिकं चतुश्चतुर्वर्णलसद्दलाष्टकम् ।
सुलक्षितं मण्डलमन्यलक्षणैर्विधाय तस्मिन् कलशं प्रपूर्य च ॥ १५
यथोक्तमार्गेण समर्च्य साष्टकं सहस्रसंख्यं प्रजपेन्मनुं ततः ।
विरुक्षरन्मन्त्रमथाऽभिषेचयेद्यमेष मृत्योः प्रतिमुच्यते मुखात् ॥ १६

क्रूरां प्रतिपत्तिमाह—उद्यदिति । अतनुमिति सूक्ष्मादिरूपमुक्तम् ॥ ८ ॥

नरसिंहममुमिति । मानसपूजा । सा च सर्वमन्त्रेषु समाना ॥ ९ ॥

विशदमतिरित्याधारशक्त्यादीनां ध्यानं सूचितम् । सम्यगिति । मूलप्रकृत्यादिमन्त्रयोग उक्तः पीठपूजायाम् । स च सर्वत्र समानः ॥ १०॥११॥१२॥१३ ॥

जपपरिपूर्त्तौ मन्त्रीति । ब्रह्म द्वादशाक्षर पञ्चाक्षर गरुडपञ्चाक्षरानन्तसप्ताक्षरादयः सूचिताः । [हं कमलासनाय नमः इति ब्राह्मनवाक्षरः इति सम्बन्धदीपिकाकारः] क्षिपान्ते तारं स्वाहेति गरुडपञ्चाक्षरम् । आमन्तेऽनन्ताय नम इत्यनन्तमन्त्रः ॥ १४ ॥ १५ ॥ १६ ॥

वर्णान्त्यानलभुवनबिन्दुभिरुक्तं नृसिंहबीजमिदम् ।
तन्नास्ति सम्यगमुना मन्त्रविदा साधितेन यदसाध्यम् ॥ १७
ऋष्यादिकमपि पूर्ववदङ्गं बीजेन दीर्घयुजा ।
ध्यानार्चनादिकमन्यदशेषं समानं स्यात् ॥ १८
विभवानुरूपतोऽस्मै दातव्या दक्षिणा च निजगुरवे ।
प्राणप्रदानकर्त्रे न च कार्यं वित्तशाठ्यममलधिया ॥ १९
संप्रीणयित्वा गुरुमात्मशक्त्या संपूजयेद्विप्रवरान् यथावत् ।
स त्वैहिकीं शुद्धिमवाप्य शुद्धं परं परत्रापि पदं समेति ॥ २०

दूर्वाविकैरष्टसहस्रसंख्यै-
राराध्य मन्त्री जुहुयादथाप्सु ।
शान्तिं प्रयान्त्येव तदोपसर्गा
आपो हि शान्ता इति च श्रुतिः स्यात् ॥ २१
उत्पाते सति महति ह्युपद्रवाणां
होमोऽयं भवति च शान्तिदो नराणाम् ।
यद्वाऽन्यन्निजमनसेप्सितञ्च कामं
तत्प्राप्नोत्यखिलनृणां प्रियश्च भूयात् ॥ २२

दुःस्वप्नेष्वपि दृष्टेष्ववशिष्टा जाग्रता निशा नेया ।
जपमानमन्त्रशक्त्या सुस्वप्नो भवति तत्क्षणादेव ॥ २३
चरन् वने दुष्टमृगाहिघोरव्यालाकुले मन्त्रमिमं जपेद्यः ।
असाधितं साधितमेव तस्य न विद्यते भीर्बहुरूपजाता ॥ २४
जप्तेनाऽष्टसहस्रं कलशेनाऽप्यहिविषार्त्तमभिषिञ्चेत् ।
अतिविषमेण विषेणाऽप्यसौ विमुक्तः सुखी भवति ॥ २५

सम्यगमुनेत्यङ्गर्ष्यादिकं सूचितम् । ब्रह्मा ऋषिः । गायत्री छन्दः । नृसिंहो देवता । दीर्घयुजा स्वेनाऽङ्गानि । ओं बीजम् । षं शक्तिः । ध्यानादिकं पूर्ववत् । मन्त्रविदेति । तत्तत्साध्यानुरूपबीजयोग उक्तः [ऋष्यादिकमपीति श्लोकः क्वचिन्न दृश्यते] ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

मन्त्री जुहुयादथाप्स्विति । नृसिंहं भीषणमिति निष्कीलमन्त्रेणेत्यर्थः । ॥ २१॥२२॥२३॥२४॥२५॥२६॥२७॥२८॥२९॥३० ॥

मूषिकलूतावृश्चिकबहुपादाद्युद्भवं विषं शमयेत् ।
अष्टोत्तरशतजापान्मनुरयमभिमन्त्रितश्च भस्माद्यम् ॥ २६
सशिरोऽक्षिकर्णहृद्गलकुक्षिरुजाज्वरविसर्पवमिहिक्काः ।
मन्त्रौषधाभिचारिककृतान् विकारानयं मनुः शमयेत् ॥ २७
नरहरिवपुषात्मना गृहीतं हरिणशिशुं निजवैरिणं विचिन्त्य ।
क्षिपतु गगनतः क्षितौ सुदूरं यमनुदिनं प्रतिचाव्यते स मासात् ॥ २८
याञ्च दिशं प्रति मनुनाक्षिप्तोऽसौ तां दिशं प्रयात्यचिरात् ।
पुत्रकलत्रधनादीन्त्यक्त्वा न पुनर्निवृत्तये सहसा ॥ २९
नरहरिवपुषात्मना निजारिं खरनखराग्रसमग्रभिन्नदेहम् ।
क्षणमिव निहतं विचिन्त्य खादन्निव जपतां मनुमेष नाशमेति ॥ ३०
पूर्वतरे मृत्युपदे विधाय निजसाध्यनाम मन्त्रितमः ।
क्रूरेण चक्षुषा तं दहन्निवालोक्य जपतु सप्तदिनम् ॥ ३१
दिनशोऽष्टोर्ध्वसहस्रं म्रियते रिपुरस्य नाऽत्र सन्देहः ।
मारणकर्म न शस्तं क्रियते यद्ययुतमथ जपेच्छान्त्यै ॥ ३२
वश्याकृष्टिद्वेषणमोहोच्चाटादिकानि यदि वाञ्छेत ।
तदर्हया प्रतिपत्त्या तत्तत्कर्म प्रसाधयेन्मन्त्री ॥ ३३
दिनमनु दिननाथं पूजयित्वा दिनादौ
नरहरिमपि सम्यक् प्रोक्तमार्गेण मन्त्री ।
तदनु तदनुमत्या भस्मना मन्त्रितेन
प्रतिरचयतु रक्षे वाऽप्यभीष्टाय रक्षाम् ॥ ३४
न्यासोक्तेषु स्थानेष्वपि न्यसेद्भस्मना च मन्त्रार्णान्
अखिलोपद्रवशान्त्यै सम्पत्त्यै वाञ्छितार्थसिद्ध्यै च ॥ ३५
अथ परराष्ट्रजयेच्छो राज्ञः कुर्यात्प्रयोगविधिमेवम् ।
नरहरिमपि विधिना तं हिरण्यकशिपुद्विषं समभ्यर्च्य ॥ ३६

साध्यनाम मन्त्रितम इति । चक्षुषि नृसिंहबीजन्यास उक्तः ॥ ३१ ॥ ३२ ॥
साधयेन्मन्त्रीति । स्तम्भनादिषु पृथिवीबीजादियोग उक्तः ॥ ३३ ॥
प्रोक्तमार्गेण मन्त्रीति । रक्षायां नृसिंहबीजयोग उक्तः ॥ ३४ ॥ ३५ ॥ ३६ ॥
॥ ३७ ॥ ३८ ॥ ३९ ॥

तस्य पुरस्ताद्विधिवन्निधाय वह्निं विभीतकतरुकाष्ठैः ।
उज्ज्वलिते च ज्वलने समूलतूलैः शरेध्मशतदशकैः ।
खादन्निवोच्चरेन्मनुमरींश्च भिन्दन्निव क्षिपेत् समिधः ॥ ३७
हुत्वा परराष्ट्रेभ्यः पृतनां सन्नाह्य सम्मुखे तस्याः ।
निघ्नन्तं रिपुसेनां स्मरेन्नृसिंहं पुरेव दितितनयान् ॥ ३८
यावज्जितारिरेष्यति नृपतिस्तावज्जपेत् स्मरन्देवम् ।
सेन्द्रसुरासुररक्षोयक्षानपि जयति का कथा मनुजे ॥ ३९
श्रीकामः श्रीप्रसूनैर्दशकमथ शतानां हुनेद्बिल्वकाष्ठै-
स्तत्पत्रैर्वा प्रसूनैः सुमतिरथ समिद्भिः फलैर्वा तदीयैः ।
पुत्रेप्सुः पुत्रजीवेन्धनचितदहने तत्फलैर्वा सहस्रै-
र्दूर्वाभिस्त्वायुषिऽब्दादभिमतमखिलं प्राप्नुयान्मन्त्रजापी ॥ ४०
ब्राह्मीं वचां वाऽष्टशताभिजप्तां प्रातः समद्याद्गृहरिं विचिन्त्य ।
संप्राप्य मेधां स तु वेदशास्त्रनिष्णातधीः स्यादपि वत्सरेण ॥ ४१

उक्तैः किमत्र बहुभिर्मनुनाऽमुनैव
संप्रार्थितं सकलमेव लभेद्विधिज्ञः ।
तस्मादमुं भजत तत्प्रतिपन्नचित्ताः
संसारसागरसमुत्तरणार्थिनो ये ॥ ४२
पाशाङ्कुशान्तरितशक्तिनृसिंहबीजे
वर्मास्त्रयुङ्मनुरयं कथितः षडर्णः ।
ऋष्यादिकाः स्वभवपङ्क्तिकनारसिंहा
वर्णैश्च मन्त्रनिहितैः कथितं षडङ्गम् ॥ ४३

भव्यान्निर्व्याजरौद्राकृतिरतिविकृतास्योल्लसत्तीक्ष्णदंष्ट्र-
श्चक्रं शङ्खश्च पाशाङ्कुशकुलिशगदादारणाख्यान्दधानः ।
रक्ताकारश्च नाभेरध उपरि सितो दिव्यभूषाविशेषो
देवोऽर्काग्नीन्दुनेत्रो निखिलसुखकरो नारसिंहश्चिरं वः ॥ ४४

सुमतिरिति । श्रीबीजयोगरत्नाभिषेकध्याने कथिते । प्राप्नुयान्मन्त्रजापीत्यनुजप उक्तः । षडक्षरस्य क्ष्रौं बीजम् । क्ष्रीं शक्तिः ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

षट्कोणस्थमुदर्शनं वसुदलप्रोल्लासिताष्टाक्षरं
बाह्ये द्वादशवर्णपत्रकमलं तत् षोड़शार्णच्छदम् ।
द्वात्रिंशन्मनुवर्णपत्रकमलं वृत्तोल्लसन्मातृकं
मध्योत्थं ध्रुवमूर्तिबीजवलयं चक्रं नृसिंहात्मकम् ॥ ४५
हृल्लेखान्तःस्थसाध्यं दहनपुरयुगास्त्रिस्थमन्त्रार्णमन्तः-
सिंहानुष्टुप्चतुर्वर्णकलसितदलाढ्यं कलाकेसरञ्च ।
वृत्तोद्यद्व्यञ्जनावेष्टितमवनिपुरान्तःस्थवृत्तो[चिन्तो]पलं तद्-
यन्त्रं रक्षःपिशाचामयरिपुविषविध्वंसनं नारसिंहम् ॥ ४६

इति विरचितयन्त्रप्रोज्ज्वले मण्डले प्राक्-
समभिहितकषायाम्भोभिरापूर्य कुम्भम् ।
प्रतियजतु तदङ्गैरस्त्रभेदैस्तदीयै-
स्तदनु शतमखाद्यैः साधु वज्रादिकैश्च ॥ ४७

रथचरणशङ्खपाशाङ्कुशकुलिशगदाह्वयानि चाऽस्त्राणि ।
दारणमुद्राकरयोर्ययोस्तदीयौ कृपाणखेटाख्यौ ॥ ४८
इति कृतदीक्षः प्रजपेदक्षरलक्षप्रमाणात्मकं मन्त्रम् ।
जुहुयाच्च षट्सहस्रं जपावसाने घृतेन शुद्धेन ॥ ४९
खरमञ्जरीसमुत्थं जुहुयादथ मञ्जरीसहस्रयुतम् ।
प्रस्नातपञ्चगव्यं सप्तदिनं भूतशान्तये मन्त्री ॥ ५०
छिन्नरुहां समिधां त्रिसहस्रं यश्च जुहोति चतुर्दिनमात्रम् ।
दुग्धयुतं नचिरान्मनुजानां होमविधिर्ज्वरशान्तिकरः स्यात् ॥ ५१
अस्य यन्त्रमभिलिख्य भूर्जके साधु वाऽथ तृणराजपत्रके ।
मन्त्रजप्तमथ शीर्षबन्धनाज्जूर्तिविभ्रमशिरोरुजापहम् ॥ ५२

रक्तोत्पलैः प्रतिदिनं मधुरत्रयाक्तै-
र्यो वा जुहोति नियमेन सहस्रसंख्यैः ।

ध्यानमाह—अव्यादिति । [षट्कोणस्थेति श्लोकः पुस्तकान्तरे नास्ति] ॥४४॥
॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥
भूतशान्तये मन्त्रीति । मन्त्रजप्तपञ्चगव्यप्राशनादिकं सूचितम् ॥५०॥५१॥५२॥

मासेन वाञ्छितमवाप्नुयाति मन्त्रजापी
स्याद्वत्सरेण धनधान्यसमृद्धगेहः ॥ ५३
आरक्तैस्तरणिसहस्रकैः प्रफुल्लै-
रम्भोजैस्त्रिमधुरसंयुतैर्जुहोतु ।
लक्ष्मीः स्यादतिमहती महत्तथायुः
संप्राप्य सकलजगत्प्रियश्च भूयात् ॥ ५४
लाजाभिस्त्रिमधुरसंयुताभिरङ्गो
मासार्धं प्रतिजुहुयान्मुखे सहस्रम् ।
कन्यार्थी प्रतिलभते वरोऽथ कन्यां
कन्या वा भवति वरार्थिनी वराढ्या ॥ ५५
तिलैः सराजीखरमञ्जरीसमिद्विविर्घृतैश्च द्विसहस्रसंख्यकैः ।
प्रजुह्वतो नैव रुजो ग्रहोद्भवा न वाऽभिचारक्षतिरस्य जायते ॥
दशाधिकशतैः पयोघृतयुतैश्च दूर्वाचयै-
र्हुनेद्दिनमुखे विभुं नरहरिं विचिन्त्याऽनले ।
अवाप्य स तु दीर्घमायुरखिलैर्विमुक्तो गदैः
सुखी भवति मानवो निजकलत्रपुत्रादिभिः ॥ ५७
विस्तारैः किं प्रतिजपति यो मन्त्रमेनं यथोक्तं
लब्ध्वा कामान् समभिलषितानाशु मन्त्री स भूयात् ।
द्रव्यैराढ्यो द्विजनृपवरैः पूजितः शान्तचेता
देहान्ते स्यात् परमपरिशुद्धं परं धाम विष्णोः ॥ ५८

इति श्रीप्रपञ्चसारे पञ्चविंशः पटलः ।

मन्त्रजापीति । श्रीबीजयोग उक्तः ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥
आशु मन्त्रीत्यभिलषितविशेषप्राप्तौ बीजविशेषयोग उक्तः ॥ ५८ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
पञ्चविंशः पटलः ।

षड्विंशः पटलः ।

अथ सम्प्रति विष्णुपञ्जरस्य प्रतिवक्ष्यामि समासतो विधानम् ।
जितवांस्त्रिपुरं हरोऽपि येन त्रिदशानामधिपो बलासुरश्च ॥ १
शक्तेर्द्वादशगुणिते यन्त्रे मन्त्राणि मण्डलान्यपि च ।
बीजानि यानि चोक्तान्येभिः क्लृप्तन्तु पञ्जरं विष्णोः ॥ २
विष्णुं लिखेन्मध्यगशक्तिबिन्दौ कपोलयोः सिंहवराहबीजे ।
तद्विश्वरूपाह्वयमन्त्रवीतं प्रवेष्टयेत् षोड़शवर्णजेन ॥ ३
तारं हृदन्ते भगवत्पदं महाविष्णुवासुदेवौ च ङेऽन्तौ ।
विश्वादिरूप शरणं भव मे प्रभविष्णवे नमः स्यान्मन्त्रः ॥ ४
द्वादशाक्षरमन्त्रान्ते भवेतां कवचास्त्रकौ ।
स्वाहान्तः षोड़शार्णोऽयं मन्त्रः सर्वार्थसाधकः ॥ ५
क्रमेण तद्वर्णविकारजाताश्चक्रादिकाः षोड़श मूर्तयः स्युः ।
याभिस्तु विष्णोरिह पञ्जरस्य प्रवर्त्यते शक्तिरनेकरूपा ॥ ६

नृसिंहविधानानन्तरं रक्षाकरत्वसाम्यात् विष्णुपञ्जरविधानमाह—अथ संप्रतीति । रक्षाकरत्वमाह—जितवानिति ॥ १ ॥

विष्णुपञ्जरयन्त्रं तावदाह—शक्तेरिति । मण्डलानि वृत्तत्रिकोणचतुरश्राणि ॥ २ ॥

अधिकमंशमाह—विष्णुमिति । विष्णुमकारमित्यर्थः । तस्य बिन्दौ विश्वरूपविष्णुरपि लेखनीयः । तस्य हस्तेषु वक्ष्यमाणायुधधारणक्रमेण षोड़शाक्षराक्षरास्त्रपि लेखनीयानि । कपोलयोरिति । अकारहकारभागद्वन्द्वयोरित्यर्थः । सिंहवराहशब्दाभ्यामेव तद्बीजे उक्ते । ते चाकारकपोलयोः लेखनीये । बीजे इति तु हकारकपोलयोः गरुड़चक्रबीजलेखनमुक्तम् । तद्विश्वरूपेति । तच्छब्देन मध्यमबीजमुक्तम् ॥ ३ ॥

विश्वरूपमन्त्रमुद्धरति—तारमिति । ओं बीजम् । नमः शक्तिः ॥ ४ ॥ ५ ॥

चक्रादिमन्त्रेषु षोड़शाक्षराक्षरयोगं सूचयति—तद्वर्णविकारजाता इति । याभिरिति । कारणसूक्ष्मस्थूलरूपाभिः भगवद्वस्त्रवेष्टनबीजपद्मदलादिस्थाभिरित्यर्थः ॥ ६ ॥

यन्त्रस्य बीजेषु चतुर्षु पूर्वं प्राग्दक्षिणप्रत्यगुदग्गतेषु ।
विद्यांस्तु चक्रञ्च गदाञ्च शार्ङ्गं खड्गञ्च मन्त्रैः सहितं विलिख्यात् ॥
शङ्खहलमुसलशूलान्यग्न्याद्यश्रिष्वथाऽष्टबीजेषु ।
विलिखेत् दण्डं कुन्तं शक्तिं
पाशाङ्कुशकुलिशपरशुशतमुखवज्रीन् ॥ ८
सप्रणवहृदयभगवद्विष्णुस्वाख्यानमूर्तिधरयुक्ताः ।
सेनापतिसहिता निजमन्त्रान्ता मूर्तयोऽत्र लिखितव्याः ॥ ९
सहस्रारपदं पूर्वं कौमोदकी ततो भवेत् ।
महाशार्ङ्गपदं पश्चात् महाखड्गपदं पुनः ॥ १०

यन्त्रस्य बीजेष्विति । वेष्टनशक्तिबीजेष्वित्यर्थः । विद्यानिति । चित्रकर्मञ्च इत्यर्थः । मन्त्रैः सहितमिति । ललाटे तत्तन्मन्त्रांश्च लिखेदित्यर्थः ॥ ७ ॥

अश्रिष्विति । अश्रिगतबीजबिन्दुष्वित्यर्थः । सिंहवराहमूर्त्योस्तु लेखनं शक्तिवेष्टनपूर्वापरभागयोः । गरुड़चक्रमूर्त्योस्तु शक्तिवेष्टनबाह्ये नृसिंहस्याग्रे ॥८॥

चक्रादिमन्त्रानुद्धरति—सप्रणवेति । नमो योगादेव भगवद्विष्णुपदयोश्चतुर्थ्यन्तत्वमवगन्तव्यम् । स्वाख्यानं स्वस्य चक्रादेराख्यानम् । ततश्च ओं नमो भगवते विष्णवे चक्रायेत्येतत् सिद्धं भवति । स्वाख्यानमूर्तीति । स्वाभिमुख्यार्थमाख्यानं स्वाख्यानं तेन सहिता मूर्तिः स्वाख्यानमूर्तिः । सम्बुध्यन्तो मूर्तिशब्द इत्यर्थः । स्वस्य साधकस्य आख्यानं स्वाख्यानं शोभनप्राप्त्यर्थमाख्यानं स्वाख्यानं मां रक्षेत्याख्यानमित्यर्थः । सुतरामाख्यानं स्वाख्यानं रक्षरक्षेति वीप्सेत्यर्थः । ततश्च चक्रमूर्ते मां रक्ष रक्षेत्येतत् सिद्धं भवति । स्वाख्यानमूर्तिधरयुक्ताः सेनापतिसहिता इति । स्वाख्यानयुक्ताः । स्वाख्यानमूर्तियुक्ताः । स्वाख्यानमूर्तिधरयुक्ताः । स्वाख्यानमूर्तिधराः सेनापतिसहिता इत्यन्वयः । तत्र स्वाख्यानयुक्ता इत्यस्यायमर्थः । ओं नमो भगवते विष्णवे चक्रायेत्यादीनि स्वाख्यानानि तैः युक्ता इति । स्वाख्यानमूर्तियुक्ता इत्यस्यायमर्थः । उक्तमन्त्रान्ते चक्रमूर्तये इत्यादि योजयेदिति । ततः परं चक्रमूर्तिधरायेत्यादि योजयेत् । ततः परं चक्रमूर्तिधरसेनापतये इत्यादि योजयेदित्यवशिष्टस्यार्थः ॥ ९ ॥

निजमन्त्रानुद्धरति—सहस्रारेति । पोत्रं धृतधरं विद्यानिति । वराहबीजयोगविद्यानित्यर्थः । विष्णुभिख्ययोरन्तरेति । विष्णवे पोत्रधृतधराय महावराहायेति क्रमेणेत्यर्थः । मन्त्रीति । महावराहमन्त्रस्यान्ते योग इत्यर्थः ।

प्रोक्तानि वर्मास्त्रान्तानि निजमन्त्राणि वै क्रमात् ।
पूर्वं महापाञ्चजन्यं महाहलमनन्तरम् ॥ ११
ततो महामुसलकं महाशूलं ततः परम् ।
स्वाहान्तानि च मन्त्राणि शङ्खादीनां क्रमाद्विदुः ॥ १२
दण्डादीनामथाऽष्टानामन्ते युज्यान्नमःपदम् ।
पोतं धृतधरं विद्वान् वाराहे विष्णुभिख्ययोः ॥ १३
अन्तरा योजयेन्मन्त्री नारसिंहे पुनः सुधीः ।
नखञ्च दलितञ्चैव रिपुविग्रहमेव च ॥ १४
योजयित्वा नृसिंहात् प्राक् सिंहमन्त्रं समापयेत् ।
विष्णोरन्ते महापक्षिराजाय च गरुत्मते ॥ १५
हरिपूर्वं वाहनाय प्राणात्मन इतीरयेत् ।
नमोऽन्तोऽसौ तु विद्वद्भिर्मन्त्रो गारुत्मतो मतः ॥ १६
सत्रिष्टुभा वह्निगृहेण पूर्वं सानुष्टुभेन्दोर्निलयेन चापि ।
गायत्रमन्त्रोल्लसितेन भूयः संवेष्टयेदर्कनिकेतनेन ॥ १७
अनुलोमविलोमगैश्च वर्णैरभिवीतं च सुधापुटद्वयेन ।
नलिनं बहिरष्टयुग्मपत्रं प्रविदध्यादथ मूर्तिमन्त्रयुक्तम् ॥ १८
तद्बहिर्मण्डलं सर्वलक्षणैरभिलक्षितम् ।
तस्मिन्नावाह्य विधिवद्विश्वरूपं हरिं यजेत् ॥ १९
अग्नीषोमात्मकमरिगदाशार्ङ्गखड्गैः सशङ्खै-
रुद्यद्बाहुं हलमुसलशूलैः सदण्डैः सकुन्तैः ।
शक्त्या पाशाङ्कुशकुलिशटङ्काग्निभिश्चाऽर्कवह्नि-
द्योतद्वक्त्राब्जिकसरसिजं तप्तकार्त्तस्वराभम् ॥ २०

नारसिंहे पुनः सुधीरिति । नृसिंहबोजयोगस्य इत्यर्थः । नृसिंहात् प्रागिति । महानृसिंहाय नमः इत्यतः पूर्वमित्यर्थः । नृसिंहमन्त्रं समापयेदित्यनुष्टुभोऽन्ते योग उक्तः । विष्णोरन्त इति । विष्णवे महापक्षिराजायेत्यादिक्रमेणो-च्चरेदित्यर्थः । विद्वद्भिरिति । महापदयोग उक्तः ॥ १०—१८ ॥

अग्नीषोमात्मकमिति । दक्षिणाधोहस्तमारभ्य पञ्चमे पञ्चमे हस्ते चक्रादिचतु-ष्टयं दक्षिणाधस्तृतीयहस्तमारभ्य पञ्चमे पञ्चमे शङ्खादिचतुष्टयं दक्षिणाधोद्वितीय-

विष्णुं भास्वत्किरीटं मणिमुकुटकटीसूत्रकेयूरहार-
ग्रैवेयोर्म्यादिमुख्याभरणमणिगणोल्लासिदिव्याङ्गरागम् ।
विश्वाकाशावकाशप्रविततमयुतादित्यसङ्काशमुद्य-
द्बाहुद्वयव्यग्रनानायुधनिकरधरं विश्वरूपं नमामि ॥ २१

अभ्यर्च्य पूर्ववत् पीठं नवशक्तिसमन्वितम् ।
अर्चयेत् क्रमशो विद्वान् मूर्तिशक्तिचतुष्टयम् ॥ २२

चक्रञ्च चक्राङ्किरीटमौलिं सशङ्खचक्रं सगदं सशार्ङ्गम् ।
रक्ताम्बरं रक्ततनुं करालदंष्ट्राननं प्राग्दलकेऽर्चयीत ॥ २३

पूज्या गदा गदाङ्कितमौलिः सगदा सचक्रशङ्खधनुः ।
पीताम्बरानुलेपा पीता क्रुद्धा च याम्यसंस्थदले ॥ २४

शार्ङ्गं शार्ङ्गाङ्कितकं श्यामं शार्ङ्गारिदरगदाहस्तम् ।
रक्तांशुकानुलेपनमाल्यादि वारुणे यजेत् पत्रे ॥ २५

खड्गं सखड्गशिरसं खड्गारिगदाधनुःकरं धूम्रम् ।
विकृताम्बरानुलेपस्रजं समर्चयेदुदक्पत्रे ॥ २६

शङ्खं सशङ्खशिरसं शङ्खारिगदाधनुःकरं सुसितम् ।
सितवसनमाल्यभूषं यजेन्महानादमग्निसंस्थदले ॥ २७

शङ्खोक्तचिह्नभूषान् स्वास्त्रादिकधरचतुर्भुजानपरान् ।
हलमुसलशूलसंज्ञान् संयजेन्निशाटादिकेषु पत्रेषु ॥ २८

दण्डादिकांस्तथाऽष्टौ छिद्रदलेष्वर्चयीत रक्ताभान् ।
स्वस्वायुधप्रधानांश्चतुर्भुजाञ्छतमुखानलान्तांश्च ॥ २९

दंष्ट्राग्रलग्नवसुधं सजलाम्बुवाह-
चोरत्विषं त्वभियजेदथ साष्टबाहुम् ।
चक्रासिबाणसगदादरचर्मशार्ङ्ग-
शक्त्याख्यकान् दधतमादिमहावराहम् ॥ ३०

हस्तमारभ्य एकैकान्तरितहस्तेषु दण्डाद्यष्टकमित्येवमायुधधारणक्रमः ॥ २०॥२१ ॥
क्रमशो विद्वानिति । वासुदेवादिमन्त्राः सूचिताः ॥ २२—३२ ॥

अर्कानलोज्ज्वलमुखं नयनैस्त्रिभिश्च
वह्निं वमन्तमवधूतसटाकलापम् ।
शुक्लाभभूषमरिशङ्खगदासिबाहुं
भूयोऽभिराधयतु खे च महानृसिंहम् ॥ ३१
अग्रे समग्रबलमुग्रतनुं स्वपक्ष-
विक्षेपविक्षतविलक्षविपक्षपक्षम् ।
खड्ग[गड]ाग्रतुण्डममुमण्डजदण्डनाथ-
माराधयेदथ च पञ्जरकस्य विष्णोः ॥ ३२
भूयोऽपि केशवेन्द्रादिकान् समभ्यर्चयेच्चक्रवज्रादीन् ।
गन्धादिभिरुपचारैः पञ्चभिरथ संयतात्मको मन्त्री ॥ ३३
निजोदितो होमविधिश्च कार्यो दीक्षाविधानाभिहिते च वह्नौ ।
ससर्पिषाऽन्नेन तु वह्निमूर्तीर्हुत्वा तु विष्णोर्मनुना तथैव ॥ ३४
हुत्वा मनुवर्णसमं षोड़शवर्णं जुहोतु षोड़शशः ।
जुहुयाच्च वासुदेवादिकं शान्त्यादींश्चाऽथ रुद्रसंख्येन ॥ ३५
दुग्धतरूत्थाः समिधः क्रमेण चक्रादिभिश्चतुर्मन्त्रैः ।
जुहुयादष्टोर्ध्वशतं शङ्खाद्यैर्द्वादशभिरथ मनुभिः ॥ ३६
तिलसिद्धार्थैर्जुहुयाद्विकारसंख्यं पृथक् पृथङ्मन्त्री ।
त्रिष्टुबनुष्टुप्तत्पदमन्त्रैर्मन्त्रार्णसंख्यकं हविषा ॥ ३७
सघृतेन केशवाद्यैर्दिनकरसंख्यं तथेन्द्रवज्राद्यैः ।
जुहुयात् पृथगपि वसुमितमथ च महाव्याहृतीर्हुनेन्मतिमान् ॥ ३८
आराध्य च विसृज्याऽग्निमभिषिच्य सुसंयतः ।
विष्णोस्तु पञ्जरं कुर्याद्दृषी ब्रह्मबृहस्पती ॥ ३९
छन्दस्यनुष्टुप् त्रिष्टुप् च मुनिभिः समुदाहृते ।
विश्वरूपादिको विष्णुर्विष्णुपञ्जरदेवता ॥ ४०

संयतात्मको मन्त्रीति । केशवादीनामुक्ता मन्त्राः सूचिताः । वह्निमूर्तिग्रहणं जिह्वादीनामप्युपलक्षणम् । विष्णोर्मनुर्विश्वरूपमन्त्रः । [निजोदित इत्यत्र निवेदिते इत्यपि पाठः] ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

पृथक् पृथङ्मन्त्रीति । वराहनृसिंहगरुडमन्त्रैरपि होमं सूचयति ॥ ३७ ॥

अष्टार्णचक्रमनुमध्यगतैश्च पादै-
र्व्यस्तैस्तथा सुमतिरारचयेत् समस्तैः ।
गीतामनोः क्रमश एव तु जातियुक्ति
पञ्चाङ्कानि हरिपञ्जरकल्पितानि ॥ ४१
विष्णुः प्राच्यादिकमथ जपेन्नारसिंहोऽम्बरान्तं
तीस्त्रीन् मन्त्रान् पुनरपि तथा पञ्चशस्त्वेकविंशम् ।
बुद्धिस्थाप्रभृति च तथा पञ्चवारं त्रिगाथां
भूयो जप्याद्विमलशितधीश्चक्रमन्त्राभिधानम् ॥ ४२

हुनेन्मतिमानिति । आदौ प्रणवेन होम उक्तः ॥ ३८ ॥ ३९ ॥ ४० ॥

सुमतिरारचयेदिति । चक्रमनोरूर्ध्वं प्रणवशक्तियोगश्च इत्यर्थः ॥ ४१ ॥

विष्णुः प्राच्यादिकमथ जपेदिति । त्रिष्टुबनुष्टुब्गायत्रीगीतात्रिष्टुब्विश्वरूप-षोडशाक्षराणां सकृत् सकृत् जपानन्तरं शतानीक उवाचेत्यारभ्य तन्निबोध महीपत इत्यन्तः सकृत् जप्त्वा त्रिष्टुबादिमन्त्रषट्कं त्रिवारमावर्त्याऽनन्तरमित्यथशब्दार्थः । षोडशाक्षराक्षरवराहनृसिंहगरुड़चक्रबीजैः सप्रणवशक्तिभिः सह तेषां जपः कार्यः ।

अयमत्र प्रयोगक्रमः । ओं क्लीं ओं विष्णुः प्राच्यां स्थितश्चक्री । ओं क्लीं नं विष्णुर्दक्षिणतो गदी । ओं क्लीं मों प्रतीच्यां शार्ङ्गधृग्विष्णुः । ओं क्लीं भं विष्णुः खड्गी ममोत्तरे । ओं क्लीं गं हृषीकेशो विकोणेषु । ओं क्लीं वं हृषीकेशो विकोणेषु । ओं क्लीं तें हृषीकेशो विकोणेषु । ओं क्लीं वां हृषीकेशो विकोणेषु । ओं क्लीं सुं तच्छिद्रेषु जनार्दनः । ओं क्लीं दें तच्छिद्रेषु । ओं क्लीं वां तच्छिद्रे । ओं क्लीं यं तच्छिद्रे । ओं क्लीं हुं तच्छिद्रेषु । ओं क्लीं फट् ओं क्लीं तच्छिद्रेषु । स्वां तच्छिद्रेषु । ओं क्लीं हां तच्छिद्रेषु । ओं क्लीं हूं क्रोड़रूपो हरिर्भूमौ । ओं क्लीं क्ष्रौं नरसिंहोऽम्बरे मम । ओं क्लीं चौं विष्णुरग्रे स्थितो गरुड़ः । ओं क्लीं रं विष्णुरग्रे स्थितं चक्रमिति विंशन्मन्त्रांस्त्रिवारं जपेत् ।

नरसिंहोऽम्बरान्तमिति । नृसिंहमन्त्रस्य पञ्जरकल्पनामन्त्रेष्वन्त्यत्वमुक्तम् । नतु ततः परं पञ्जररचकमन्त्राभावोऽन्तशब्देन सिध्यति । यतः तत्र पुनरपीति मन्त्रद्वयसद्भावं सूचयति । तथा पञ्चशस्त्वेकविंशमिति । विश्वरूपमन्त्रेण सार्धं चक्रादिचक्रान्तान् एकविंशतिमन्त्रान् पञ्च पञ्चवारं जपेदित्यर्थः । तत्र विश्वरूपमन्त्रं ओं नमो भगवते विष्णवे विश्वरूपमूर्ते मामित्यादिको ग्राह्यः ।

ॐ नमो भगवते सर्वजिष्णवे विश्वरूपिणे ।
वासुदेवाय चक्रादिसर्वायुधभृते नमः ॥ ४३

अर्केन्दुवह्निनिलयस्फुरितत्रिमन्त्र-
शक्तिप्रवृद्धमहसः परमस्य विष्णोः ।
पादारविन्दगलितामृतसिक्तगात्रं
साध्यं स्मरेज्जपविधावपि साधकेशः ॥ ४४

विष्णोः सान्निध्यलब्धोल्लसितचलचलद्वस्तदण्डोद्यतास्त्रै-
श्चक्राद्यैर्भीषणास्येक्षणचरणवचोहासहुङ्कारघोरैः ।
उत्क्षिप्ताक्षिप्तकृत्तस्फुटितविदलितांश्चूर्णितध्वस्तगात्रान्
ध्यायेद्वेतालभूतग्रहदुरितपिशाचारिनागादिरोगान् ॥ ४५

पूर्वं स्थाने हृषीकेशमन्त्रयुक्तं विधानवित् ।
विश्वरूपात्मकं जप्याद्वैष्णवं मूलमन्त्रकम् ॥ ४६
योजयित्वा जपेत् पश्चात् चक्रादिषु यथाक्रमम् ।
चतुर्षु चतुरः पादान् गौतात्रिष्टुप्समुद्भवान् ॥ ४७
पूर्णेषु षोड़शस्वेवमाद्यं पादं वराहके ।
द्वितीयं नारसिंहे च तृतीयं गारुड़े पुनः ।
चतुर्थं चक्रमन्त्रे च योजयित्वा जपेत् सुधीः ॥ ४८

पूर्वोद्दृष्टतविश्वरूपमन्त्रेण सहाऽयं पञ्चवारं प्रथमतो जप्यः । ततश्चक्रादिमन्त्राः । विमलशितमतिरिति । पञ्चराकाराणां तद्रचकाकाराणामायुधादीनामाधार-भूतानां त्रिष्टुबादीनां ध्यानमायुधानां मुद्रापूर्वकं जपः त्रिष्टुबादिप्रतिलोम-जपश्चेत्यादि सूचितम् ॥ ४२ ॥

चक्रमन्त्रमुद्धरति—ओं नमः इति ॥ ४३ ॥

[प्रतिपत्तिमाह—अर्केन्दिति द्वाभ्याम् । अर्केन्दुवह्नीनां निलयानि मण्डलानि । तेषु स्फुरितास्त्रिमन्त्राः गायत्र्यनुष्टुप्त्रिष्टुभः तेषां शक्तिभिः प्रवृद्धं समेधित-मत्युर्जितं महस्तेजो यस्य स तथा तस्य विश्वरूपविष्णोः] ॥ ४४॥४५ ॥

विश्वरूपत्रिष्टुबादीनामपि पञ्चपञ्चवारं जपमाह—पूर्वमिति । विश्वरूप-चक्रादिमन्त्रजपात् पूर्वमित्यर्थः । त्रिष्टुबादिजपक्रमं च सूचयति—विधान-विदिति । चक्रादिमन्त्रेष्वपि गौतात्रिष्टुबादियोगमाह—योजयित्वेति ।

मन्त्रं सुदर्शनं चेत्थमिम[ष्ट]मष्टाक्षरं मनुम् ।
संयोज्य कृच्छ्रे महति जपेन्मन्त्री विधानवित् ॥ ४९
आग्नेये वक्ष्यमाणेन विधानेन समाहितः ।
सिकतोपलचर्वादीन् साधयेदथ तैः क्रियाम् ॥ ५०
वास्तौ पुरे वा ग्रामे वा विदध्याद्विषयेऽपि वा ।
मध्ये च षोड़शाशान्ते खनेदष्टादशाऽवटान् ॥ ५१
अष्टादशन्तु चक्रस्य विदध्यात् पुरतोऽवटम् ।
हस्तागाधांस्तथाऽऽयामांश्चतुरस्रान् समन्ततः ॥ ५२
अन्योन्यतश्चंक्रमार्थं शुद्धान् मार्गान् विधाय च ।
गोमयेनोपलिप्यैतानानीय स्थाप्य वस्त्वपि ॥ ५३

सुधीरिति। गाथाचक्रमन्त्रेष्वपि गीतात्रिष्टुबादियोगश्च इत्यर्थः ॥४६॥४७॥४८॥

पादपूर्वोत्तरभागयोरष्टाक्षरस्य च क्रमेण योगमाह—मन्त्रमिति। जपेन्मन्त्री विधानविदिति। सुदर्शनानन्तरं प्रणवशक्तिषोड़शाक्षराक्षरादिबीजस्तोत्रयोग इत्यादिकं दर्शितम्।

अयमत्र मन्त्रप्रयोगक्रमः। ओं क्लीं रं विष्णुरग्ने स्थितं चक्रमित्यन्तमुक्तप्रकारेण त्रिवारं जप्त्वा षोडशाक्षरादिमन्त्रषट्कं त्रिवारमावर्त्य क्षुरान्तमित्यादि विष्णुचक्ररयाहता इत्यन्तमेकवारं जप्त्वा षोडशाक्षरादिमन्त्रषट्कमप्येकैकवारं जपित्वा त्रिष्टुबादिमन्त्रषट्कं पञ्चवारमावर्त्य ओं नमो भगवते विष्णवे विश्वरूपमूर्ते मामित्यादि विश्वरूपमन्त्रमपि पञ्चवारं जपित्वा चक्रादिचतुर्विंशतिमन्त्रान् पञ्चवारमावर्तयेत्। ओं नमो नारायणाय स्थाने हृषीकेश तव प्रकीर्त्या सहस्रार हुं फट् ओं क्लीं ओं विष्णुः प्राच्यां स्थितश्चक्री ओं नमो भगवते विष्णवे चक्रमूर्ते मां रक्ष रक्ष ओं नमो भगवते विष्णवे चक्राय चक्रमूर्तये चक्रमूर्तिधराय चक्रमूर्तिधरसेनापतये सहस्रार हुं फडिति चक्रमन्त्रः। एवमन्येऽपि मन्त्रा जप्याः। एवं रक्षां कृत्वाऽङ्गन्यासादिकं विन्यस्योपसंहरेदिति ॥ ४९ ॥

शरीररक्षाप्रकारमभिधाय वास्त्वादिरक्षाप्रकारमाह—आग्नेये इति। विधानप्रकारमाह—मध्य इति ॥ ५० ॥ ५१ ॥

हस्तागाधानिति। मध्यव्यतिरिक्तानां परिमाणकथनं मध्ये तु त्रिहस्तेन त्रिभौमौ भाव्यम्। वराहनृसिंहयोरपि तत्रैव प्रतिष्ठाया वक्ष्यमाणत्वात्

शुक्लपुष्करपत्रेषु निदध्याद्विंशतिष्वपि ।
ततो मध्यगकुण्डस्य प्रविश्य पुरतो गुरुः ॥ ५४
तदन्तरिष्ट्वा पीठञ्च तत्र यन्त्रमनुस्मरन् ।
स्थापयेद्देषावे स्थाने विश्वरूपधिया सुधीः ॥ ५५
ततः क्रमेण चक्रादीन् दिक्कुण्डेषु चतुर्ष्वपि ।
पुनः शङ्खादिकांस्तद्वत् कुण्डेष्वस्राश्रितेष्वपि ॥ ५६
तथा दण्डादिकानष्टौ छिद्राशासु प्रकल्पयेत् ।
मध्ये पुनरधश्चोर्ध्वे कोलकेसरिणौ यजेत् ॥ ५७
चक्रस्य प्राक्तने कुण्डे स्थापयेद्विनतासुतम् ।
ततः समस्थलीकृत्य क्रमात् संमुपलिप्य च ॥ ५८
प्रत्यगासनमासीनो मध्यगस्थण्डिले स्थिते ।
यन्त्रे काञ्चनपट्टस्थे पूजयेत् पूर्ववत् प्रभुम् ॥ ५९
वादित्रघोषबहुलं निवेद्यान्तं यथाक्रमम् ।
हुनेच्च पूर्वसन्दिष्टैर्द्रव्यैः पूर्वोक्तमानतः ॥ ६०
आशोपाशान्तराशासु बलिं दद्यात्त्रिशस्त्रिशः ।
क्रमाच्चक्रादिमूर्तीनां पञ्चपूराऽम्बसा सुधीः ॥ ६१
तत उद्वास्य देवेशं पूजां परिसमाप्य च ।
दत्त्वा सुवर्णवासांसि गुरवे ब्राह्मणानपि ॥ ६२
प्रतर्प्य विभवैः सम्यक् भोजयेद्देवताधिया ।
तत्रोपसर्गा नश्यन्ति नरनारीमहीस्थिताः ॥ ६३

एकोनविंशतिकुण्डानि कार्याणि। चक्रस्य पुरतो गरुडस्यापि हि स्थापनमत्र विवक्षितम्। [पुष्करपत्रेण सहितान् तत्तन्मन्त्रैर्यथाविधि जप्तान् सिकतादीन् विश्वरूपविष्णवादिदेवताबुद्ध्या तत्तन्मन्त्रैस्तेषु तेषु अवटेषु उक्तक्रमेण स्थापयेदित्याह —स्थापयेदित्यादिना। मध्ये पुनरिति। मध्यमावटे विश्वरूपहरेरध ऊर्ध्वं च द्रव्यस्थापनपूर्वकं वराहनृसिंहौ पूजयेदित्यर्थः। चक्रस्य प्राक्तन इति। नृसिंह-प्रतिष्ठानन्तरं तत्पुरस्थितकुण्डे सुदर्शनचक्रं प्रतिष्ठाप्य ततपुरस्थितकुण्डे गरुडं प्रतिष्ठापयेदित्यर्थः। पञ्चपूरान्बसेति। दधिसक्तुलाजतिलहरिद्रारजोन्वित मोदनं तेषु विष्णुपार्षदेभ्यो बलिं विकिरयेदित्यर्थः। इति सम्बन्धदीपिका-

ग्रहक्षुद्रपिशाचाद्या नेक्षन्ते तां दिशं भयात् ।
अश्मपातादिका ये च भया नश्यन्ति तेऽचिरात् ॥ ६४
शस्यर्द्धिर्गोसमृद्धिश्च प्रजावृद्धिश्च जायते ।
धनधान्यसमृद्धिश्च वर्धते तत्कुलं क्रमात् ।
दारिद्र्यरोगनिर्मुक्तं सुखमाभूतसंप्लवम् ॥ ६५

रक्षोभिरक्षतबलैरसुरैश्च दैत्यैः
सर्वैः समुद्यतमहास्त्रधरैः परीतम् ।
विष्णोस्तु पञ्जरमिदं प्रभजन्तमव्यात्
साक्षादपीन्द्रमपरत्र नरे कथा का ॥ ६६

इति श्रीप्रपञ्चसारे षड्विंशः पटलः ॥

कारः] ॥ ५२—६५ ॥

अपरत्र नरे कथा केति । एवंविधशत्रुपरीतमिन्द्रमपि अरक्षत् । तत उत्पन्नशत्रुं नरं रक्षितुं सामर्थ्यमस्तीति का कथेत्यर्थः ॥ ६६ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
षड्विंशः पटलः ।

सप्तविंशः पटलः ।

अथाऽभिवक्ष्यामि मनुं समासात् प्रासादसंज्ञं जगतो हिताय ।
येन प्रजप्तेन यथाऽर्चितेन हुतेन सिद्धिं लभते यथेष्टाम् ॥ १
प्रसादनत्वान्मनसो यथावत् प्रासादसंज्ञाऽस्य मनोः प्रदिष्टा ।
अन्त्यात्तृतीयः प्रतिलोमतः स्यादनुग्रहार्धेन्दुयुतश्च मन्त्रः ॥ २
ऋषिरस्य वामदेवः पङ्क्तिश्छन्दश्च देवतेशः स्यात् ।
तेनैवाऽक्लीबकलादीर्घयुजाऽङ्गानि तस्य बीजेन ॥ ३
शूलाही टङ्कघण्टासिशृणिकुलिशपाशाग्न्यभीतीर्दधानं
दोर्भिः शीतांशुखण्डप्रतिघटितजटाभारमौलिं त्रिनेत्रम् ।
नानाकल्पाभिरामापघनमभिमतार्थप्रदं सुप्रसन्नं
पद्मस्थं पञ्चवक्त्रं स्फटिकमणिनिभं पार्वतीशं नमामि ॥ ४
ईशानादीन् मन्त्रवित् पञ्च मन्त्रा-
नङ्गुष्ठादिष्वङ्गुलीषु क्रमेण ।
न्यस्येदज्भिर्व्युत्क्रमाद्व्योमगाभि-
र्ङ्खाख्याभिस्ताभिरेवाऽङ्गुलीभिः ॥ ५
ईशानस्तत्पुरुषाघोराख्यौ वामदेवसंज्ञश्च ।
सद्योजाताह्वय इति मन्त्राणां देवताः क्रमात् पञ्च ॥ ६

वैष्णवविधानानन्तरं शैवं विधानं वदन् शैवागमसारस्य प्रासादस्य विधानं सप्रयोजनं वक्तुमुपक्रमते—अथेति ॥ १॥२ ॥

देवतेशः स्यादिति। सदाशिव इत्यर्थः ॥ ३॥४ ॥

मन्त्रवित् पञ्च मन्त्रानिति। अङ्गुष्ठाभ्यां नम इत्यादियोग उक्तः। ताभिरेवाङ्गुलीभिरित्यस्य मूर्धाननादिषु विन्यसेदिति उत्तरत्रान्वयः ॥ ५ ॥

ईशानादिमन्त्रान् विहाय देवतानामभिर्वा बीजसहितैः न्यास इति मन्त्रानो देवतानामानि कथयति—ईशान इति ॥ ६॥७॥८॥९ ॥

मूर्धाननहृद्गुह्यकपादेषु च नामभिः स्वबीजाद्यैः ।
ऊर्ध्वप्राग्दक्षोदक्पश्चिमगेष्वाननेषु विन्यस्येत् ॥ ७
प्रतिपाद्य निजं शरीरमेवं प्रजपेदिन्द्रियलक्षकं शिवात्मा ।
जुहुयाच्च दशांशतस्तदन्ते मधुराक्तैः करवीरजप्रसूनैः ॥ ८
अथवा कुसुमैर्जवासमुत्थैः कमलैर्वा विमलेन पायसेन ।
नृपवृक्षभवैः समिद्वरैर्वा जुहुयात् साधकसत्तमः समृद्ध्यै ॥ ९
अष्टपत्रगुणवृत्तराशिभिर्वीथिकल्पतरुभिः समावृतम् ।
मण्डलं प्रतिविधाय शूलिनः पीठमत्र नवशक्तिभिर्यजेत् ॥ १०
वामा ज्येष्ठा रौद्री काल्याख्या कलबलाद्यविकरिण्यौ ।
सबलप्रमथिनिसर्वभूतदमन्यौ मनोन्मनीश्च यजेत् ॥ ११
तारादिकं नतिमपि प्रोक्त्वा भगवत्पदं चतुर्थ्यन्तम् ।
सकलगुणात्मपदान्ते शक्तियुक्ताय चेति सम्भाष्य ॥ १२
भूयोऽनन्तायेति च योगान्ते पीठात्मने चेति ।
नमसा युक्तं यात् ब्रूपीठाख्योऽयं मनुः समुद्दिष्टः ॥ १३
न्यासक्रमेण देहे मन्त्री गन्धादिभिः समभ्यर्च्य ।
पूर्वोक्तदिक्षु मूर्तीर्विदिक्षु सनिवृत्तिपूर्विकाश्च यजेत् ॥ १४
सद्यो वेदाक्षमालाभयवरदकरः कुन्दमन्दारगौरो
वामः काश्मीरवर्णोऽभयवरदपरश्चक्षमालाविलासी ।
अक्षस्रग्वेदपाशाङ्कुशडमरुकखट्वाङ्गशूलान् कपालं
बिभ्राणो भीमदंष्ट्रोऽञ्जनरुचिरतनुर्भीतिदश्चाऽप्यघोरः ॥ १५

अष्टपत्रेति । मध्ये प्रासादिकं केसरेषु स्वरान् दलेष्वष्टाक्षरं तद्बहिः वृत्ते व्यञ्जनानि पार्थिवकोणेषु प्रासादं लिखेत् । तद्बहिः गुणवृत्तादिकं लिखेदित्यर्थः ॥ १० ॥

पीठशक्तीराह—वामेति ॥ ११॥१२॥१३ ॥

न्यासक्रमेण मन्त्रीति । पूजायां पञ्चाक्षर्यन्तत्वमुक्तम् । पूर्वोक्तदिक्षिति । ऊर्ध्वप्रागित्यत्रेत्यर्थः ॥ १४ ॥

प्रोक्ताः सर्व इति पक्षान्तरम् । बाहुभिः खेटा[विदा]भयवरदकुठारधराश्चास्मिन् पक्षे शर्वो देवः स्वयमपि शूलडमरुकवराभयधरोऽस्मिन् पक्षे पक्षान्तरमाश्रित्य

विद्युद्वर्णोऽथ वेदाभयवरदकुठारान् दधत् पूरुषाख्यः
प्रोक्ताः सर्वे त्रिनेत्रा विधृतमुखचतुष्काश्चतुर्बाहवश्च ।
मुक्तागौरोऽभयेष्टाधिककरकमलोऽघोरतः पञ्चवक्त्र-
स्त्वीशो ध्येयोऽम्बुजन्मोद्भवमुररिपुरुद्रेश्वराः स्युः शिवान्ताः ॥ १६
भूतानां शक्तित्वाद्व्याप्तत्वाज्जगति वा निवृत्त्याद्याः ।
तेजोरूपाः करपदवर्णविहीना मनीषिभिः प्रोक्ताः ॥ १७
अनन्तसूक्ष्मौ च शिवोत्तमश्च तथैकपूर्वावपि नेत्ररुद्रौ ।
त्रिमूर्तिश्रीकण्ठशिखण्डिनश्च प्रागादिपत्रेषु समर्चनीयाः ॥ १८
शूलाशनिशरचापोल्लासिदोर्दण्डभीषणाः सर्वे ।
पद्मासनाश्च नानाविधभूषणभूषितास्त्रिनेत्राश्च ॥ १९
पाटलपीतसितारुणशितिरक्तशितिप्रभाश्च धूम्रान्ताः ।
कोटीरघटितविलसच्छशिकलायुताश्च मूर्तयः क्रमशः ॥ २०
उमा चण्डेश्वरो नन्दी महाकालो गणेश्वरः ।
वृषभृङ्गिरिटिस्कन्दाः संपूज्याश्चोत्तरादिकाः ॥ २१
कनकविदूरजविद्रुममरकतमुक्तासिताच्छरक्ताभाः ।
पद्मासनसंस्थाश्च क्रमादुमाद्या गुहान्तिकाः प्रोक्ताः ॥ २२
पुनराशेशास्तदनु च कुलिशाद्या दिक्क्रमेण संपूज्याः ।
प्रासादविधानमिदं निगदितमिति सकलवर्गसिद्धिकरम् ॥ २३
अमुना विधिना महेशपूजां दिनशो यः कुरुते समाहितात्मा ।
स तु सम्यगवाप्य दृष्टभोगान् परमन्ते परिपूर्णमेति धाम ॥ २४
वक्ष्यामि शैवागमसारमष्टत्रिंशत्कलान्यासविधिं यथावत् ।
सपञ्चभिर्ब्रह्मभिरीशपूर्वैः सर्प्यादिकैः साङ्गविशेषकैश्च ॥ २५

ईशानस्य ध्यानमाह—मुक्तागौर इति । सद्यादीनां स्वरूपमाह—अम्बुजन्मेति । मूर्त्यावरणाद्बहिरङ्गावरणं द्रष्टव्यम् ॥ १५—२४ ॥

प्रासादविधानमभिधाय तदवयवभूतानां पञ्चब्रह्मणां विधानमाह—वक्ष्यामीति । शशिन्यङ्गदेष्टदामरीचंशुमालिन्यः ईशानकलाः । निवृत्त्याद्याश्चतस्रस्तत्पुरुषकलाः । तमोमोहाक्षयानिद्राव्याधिर्मृत्युक्षुधातृषा इति अघोरकलाः ।

ईशोऽनुष्टुब्भूरीश्वरास्तत्पुरुषसंज्ञगायत्र्यापः ।
पुनरग्न्यनुष्टुबापो वामक्रतिभगा हरस्त्वनुष्टुब्भगयुक् ॥ २६
इन्द्रियतारसमेतं सर्वज्ञायेति हृच्छिरस्त्वमृते ।
तेजोमालिनि पूर्वं हृन्नाय ब्रह्मशिरस इति कथितम् ॥ २७
ज्वलितशिखिशिखान्ते त्वनादिबोधाय चाऽन्वितेह शिखा ।
वज्रिणे वज्रधराय स्वान्ते तन्त्रायेति वर्म नेत्रञ्च ॥ २८
सौ चौ[वौ] ह्रौ बिन्दुयुतं संप्रोक्ताऽलुप्तशक्तये च तथा ।
श्रीं पशु हुं फट् अनन्तशक्तये तथा चाऽस्त्रं स्यात् ।
समुनिच्छन्दोदैवतयुक्तं तदङ्गषट्कमिति कथितम् ॥ २९
करदेहमुखन्यासं मन्त्री पूर्ववदाचरेत् ।
कलाः प्रविन्यसेद्देहे वक्ष्यमाणक्रमेण तु ॥ ३०
ताः स्युः पञ्च चतस्रोऽष्टौ त्रयोदश चतुर्द्वयम् ।
अष्टत्रिंशत्कलाः सम्यक् न्यस्तव्या मन्त्रवित्तमैः ॥ ३१

रजा रक्षा रतिः पाल्या कामा संयमिनी क्षमा [क्रिया] ।
वृद्धिः स्थिरा च रात्रिश्च भ्रामिणी मोहनी जरा ॥

इति वामदेवकलाः ।

वृद्धिः सिद्धिर्द्युतिर्लक्ष्मीर्मेधा प्रज्ञा प्रभा सुधा ।

इति सद्योजातकलाः । एताश्च पञ्चब्रह्मकलाभिः सार्धं न्यस्तव्याः । अतस्तैः सार्धं वक्ष्यामीत्याह—सपञ्चभिरिति ॥ २५॥२६ ॥

इन्द्रियतारसमेतमिति । ऐं क्लीं श्रीं हसखफ्रें ह्सौः सर्वज्ञाय सर्वात्मने हृदयाय नमः इति हृन्मन्त्र इत्यर्थः । पञ्चप्रणवयोगः शिरआदिष्वपि समानः । हृन्नाय इत्यतः पूर्वं नित्यपदं योज्यमित्याचार्याः । अस्त्रेऽपि क्लीमित्यस्यानन्तरं क्लीमिति योज्यम् । मन्त्रवित्तमैरिति । प्रणवशक्तिप्रासादयोगः पदविभागश्च कथितः ।

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ।

तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ।

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च सर्वतः सर्वशर्वेभ्यः नमस्ते अस्तु रुद्ररूपेभ्यः ।

दिक्षु प्राग्याम्यवारीड्वसुपनिजभुवामैन्द्रवारार्किराक्षां
हृद्ग्रीवांसद्वयीनाभ्युदरचरमवक्षःसु गुह्याण्डयोश्च ।
सोर्वोर्जान्वोः सजङ्घास्फिगुभयकटिपार्श्वे च पट्टोस्तलेषु
घ्राणे के बाहुयुग्मेष्वपि विशदमतिर्विन्यसेदङ्गुलीभिः ॥ ३२
विन्यासः प्रतिमाकृतौ च नितरां सान्निध्यकृत् स्यादयं
देहे वापि शरीरिणां निगदितः सामर्थ्यकारीति च ।
आस्ते यत्र तथाऽमुनैव दिनशो विन्यस्तदेहः पुमान्
क्षेत्रं देशममुञ्च योजनमितं शैवागमज्ञा विदुः ॥ ३३
न्यस्यैवं पञ्चभिर्ब्रह्मभिरथ शिवमाराधयेदृग्भिराभि-
र्मध्यप्राग्याम्यसौम्यापरदिशि पुनरङ्गैरनन्तादिभिश्च ।
अन्योमाद्यैर्दिशापैः पुनरपि कुलिशाद्यैर्यजेदेवमुक्तं
पाञ्चब्राह्मं विधानं सकलसुखयशोभुक्तिमुक्तिप्रदञ्च ॥ ३४
पञ्चाक्षरविहितविधिं वक्ष्ये जपतामभीष्टसिद्धिकरम् ।
सिद्धेन येन देही प्रेत्येह च वाञ्छितं पदं लभते ॥ ३५

वामदेवाय नमः । ज्येष्ठाय नमः । रुद्राय नमः । कालाय नमः । कलविकलनाय नमः । बलाय नमः । बलविकलनाय नमः । बलप्रमथनाय नमः । सर्वभूतदमनाय नमः । मनोन्मनाय नमः ।

सद्योजातं प्रपद्यामि सद्योजाताय वै नमः । भवे अभवे अनादिभवे भजस्व मां भवोद्भवाय नमः ॥ २७॥२८॥२९॥३०॥३१ ॥

न्यासक्रममाह—दिक्षिति । शिरोदिक्षित्यर्थः । ऐन्द्रेत्यादिना वक्त्राणि तत्पुरुषन्यासस्थानान्युच्यन्ते । हृदित्यादिना अघोरकलान्यासस्थानानि । गुह्येत्यादिना वामकलान्यासस्थानानि । पट्टोरित्यादिना सद्योजातकलान्यासस्थानानि । अङ्गुलीभिरित्यङ्गुष्ठाद्यङ्गुलीभिः क्रमेणेशानकलादि न्यसेदित्यर्थः । ओं क्रीं ह्रीं नमः शिवाय ईशानः सर्वविद्यानां शशिन्यै नमः इत्यादयो मन्त्राः ॥ ३२॥३३॥३४ ॥

पञ्चब्रह्मविधानमभिधाय तदात्मकस्य पञ्चात्मकस्य विधिं वदन् विनियोगमाह—पञ्चाक्षरेति । जगतामिति । पञ्चाक्षरमन्त्रे सर्वेषामधिकार उक्तः । न केवलं प्राप्तिमात्रेणेष्टसिद्धिः किन्तु साधितेनैवेत्याह—सिद्धेनेति ॥ ३५ ॥

दीर्घो विषो विसर्गो मृत्युः साक्षी च सवाक्षरः पवनः ।
तारादुद्भवति यदस्मात्तदादिरभिधीयते मनुप्रवरः ॥ ३६
अस्याऽक्षराग्यमूनि च पञ्च स्युः पञ्चभूतगानि तथा ।
जगदपि भूतारब्धं तेन हि जगदात्मतोदिताऽस्य मनोः ॥
प्रोक्तमृष्यादिकं पूर्वमङ्गवर्णैस्तु मन्त्रजैः ।
अङ्गुलीदेहवक्त्रेषु मूलमन्त्राक्षरादिकान् ॥ ३८
न्यसेत्तत्पुरुषाघोरसद्योवामेशसंज्ञकान् ।
सतर्जनीमध्यमान्त्यानामिकाङ्गुष्ठकेषु च ३९
वक्त्रहृत्पादगुह्याख्यमूर्धस्वपि च नामभिः ।
प्राग्याम्यवारुणोदीच्यवक्त्रष्वाप च मूर्धनि ॥ ४०
बिभ्रद्दोर्भिः कुठारं मृगमभयवरौ सुप्रसन्नो महेशः
सर्वालङ्कारदीप्तः सरसिजनिलयो व्याघ्रचर्मोत्तवासाः ।
ध्येयो मुक्तापरागामृतरसकलिताद्रिप्रभः पञ्चवक्त्र-
स्त्र्यक्षः कोटीरकोटीघटिततुहिनरोचिःकलोत्तुङ्गमौलिः ॥ ४१
अक्षरलक्षचतुष्कं जप्यात्तावत्सहस्रमपि जुहुयात् ।
शुद्धैस्तिलैर्घृतैर्वा दुग्धान्नैर्दुग्धभूरुहेध्मैर्वा ॥ ४२
तत्पुरुषाद्याः सर्वे प्रधानसप्रोक्तबाहुहेतियुताः ।
उल्लसितमुखचतुष्कास्तेजोरूपो विलक्षणस्त्वीशः ॥ ४३
आवृतिराद्या मूर्तिभिरङ्गैरन्याऽपराऽप्यनन्ताद्यैः ।
अपरोमादिभिरपरेन्द्राद्यैरपरा तदायुधैः प्रोक्ता ॥ ४४
कथयामि मनोर्विधानमन्यन्मुनिपूज्यं प्रवरं पिनाकपाणेः ।
स्वतनौ परिकल्प्य पीठमङ्गान्यपि विन्यस्य तथैव मन्त्रवर्णान् ॥
हृन्मुखांसोरुयुग्मेषु षड्वर्णान् क्रमशो न्यसेत् ।
कण्ठमूले तथा नाभौ पार्श्वयुक्पृष्ठहृत्सु च ॥ ४६

प्रणवस्य भूतयोन्यात्मत्वमितरेषां भूतात्मत्वं च वदन् न्यासादौ मन्त्रविशेषान् आह—तारादिति । अनेन चाऽक्षरतत्त्वन्यासः सूचितः ॥ ३६॥३७ ॥

प्रोक्तं पूर्वमिति प्रासाद इत्यर्थः । अं बीजम् । आय शक्तिः ॥ ३८—४९ ॥

मूर्द्धास्यनेत्रघ्राणेषु दोःपत्सन्ध्यग्रकेषु च ।
सशिरोवक्त्रहृदयजठरोरुपदेष्वपि ॥ ४७
हृदाननपरश्वेणाभौत्याख्यवरदेषु च ।
मुखांसहृदयेषु त्रीन् परान् पादोरुकुक्षिषु ॥ ४८
ऊर्ध्वाधः क्रमशः कुर्याद्गोलकन्यासमुत्तमम् ।
पुनस्तत्पुरुषाघोरसद्योवामेशसंज्ञकान् ॥ ४९
ललाटजठरद्वंसहृदयेषु क्रमान्न्यसेत् ।
पुनस्तत्प्रतिपत्त्यर्थं जपेन्मन्त्रमिमं सुधीः ॥ ५०
नमोऽस्तु स्थाणुभूताय ज्योतिर्लिङ्गाव[भृ]तात्मने ।
चतुर्मूर्तिवपुश्छायाभासिताङ्गाय शम्भवे ॥ ५१
कुर्यादनेन मन्त्रेण निजदेहे समाहितः ।
मन्त्री पुष्पाञ्जलिं सम्यक् त्रिशः पञ्चश एव च ॥ ५२
पूर्वोक्त एव पीठे प्रागङ्गैर्मूर्तिभिः शक्तिभिस्तदनु ।
वृषपालचण्डदुर्गागुहनन्दिगणपसैन्यपाः पूज्याः ॥ ५३
पूज्याश्च वासवाद्याः पुनरुपहारैः क्रमेण भक्तिमता ।
अभ्यर्चिते हुते च स्तोतव्यः संस्तवेन पुनरीशः ॥ ५४
नमो विरिञ्चिविष्ण्वीशभेदेन परमात्मने ।
सर्गसंस्थितिसंहारव्याहृति[वृत्ति]व्यक्तमूर्तये ॥ ५५
नमश्चतुर्धाप्रोद्भूतभूतभौ[भू]तात्मने भुवः ।
भूरिभारार्तिसंहर्त्रे भूतनाथाय शूलिने ॥ ५६
विश्वग्रासाय विलसत्कालकूटविषाशिने ।
तत्कलङ्काङ्कितग्रीवनीलकण्ठाय ते नमः ॥ ५७
नमो ललाटनयनप्रोल्लसत्कृष्णवर्त्मना ।
ध्वस्तस्मरनिरस्ताधियोगिध्येयाय शम्भवे ॥ ५८

मन्त्रमिदं सुधीरिति । मन्त्रार्थगतमानस इत्यर्थः ॥ ५०॥५१॥५२ ॥

मन्त्री पुष्पाञ्जलिमिति । मूलमन्त्रयोगमाह सम्यगिति । सप्रतिपत्तिकमित्यर्थः ॥ ५२—६६ ॥

नमो देहार्धकान्ताय दग्धदक्षाध्वराय च ।
चतुर्वर्गे[र्गे]ष्वभीष्टार्थदायिने मायिनेऽणवे ॥ ५९
स्थूलाय मूलभूताय शूलदारितविद्विषे ।
कालहन्त्रे नमश्चन्द्रखण्डमण्डितमौलये ॥ ६०
विवाससे कपर्दान्तर्भ्रान्ताहिसरिदिन्दवे ।
देवदैत्यासुरेन्द्राणां मौलिघृष्टाङ्घ्रये नमः ॥ ६१
भस्माभ्यक्ताय भक्तानां भुक्तिमुक्तिप्रदायिने ।
व्यक्ताव्यक्तस्वरूपाय शङ्कराय नमो नमः ॥ ६२
नमोऽन्तकान्धकरिपवे पुरद्विषे
नमोऽस्तु ते द्विरदवराहभेदिने ।
विषोल्लसत्फणिवरबद्धमूर्तये
नमः सदा वृषवरवाहनाय ते ॥ ६३
वियन्मरुद्धुतवहवार्वसुन्धरा-
मखेशरव्यमृतमयूखमूर्तये ।
नमः सदा नरकभयापभेदिने
भवेह नो भवभयभङ्गकृद्विभो ॥ ६४
स्तुत्वेन्दुखण्डपरिमण्डितमौलिमेव-
मुद्भासयेत् पुनरमुं हृदयाम्बुजे स्वे ।
अभ्यर्च्य देह[व]मपि संयतचित्तवृत्ति-
र्भूत्वा शिवो जपतु मन्त्रमहेशमेनम् ॥ ६५
सन्तर्प्य विप्रान् पुनरेवमेव संपूजयेदिन्दुकलावतंसम् ।
जपेद्यथाशक्ति शिवस्वरूपी भूत्वा तथाऽन्ते च शिवः स भूयात् ॥
अमुमेव मनुवरं मनुलक्षं हृल्लेखया अभितो निरुद्धम् ।
जप्त्वा नृपतरुसमिधां मधुरयुजां मनुसहस्रमपि जुहुयात् ॥ ६७

शक्तिपञ्चाक्षरविधानमाह—अमुमेवेति । क्राङादियुक्तेन षड्क्षरेण अङ्गानि । ऋष्यादिकं पूर्ववत् । ओं बीजम् । ह्रीं शक्तिः । अष्टाक्षरस्याऽप्येवमेव बीजशक्ती । पञ्चार्णोक्तान्यङ्गानि । इति क्राङादियोगबाधकं न भवति ॥ ६७—७२ ॥

वन्दे हरं वरदशूलकपालहस्तं
साभीतिमद्रिसुतयोज्ज्वलदेहकान्तिम् ।
वामोरुपीठगतया निजवामहस्त-
न्यस्तारुणोत्पलयुजा परिरब्धदेहम् ॥ ६८

आवृतिरङ्गैराद्या हृल्लेखाद्याभिरनु वृषाद्यैश्च ।
मात्राशेशैरुक्तं पञ्चावरणं विधानमीशस्य ॥ ६९

आप्यायिनी शशियुताऽप्यरुणाऽग्निमाया-
बिन्दून्तिका च नकुली भुवनेन्दुयुक्ता ।
दीर्घी कलायुतविषश्च शिवायवर्णाः
स्याच्छूलिनो मनुरयं वसुवर्णयोगी ॥ ७०

वामाङ्कन्यस्तवामेतरकरकमलायास्तथा वामबाहु-
न्यस्तारक्तोत्पलायाः स्तनविधृतलसद्वामबाहुः प्रियायाः ।
सर्वाकल्पाभिरामो धृतपरशुमृगेष्टः करैः काञ्चनाभो
ध्येयः पद्मासनस्थः स्मरललिततनुः सम्पदे पार्वतीशः ॥ ७१

पञ्चार्णोक्ताङ्गाद्यः पञ्चब्रह्मप्रदिष्टपूजश्च ।
वसुमितलक्षजपोऽयं मन्त्रस्तावत्सहस्रहोमश्च ॥ ७२

इति जपहुतपूजाध्यानकैरीशयाजी
प्रियतरचरितः स्यात् सर्वतो देहभाजाम् ।
धनविभवयशःश्रीसम्पदा दीर्घजीवी
तनुविपदि च शैवं तत्परं धाम भूयात् ॥ ७३

इति श्रीप्रपञ्चसारे सप्तविंशः पटलः ।

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
सप्तविंशः पटलः ।

अष्टाविंशः पटलः ।

अथ प्रवक्ष्यते मन्त्रो दक्षिणामूर्तिसंज्ञितः ।
जपतामिष्टसंसिद्धिविधानसुरपादपः ॥ १
अद्रिः क्षिणा कालकर्णकामिकायुग्रयेक्षराः ।
तुर्य्यामध्यगताः स्युर्भ्यं वटमूलनिवासिने ॥ २
नैधात्रनिरताङ्गाय नमो रुद्राय शम्भवे ।
तारशक्तिनिरुद्धोऽयं मन्त्रः षट्त्रिंशदक्षरः ॥ ३
शुकः प्रोक्तो मुनिश्छन्दोऽप्यनुष्टुप् समुदाहृतम् ।
दक्षिणामूर्तिरुद्रोऽस्य देवता समुदाहृता ॥ ४
तारशक्त्यादिकैर्ङाद्यन्तैर्मन्त्राक्षरैः क्रमात् ।
ऋत्वक्षिवसुवस्वग्निगुणवर्णैर्विभागशः ।
मन्त्री कुर्यात् षड्ङ्गानि जातियुक्ति समाहितः ॥ ५
कालिकश्रुतिदृग्गण्डद्वयनासास्यके दश ।
दोःसन्धिकण्ठाननहृन्नाभिकट्यन्त्रुषु क्रमात् ॥ ६
पत्सन्धिषु पुनर्द्वाभ्यां मन्त्रविट्व्यापकं न्यसेत् ।
एवं न्यस्तशरीरोऽथ चिन्तयेन्मन्त्रदेवताम् ॥ ७
मुद्रां भद्रार्थदात्रीं सपरशुहरिणां बाहुभिर्बाहुमेकं
जान्वासक्तं दधानो भुजगवरसमाबद्धकक्षो वटाधः ।
आसीनश्चन्द्रखण्डप्रतिघटितजटः क्षीरगौरस्त्रिनेत्रो
दद्यादाद्यैः शुकाद्यैर्मुनिभिरभिवृतो भावशुद्धिं भवो वः ॥ ८

एवं पञ्चवक्त्रस्य शिवस्य मन्त्रानभिधाय दक्षिणवक्त्रप्रधानं सौम्यमन्त्रमाह— अथ प्रवक्ष्यत इति। इष्टेति। विनियोग उक्तः। ओं बीजम्। ह्रीं शक्तिः। मन्त्री कुर्यादिति। सर्वज्ञादियोग उक्तः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

द्वाभ्यां मन्त्रविदिति। प्रणवशक्त्योः सर्वत्र योगं जानन्नित्यर्थः [आद्यन्त-प्रणवशक्त्योरेकत्वं जानन्नित्यर्थ इति पदार्थादर्शीकृतपाठः] ॥ ६ ॥ ७ ॥

ध्यानमाह— मुद्रामिति ॥ ८ ॥

प्राक्प्रोक्तविधानेन च सम्यक् संपूज्य साधु कलशाद्यैः ।
कृतसंदीक्षो मन्त्री जप्यादेनं मनुं समाहितधीः ॥ ९
द्वात्रिंशदयुतमानं प्रतिजप्य जुहोतु तद्दशांशमितैः ।
दुग्धाप्लुतैस्तिलैर्वा साज्येन पयोऽम्बसा द्वयेनाऽपि ॥ १०
जप्त्वैवं मन्त्रमेनं दिनमनु गिरिशं पूजयित्वा च हुत्वा
स्तुत्वा नत्वा मनोवाक्तनुभिरवहितः प्राप्य कामानशेषान् ।
व्याख्याता चागमानां भुवि कविषु वरः साधु वेदान्तवेदी
वादीट् सोऽद्वैतविद्याफलममलतरं याति शैवं पदं तत् ॥ ११
जीवशिखिकर्णरेफान् प्रतिवीक्ष्य प्रादिकांश्च पुनरपि तान् ।
मेधाप्यायिनियान्तांस्तानेव तरान्तिकान् सतनुरूपान् ॥ १२
आभाष्य चटप्रचटौ सकहवमौ बन्धघातयौ वीक्ष्य ।
प्रोक्त्वा वर्मास्त्रावधि समुद्धरेच्छक्तिपूर्वकं मन्त्रम् ॥ १३
ऋषिरस्याऽघोराख्यः संप्रोक्तस्त्रिष्टुबुच्यते च्छन्दः ।
रुद्रोऽप्यघोरपूर्वः संप्रोक्ता देवताऽस्य मनोः ॥ १४
हृत् पञ्चभिस्तदर्णैः शिरोऽपि षड्भिः शिखा तथा दशभिः ।
तावद्भिरेव कवचं दृगष्टभिर्द्वादशभिरपि चाऽस्त्रम् ॥ १५
कदृगास्यकण्ठहृन्नाभ्यन्धूरुषु जानुजङ्घयोः पदयोः ।
एकादशधा भिन्नैर्मन्त्रार्णैर्न्यसतु विग्रहे मन्त्री ॥ १६
पञ्चभिरथो सषड्भिर्द्वाभ्यामप्यष्टभिश्चतुर्भिश्च ।
षड्भिश्चतुस्त्रयेण च षड्भिर्द्वाभ्याञ्च भेदितैः क्रमशः ॥ १७
कालाभ्राभः कराग्रैः परशुडमरुकौ खड्गखेटौ च बाणे-
ष्वासौ शूलं कपालं दधदतिभयदो भीषणास्यस्त्रिनेत्रः ।

कृतसंदीक्षो मन्त्रीति । शक्त्यनन्तरं पञ्चाक्षरयोग उक्तः [न्यासमन्त्रादौ प्रणवशक्तियोग उक्त इति पदार्थादर्शोद्धृतपाठः] ॥ ८ ॥

द्वयेनाऽपीत्यपिर्वार्थः ॥ १० ॥ ११ ॥

दक्षिणवक्त्रप्रधानमेवाग्नेयं मन्त्रमाह—जीवेति ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

विग्रहे मन्त्रीति । न्यासमन्त्रेषु प्रणवशक्त्यादियोगार्थः । हुं बीजम् । क्रीं शक्तिः ॥ १६॥१७॥१८॥१९॥२० ॥

रक्ताकाराम्बरोऽहिप्रवरघटितगात्रोऽरिनागग्रहादीन्
खादन्निष्टार्थदायी भवदनभिमतोच्छित्तये स्यादघोरः ॥ १८
स्वच्छो मुमुक्षोस्तु भवेदघोरः काम्यक्रियायामपि रक्तवर्णः ।
कृष्णोऽभिचारे ग्रहवैकृते च प्रोक्तो जपः स्यादपि लक्षमानः ॥ १९
घृतावसिक्तैस्तिलतण्डुलैश्च जपावसाने जुहुयाद्दशांशम् ।
घृतप्लुतैर्वाऽथ हविर्भिरेव तावत्प्रजुह्वन् समुपैति कामान् ॥ २०
हृल्लेखास्थितसाध्याक्षरविलसत्कर्णिकं कलावीतम् ।
वर्गाष्टकान्तकेसरमन्त्ये सहलक्षयाक्षरोल्लसितम् ॥ २१
मन्त्राक्षरक्षयोद्यद्दलमध्यदलाग्रकञ्च तद्बाह्ये ।
वह्निपुटास्त्रिसमाश्रितकवचास्त्रं प्रतिविलिख्य यन्त्रमिदम् ॥ २२
कृत्वा समाप्य मण्डलमत्र विनिःक्षिप्य पूरयेत् कलशम् ।
पीठे पिनाकपाणेर्गव्यैर्वा क्वाथकृप्ततोयैर्वा ॥ २३
अङ्गावृतेरनु च हेतिभिरीरिताभिः
पश्चात्त मातृभिरथाऽपि दिशाधिनाथैः ।
संपूजयीत विधिनेति षड्क्षरोत्थ-
मार्गेण वा मनुपरिस्फुरणाय मन्त्री ॥ २४
आज्यापामार्गसमित्तिलसर्षपपायसाज्यकैश्च पृथक् ।
रात्रौ सहस्रहोमाद्भूतापस्मारादिशान्तिरुद्दिष्टा ॥ २५
सितकिंशुकनिर्गुण्डीकनकापामार्गजन्मनां समिधाम् ।
पृथगपि सहस्रहोमान्निग्रहमोक्षोऽचिराद्ग्रहाणां स्यात् ॥ २६

पूजायन्त्रमाह—हृल्लेखेति । साध्याक्षरमिति । साधकाद्यक्षरस्योपलक्षणम् । कलावीतमिति । स्वरवेष्टितमध्यबीजमित्यर्थः । अन्त्ये सहलक्षयाक्षरोल्लसितमिति । अन्त्ये दले सहलक्षयाक्षरोल्लसितम् । क्षयाक्षरं क्षकारः । उक्तं हि भुवनं कषत इति । स एव लकारेण सह वर्तत इति सहलक्षयाक्षरं तेनोल्लसितमित्यर्थः । अथवा हकारलकाराभ्यां सह वर्तमानं क्षकारं तेनाऽन्त्येन उल्लसितमित्यन्त्यदलेऽक्षर-त्रयलेखनमनेन दर्शितम् । समाप्य मण्डलमिति । वृत्तराश्यादिकं बहिः कल्पयित्वेत्यर्थः ॥ २१ ॥ २२ ॥ २३ ॥

परिस्फुरणं सिद्धिः । मन्त्रीति । प्रणवशक्तिपुटितत्वमुक्तम् ॥ २४॥२५॥२६ ॥

गव्यान्नैर्जुहुयात् पृथग्दशशतं मन्त्री मयूरेध्मकै-
र्भूयस्तैश्चतुरङ्गुलैश्च शिवपञ्चम्यां निशायां हुनेत् ।
सर्पिर्मार्गसपञ्चगव्यचरुभिः सर्पिः ससंपातकं
हुत्वा तत् प्रतिभोजयेत् प्रतिशमं यान्त्येव सर्वे ग्रहाः ॥ २७
षट्कोणे कर्णिकायां स्फुरद्युगलयुतां साध्यगर्भाञ्च शक्तिं
कोणाग्रे प्रस्फुरद्बिन्दुकमथ विलिखेन्मन्त्रवर्णान् दलेषु ।
षड्वेदद्वन्द्वषड्वेदकचतुर्युगषट्संख्यकान् बाह्यषट्के
वर्मास्त्राणां तदेतद् ग्रहगदभयहृद् यन्त्रमाघोरमाहुः ॥ २८
न च रिपवो न च रोगा न ग्रहपीड़ा न शस्त्रबाधा च ।
न च्वेलरुजो मर्त्यान् स्पृशन्त्यघोरास्त्रमन्त्रजापरतान् ॥ २९
तस्मादघोरास्त्रमनुं प्रजप्यात् समर्चयेत्तद्विहितं विधानम् ।
हुनेच्च तेनैव समस्तवाञ्छासंसिद्धये चाऽथ विमुक्तये च ॥ ३०

खसप्तमः कर्णयुतोऽर्धचन्द्रवान्
कुपञ्चमो द्वीन्दुयुतो ध्रुवादिकः ।
मनुस्त्वयं मृत्युजयात्मकः स्फुटं
समीरितः साधकरक्षणक्षमः ॥ ३१

ऋषिरस्य कहोलाख्यश्छन्दो देव्यादिका च गायत्री ।
स्याद्देवता च मृत्युञ्जयरुद्रोऽङ्गान्यथाचरेद् भृगुणा ॥ ३२

पुटितनलिनसंस्थं मौलिबद्धेन्दुरेखा-
गलदमृतजलार्द्रं चन्द्रवह्न्यर्कनेत्रम् ।
स्वकरकलितमुद्रापाशवेदाक्षमालं
स्फटिकरजतमुक्तागौरमीशं नमामि ॥ ३३

मन्त्री मयूरेति । शक्त्यनन्तरं चिन्तामणियोग उक्तः ॥ २७॥२८॥२९॥३० ॥

शिवस्यैवोर्ध्ववक्त्रप्रधानं मन्त्रवर्यमाह—खसप्तम इति ॥ ३१ ॥

अङ्गान्यथाचरेत् भृगुणेति । नाभिहृद्भ्रूमध्येषु अक्षरन्यासानन्तरं दीर्घ-स्वरयुतेन भृगुणा अङ्गान्याचरेदित्यर्थः । जूं बीजम् । सः शक्तिः ॥ ३२ ॥

स्फटिकरजतमुक्तावर्णमिति । एकैकाक्षरप्रधानेषु वक्ष्यमाणेषु ध्यानेष्वपि वर्णविशेष उक्तः ॥ ३३ ॥

जप्तव्योऽयं मन्त्रवर्यस्त्रिलक्षं दीक्षापूर्वं होमकृत् स्याद्दशांशैः ।
दुग्धाज्याक्तैः शुद्धखण्डैर्गुडूच्या गुर्वादेशात् साधको हव्यवाहे ॥ ३४
अर्चा कार्या नित्यशः शैवपीठे स्यादप्यङ्गैर्लोकपालैस्तदस्त्रैः ।
सम्यक् पूजावस्तुभिर्मन्त्रजापी प्रोक्तं ह्येतन्मृत्युजेतुर्विधानम् ॥ ३५
इति जपहुतार्चनादिभिः सिद्धो मन्त्रोक्तमूर्तिविहिततनुः ।
समाचरेन्निजान्तर्योगं कृत्यापमृत्युनाशकरम् ॥ ३६
तारनालमथ मध्यपत्रकं हाद्यकर्णिकयुतं क्रमोत्क्रमात् ।
चिन्तयेन्नियतमन्तरा शिवं नीरुजे च नियतायुषेऽञ्जयोः ॥ ३७
ऊर्ध्वाधः प्रोतपद्मद्वयदलनिचितैरक्षरैस्तैर्ध्रुवाद्यै-
राद्यन्तैर्मन्दमन्दप्रतिगलितसुधापूरसंसिच्यमानम् ।

गुर्वादेशादिति । द्रव्यदेवतैक्यज्ञत्वमुक्तम् ॥ ३४ ॥

सम्यक् पूजा वस्तुभिरिति । अमृतमयैरित्यर्थः । मन्त्रजापीति । मन्त्राज्ञाता मन्त्रे वीता च । मन्त्रजापीत्यनेनाऽर्चां विशिनष्टि । शिवपदादाविर्भूय तत्रैव विलीनया माययाऽमृतमय्याऽर्चा कार्येत्यर्थः । वक्ष्यमाणमन्त्रेणाऽर्चा कार्येति भावः ॥ ३५ ॥

मन्त्रोक्तमूर्तिविहिततनुरिति । मन्त्रगतत्तदक्षरानुगतङ्खस्वरपञ्चकेन सार्धम् उक्तैरीशानादिमूर्तिभिर्विहिततनुरिति । प्रणवादिप्रधानयोगेषु न्यासविशेषाः कथिताः । तत्र प्रणवप्रधानयोगे ओं एं उं इं अं इति बीजैः सार्धमीशानादिमूर्तिभिः सूक्तवक्त्रन्यासं कुर्यात् । वोमित्यादिभिः सार्धं वा । इतरयोस्तु योगयोर्ज्ञौं सोमित्यादिभिः सार्धं न्यासः कार्यः । सर्वैः सार्धं समष्टिमूर्तेरित्यर्थसिद्धमेतत् ॥ ३६ ॥

प्रणवप्रधानं योगमाह—तारेति । क्रमोत्क्रमादिति । ऊर्ध्वाधोमुखपद्मद्वयं क्रमोत्क्रममन्त्रात्मकं चिन्तनीयमित्युक्तम् । चिन्तयेन्नियतमन्तरा शिवमिति । नियतमन्तरा नियतस्य नित्यस्य मायाबीजस्याऽनुलोमविलोममन्त्रमध्यस्थितस्य अन्तरा मध्ये शिवं पञ्चाक्षरमित्यर्थः । ततो ध्यानार्थमौं नमः शिवाय ईमिति मन्त्रः सूचितः अनुलोमविलोममध्ये । अत्र च शिवः स्फटिकनिभः स्त्रीरूपो वीणावादनपरो ध्येयः ॥ ३७ ॥

अस्मिन्नेव योगे मन्त्रान्तरं शिववाचकमाह—ऊर्ध्वाध इति । पूर्ववत् पद्मद्वयं सङ्कल्प्य दलेष्वपि अक्षरत्रयं लेख्यमित्याह—दलनिचितैरक्षरैरिति । स्वरविशिष्टा-

ईशानं सूक्ष्मरूपं विमलतरसुषुम्नान्तरा सन्निषण्णं
ध्यायन्नाप्नोति रोगैर्नियतपरिहृतस्तज्जपाद्दीर्घमायुः ॥ ३८
आदौ तारं विलिखतु ससाध्याह्वयं कर्णिकायां
दिक्पत्रेष्वप्यपरमपरं वाऽपि तत्कोणकेषु ।
भूयो भूमेः परमनु मृगाङ्कं तदस्रेषु टान्तं
जप्त्वा बन्धग्रहगदविषध्वंसि यन्त्रं तदेतत् ॥ ३९
इति कृतयन्त्रविभूषितमण्डलमध्ये निधाय कलशमपि ।
आपूर्य चाऽभिषिञ्चेच्छ्रीवश्यकरं ग्रहाभिचारहरम् ॥ ४०
ततश्छिन्नोद्भवानाञ्च समिद्भिश्चतुरङ्गुलैः ।
दुग्धसिक्तैः समिद्धेऽग्नौ षट्सहस्रद्वयं हुनेत् ॥ ४१
यस्तु वह्नौ जुहोत्येवं यावत्संख्येन साधकः ।
तावत्संख्यैः सुधाकुम्भैरग्निः प्रीणाति शङ्करम् ॥ ४२
आप्यायितोऽग्निना शर्वः साधकस्येप्सितान् वरान् ।
प्रदद्यादायुराद्यांश्च दुरन्तान् प्रलयान्तिकान् ॥ ४३
मन्त्रान्ते साध्याख्यां पालययुगलं प्रतीपमपि मन्त्रम् ।
प्रोक्त्वा समापयेन्मनुमयमपि मृत्युञ्जयाह्वयो मन्त्रः ॥ ४४

नामचराणां लेखनं कर्तव्यमित्याह—आद्यन्तैरिति । अ आ इत्यादयः अन्ते येषामचराणां तान्याद्यन्तानि तैरित्यर्थः । तस्मात् प्रणवसम्बन्धिभिः स्वरैः केसरस्थाने संवेष्य जकारसम्बन्धिभिः स्वरैः दलमध्ये वेष्टयित्वा सकारसम्बन्धिभिः स्वरैः दलाग्रे वेष्टयेदित्यर्थः । पूर्वोक्तपद्मेऽपि समानमेतत् वेष्टनत्रयम् । ईशानं सूक्ष्मरूपमिति मन्त्रविशेषमाह । इकारः सूक्ष्मशब्दार्थः । ततः इं ईशानाय नमः इं इति मन्त्रः सिद्धः अनुलोमविलोममध्ये । अत्र तु शिवो वीणावादनपरो ध्येयः ॥ ३८ ॥

बाह्यप्रयोगाङ्गं यन्त्रमाह—आदौ तारमिति ॥ ३९ ॥ ४० ॥ ४१ ॥

होमकाले प्रतिपत्तिमाह—तावत्संख्यैरिति ॥ ४२ ॥ ४३ ॥

मध्यबीजप्रधानमान्तरं योगमाह—मन्त्रान्त इति । मन्त्रमपि प्रोक्त्वा प्रतीपं प्रतिलोमं समापयेदित्यन्वयः । पालयेत्यस्याऽन्ते ज्वीं नमः शिवाय ज्वीमित्येतन्मन्त्रमुक्त्वा प्रतिलोममुच्चरेदित्यर्थः । रजतवर्णा मुद्रापुस्तकधरा देव्यत्र

अथवाऽमलकमलपुटान्तरितं शिशुवेशभूषणं रुद्रम् ।
ध्यात्वा जप्याद् यथावद् भूतक्लृप्ता मृत्युनाशनं दृष्टम् ॥ ४५
चतुरङ्गुलिपरिमाणैरमृताखण्डैरथाऽर्कसाहस्रम् ।
जुहुयाच्च दुग्धसिक्तैरारोग्यायाऽऽयुषे च लक्ष्म्यै च ॥ ४६
अमृता वटतिलदूर्वाः पयो घृतं पायसं क्रमेणेति ।
सप्तद्रव्याण्युक्तान्येतैर्जुहुयात् पृथक् सहस्रतयम् ॥ ४७
तीव्रे ज्वरे घोरतरेऽभिचारे सोन्मादके दाहगदे च मोहे ।
तनोति शान्तिं न चिरेण होमः सञ्जीवनं चाऽब्दशतप्रमाणम् ॥ ४८
सम्भोजयेद्धोमदिनेषु विप्रान् सप्ताधिकान् स्वादुभिरन्नभोज्यैः ।
सतर्णका गाश्च हुतावसाने दद्याद् द्विजेभ्यो हुतकर्मकृद्भ्यः ॥ ४९
निजजन्मदिने शतं शतं यो जुहुयाद् द्रव्यवरैश्च सप्तसंख्यैः ।
मधुरैः प्रतिभोजयेच्च विप्रानभिवाञ्छन्नियमेन दीर्घमायुः ॥ ५०
अथवा सप्तभिरेतैर्द्रव्यैरेकेन वा सहस्रतयम् ।
जन्मर्क्षहोममात्रान्निरुपद्रवमुत्तमं व्रजेदायुः ॥ ५१
दूर्वात्रितयैर्जुहुयान्मन्त्रविदेकादशाहुतीर्दिनशः ।
जित्वाऽपमृत्युरोगान् प्रयात्यसावायुषश्च दैर्घ्यमपि ॥ ५२
जन्मर्क्षाणां त्रितये छिन्नाकाश्मर्यवकुलजैरिध्मैः ।
क्रमशो हुनेत् सहस्रं नश्यन्त्यपमृत्युरोगदुरितानि ॥ ५३

ध्येया । पुनः पूर्ववदक्षरत्रयविशिष्टषोड़शस्वरयुक्तं पद्मद्वयं सञ्चिन्त्य तन्मध्ये मुद्रापुस्तकधरं शिवं सञ्चिन्त्य पालयान्ते ज्वीं ईशानाय नमः ज्वीमिति जपित्वा प्रतिलोमं जपेदिति मध्यबीजयोगः ॥ ४४ ॥

तृतीयबीजप्रधानं योगादिकमाह—अथवेति । कमलद्वयं वर्णत्रयं स्वरविशिष्टमत्राप्यनुलोमविलोममन्त्रात्मकं द्रष्टव्यम् । स्त्रिं नमः शिवाय स्त्रीमिति देवीमन्त्रः । स्त्रिं ईशानाय नमः स्त्रीमिति देवमन्त्रः । तत्र त्रिवर्षं दिग्वाससं विचित्रकिङ्किण्याद्यलंकृतं वामहस्ते अर्धेन्दुधरं तमेव दक्षिणहस्तेन भक्षयन्तं मुक्तावर्णं देवं देवीं च ध्यायेत् । अर्धनारीश्वरो वा सर्वत्र ध्येय इति ॥ ४५ ॥ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

मन्त्रविदेकादशाहुतीरिति । पञ्चाक्षरयोग उक्तः ॥ ५२ ॥ ५३ ॥ ५४ ॥

सितसिद्धार्थैः सहस्राहुत्या नश्यन्त्युपद्रवा ज्वरजाः ।
तद्वदपामार्गहुतान्मृत्युञ्जयमप्यरोगतां लभते ॥ ५४
प्रोक्तैर्ध्यानजपार्चनाहुतविधानाद्यैश्च मृत्युञ्जयं
यो मन्त्री प्रभजेन्मनुं प्रतिदिनं प्रातः प्रसन्नाशयः ।
तस्येष्टानि भवन्ति संसृतिरपि स्फीता च पुत्रादयः
सम्पन्नाः सुसुखी च जीवति चिरं देहापदि स्याच्छिवः ॥ ५५

इति श्रीप्रपञ्चसारे अष्टाविंशः पटलः ।

प्रभजेद् यो मन्त्रीति । प्रणवान्ते शक्तिबीजयोग उक्तः ॥ ५५ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
अष्टाविंशः पटलः ।

एकोनत्रिंशः पटलः ।

अथ सजपहुताद्यो वक्ष्यते साधुचिन्ता-
मणिरभिमतकामप्राप्तिकल्पद्रुमोऽयम् ।
अनलकषमरेफप्राणसत्यान्तवाम-
श्रुतिहिमरुचिखण्डैर्मण्डितो मन्त्रराजः ॥ १
ऋषिरपि काश्यप उक्तश्छन्दोऽनुष्टुप् च देवतोमेशः ।
यान्तैः षड्भिर्वर्णैरङ्गं वा देवताऽर्धनारीशः ॥ २
अहिशशधरगङ्गाबद्धतुङ्गाग्रमौलि-
स्त्रिदशगणनताङ्घ्रिस्त्रीक्षणः स्त्रीविलासः ।
भुजगपरशुशूलान् खड्गवह्नी कपालं
शरमपि धनुरीशो बिभ्रदव्याच्चिरं वः ॥ ३
हावभावललितार्धनारिकं भीषणार्धमथवा महेश्वरम् ।
पाशसोत्पलकपालशूलिनं चिन्तयेज्जपविधौ विभूतये ॥ ४
अथवा षोड़शशूलव्यग्रभुजा त्रिनयनाहिनद्धाङ्गी ।
अरुणांशुकानुलेपनवर्णाभरणा च भगवती ध्येया ॥ ५
विहितार्चनविधिरथाऽनुदिनं प्रजपेद्दशायुतमितं मतिमान् ।
अयुतं हुनेत्त्रिमधुरार्द्रतरैस्तिलतण्डुलैस्तदवसानविधौ ॥ ६
शेवोक्तपीठाङ्गपदैर्यथावद् वृत्तेचदुर्गुर्नगसैर्मुखाद्यैः ।
समाप्तभिर्दिक्पतिभिर्महेशं पञ्चोपचारैर्विधिनाऽर्चयीत ॥ ७

ऊर्ध्ववक्त्रप्रधानमन्त्रानन्तरमुत्तरवक्त्रप्रधानं मन्त्रं वदन् विनियोगमाह—अथ सजपहुताद्य इति ॥ १ ॥ २ ॥

उमेशदेवतापक्षे ध्यानमाह—अहीति ॥ ३ ॥

अर्धनारीश्वरदेवतापक्षेऽप्याह—हावभावेति । पुरश्चरणे नित्यजपपूजादौ अर्धनारीश्वरध्यानं नियमयति—जपविधाविति ॥ ४ ॥

क्रूरप्रयोगे ध्यानमाह—अथवेति । रं बीजम् । औं शक्तिः ॥ ५ ॥

मतिमानिति । उन्मन्यन्तं व्याप्तचित्त इत्यर्थः ॥ ६ ॥

अङ्गपदैर्यथावदिति । सर्वत्रादियुक्तैरित्यर्थः । मुखाद्यैरिति । वृं वृषभाय

आरभ्यादिज्वलनं दिक्संस्थैरष्टभिर्मनोर्वर्णैः ।
आराधयेच्च मातृभिरिति संप्रोक्तः प्रयोगविधिरपरः ॥ ८

कात्पूर्वं हसलिपिसंयुतं जपादौ
जप्तॄणां प्रवरमितीह केचिदाहुः ।
प्रासादाद्ययुतजपेन मङ्क्षु कुर्या-
दावेशादिकमपि नीरुजाञ्च मन्त्रः ॥ ९

शिरसोऽवतरन्निशेशबिम्बस्थितमज्भिर्वृतमागलत्सुधार्द्रम् ।
अपमृत्युहरं विषज्वरापस्मृतिविभ्रान्तिशिरोरुजापहञ्च ॥ १०
निजवर्णविकीर्णकोणवैश्वानरगेहद्वितयावृतत्रिकोणम् ।
विगतस्वरवीतमुत्तमाङ्गे स्मृतमेतत् क्षपयेत् क्षणाद् ग्रहार्तिम् ॥ ११
वह्नेर्बिम्बे वह्निवत् प्रज्वलन्तं न्यस्त्वा बीजं मस्तके ग्रस्तजन्तोः ।
ध्यात्वाऽऽवेशं कारयेद्बन्धुजीवं तज्जप्तं वा सम्यगाघ्राणनेन ॥ १२
शुक्लादिः शुक्लभाः पौष्टिकशमनविधौ कृष्टिवश्येषु रक्तो
रक्तादिः क्षोभसंस्तोभनविधिषु हकारादिको हेमवर्णः ।
धूम्रोऽङ्गामर्दनोच्चाटनविधिषु समीरादिको मा[ऽदा]दिरुक्तः
पीताभः स्तम्भनादौ मनुरतिविमलो मुक्तिभाजामना[दा]दिः ॥ १३

कृष्णाभं प्राणगेहस्थितमथ नयने ध्यातमान्ध्यं विधत्ते
वाधिर्यं कर्णरन्ध्रेऽर्दितमपि वदने कुक्षिगं शूलमाशु ।
मर्मस्थाने समीरं सपदि शिरसि वा दुःसहं शीर्षरोगं
वायोर्धं कण्ठनालेऽवनिवृतमथ तन्मण्डले बीजमेतत् ॥ १४

नमः इत्यादिप्रकारेण मुखाक्षराद्यैरित्यर्थः । अथवा देवस्याऽग्रमारभ्य पूजयेदित्यर्थः ॥ ७ ॥

अर्धनारीश्वरध्यानपक्षे वृषभादिस्थान आवरणान्तरमाह—आरभ्येति ॥ ८ ॥

कात्पूर्वमिति । रेफं परित्यज्य तत्स्थाने इत्यर्थः । प्रासादादित्वमपि तथैव ॥ ८ ॥ १० ॥

निजवर्णविकीर्णेति । निजशब्देन वैश्वानरो मूलमन्त्रश्चोक्तः । अतः सर्वकोणेष्वग्निबीजं लिखित्वा तेषु बीजेषु मूलाक्षराणि षट्कोणपूर्वकोणमारभ्य लिखित्वा मध्यगताग्निबीजे बिन्दौ मूलं लिखित्वा तत्र वक्ष्यमाणक्रमेण मकार-

प्रालेयत्विषि च स्वराहृतमिदं नेत्रे स्मृतं तद्रुजं
योनौ वामदृशोऽस्रविस्रुतिमथो कुक्षौ च शूलं जयेत् ।
विस्फोटे सविषे ज्वरे तृषि तथा रक्तामये विभ्रमे
दाहे शीर्षगदे स्मरेद्विधिमिमं संतप्तये मन्त्रवित् ॥ १५

साध्याया हृदयकुशेशयोदरस्थं
प्राणाख्यं दृढमभिबध्य बीजवर्णैः ।
तेजस्तच्छिरसि विधुं विधाय वाते-
नाकर्षेदपि निजवाञ्छयैव मन्त्री ॥ १६

पारिभद्रसुमनोदलभद्रं वह्निबिम्बगतमक्षरमेतत् ।
संस्मरेच्छिरसि यस्य स वश्यो जायते न खलु तत्र विचारः ॥ १७
निजनामगर्भमथ बीजमिदं प्रविचिन्त्य योनिसुषिरे सुदृशः ।
वशयेत् क्षणाच्छिततया मनसः स्रवयेच्च शुक्रमथवा रुधिरम् ॥ १८
निजशिवशिरःश्रितं तद्बीजं स्मृत्वा प्रवेशयेद् योनौ ।
यस्यास्तत्सम्पर्कात्ताञ्च स्रवयेत् क्रमेण[क्षणेन] वशयेच्च ॥ १९
पररेफगर्भधृतसाध्यपदं त्रिकगं हुताशयुगषट्कवृतम् ।
विगतस्वराहृतमगारभुवि स्थितमेतदाशु वशयेद्रमणान् ॥ २०

सम्बन्धरेफोदरे साध्यं कोदरे मोदरे वा साधकं साधकांशे कर्म च विलिखेदिति सिद्धम् ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

संतप्तये मन्त्रविदिति । वकारयोगेऽन्ते पञ्चाक्षरयोगश्चोक्तः ॥ १५ ॥

वातेनेति । काकचञ्चुवातेनेत्यर्थः । निजवाञ्छयैव मन्त्रीति । मूलाधारगत-मन्त्राग्नौ साध्यप्रक्षेप उक्तः ॥ १६ ॥ १७ ॥

शिततया मनस इति । योनिस्थमन्त्ररज्ज्वावद्धस्य तस्या मनसः स्वलिङ्ग-निःसृतकुण्डलीशक्त्याकर्षणध्यानमुक्तम् । स्रवयेच्चेति । यस्य प्रतिबन्ध दृष्टः । शुक्रस्य रक्तस्य वा तदाश्रये पृथिवीबीजस्मरणं चिन्तयेत् । इतरत्राऽग्निबीजस्थं तत दृष्टं भवतीत्यर्थः ॥ १८ ॥

उभयोरपि सहचरणार्थमन्यमृतस्यप्रयोगान्तरमाह—निजशिवेति । त्रिकग-मिति । त्रिकोणगतमित्यर्थः । हुताशयुगात्मकं षट्कोणं हुताशयुगषट्कं तेन वृतमित्यर्थः । अत्राऽपि कोणेषु मन्त्राक्षरयोगो द्रष्टव्यः ॥ १८ ॥ २० ॥

मधुरत्रयसंयुतेन शालीरजसा पुत्तलिकां विधाय तेन ।
मनुना जुहुयात्तया[था] विभज्य त्रिदिनं यस्य कृते वशीभवेत् सः ॥

विषपावकोद्यदभिधानगदं ठगतं कुकोणध्व[यु]तलाङ्गलिकम् ।
अहिपत्रकृष्णपरिजप्तमिदं शिरसो रुजं प्रशमयेद्दनात् ॥ २२

कण्ठे केनाऽवरुद्धाऽर्पितदहनयुजा मज्जया मेन वामं
दत्तं संवेष्ट्य वक्षोरुहमनलसमीरौभिरंसद्वयञ्च ।
वक्त्रे नाभौ च दीर्घं सुमतिरथ विनिःक्षिप्य बिन्दुं निशेशं
वक्षस्याधाय बद्ध्वा चिरमिव विहरेत् कन्दुकैरात्मसाध्यैः ॥ २३

कृत्वा वक्त्रैः पुरमनु मनुं बन्धुजीवेन तस्मि-
न्नाधायाऽग्निं विधिवदभिसंपूज्य चाऽऽज्यैः शताख्यम् ।
वैलोहाख्ये प्रतिविहितसंपातमष्टोत्तरं त-
द्धुत्वा जप्तं दुरितविषवेतालभूतादिहारि ॥ २४

साध्याख्यागर्भमेनं लिख दहनपुरे कर्णिकायां षड़स्रं
बाह्यास्रिष्वङ्गमन्त्रान् दलमनु परितो बीजवर्णान् विभज्य ।
भूयोऽचः कादियादौस्त्रिषु वृतिषु कुगेहास्त्रके नारसिंहं
तस्मिन् कार्यो यथावत्कलशविधिरयं सर्वरक्षाकरः स्यात् ॥ २५

तया विभज्येति । सव्यपाद सव्यपार्श्वं सव्यहस्त शिरो दक्षिणहस्त दक्षिणपार्श्व-दक्षिणपादैर्जुहुयात् स्त्रीवश्ये । पुरुषवश्ये तु विपरीतमित्यर्थः ॥ २१ ॥

विषपावको मकारसम्बद्धो रेफः तस्मिन् उद्भूतेन साध्यसाधकाभिधानेन गदेन च संयुक्तमित्यर्थः ॥ २२ ॥

सुमतिरिति । बिन्दुलक्षणेन निशेशेन तस्य जीवं रक्षन्निक्षिप्येत्युक्तम् । [वश्यकरं प्रयोगमाह—कण्ठं केनेति । साध्यस्य कण्ठं रेफसहितककारेण बद्ध्वा मज्जया षकारेण मेन मकारेण च वामदक्षिणहस्तौ संवेष्ट्य अनलसमीरौभिः रेफयकारचतुर्दशस्वरैः अंसद्वयं वक्त्रं च बद्ध्वा ऊकारेण दीर्घरूपेण नाभिं बद्ध्वा सुमतिः बिन्दुलक्षणेन निशेशेन तस्य जीवं वक्षसि निक्षिप्य गृहीत्वा वश्यैः क्रीडासाधनैरिव विहरेदित्यर्थः । इति सम्बन्धदीपिकाकारः] ॥ २३ ॥

कृत्वा वक्त्रैः पुरमिति । बन्धुजीवपुष्परसेन भूमिं विलिप्य तत्र तद्रसेन तत्पुष्पेण त्रिकोणं लिखित्वा तन्मध्ये मन्त्रं च विलिख्य अग्न्याधानादिकं कुर्यादित्यर्थः । अत्र लोहत्रयमपि मूलाक्षरसंख्यं ग्राह्यम् ॥ २४ ॥ २५ ॥

टान्ते लिख्यात् कलाभिर्वृतमनुमनलावासयुग्मेन वह्नि-
द्योतत्कोणेन बाह्ये तदनु सवितृबिम्बेन कादार्णभाजा ।
तद्बाह्ये क्ष्मापुराभ्यां लिखितनृहरियुक्तास्त्रकाभ्यां तदेतद्
यन्त्रं रक्षाकरं स्याद् ग्रहभयविषमच्छेलजूर्त्यादिरोगे ॥ २६
बिम्बद्वन्द्वे कृशानोर्विलिखतु मनु[णि]मेनं ससाध्यं तदस्रि-
ष्वग्न्यादीन् व्यञ्जनार्णान् स्वरयुगलमथो सन्धिषट्के यथावत् ।
तारावीतञ्च बाह्ये कुरुहपरिवृतं गोमयाब्रोचनाभ्यां
लाक्षावद्धं निबध्याज्जपमहितमिदं साधु साध्योत्तमाङ्गे ॥ २७
लक्ष्म्यायुःपुष्टिकरं परञ्च सौभाग्यवश्यकृत् सततम् ।
चोरव्यालमहोरगभूतापस्मारहारि यन्त्रमिदम् ॥ २८
साध्याख्याकर्मयुक्तं दहनपुरयुगे मन्त्रमेनं तदस्रि-
ष्वग्निज्वालाश्च बाह्ये विषतरुविटपे साग्रशाखे लिखित्वा ।
जप्त्वाऽष्टोर्ध्वं सहस्रं नृहरिकृतधिया स्थापयेत् तत्र शत्रु-
व्याघ्रादिक्रोड़चोरादिभिरपि च पिशाचादयो न व्रजन्ति ॥ २९

ससिद्धसुरपूजितः सकलवर्गसंसाधको
ग्रहज्वरविषापहो विविधकामकल्पद्रुमः ।
किमत्र बहुना नृणामभिमतार्थचिन्तामणिः
समुक्त इह संग्रहान्मनुवरस्तु चिन्तामणिः ॥ ३०
षष्ठस्वरो हुतवहस्तययोस्तुरीया-
वादिस्वरो मनुरयं कथितः फड़न्तः ।
अस्य त्रिको निगदितो मुनिरप्यनुष्टुप्
छन्दश्च चण्डसहितो मनुदेवतेशः ॥ ३१

रक्षाकरं यन्त्रमाह—टान्त इति ॥ २६ ॥

बिम्बद्वन्द्व इति । बिम्बद्वन्द्वमध्य इत्यर्थः । तदस्रिष्वन्तरालेषु । यथावदिति । आवूकारेण सार्धमित्यर्थः । कुरुहे च नृसिंहबीजं लिखितव्यम् ॥ २७॥२८ ॥

दहनपुरयुगे युगमध्य इत्यर्थः । तदस्रिष्वन्तरालेषु चैनं पूर्ववल्लिखित्वा नेमिबाह्येऽग्निज्वालाश्च लिखेदित्यर्थः ॥ २९ ॥ ३० ॥

महेश्वरस्य मन्त्रानभिधाय चण्डेश्वरस्य मन्त्रमाह—षष्ठेति । चं बीजम् ।

दीप्तज्वलज्ज्वालिनिभिस्तटेन च हृनेन च ।
सर्वज्वालिनिसंयुक्तैः फड़न्तैरङ्गमारभेत् ॥ ३२
अव्यात् कपर्दकलितेन्दुकलः करात्त-
शूलाक्षसूत्रकककमण्डलुटङ्क ईशः ।
रक्ताभ्र[भ]वर्णवसनोऽरुणपङ्कजस्थो
नेत्रत्रयोल्लसितवक्त्रसरोरुहो वः ॥ ३३
कृतसंदीप्तो मन्त्री जप्याल्लक्षत्रयञ्च मन्त्रमिमम् ।
जुहुयात्तिमधुरयुक्तैः सतिलैरपि तण्डुलैर्दशांशेन ॥ ३४
व्याघातसमिद्भिर्वा मनुजापी तावतीभिरथ जुहुयात् ।
पूर्वोक्त एव पीठे गन्धाद्यैरर्चयेच्च चण्डेशम् ॥ ३५
चण्डचण्डाय चेत्युक्त्वा प्रवदेद् विद्महेपदम् ।
चण्डेश्वराय च प्रोक्त्वा धीमहिपदमुच्चरेत् ॥ ३६
तन्नश्चण्ड इति प्रोक्त्वा ब्रूयाद् भूयः प्रचोदयात् ।
एषा तु चण्डगायत्री जपात् सान्निध्यकारिणी ॥ ३७
अङ्गैः समालभिर्मन्त्री लोकेशैः सम्प्रपूजयेत् ।
कूर्मो विष्णुयुतो दण्डी बीजमस्योच्यते बुधैः ॥ ३८
वदेच्चण्डेश्वरायेति बीजादिहृदयान्तिकम् ।
अर्चनादिष्विमं मन्त्रं यथावत् सम्प्रयोजयेत् ॥ ३९
एवं जपहुतार्चाभिः सिद्धे मन्त्रे तु मन्त्रिणः ।
वाञ्छितादधिकं लभ्येत् काञ्चनं नात्र संशयः ॥ ४०
त्र्यक्षरस्य जपो यावत्तावज्जप्यात् षड़क्षरम् ।
ऐहिकामुष्मिकीं सिद्धिं तथा हि लभते नरः ॥ ४१
कृत्वा पिष्टेन शाल्याः प्रतिकृतिमनलं चाऽपि काष्ठैश्चिताना-
माधायारभ्य पुंसस्त्रिमधुरलुलितं दक्षिणाङ्गुष्ठदेशात् ।

फट् शक्तिः ॥ ३१ ॥ ३२ ॥ ३३ ॥
मन्त्री जप्यादिति । प्रणवयोग उक्तः ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥
मन्त्री लोकेशैरिति । चण्डपार्षदायेति योगः सूचितः ॥ ३८ ॥
यथावदिति । प्रणवयोग उक्तः ॥ ३८॥४०॥४१॥४२॥४३॥४४॥४५॥४६ ॥

छित्वा छित्वाऽष्टयुक्तं शतमथ जुहुयाद् योषितो वामभागा-
द्विप्रादीनां चतुर्णां वशकरमनिशं मन्त्रमेतद्भुतान्तम् ॥ ४२
अनुदिनमष्टशतं यो जुहुयात् पुष्पैरनेन मन्त्रेण ।
सप्तदिनैः स तु लभते वाससद्वर्णसङ्काशम् ॥ ४३
अहरहरष्टशतं यो मन्त्रेणाऽनेन तर्पयेदीशम् ।
तस्य तु मासचतुष्कादर्वाक् सञ्जायते महालक्ष्मीः ॥ ४४
साध्यर्चाङ्घ्रिप्रचर्मणां सुमसृणां पिष्टैश्च लोणैः कृतां
छित्त्वा पुत्तलिकां प्रतिष्ठितचलां जप्त्वा च रात्रौ हुनेत् ।
सप्ताहं पुरुषोऽङ्गना यदि चिरं वश्यस्त्ववश्यं भवे-
दस्मिन् जन्मनि नाऽत्र चोद्यविषयो देहान्तरेऽसंशयः ॥ ४५

इति चण्डमन्त्रविहितं विधिवद्विधिमादरेण य इमं भजते ।
स तु वाञ्छितं पदमिहाप्य पुनः शिवरूपतामपि परत्र लभेत ॥

इति श्रीप्रपञ्चसारे एकोनत्रिंश पटलः ।

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
एकोनत्रिंशः पटलः ।

त्रिंशः पटलः ।

अथाऽखिलार्थानुगतैव शक्तिर्युक्ता चतुर्विंशतितत्त्वभेदैः ।
गायत्रिसंज्ञाऽप्यथ तद्विशेषान् सहप्रयोगान् कथयामि साङ्गान् ॥ १
ताराह्वयो व्याहृतयश्च सप्त गायत्रिमन्त्रः शिरसा समेतः ।
अन्वर्थकं मन्त्रमिमन्तु वेदसारं पुनर्वेदविदो वदन्ति ॥ २
जप्यः स्यादिह परलोकसिद्धिकामैर्मन्त्रोऽयं महितवरो द्विजैर्यथावत् ।
भूदेवा नरपतयस्तृतीयवर्णाः संप्रोक्ता द्विजवचनेन तेऽत्र भूयः ॥ ३
तेषां शुद्धकुलद्वयोत्थमहसामारभ्य तन्तुक्रियां
तारव्याहृतिसंयुता सहशिरो गायत्र्युपास्या परा ।
सन्ध्योपासनया जपेन च तथा स्वाध्यायभेदैरपि
प्राणायामविधानतो मतिमतां ध्यानैस्तथा नित्यशः ॥ ४

तान्त्रिकमन्त्रानन्तरं वैदिकमन्त्रान् वदन् वेदसाररूपिण्या गायत्र्या विधानं प्रथमतः प्रतिपादयन् तद्वाच्यदेवतायाः तत्त्वमाह—अथाऽखिलेति । अथ-शब्दस्तान्त्रिकानन्तर्यार्थः । अखिलार्थानुगता शक्तिरेव गायत्रीसंज्ञाऽपि भवेत् । अथ तद्विशेषानपि सहप्रयोगान् साङ्गान् प्रवदामीत्यन्वयः । त्रिसप्तव्याहृतिदश-द्वादशप्रणवशक्तिश्रीबीजादियुक्ता गायत्र्या विशेषशब्दार्थः । अखिलार्थानुगताया एकरूपिण्याः शक्तेः कथं चतुर्विंशत्यक्षरात्मकगायत्र्यात्मकत्वमित्याशङ्क्य शक्तेरपि चतुर्विंशतत्त्वात्मता चतुर्विंशतिसंख्यायोगादिति वदन् गायत्र्यक्षरैः सार्धं तत्त्वन्यासं सूचयति—युक्ता चतुर्विंशतितत्त्वभेदैरिति ॥ १ ॥

वदामीति प्रतिज्ञातं विशेषमाह—ताराह्वय इति । अन्वर्थकत्वं साधयति —वेदसारमिति ॥ २ ॥

जपादावधिकारनियममाह—जप्यः स्यादिति । यथावदिति उपनयनादि-पूर्वकमित्यर्थः । द्विजशब्देन रूढिमाश्रित्य न ब्राह्मणमात्रं गृह्यते इत्याह—भूदेवा इति ॥ ३ ॥

द्विजेष्वपि शूद्रानामेव अधिकार इत्याह—तेषामिति । शूद्रानामपि उपनीताना-मेवाऽधिकार इत्याह—आरभ्येति । उपासनप्रकारानाह—सन्ध्येति । सन्ध्योपा-सनादि प्रकारमुत्तरत्र वक्ष्यति ॥ ४ ॥

आदौ तारः प्रकृतिविकृतिप्रोत्थितोऽसौ च मूला-
धारादारादलिविरुतिराविश्य सौषुम्नमार्गम् ।
आद्यैः शान्तावधिभिरनुगो मात्रया सप्तभेदैः
शुद्धो मूर्धावधिपरिगतः शाश्वतोऽन्तर्बहिश्च ॥ ५

प्रकाशितादौ प्रणवप्रपञ्चता निगद्यते व्याहृतिसप्तकं पुनः ।
सभूर्भुवः स्वश्च महोजनस्तपःसमन्वितं सत्यमिति क्रमेण च ॥ ६

भूःपदाद्या व्याहृतयो भूःशब्दस्तदि वर्तते ।
तत्पदं सदिति प्रोक्तं सन्मात्रत्वात् तु भूरतः ॥ ७

अथ ध्यानार्थं सविशेषाया गायत्र्या अर्थं वदन् प्रणवस्याऽर्थं सानुभवसाधनमाह—आदाविति। आदौ भवो यस्तारः असौ प्रकृतिविकृतिप्रोत्थितः। प्रकृतिः निश्चला परावाग्रूपिणी परप्रणवात्मिका कुण्डलिनी शक्तिः। तस्या विकृतिर्विकारः पश्यन्त्यादिरूपः तद्रूपेण प्रोत्थितः अभिव्यक्तः। एवमुच्चारणात् पूर्वं पूर्णसंविदात्मना स्थितस्य परप्रणवस्य किञ्चिद् बहिर्मुखः सन् स्वातन्त्र्येच्छाज्ञानप्रयत्न शरीरस्पर्शतदन्तर्गत क्रियाज्ञानशक्तिरूप गुरुवक्त्र मनोन्मन्युन्मना समनाव्यापिनोस्पर्शशक्तिनादान्तनादावस्थाः प्राप्तस्य विशेषयत्नरूप निरोधिन्यात्मना ज्वालाप्रवाहशब्द भेदरूप कालबिन्दुबीजात्मना चोच्चारणसमये अभिव्यक्तस्य प्रणवस्य सुषुम्नाप्रवेशक्रमं दर्शयति तेन परानुभवप्रकारं दर्शयितुम्—असावित्यादिना। असावभिव्यक्तः प्रणवः। मूलाधारात् आमूलाधारम् उद्गतो य आरः। आ समन्तात् स्वप्रभया राति गच्छतीत्यारश्चिदग्निः ज्योतिर्लिङ्गाकारः तस्मादलिविरुतिः सन् सौषुम्नमार्गं प्रविश्य शाश्वतो भवतीत्यन्वयः। सौषुम्नमार्गं प्रविष्टे प्रणवे स्थानविशेषे वाचकरूपाकारादिसप्तभेदानुसन्धानं कर्तव्यमित्याह—आद्यैः शान्तावधिभिः सप्तभेदैरनुगत इति। वाचकभेदानुगतवद् वाच्यभेदानुगमोऽपि ध्यातव्य इत्याह—मात्रयेति। मात्रा कुण्डलिनी शक्तिः। तया च ब्रह्मविष्णुरुद्रेश्वरसदाशिवशक्तिपररूपिण्या अनुगत इत्यर्थः। उक्तवाच्यवाचकभेदे संहारेण शुद्धज्योतिर्मात्रप्रणवो ध्यातव्य इत्याह—शुद्ध इति। मूर्धशब्देन सर्वोत्कृष्टं द्वादशान्तस्थं तत्त्वमुच्यते। तत्पर्यन्तं व्यापिन्यादिद्वारेण गत्वा शाश्वतो भवति। अपरिच्छिन्नत्वेन शाश्वतत्वमुपपादयति—अन्तर्बहिश्चेति ॥ ५ ॥

एवं निर्विशेषब्रह्मार्थत्वं प्रणवस्योत्तमाधिकारिणां प्रदर्श्य मन्दानां सप्रपञ्चार्थमाह—प्रकाशितादाविति। तारादिभक्तान् त्रिगुणासत्यादावित्यक्षरार्थः ॥ ६ ॥

भूतत्वात् कारणत्वाच्च भुव:शब्दस्य सङ्गति: ।
सर्वस्य स्वीरणात् स्वात्मतया च स्वरितीरितम् ॥ ८
महत्त्वाच्च महस्त्वाच्च मह:शब्द: समीरित: ।
तदेव सर्वजनता तस्मात्तद्[त्तु]व्याहृतिर्जन: ॥ ९
तपो ज्ञानतया चैव तथा तापतया स्मृतम् ।
सत्यं परत्वादात्मत्वादनन्तज्ञानत: स्मृतम् ॥ १०
प्रणवस्य व्याहृतीनामत: सम्बन्ध उच्यते ।
अकारो भूरुकारस्तु भुवो मार्ण: स्वरीरित: ॥ ११

एवं प्रणवस्य सगुणं निर्गुणं चाऽर्थमभिधाय व्याहृतीनामर्थं वदन् भूरित्यस्यार्थमाह—भू:शब्दस्तदीति तत्पदार्थ इत्यर्थ: । भू:शब्दस्य कथं तत्र वृत्तिरिति तत्राह—तत्पदं सदिति । तदिति पदं यस्य ब्रह्मण: 'तत् सदेव सौम्य' 'ओं तत्सत्' इत्यादौ सदिति प्रोक्तम् । भूश्च सत्तार्थ: । अतस्तस्य तदर्थत्वं तत्पदत्वं संभवतीत्यर्थ: । अत: पूर्वोक्तस्य प्रणवार्थस्य सन्मात्रत्वात् भू:शब्देनापि तदेव लक्षणयोच्यते इत्याह—सन्मात्रत्वादिति । मन्दानां चादित्यानुगतं सदादिशब्दवाच्यं सगुणं ब्रह्म भू:शब्देन प्रतिपत्तव्यमिति उक्तम् ।

तुशब्देन भुव इत्यत्र भुइत्यस्य भूतात्मत्वं व इत्यस्य जगद्वमनात्मत्वं जगदुपादनात्मत्वं च स्वीकृत्याह—भूतत्वादिति । भूतत्वं नित्यसिद्धत्वं पारमार्थिकत्वं च । भुव:शब्दस्य संगतिरिति । प्रणवार्थेन लक्षणया मुख्यया वृत्त्या वा सम्बन्ध इत्यर्थ: । एवमुत्तरपदानामपि प्रणवार्थेनैव संगति: । स्व:शब्दस्य स्वर्गसुखात्मकत्वेनात्मार्थत्वं सुवहनार्थत्वं चादायाह—सर्वस्येति ॥ ७ ॥ ८ ॥

महत्त्वं त्रिविधं देशत: कालतो वस्तुतश्च । महस्त्वं चैतन्यं ज्योतिषि । इतरच्च तदेव इति ब्रह्मैवेत्यर्थ: । तस्मात्तद्व्याहृतिर्जन इति शब्दार्थयोरेकत्वमप्युक्तम् ॥ ९ ॥

तापतयेति । अज्ञानां संसारतापनिमित्तत्वादित्यर्थ: । आदित्यानुगते तु तत्सत्त्वं प्रसिद्धमेव । सत्यं परत्वादिति । अनृतेभ्य: परत्वादित्यर्थ: । तत् कथमित्याह—आत्मत्वादिति । तदपि कथमित्याह—अनन्तेति ॥ १० ॥

एवं केवलनिर्गुणनिष्ठानां केवलसगुणनिष्ठानां च प्रतिपत्तिप्रकारमभिधाय सगुणद्वारा निर्गुणपर्यन्तं गच्छतां प्रतिपत्तिप्रकारं वदन् प्रणवमात्राभि: व्याहृतीनां सम्बन्ध इत्याह—अकारो भूरिति । ब्रह्म विष्णु रुद्रेश्वर सदाशिव कारण साक्षि-

विन्दुर्महस्तथा नादो जनः शक्तिस्तपः स्मृतम् ।
शान्तं सत्यमिति प्रोक्तं यत् स्यात् परतरं पदम् ॥ १२
प्रणवस्य व्याहृतीनां गायत्रैक्यमथोच्यते ।
अत्रापि तत्पदं पूर्वं प्रोक्तं तदनु वर्ण्यते ॥ १३
तद्द्वितीयैकवचनमनेनाऽखिलवस्तुनः ।
सृष्ट्यादिकारणं तेजोरूपमादित्यमण्डले ॥ १४
अभिध्येयं सदानन्दं परं ब्रह्माऽभिधीयते ।
यत्तत्सवितुरित्युक्तं षष्ठ्येकवचनात्मकम् ॥ १५
धातोरिह विनिष्पन्नं प्राणिप्रसववाचकात् ।
सर्वासां प्राणिजातीनामिति प्रसवितुः सदा ॥ १६
वरेण्यं वरणीयत्वात् सेवनीयतया तथा ।
भजनीयतया सर्वैः प्रार्थनीयतया स्मृतम् ॥ १७

णोऽकाराद्यर्थभूताः व्याहृतिभिरपि ध्येया इत्यर्थः ॥ ११ ॥ १२ ॥

एवं बहिःप्रणवव्याहृतिपञ्चमभिधायाऽन्तःप्रणवव्याहृतिपञ्चमाश्रित्य प्रणवाद्यर्थकथनायोपक्रमते—प्रणवस्येति । प्रणवस्त्रिमात्रः । व्याहृतयश्च तिस्रः । तेषां गायत्रैक्यं ओं भूर्भुवःस्वस्तत्सवितुर्वरेण्यमिति प्रकारेण अथवा ओं अं भूः तत् सवितुर्वरेण्यम् ओं उं भुवः भर्गो देवस्य धीमहि ओं मं स्वः धियो यो नः प्रचोदयात् । इत्यैक्यं स्वरूपतोऽर्थतश्चोच्यत इति ।

अत्रापि तत्पदं पूर्वमिति । प्रथमपाद प्रथमव्याहृत्योरेकार्थत्वद्योतनायेति । अपिना ध्येयवाचकत्वेन द्वितीयैकवचनमुपपादयति—अनेनेति । आदित्यमण्डल इत्युपलक्षणम् । कारणमण्डलस्यापि ।

धियो य इत्यत्र यच्छब्देन चास्य सम्बन्ध इत्याह—यत्तदिति । द्वितीयं पादं व्याचष्टे—तत् सवितुरिति । षूङ् प्राणिप्रसव इति धातुः । इति प्रसवितुर्यस्मात् संकोचकं नास्ति तस्मात् सर्वप्रसविता परमेश्वरोऽस्यार्थः । इति तात्पर्यकथनमेतत् ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

परमपुरुषार्थरूपत्वात् वरणीयत्वम् । असेवितस्य वरणायोगात् । तदर्थं सेवनीयत्वमप्यस्त्यस्य । पूजाभिलक्षणभजनेन विना सेवायोगात् भजनीयत्वमप्यस्ति । प्रार्थनया विना पूजादिलक्षणभजनस्याप्ययोगात् तदर्थं सर्वैः प्रार्थनीयत्वमप्यस्त्यस्य ॥ १७ ॥

पूर्वस्याऽष्टाक्षरस्यैवं व्याहृतिर्भूरिति स्मृता ।
पापस्य भर्जनाद्भर्गो भक्तस्निग्धतया तथा ॥ १८
देवस्य दृष्टिदानादिगुणयुक्तस्य नित्यशः ।
प्रभूतेन प्रकाशेन दीप्यमानस्य वै तथा ॥ १९
ध्यै चिन्तायामतो धातोर्निष्पन्नं धीमहीत्यदः ।
निगमाद्येन दिव्येन विद्यारूपेण चक्षुषा ॥ २०
दृश्यो हिरण्मयो देव आदित्ये नित्यसंस्थितः ।
हीनतारहितं तेजो यथा स्यात् स हिरण्मयः ॥ २१
यः सूक्ष्मः सोऽहमित्येवं चिन्तयामः सदैव तु ।
द्वितीयाष्टाक्षरस्यैवं व्याहृतिर्भुव ईरिता ॥ २२
धियो बुद्धीर्मनोरस्य छान्दसत्वाद् य ईरितः ।
कृतश्च लिङ्गव्यत्यासः सूत्रात् सुप्तिङुपग्रहात् ॥ २३
यत् तु तेजो निरुपमं सर्ववेद[देव]मयात्मकम् ।
भजतां पापनाशस्य हेतुभूतमिहोच्यते ॥ २४

पूर्वस्याऽष्टाक्षरस्यैवमिति । एवमुक्तेन प्रकारेण यस्मात् सर्वजगत्कारणं सदात्मकं ब्रह्म प्रथमपादार्थः तस्मात्तस्य भूरित्येव व्याहृतिरीरितेत्यर्थः ।

भर्गश्चित्प्रकाशः । केन चिन्त्यत इति तदाह—निगमाद्येनेति । प्रथमं प्रणवेन संचिन्त्य पुनस्तदेव तदक्षरव्याहृतिपादैश्चिन्तनीयमित्यर्थः ॥ १८ ॥ १९ ॥ २० ॥

अथ 'य एषोऽन्तरादित्ये हिरण्मयः' इत्यादिश्रुतिमाश्रित्य ध्येयस्वरूपं ध्यानप्रकारं चाह—दृश्यो हिरण्मय इति । द्वितीयाष्टाक्षरस्यैवमिति । एवमुक्तेन प्रकारेण द्वितीयपादद्वितीयव्याहृत्योरेकार्थत्वात् तयोः संगतिर्योग्येत्यर्थः ॥२१॥२२॥

धियो यो न इति वक्तव्ये य इति वचनमनुपपन्नमिति तत्राहुः—छान्दसत्वादिति । छन्दसि तु लिङ्गव्यत्यासादिकं सम्भवतीत्यत्र प्रमाणमाह—कृतश्चेति । सुप्तिङुपग्रहलिङ्गनराणां कलहल स्वरकर्तृयङां च व्यत्ययमिच्छति शास्त्रकृदेषाम् सोऽपि च सिध्यति बाहुलकेन इति वचनादित्यर्थः ॥ २३ ॥

यच्छब्दार्थः क इति । भर्गशब्देनोक्तः प्रकाश इत्याह—यत्त्विति । निरुपममित्यनेन निर्गुणनिष्ठानां ध्येयं तेज इत्युक्तम् । सर्ववेदमयात्मकमिति । सगुणनिष्ठानां सर्ववेदमयः सूर्यः तदात्मकमित्यर्थः । भर्गपदार्थस्य विशेष्यत्वमितरेषं विशेषणत्वं च विवक्षन्नाह—पापनाशस्येति ॥ २४ ॥

न इति प्रोक्त आदेशः षष्ठ्यसौ युष्मदस्मदोः ।
तस्मादस्माकमित्यर्थः प्रार्थनायां प्रचोदयात् ॥ २५
तृतीयाष्टाक्षरस्याऽपि व्याहृतिः स्वरितीरिता ।
एवं दशपदान्यस्यास्त्रयश्चाऽष्टाक्षराः स्मृताः ॥ २६
षड्क्षराश्च चत्वारः स्युश्चतुर्विंशदक्षराः ।
इत्थंभूतं यदेतस्य देवस्य सवितुर्विभाः ॥ २७
वरेण्यं भजतां पापविनाशनकरं परम् ।
भर्गोऽस्माभिरभिध्यातं धियस्तन्नः प्रचोदयात् ॥ २८
उक्तैवमत्र गायत्री पुनस्तच्छिर उच्यते ।
आपो ज्योती रस इति सोमाग्न्योस्तेज उच्यते ॥ २९
तदात्मकं जगत् सर्वं रसस्तेजोद्वयं युतम् ।
अमृतं तदनाशित्वाद्बहुत्वाद्ब्रह्म उच्यते ॥ ३०
यदानन्दात्मकं ब्रह्म सत्यज्ञानादिलक्षणम् ।
तद्भूर्भुवः स्वरित्युक्तं सोऽहमित्योमुदाहृतम् ॥ ३१
एतत् तु वेदसारस्य शिरस्त्वाच्छिर उच्यते ।
लक्षणैरिति निर्दिष्टे वेदसारे सुनिष्ठितः ॥ ३२
फलार्थी फलमाप्नोति मुमुक्षुर्मोक्षमृच्छति ।
उषस्युषसि चोत्थाय कृतशौचविधिर्द्विजः ॥ ३३

न इति षष्ठी । बहुवचनस्यादेशत्वात् षष्ठीबहुवचनमेवेत्याह—न इति । तस्य तदादेशे प्रमाणमाह—युष्मदस्मदोरिति । युष्मदस्मदोः षष्ठी । चतुर्थीद्वितीयार्थयोर्बहुवचनस्य वस्नसौ इत्येतावादेशौ भवतः । पदसंख्याकथनेन पदतत्त्वन्यासः सूचितः । पदाक्षरसंख्याकथनेन भूमिमन्तरिक्षं द्यौरित्यष्टावक्षराणीत्युक्तमुपासनं सूचितम् । चतुष्पात्त्वकथनेन 'पादोऽस्य विश्वा भूतानि' इत्युक्तं चिन्तनं सूचितम् । चतुर्विंशाक्षरत्वकथनेन चतुर्विंशतितत्त्वात्मनोपासनमुक्तम् ॥ २५ ॥ २६ ॥ २७ ॥

उक्तमर्थं संक्षिप्याह—इत्थमिति । सोमाग्निशब्दाभ्यां प्रकृतिपुरुषावुच्येते । न केवलं कारणमात्रमुच्यते किन्तु कारणात्मकं जगदप्युच्यते इत्याह—तदात्मकं जगदिति । रसशब्दार्थमाह—रस इति ॥ २७॥२८॥२९॥३०॥३१॥३२ ॥

वेदसारे सुनिष्ठित इत्युक्तां निष्ठां साङ्गमाह—उषस्युषसीति ॥ ३२—३९ ॥

दन्तानां धावनञ्चैव जिह्वानिर्लेखनादिकम् ।
कृत्वा स्नात्वा समाचम्य मन्त्रपूतेन वारिणा ॥ ३४
आपोहिष्ठामयाद्याभिर्ऋग्भिस्तिसृभिरेव च ।
अभ्युक्ष्य शुद्धदेहः सन्नपः पीत्वा समाहितः ॥ ३५
सूर्यश्चेत्यनुवाकेन पुनराचम्य पूर्ववत् ।
अभ्युक्ष्य शुद्धदेहः सन् गृहीत्वाऽञ्जलिना जलम् ॥ ३६
आदित्याभिमुखो भूत्वा तद्गतात्मोर्ध्वलोचनः ।
वेदसारं जपन् ज्योतिर्मूलभूतं परात्परम् ॥ ३७
हृत्स्थं सर्वस्य लोकस्य मण्डलान्तर्व्यवस्थितम् ।
चिन्तयन् परमात्मानमापस्तूर्ध्वं विनिःक्षिपेत् ॥ ३८
एनसाः प्रतिनिघ्नन्ति जगदाप्याययन्ति च ।
ततः प्रदक्षिणीकृत्य पुनराचम्य संयतः ॥ ३९
क्रमात्तारादिमन्त्राणामृष्यादीन् विन्यसेत् सुधीः ।
तत्र तु प्रणवस्याऽऽदावृषिरुक्तः प्रजापतिः ॥ ४०
छन्दस्तु देवी गायत्री परमात्मा च देवता ।
जमदग्निभरद्वाजभृगुगौतमकाश्यपाः ॥ ४१
विश्वामित्रो वसिष्ठाख्य ऋषयो व्याहृतीरिताः ।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥ ४२
त्रिष्टुब्जगत्यौ छन्दांसि कथ्यन्ते देवता अपि ।
सप्तार्चिरनिलः सूर्यो वाक्पतिर्वरुणो वृषा ॥ ४३
विश्वेदेवा इति प्रोक्ताः सप्तव्याहृतिदेवताः ।
हृन्मुखांसोरुयुग्मेषु सोदरेषु क्रमान्न्यसेत् ॥ ४४
विश्वामित्रस्तु गायत्र्या ऋषिश्छन्दः स्वयं स्मृतम् ।
सविताऽस्या देवता च ब्रह्मा शिरऋषिः स्मृतः ।
छन्दस्तु देवी गायत्री परमात्मा च देवता ॥ ४५

सुधीरिति । ऋष्यादिन्यासस्थानमुक्तं स्मरन्नित्यर्थः । अथवा तारादिव्याप्तिं जानन्नित्यर्थः ॥ ३८ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

स्थानेषु पूर्वमुक्तेषु सतारा व्याहृतीर्न्यसेत् ।
गायत्रीं शिरसा विद्वान् जप्यात्त्रिः स्यादुपासना ॥ ४६
हृदयेऽधस्तथोर्ध्वञ्च महादिक्ष्वपि संयतः
व्यापयेद्व्याहृतीः सम्यग्गायत्रीञ्च शिरोयुताम् ।
सार्थं संस्मृत्य संजप्यात्त्रिविधं जपलक्षणम् ॥ ४७
आत्मन्यधश्चोपरि च दिग्भ्यस्ताः समुपानयेत्
गायत्रीं पूर्ववज्जप्यात् स्वाध्यायविधिरीदृशः ॥ ४८
एतत्त्रयं त्रिशः कुर्यादृजुकायस्त्वनन्यधीः ।
निरुच्छ्वासः स विज्ञेयः प्राणायामो मनीषिभिः ॥ ४९
ध्यानस्य केवलस्याऽस्य व्याख्याने दर्शितः क्रमः ।
त्रिर्व्याहृत्यादिमभ्यस्येद्गायत्रीं सन्ध्ययोः सुधीः ॥ ५०
शतं वाऽथ सहस्रं वा मन्त्रार्थगतमानसः ।
पूर्वं प्रपञ्चयागोक्तान् गाणपत्यजपादिकान् ॥ ५१
लिपिन्यासादिकान् साङ्गान् ग्रहन्यासादिसंयुतान् ।
सनिजर्ष्यादिकान् सर्वान् विदध्याद्विधिवद्बुधः ॥ ५२
पादसन्धिचतुष्काम्बुनाभिहृद्गलदोर्द्वये ।
सन्ध्यास्यनासागण्डाक्षिकर्णभ्रूमस्तकेष्वपि ॥ ५३

पूर्वं कर्तव्यतया उक्तानुपासनाजपस्वाध्यायप्राणायामध्यानान् क्रमेण आह—स्थानेष्वित्यादिना। विद्वानर्थज्ञ इत्यर्थः ॥ ४६ ॥

व्याहृतीः सम्यगिति। बहिर्मुखाभिः मुद्राभिः जगत् सर्वं व्याहृतिभिः व्यापयेत्त्यर्थः। समुपानयनमन्तर्मुखमुद्राभिः न्यासं व्यापनमानयनं चेत्यर्थः। एतत्त्रयं त्रिश इति। अविच्छेदेन त्रयं कृत्वा पुनः व्याहृत्यादिसहितां गायत्रीं त्रिशः जपेत्। अयमेकः प्राणायामः। पुनरप्येवं द्विवारं कुर्यादित्यर्थः ॥ ४७॥४८॥४९ ॥

ध्यानैस्तथा नित्यश इत्युक्ता ध्यानप्रकाराः कथं कर्तव्या इति तत्र निराकारध्यानप्रकार उक्त इत्याह—ध्यानस्येति। केवलस्येति। केवलस्य निराकारस्येत्यर्थः। अस्येति। प्राणायामादिभिः शुद्धस्येत्यर्थः। सुधीरिति। व्याहृतीनामादौ प्रणवेन स्वरूपध्यानमुक्तम् ॥ ५० ॥

बहिः जपक्रममाह—पूर्वमिति। मन्त्रवित्तम इति। प्रणवशक्त्यादियोगो

वारुणेन्द्रवयाम्यप्रागूर्ध्वगेषु मुखेषु च ।
क्रमेण वर्णान् विन्यस्येद्गायत्र्या मन्त्रवित्तमः ॥ ५४
शिरोभ्रूमध्यनयनवक्त्रकण्ठेषु वै क्रमात् ।
हृन्नाभिगुह्यजान्वाख्यपादेष्वपि पदान्यसेत् ॥ ५५
सब्रह्मविष्णुरुद्रैश्च सेश्वरैः ससदाशिवैः ।
ससर्वात्माह्वयैः कुर्यादङ्गन्यासं समाहितः ॥ ५६
एवं कृत्वा तु सिद्ध्यर्थं गायत्रीं दीक्षितो जपेत् ।
अथ त्रिगुणिते प्रोक्ते विचित्रे मण्डलोत्तमे ॥ ५७
शक्तिभिः प्राक्समुक्ताभिः सौरं पीठं समर्चयेत् ।
तत्र निःक्षिप्य कलशं यथापूर्वोपचारतः ॥ ५८
गव्यैर्वा पञ्चभिः क्वाथजलैर्वा पूरयेत्ततः ।
तस्मिन्नावाह्य कलशे शक्तिमित्थं विचिन्तयेत् ॥ ५९
मन्दाराह्वयरोचनाञ्जनजवाच्छाभैर्मुखैरिन्दुम-
द्रत्नोद्यन्मुकुटाङ्गसन्ततचतुर्विंशार्णचित्राऽतनुः ।
अब्जे चाऽरिगदाह्वयौ गुणकपालाख्यौ च पाशाङ्कुशे-
ष्टाभीतीर्दधती भवेद्भवदभीष्टोद्भाविनी तारिणी ॥ ६०
सञ्चिन्त्य भर्तारमिति प्रभाणां त्रिशक्तिमूर्तीः प्रथमं समर्च्य ।
आदित्यशक्त्याख्यचतुष्टयेन यजेद्द्वितीयावरणे दिनेशम् ॥ ६१
प्रह्लादिनीं प्रभां नित्यां सविश्वम्भरसंज्ञिकाम् ।
विलासिनीप्रभावत्यौ जयां शान्तां क्रमाद्यजेत् ॥ ६२
कान्तां दुर्गासरस्वत्यौ विद्यां रूपाह्वयां तथा ।
विशालेशां व्यापिनीं च विमलाख्यां क्रमाद्यजेत् ॥ ६३
तमोऽपहारिणीं सूक्ष्मां विश्वयोनिं जयावहाम् ।
पद्मालयां परां शोभां पद्म[भद्र]रूपां तथा यजेत् ॥ ६४

णियमित्यस्य द्वित्वं चोक्तम् ॥ ५१॥५२॥५३॥५४ ५५॥५६॥५७॥५८॥५९॥६० ॥

त्रिशक्तिमूर्तीर्ब्राह्म्याद्याः । आदित्यशक्त्याख्यचतुष्टयेनेति । आदित्यादि-पञ्चकसहितेनादित्यशक्तिचतुष्टयेनेत्यर्थः । तत्रादित्यो मध्ये रव्यादयो दिक्षु उषाद्या विदिक्षु ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥

मातृभिः सारुणान्ताभिः षष्ठ्यादयो सप्तमी ग्रहैः ।
आदित्यपार्षदन्तैरप्यष्टमीन्द्रादिभिः सुरैः ॥ ६५
आवृतिः कथिता चेति विधानं परमीदृशम् ।
गन्धादिभिर्निवेद्यान्तैर्दिनेशं सम्यगर्चयेत् ॥ ६६
अथ पुनरमुमभिषिञ्चेत् संयतचित्तश्च देशिकः शिष्यम् ।
कृतहुतविधिमपि विधिवद्विहितबलिं दत्तदक्षिणं गुरवे ॥ ६७
भूयस्त्वक्षरलक्षं गायत्रीं संयतात्मको जप्त्वा ।
जुहुयात् पायसघृततिलदूर्वाभिर्दुग्धतरुसमिद्भिरपि ॥ ६८
एकैकं त्रिसहस्रं मन्त्री समभीष्टसिद्धये मुक्त्यै ।
अक्षरसहस्रसंख्यं मुख्यतरैः केवलैस्तिलैर्जुहुयात् ॥ ६९
दुरितोच्छेदनविधये मन्त्री दीर्घायुषे च विशदमतिः ।
आयुःकामो जुहुयात् पायसहविराज्यैः केवलाज्यैश्च ।
दूर्वाभिः सतिलाभिः सर्वैस्त्रिसहस्रसंख्यकं मन्त्री ॥ ७०
अथवा विमधुरसिक्तैररुणैर्जुहुयात् सरोरुहैरयुतम् ।
नष्टश्रीरपि भूयो भवति मनोज्ञः स मन्दिरं लक्ष्म्याः ॥ ७१
अन्नाद्यर्थन्नैरपि पालाशैर्ब्रह्मवर्चसे जुहुयात् ।
सर्वैरेतैर्जुहुयात् सर्वफलाप्त्यै द्विजेश्वरो मतिमान् ॥ ७२
इति परमरहस्यं वेदसारस्य सारं
गदितमज सुशुद्धैर्योगिभिर्ध्यानगम्यम् ।
अमुमथ जपहोमध्यानकाले य एवं
भजति स तु विमुक्तः कर्मभिर्मुक्तिमेति ॥ ७३
इति श्रीप्रपञ्चसारे विंशः पटलः ॥

दुरितोच्छेदनविधये मन्त्रीति । दीर्घायुष्याय मृत्युञ्जयहंसयोग उक्तः । विशदमतिरिति । शुक्लध्यानमुक्तम् । त्रिसहस्रसंख्यकं मन्त्रीत्यपि तथा इति ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
विंशत्पटलः ।

एकविंशः पटलः ।

अथ वक्ष्यामि विद्यायास्त्रिष्टुभः प्रवरं विधिम् ।
ऋषिच्छन्दोदेवताभिरङ्गन्यासक्रमैः सह ॥ १
मरीचिः काश्यपो नाम ऋषिश्छन्दः स्वयं स्मृतम् ।
देवता जातवेदोऽग्निरुच्यन्तेऽङ्गान्यतो मनोः ॥ २
नवभिः सप्तभिः षड्भिः सप्तभिश्च तथाऽष्टभिः ।
सप्तभिर्मूलमन्त्रेण कुर्यादङ्गानि वर्णकैः ॥ ३
अङ्गुष्ठगुल्फजङ्घासु जानूरुकटिगुह्यके ।
सनाभिहृदयोरोजपार्श्वयुक्पृष्ठकेषु च ॥ ४
स्कन्धयोरुभयोर्मध्ये बाहुमूलोपबाहुषु ।
प्रकूर्परप्रकोष्ठेषु मणिबन्धतलेषु च ॥ ५
मुखनासाक्षिकर्णेषु मस्तमस्तिष्कमूर्धसु ।
विन्यसेदक्षरान्मन्त्री क्रमान्मन्त्रसमुद्भवान् ॥ ६
शिखाललाटहृक्कर्णयुगोष्ठरसनासु च ।
सकण्ठबाहुहृत्कुक्षिकटिगुह्योरुजानुषु ॥ ७
जङ्घाचरणयोर्न्यस्येत् पदानि त्रिष्टुभः सुधीः ।
इति विन्यस्तदेहस्तु कुर्याज्जप्यादिकाः क्रियाः ॥ ८
उद्यद्विद्युत्करालाकुलहरिगलसंस्थाऽरिशङ्खासिखेटै-
ष्विष्वासाख्यत्रिशूलानरिगणभयदां तर्जनीञ्चाऽऽदधाना ।
चर्मास्युद्घूर्णदोर्भिः प्रहरणनिपुणाभिर्वृता कन्यकाभि-
र्दद्यात्कार्ष्णीनवीष्टांस्त्रिनयनलसिता चापि कात्यायनी वः ॥ ९

सावित्र्या विधानमभिधाय आग्नेय्या विधानं वक्तुमारभते—अथ वक्ष्यामीति । [मन्त्रोऽयमृग्वेदोक्तः प्रसिद्धः तेनाऽत्र नोक्तः] ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

अक्षरान्मन्त्रीति । प्रणवशक्त्यादिपूर्वकानित्यर्थः । सुधीरित्यपि तथा । रं बीजम् । क्रीं शक्तिः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

दीक्षा प्रवर्त्यते पूर्वं यथावद्देशिकोत्तमैः ।
ततोऽस्त्रकृप्तिः सम्प्रोक्ता स्यात्प्रयोगविधिस्ततः ॥ १०
दीक्षकाख्याक्षराख्यादौ शक्त्यावेष्ट्य ततो बहिः ।
यन्त्रं षड्गुणितं कृत्वा दुर्वर्णलसितास्त्रकम् ॥ ११
बहिरष्टदलं पद्मं प्रोक्तलक्षणलक्षितम् ।
अत्र पीठं यजेन्मन्त्री क्रमात् सनवशक्तिकम् ॥ १२
जया सविजया भद्रा भद्रकाली सुदुर्मुखी ।
व्याघ्रसिंहमुखी दुर्गा त्रिष्टुभो नव शक्तयः ॥ १३
तत्राधाय घटं गव्यक्वाथमूत्रपयोऽम्भसाम् ।
एकेन पूरणं कृत्वा आवाह्य च विभावसुम् ॥ १४
आवृतेर्बहिरग्न्यादिपादाष्टकविनिःसृताः ।
मूर्तीरभ्यर्चयेदग्नेर्जातवेदादिकाः क्रमात् ॥ १५
पृथिव्यम्बुनलेरानप्यात्मनेपदसंयुतान् ।
अर्चयेद्दिक्षु कोणेषु निवृत्त्यादीर्यथाक्रमम् ॥ १६
दिक्ष्वेकादशसंख्याः स्युर्जार्णाद्या वर्णशक्तयः ।
लोकपालांश्च तद्वेतीर्विधिनेति समर्चयेत् ॥ १७
जाग[ग्र]ता तपनो वेदगर्भा दहनरूपिणी ।
सेन्दुखण्डा शुम्भहन्त्री सनभश्चारिणी तथा ॥ १८
वागीश्वरी मदवहा सोमरूपा मनोजवा ।
मरुद्वेगा रात्रिसंज्ञा तीव्रकोपा यशोवती ॥ १९
तोयात्मिका तथा नित्या दयावत्यपि हारिणी ।
तिरस्क्रिया वेदमाता तथाऽन्या दमनप्रिया ॥ २०

यथावदिति । योजनान्तमित्यर्थः । अस्त्रकृप्तिः भविष्यतीति ॥ १० ॥

दीक्षकाख्येति । मध्यशक्तावाख्यादिकं लिखेदित्यर्थः । शक्त्येति । त्रिष्टुभेत्यर्थः । यजेन्मन्त्रीति । प्रणवशक्त्यादित्वं मन्त्राणामुक्तम् ॥ ११॥१२॥१३॥१४॥१५॥१६॥

वर्णशक्तीनां स्वाद्याक्षराद्यत्वमाह—जार्णाद्या इति । जाद्यर्णाद्या इत्यर्थः । [एकादशेति प्रतिदिशमेकादशेत्यर्थः] ॥ १७ ॥

अक्षरशक्तीराह – जागता इति ॥१८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

समाराध्या नन्दिनी च परा रिपुविमर्दिनी ।
षष्ठी च दण्डिनी तिग्मा दुर्गा गायत्रिसंज्ञिका ॥ २१
निरवद्या विशालाक्षी श्वासोद्वाहा च नादिनी ।
वेदना वह्निगर्भा च सिंहवाहाह्वया तथा ॥ २२
धुर्या दुर्विषहा चैव रिरंसा तापहारिणी ।
त्यक्तदोषा निःसपत्ना चत्वारिंशच्चतुर्युताः ॥ २३
अभिषिच्य पुनः शिष्यं कुम्भादीन् गुरुराहरेत् ।
ईदृशं यन्त्रमारुह्य जपेच्छिष्यः सुयन्त्रितः ॥ २४
मन्त्राक्षरसहस्रन्तु सिद्ध्यर्थं गुरुसन्निधौ ।
सर्वजापेषु चाग्नेय्या गायत्र्या द्विगुणो जपः ॥ २५
कर्तव्यो वाञ्छितावाप्त्यै रक्षायै कार्यसिद्धये ।
तिलराज्यनलक्षीरवृक्षेध्महविराज्यकैः ॥ २६
सर्पिःसिक्तैः क्रमाद्धोमः साधयेदीप्सितं नृणाम् ।
चत्वारि चत्वारिंशच्च चतुःशतसमन्वितम् ॥ २७
चतुःसहस्रसंयुक्तं प्रोक्तैर्द्रव्यैर्हुतक्रिया ।
एवं संसिद्धमन्त्रस्य स्युरस्त्राद्याः क्रिया मताः ॥ २८
चत्वारि चत्वारिंशच्च वर्णानामस्त्रमिष्यते ।
विलोमपाठो वर्णानामस्त्रमाहुर्मनीषिणः ॥ २९
पादाष्टकमिदं विद्यात्ततोऽष्टाङ्गो मनुस्त्वयम् ।
जप्तुकामो मनुन्त्वेनं पादांस्तु प्रतिलोमतः ॥ ३०
जपेत्तथा हि मन्त्रोऽयं ज्ञाप्यते दुष्टदूषितः ।
आद्याः पञ्चाक्षराः पादास्त्रयः सप्ताक्षरः पदः ॥ ३१
पञ्चमश्चाऽथ षष्ठश्च द्वौ तु पादौ षड्क्षरौ ।
पञ्चाक्षरौ तदन्तौ च तेषां भावो निगद्यते ॥ ३२

ईदृशमिति उक्तपूजायन्त्रग्रहणं कृतम् ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

अष्टाङ्गो मनुस्त्विति । अष्टमूर्तिभिः सहाऽष्टपादन्यासः सूचितः । त्रिस्त्रेत्यारभ्य पादाक्षरगणना ।

तेषां भाव इत्यादिना तत्त्वन्यासं सूचयति । भावो याथात्म्यम् ॥३०॥३१॥३२॥

आ[ग्न्या]द्यं ज्ञानेन्द्रियं कामं द्वितीयं पाञ्चभौतिकम् ।
तृतीयं धातवः सप्त चतुर्थं वर्णसप्तकम् ॥ ३३
षड्भूमयः पञ्चमं स्यात् षष्ठः षाट्कौशिको मतः ।
सप्तमश्चाऽष्टमः पादः शब्दाद्यं वचनादिकम् ॥ ३४
साङ्गः सप्रतिपत्तिकः सगुरुपद्द्वन्द्वप्रणामक्रियो
जाप्योऽत्यादिषदन्तकोऽन्तविगतो वर्णप्रतीपस्तथा ।
गुर्वादेशविधानतश्च विधिवद्ध्यातो मनुर्मन्त्रिणा
तत्तत्कार्यसमाप्तयेऽखिलविपद्ध्वान्तौघभानूदयः ॥ ३५
अनुलोमजपेऽङ्गानामपि पाठोऽनुलोमकः ।
प्रतिलोमानि तानि स्युः प्रतिलोमविधौ तथा ॥ ३६
अन्तपादप्रतीपे हि तथा तानि भवन्ति हि ।
वर्णप्रतीपे हि तथा माला च प्रतिलोमके ॥ ३७
प्रतिपत्तिविशेषांश्च तत्र तत्र विचक्षणः ।
गुर्वादेशविधानेन प्रविदध्यान्न चाऽन्यथा ॥ ३८

आद्यपादत्रयं देव्या हैरण्यगर्भरूपार्थः । चतुर्थी देव्या वैराजरूपार्थः । तत्र धातुशब्देन पञ्चीकृतभूतानि तदनुगतनामरूपे चोक्ते । अवशिष्टपादचतुष्कं देव्येच्छया गृहीतव्यष्टिशरीरगतं तत्त्वजातम् ।

पक्तिपरेशजीवप्रकृतितत्त्वानि क्लीं ह्रीं श्रीं दुर्भिः सह व्यापकत्वेन प्रथमत एव न्यस्तव्यानि ॥ ३३ ॥ ३४ ॥

अतिदुर्गापदपादवर्णप्रतिलोमानां जपे नियममाह—साङ्ग इति । प्रतिपत्तिरुत्तरत्र रकर्मणि वक्ष्यमाणानामेका । अथवा उक्तैव अष्टभुजाऽतिक्रूरा ध्येया । सहस्रभुजा सहस्रनयना वा । प्रतिजपं देवतारूपो गुरुर्मनसा नमस्कार्य इत्याह—सगुरुपदिति । अत्यादिषदन्तकः अतिदुर्गा । अन्तविगतः अवसानादारभ्य विलोमेन गतः । पदपादप्रतिलोमावित्यर्थः । वर्णप्रतिलोमानां पृथग्ग्रहणात् । वक्ष्यमाणप्रयोगः प्रतिपत्तयश्च गुर्वादेशेनैव ज्ञातव्या इत्याह—गुर्वादेशेति । मन्त्रिणेति । तत्तत्कर्मोचितबीजादियोग उक्तः ॥ ३५ ॥

साङ्ग इत्युक्तमङ्गभेदमाह—अनुलोमेति । वर्णपदन्यासयोरपि समानोऽयं न्यासः । सकृत्प्रतिषेधमात्रेणाऽकार्यान्मन्दान्न निवर्तयितुं शक्य इति पुनरप्याह—प्रतिपत्तीति ॥ ३६ ॥ ३७ ॥ ३८ ॥

जपः पुरोक्तसंख्यः स्याद्धुतकृन्निस्तथा भवेत् ।
क्षीरवृक्षसमिद्राजीतिलहव्यघृतैः क्रमात् ॥ ३९
अथवा पञ्चगव्योत्थचरुणा हुतमुच्यते ।
प्रत्यङ्मुखेन कर्तव्यं प्रायोजपहुतादिकम् ॥ ४०
ततः स्युर्मन्त्रवर्णेभ्यस्तावत्यो वह्निदेवताः ।
प्रत्येकमावृतास्तास्तु पञ्चकेन नतभ्रुवाम् ॥ ४१
तत्पञ्चकञ्च प्रत्येकमावृतं पञ्चभिः पृथक् ।
प्रत्येकं पञ्चकानाञ्च षोड़शावृतिरिष्यते ॥ ४२
प्रत्येकं षोड़शानाञ्च कोटयः परिचारिकाः ।
इत्येकाक्षरजात् पूर्वादेकस्मात् षोड़शात्मकात् ॥ ४३
एतावत्यस्तु जातास्तद्विस्तारं पुनरूहयेत् ।
तत्र त्विन्द्रियजाः प्रोक्ता देवतास्तूर्ध्वदृष्टयः ॥ ४४
तिर्यञ्चो भौतिकाः प्रोक्ता धातूत्थास्तूभयाननाः ।
ऊर्मिजास्तूर्ध्ववदनास्तिर्यञ्चश्चाऽथ कोशजाः ॥ ४५

प्रतिलोममन्त्रस्य पृथक्साधनं कर्तव्यमित्याह—जपः पुरोक्तसंख्य इति । प्रायोजपहुतादिकं प्रतिलोमजपहुतादिकमित्यर्थः ॥ ३९ ॥ ४० ॥

प्रयोगार्थं मन्त्रवर्णदेवताव्याप्तिमाह—तत इति । सिद्धमन्त्रस्य स्मृत्यनन्तरमित्यर्थः । सर्वासां वर्णशक्तीनां पञ्चभूतात्मकत्वात् पञ्चकेनावृता इति उक्तम् । तासामपि पञ्चभूतात्मकत्वात् आह—तत्पञ्चकमिति । तासामपि भूतगतशब्दादिगुणभेदेन कारणसहितेन षोड़शधा भेदमाह—प्रत्येकमिति । कोटिभेदोऽपि शब्दादिवैचित्र्यादेव ज्ञातव्यः ॥ ४१ ॥ ४२ ॥ ४३ ॥

उक्तां विभूतिमनूद्य विभूत्यन्तरमाह—इत्येकाक्षरजादिति । इति इत्थम् । एकाक्षरजात् पञ्चकात् पूर्वं पूर्वं जातात् प्रत्येकं पञ्चकपरिवृतात् पुनरप्येकैकस्मात् षोड़शात्मकादेतावत्यो विभूतयो जाता इत्यर्थः । तद्विस्तारं पुनरूहयेदित्यस्याऽयमर्थः । कोटीनां मध्ये एकैकस्या पञ्चकोटयः परिचारिकाः । तासामेकैकस्याः पुनः पञ्च कोटयः । तासामेकैकस्याः षोड़शकोटयः । तासामेकैकस्याः कोटिकोटयः । इत्यादिप्रकारेणोहयेदिति ॥ ४३ ॥ ४४ ॥

इन्द्रियजानामूर्ध्वदृष्टित्वं केवलसमष्टिजत्वेन । प्रत्यङ्मुखत्वात् तिर्यञ्चः ।

क्लीबा मुखद्वयोपेता गोचरोत्थाः स्त्रियो मताः ।
अधोमुखाश्च तिर्यञ्च इत्युक्तो मूर्तिसंग्रहः ॥ ४६
आभिः सर्वाभिरपि च शिखाभिर्जातवेदसः ।
व्याप्यते परराष्ट्रेषु वृक्षगुल्मलतादिकम् ॥ ४७
आरम्भे मानुषाणि स्युर्नक्षत्राण्याभिचारिके ।
कर्मण्यासुरभानि स्युर्दैवानि स्युस्तथा हृतौ ॥ ४८
अन्त्याश्वीन्दूर्कादितिगुरुहरिमिवानिलाह्वया दैवाः ।
पूर्वोत्तरचयीयमहरविधयो मानुषाः परेऽसुरभाः ॥ ४९
नन्दास्वारभ्य रिक्तासु प्रयोज्याऽऽत्मनि संहरेत् ।
भद्रासु संग्रहं कुर्याज्जयासु तु विशेषतः ॥ ५०
आरेणारभ्य मन्देन प्रयोज्याऽऽदित्यवारके ।
संहरेत् संग्रहं कुर्याद्वारे त्वाचार्ययोः सुधीः ॥ ५१
चरैर्विसृज्योभयकैराहरेदभ्यसेत् स्थिरैः ।
दिनास्त्रं दिनकृद्युक्तं वारग्रहसमन्वितम् ॥ ५२

वराहसिंहादिवदना इत्यर्थः । उभयानना इति । द्विवदना ऊर्ध्वाधोमुखाश्चेत्यर्थः । पञ्चीकृतत्वेनोभयात्मकत्वात् तासाम् । ऊर्मिजानामूर्ध्ववदनत्वम् । तासामध्यात्म-स्थूलसूक्ष्मकारणसमष्टिरूपत्वेन विवक्षितत्वात् । तिर्यक्त्वं पूर्ववत् कोशजानाम् । क्लीबत्वं स्त्रीपुरुषमिश्रात्मकत्वात् । गोचरोत्थानां स्त्रीत्वं प्रकृतिप्रधानत्वात् । अधोमुखत्वं बहिर्मुख्यप्राधान्यात् ॥ ४४ ॥ ४५ ॥ ४६ ॥

प्रयोगे प्रतिपत्तिमाह—आभिरिति ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

[राशीनपि विदधाति—चरैरिति राशिभिः । इति दीपिकाकारः ।]

दिनास्त्रमिति । अतिदुर्गादिनास्त्रमेकादशाक्षरं च । दिनकृद्युक्तमिति । दिनकृच्छब्दो द्वादशसंख्यालक्षकः प्राणबुद्धिसहितेन्द्रियदशकयुतमन्त्र इत्यर्थः । आद्यन्तयोः द्वादशादित्यनामयुक्तमिति चाऽर्थः । आदित्यगतदेवताध्यानयुक्तमिति चाऽर्थः । वारग्रहसमन्वितमाद्यन्तयोर्वाराभिमानिग्रहनामभिः समन्वितमन्त्रे वार्यस्यावरणीयस्य ग्रहेण ग्रहणेन नाम्ना समन्वितं चादित्यमण्डलस्थादिभिः प्रधानाकाराभिर्वारग्रहाभिमानिदेवताभिः षट्कोणस्थाभिः समन्वितमिति त्रिधा योज्यम् ॥ ५२ ॥

कृत्तिकादि च कृत्यान्तं कृत्यास्त्रं जातवेदसः ।
नक्षत्रात्मा हुताशः स्यात्तिथ्यात्मेन्दुरुदाहृतः ॥ ५३

कृत्तिकादि चेति । युक्तमिति पदमत्रापि योज्यम् । कृत्तिकादि चादि च कृत्तिकादि । कृत्तिकादिशब्देन सप्तविंशतिनक्षत्राणि उक्तानि कृत्तिकादीनि । आदिशब्देन प्रथमाद्वितीयेत्यादि तिथिपञ्चदशकमुक्तम् । तदेव द्वयमाद्यन्तयोः युक्तमिति कृत्तिकादि चेत्यस्यैकोऽर्थः ।

कृत्तिका त्वक् । त्वक् च तदादि च कृत्तिकादि । इन्द्रियगणात् पूर्वं त्वगादिधात्वष्टकयुक्तमित्यर्थः । कृत्यान्तं कृत्यावसानम् । साध्यनामान्ते मारय मारय दह दहेति वा क्रियायुक्तमित्यर्थः ।

कृत्तिका कुण्डलिनी तदादि च । कृत्यान्तं कृत्यापि कुण्डलिनी तदन्तं च दिनास्त्रम् । सर्पज्वालायुधादिरूपिणीं कुण्डलिनीमुत्थाप्य साध्यं ग्रसित्वा कुण्डलिन्यग्नावानीय दाहान्तं दिनास्त्रमध्यात्मप्रयोग इत्यर्थः ।

कृत्यास्त्रं जातवेदसः । कृत्यास्त्रं नाम प्रतिलोमास्त्रं पञ्चदशाक्षरं च । अतिदुर्गाप्रतिलोमास्त्रमेवेति केचित् । तदप्येवमेव प्रयोक्तव्यमिति शेषः ।

प्रयोगप्रकारं मन्त्रविशेषं चाह—नक्षत्रात्मा हुताशः स्यादिति । नक्षत्राणामात्मा आधारभूतः हुताशः स्यात् । द्वादशादित्य सप्तग्रह तिथीनामुपलक्षणं नक्षत्रग्रहणम् । आदित्यादीनां ग्रहणम् । आदित्य ग्रह नक्षत्र तिथीनामस्त्राद्यन्तयोः चतुर्थीसम्बुद्ध्यन्ततया स्थितानामादौ चतुर्थीसम्बुद्ध्यन्तः अग्निशब्दः प्रयोक्तव्य इत्यर्थः ।

अथाऽन्योऽर्थः । नक्षत्रादय आत्मा आधारो यस्य हुताशस्याऽनुलोमत्रिष्टुभः स तथोक्तः । चतुर्थ्यन्तनक्षत्रादीनामन्तेऽनुलोममन्त्रः प्रयोक्तव्य इत्यर्थः ।

अथाऽन्योऽर्थः । नक्षत्रात्मा सप्तविंशत्यात्मा हुताशः अग्निमन्त्रः स्यात् । अमुष्य त्वचं दह दहेत्यादिकृत्यान्ते रं रं रमित्याद्यग्निमन्त्रः सप्तविंशतिवारमावर्तनीयः इत्यर्थः ।

अन्योऽर्थः । नक्षत्रात्मा सप्तविंशतिज्वालारूपः हुताशः कुण्डल्यात्मा हुताशमन्त्रोऽध्यात्मप्रयोगे ध्येयः । अधिदैवतप्रयोगे सप्तविंशत्यादित्यात्मा इति विशेषः ।

तिथ्यात्मेन्दुरुदाहृत इत्यनेनाऽस्त्रोपसंहारसमये मन्त्रविशेषं प्रतिपत्तिविशेषं चाह । अत्रापि तिथिग्रहणमुपलक्षणार्थम् आदित्यादीनां तिथ्यादीनामात्मा इन्दुः सोमः । चतुर्थीसम्बुद्ध्यन्तादित्य ग्रह नक्षत्र तिथीनामादौ तथाविधः सोमशब्दः प्रयोक्तव्य इत्यर्थः ।

ताभ्यां करोति दिनकृद्विसर्गादानकर्मणी ।
इत्येष निपुणो मन्त्री प्रयोगादन्यथात्महा ॥ ५४

अन्योऽर्थः । तिथ्यादय आत्मा यस्य सोमस्याऽनुलोममन्त्रस्य स तथोक्तः । चतुर्थ्यन्तसोमशब्दान्ते अनुलोममन्त्रः प्रयोक्तव्य इत्यर्थः ।

अन्योऽर्थः । तिथ्यात्मा इन्दुः सौम्यत्वात् गायत्रीन्दुः । स तिथ्यात्मा पञ्चदशात्मा । उपसंहारविधौ प्रतिलोमजपाभावात् तत्स्थाने गायत्रीपञ्चदशकं जप्तव्यमित्यर्थः ।

अन्योऽर्थः । तिथ्यात्मा पञ्चदशात्मा इन्दुः सोममन्त्रः वं वं वं वं वं वं वे वं व वै वं व व वं व व इत्युदाहृतः । सम्बुद्ध्यन्ते तिथ्यादीनामनन्तरपठितानां मम त्वचं पूरय पूरय इत्यादीनामन्ते अमृतमन्त्रः पञ्चदशवारमावर्तनीय इत्यर्थः ।

अन्योऽर्थः । तिथ्यात्मा पञ्चदशात्मा अमृतधारात्मा इन्दुः । परकुण्डल्यमृतरूपो मन्त्रोऽध्यात्मप्रयोगे अधिदैवते पञ्चदशचन्द्रात्मा उदाहृत इति ॥ ५२ ॥

इदानीं प्रयोगप्रकारमाह—ताभ्यामिति । ताभ्यां हुताशेन्दुभ्यां नाड़ीद्वय वर्तिभ्यां करोति दिनकृत् । आदित्यात्मा साधकः मध्यनाडीप्रधानः स विसर्गादानकर्मणी दक्षिणमार्गेणाऽग्निरूपेणाऽग्निरूपाणां देवतानां विसर्गं कृत्वा ता विसृष्टा देवतास्तत्रैव साध्यप्रदेशे संस्थाप्य तन्मूलभूतं कुण्डल्यात्मकं तेजः केवलं तेनैव मार्गेण मूलाधारपर्यन्तमादत्ते । पुनः सोममन्त्रोच्चारणसमये वाममार्गेण मध्यमार्गेण चातिसौम्यतेजोरूपेण कुण्डलिनीं विसृज्य पूर्वविसृष्टदेवतासंख्याभिः अमृतधाराभिस्तासामाप्यायनं वामनाड़ीद्वारेण कृत्वा मध्यनाड़ीद्वारेणात्मनोऽप्याप्यायनं विधाय तामपि कुण्डलिनीं वामनाड़ीद्वारेण गतां तेनैव मार्गेण मूलाधार एवादत्ते । मध्यगतां तु तां तथैव स्थापयतीत्यर्थः । प्रणवान्ते अग्नये धात्रे इति उक्त्वा अनुलोमत्रिष्टुबन्तेन दुर्गतिं कलौहच्च सच्चस्त्र औ इति दिनास्त्रम् सं सायै य सायै ययं सायै ययंसायया इति कृत्यास्त्रं वोक्त्वा अतिदुर्गाप्रतिलोमं वोच्चार्य अग्ने धातरमुष्य त्वचं दह दह रं ररं ररररं रेरैं ररं रं ररमित्यग्निमन्त्रं सप्तविंशतिवारमावर्तयेत् । इत्यादयः प्रयोगमन्त्राः । प्रणवान्ते सोमाय धात्र इत्यस्यान्ते अनुलोमत्रिष्टुभमुच्चार्य गायत्रीं पञ्चदशवारमावर्त्य सोम धातः अमुष्य त्वचं पूरय पूरय इत्याद्यन्ते अमृतमन्त्रमपि पञ्चदशवारं जपेदित्यादय आदानमन्त्राः । एते च धात्र सूर्य कृत्तिकाप्रतिपदाद्येकषष्टिमन्त्राः प्रयोगादानयोः त्वगादिषु विंशतिषु प्रत्येकं प्रयोक्तव्याः । व्यस्तप्रयोगे । समस्तप्रयोगे तु धात्रादीनां त्वगादीनां च नामानि सकृदेवोच्चार्य एक एव मन्त्रः प्रयोक्तव्यः । निरपेक्षादानसमये त्वेकषष्टिरेव प्रयोक्तव्यः । आगच्छागच्छेति च तत्र क्रिया एकप्रयोगपक्षे

रक्षानिग्रहकर्मणोरनुपराग्वक्त्राः प्रधानाकृति-
प्रख्या मन्त्रविधानविच्च दिशि दिश्येकादशैकादश ।
संस्थाप्य क्रमशोऽक्षरोदितरुचीः शक्तीर्जपेद्वा मनुं
सम्यग्वा जुहुयादनु प्रतिगतं सिद्धै समाराधयेत् ॥ ५५
पीताऽयोमुष्टिगदाहस्ता महिषाज्यसंयुतपुलाकैः ।
बैभीतकारिष्टसमित्कोद्रवकैः स्तम्भयेच्च हुतविधिना ॥ ५६
सुसिता पाशाङ्कुशयुग्विगलद्वारिप्रवाहसम्भिन्ना ।
वैतससमिदाहुत्या मधुरयुजा मङ्क्षु वशयेद्दुर्गा ॥ ५७
रक्ता पाशाङ्कुशिनी निशि फलिनीकेसरोद्भवैः पुष्पैः ।
चन्दनरससंसिक्तैर्होमाद्दुर्गा वशीकरोति जगत् ॥ ५८
लवणैस्त्रिमधुरसिक्तैस्तत्कृतया वा जुहोतु पुत्तल्या ।
उडुतरुकाष्ठैर्नक्तं सप्ताहान्नृपतिमपि वशे कुरुते ॥ ५९
सकपालशूलपाशाङ्कुशहस्ताऽरुणतरा तथा दुर्गा ।
आकर्षयेच्च लावणपुत्तल्या त्रिमधुराक्तया होमात् ॥ ६०
ध्यात्वा धूम्रां मुसलत्रिशिखकरामस्थिभिश्च तीक्ष्णाक्तैः ।
कार्पासानां निम्बच्छदमेषघृतै र्हुताच्च विद्वेषः ॥ ६१
धूम्रा तर्जनिशूलाङ्कितहस्ता विषदलैः समाहिषाज्यैः ।
होमाच्च मरिचसर्षपचरुभिरजारुधिरसेचितैरटयेत् ॥ ६२
शिखिशूलकराऽग्निनिभा सर्षपतैलाक्तमत्तबीजैश्च ।
मरिचैर्वा राजियुतैर्होमादहितान् विमोहयेद्दुर्गा ॥ ६३

एकेनैवोपसंहारः ॥ ५४ ॥

अनुलोमप्रतिलोमयोः कार्यभेदध्यानभेदं चाह—रक्षेति । अनुपराग्वक्त्रा इति उभयोरपि रक्षानिग्रहकर्मणोः अनुपराग्वक्त्रत्वं ज्ञातव्यम् । मन्त्रविधानविदिति । रक्षायां चतुश्चत्वारिंशदनुलोमविधानवित् । निग्रहे चतुश्चत्वारिंशत्प्रतिलोमविधानविदित्यर्थः । मूलोक्तमेव सर्वत्र विधानं प्रतिलोमविधानेषु आवरणपूजादिकमपि प्रातिलोम्येन कार्यमिति विशेषः । अक्षरोदितरुचीरिति । रुचयः शक्तयः । चतुश्चत्वारिंशदक्षराणां यावत्यः शक्तय उक्ताः । तावच्छक्तिविशिष्टा एकैकाक्षरशक्तय इत्यर्थः । चतुश्चत्वारिंशत्तत्त्वानि पादाष्टकविभूति-

कृष्णा शूलासिकरा रिपुदिनवृक्षोद्भवैः समित्प्रवरैः ।
व्रणकृद्घृतसंसिक्तैर्हीमान्मारयति मासतो दुर्गां ॥ ६४
नक्षत्रवृक्षसमिधो मरिचानि च तीक्ष्णहिङ्गुशकलानि ।
मारणकर्मणि विहितान्यारुष्करस्नेहसिक्तानि ॥ ६५
नक्षत्रवृक्षसमिधां विलिखितसाध्याभिधानकर्मवताम् ।
सचतुश्चत्वारिंशत्तत्त्वयुजां होमकर्म मारणकरम् ॥ ६६
मरिचं क्षौद्रसमेतं प्रत्यक्पुष्पीपरागसम्भिन्नम् ।
उष्णाम्भःपरिलुलितं प्रसेचयेद्वृक्षवृक्षपुत्तल्या ॥ ६७
हृदये वदने च रिपोः सम्मुखतः संप्रतिष्ठिते वायोः ।
जूर्त्यभिभूतोऽरिः स्यात्तत्क्वथनात् पक्षमात्रकान्म्रियते ॥ ६८
सैव प्रतिकृतिरसकृत्तत्प्रतिष्ठितसमीरणा च विशदधिया ।
तीक्ष्णस्नेहालिप्ता विलोमजापेन तापनीयाऽग्नौ ॥ ६९
विधिना ज्वरविद्धः स्यादपघनहोमेन हानिरङ्गस्य ।
सर्वाहुत्या मरणं प्राप्नोति रिपुर्न तत्र सन्देहः ॥ ७०

प्राक्प्रोक्तान् भूतवर्णान् दशदशयुगशो बिन्दुयुक्तान्नमोऽन्तान्
योनेर्मध्यास्त्रिमध्येष्वपि पुनरथ सस्थाप्य भूताभवर्णान् ।
वर्णैस्तैः साकमग्नेर्मनुमपि कुलिशाद्यैः स्वचिह्नैः समेतं
कुर्यात् कर्माणि सम्यक् पटुविशदमतिः स्तम्भनाद्यानि मन्त्री ॥

ऊदङ्गादिललाः कोर्नसौचतुर्थार्णका वसौ वारः ।
दृष्ट्यैद्वितीयरक्षा वक्रेरद्वन्द्वयोनिकादियषाः ॥ ७२

कथनेन कथितानि तद्वुद्ध्या जुहुयादित्यर्थः ॥ ५५ ७० ॥

अग्नेर्मनुमपीति । त्रिष्टुभमपीत्यर्थः । स तु मध्ये लेखनीयः । कुलिशाद्यैरिति स्तम्भनाद्यचित पृथिव्यादिमण्डलैरित्यर्थः । मन्त्रीति । तत्तत्प्रयोगोचितानुलोमविलोमममन्त्रज्ञ इत्यर्थः । पटुविशदमतिरिति । पूर्वोक्तध्यानविशेषेष्वायत्तमतिरित्यर्थः । अतिदुर्गाप्रतिलोमैश्च मारणोच्चाटन विद्वेषणस्तम्भन मोहनादीनि । गाणिविश्वाग्निदुर्गाभिः वश्यम् अग्निदुर्गया आकर्षणं सोमसिन्धुदुर्गाभ्यां सौम्यप्रयोग इत्यादिमन्त्रविनियोगज्ञ इत्यर्थः ॥ ७१ ॥

मूर्तिवर्णानाह—ऊदिति ।

मरुतः कपोलबिन्दुकपञ्चमवर्णाः शङ्खौ तथा व्योम्नः ।
मनुषु परेष्वपि मन्त्री करोतु कर्माणि तस्य संसिद्ध्यै ॥ ७३

उन्मत्तच्छेलनेत्रद्रुमभवसमिधां सप्तसाहस्रकान्तं
प्रत्येकं राजितैलालुलितमथ हुनेन्माहिषाज्याप्लुतं वा ।
कृष्णाष्टम्याद्यमेवं सुनियतचरितः सप्तरात्रं निशायां
निःसन्देहोऽस्य शत्रुस्त्यजति किल निजं देहमाविष्टमोहः ॥ ७४

सामुद्रे च सहिङ्गुजौरकविषैः साध्यर्क्षवृत्ताकृतिं
कृत्वाऽधोवदनां जले घटकटाहादिस्थिते क्वाथयेत् ।
सप्ताहं ज्वलनं जपन् विषतरोर्यष्ट्या शिरस्ताडनं
कुर्वन् सप्तदिनान्तरे यमपुरक्रीडापरः स्यादरिः ॥ ७५

अर्कस्यन्दनवङ्गपन्नगमुखग्रस्ताङ्घ्रिमाशाम्बरं
न्यग्वक्त्रं तिलजाप्लुतं विषहतं दीप्तं करैर्भास्वतः ।
वायुप्रेरितवह्निमण्डलमहाज्वालाकुलास्यादिकं
ध्यायन् वैरिणमुत्क्षिपेत् जलममुं मन्त्रं जपन् मृत्यवे ॥ ७६

आर्द्रांशुकोऽग्निमनुना त्वथ सप्तरात्रं
सिद्धार्थतैललुलितैर्मरिचैर्जुहोतु ।
आरभ्य विष्टिदिवसेऽरिनरः प्रलाप-
मूर्च्छान्वितेन विषयौक्रियते ज्वरेण ॥ ७७

[भूतवर्णान् विभजते—ऊदृदृगादीति सार्धेन । उकारश्च ऊकारश्च ऊ । दत् दन्ताक्षरः ओकारः । गादयो गजडदबाः । लकारलकारौ च । एते दश कोः पृथिव्या वर्णाः । नसोः नासिकापुटयोरक्षरे ऋकारॠकारौ । औकारश्च । चतुर्थार्णकाः घझढधभाः । वकारसकारौ च । इत्येते दश वारः जलस्य वर्णाः । दृष्योरक्षरे इकारईकारौ । ऐकारश्च । द्वितीयाः खछठथफाः । रेफक्षकारौ च । एते दश अग्निवर्णाः । अहन्दमिति । अकारआकारौ । योनिरेकारः । कादयः कचटतपाः । यकारषकारौ च । इत्येतानि दश वायोरक्षराणि । कपोलयोरक्षरे ऌकारॡकारौ च । बिन्दुः पञ्चदशस्वरः । ङञणनमाः शकारहकारौ च । इत्येते दश आकाशस्य वर्णा इत्यर्थः । अयं विधिः सर्वमन्त्रसाधारण इति ब्रूते—मनुषु परेष्विति । इति सम्बन्धदीपिकाकारः] ।

मन्त्री करोत्विति । तत्तन्मन्त्रयोग इत्युक्तः ॥ ७२—८० ॥

तालस्य पत्रे भुजपत्रके वा
मध्ये लिखेत् साध्यनराभिधानम् ।
अथाऽभितो मन्त्रमिमं विलोमं
विलिख्य भूमौ विनिखन्य तत्र ॥ ७८

आधाय वैश्वानरमादरेण समर्च्य सम्यङ्घृतचैर्जुहोतु ।
तीव्रो ज्वरस्तस्य भवेत् पुनस्तत्तोये क्षिपेद्वश्यतमः स भूयात् ॥ ७९

सिंहस्थां शरनिकरैः कृशानुवक्त्रै-
र्धावन्तीं रिपुमनु धावमानमेनाम् ।
संचिन्त्य क्षिपतु जलं दिनेशबिम्बे
जप्त्वाऽमुं मनुमपि चाटनाय शीघ्रम् ॥ ८०

कृत्वा स्थण्डिलमङ्गणे भगवतीं न्यासक्रमादर्चयेद्-
गन्धाद्यैः पुनरम्बसा च विकिरेन्मन्त्री निशायां बलिम् ।
जप्त्वा मन्त्रममुञ्च रोगसहिताः कृत्या निकृत्या कृता-
स्तांस्तान् भूतपिशाचवैरिविहितान् दुःखानसौ नाशयेत् ॥ ८१

विधिवदभिज्वाल्याऽनलमन्वहमाराध्य गन्धपुष्पाद्यैः ।
सन्ध्यासु जपाच्च मनुरयमाकाङ्क्षितसर्वसिद्धिकल्पतरुः ॥ ८२

कुसुमरसलुलितलोणैर्वारुणवदनो जुहोतु सन्ध्यासु ।
मन्त्रार्णसंख्यमग्नेरैक्येन द्रावयेदरीनचिरात् ॥ ८३

शुद्धैश्च तण्डुलैरथ हविरपि निष्पाद्य पञ्चगव्यमपि ।
सघृतेन तेन जुहुयादष्टसहस्रं समेतसम्पातम् ॥ ८४

प्राशितसम्पातस्य स्याद्रक्षा सर्वथैव साध्यस्य ।
प्राङ्गणमन्दिरयोरपि निखनेत् द्वारेऽवशिष्टसम्पातम् ॥ ८५

कृत्या नश्यति तस्य वीक्षितेन ग्रहादयो भीत्या ।
कर्त्तारमेति कुपिता कृत्या सर्वात्मना च नाशयति ॥ ८६

ब्रह्मद्रुमफलकान्ते मन्त्रितमः सप्तसप्तकोष्ठयुते ।
कोणोदराणि हित्वा मायाबीजं सकामं मध्यगते ॥ ८७

मन्त्रो निशायामिति । पञ्चदुर्गादिभिः बलिदानमुक्तम् ॥ ८१—८६ ॥
मन्त्रितमः सप्तेति । सर्वकोष्ठेषु मायाबीजलेखनमुक्तम् ॥ ८७—८४ ॥

विलिखेत् क्रमेण मन्त्राक्षरांश्च शिष्टेषु तेषु कोष्ठेषु ।
तत्र मरुतः प्रतिष्ठां विधाय निधाय वह्निमपि जुहुयात् ॥ ८८
आज्येनाऽष्टसहस्रं फलकोपरि सम्यगात्तसम्पातम् ।
विप्रतिपत्तिधरायां निखनेन्नश्यन्त्युपद्रवाः सद्यः ॥ ८९
सिकताचरुगव्याश्मकमृदां प्रतिष्ठा विधीयते सिद्धैः ।
प्रस्थाढ़कघटमाना गृहपुरराष्ट्राभिगुप्तये सिकताः ॥ ९०
मध्येऽष्टाशान्तासु च कुण्डानामारचय्य नवकमपि ।
विधिना निवपेत् क्रमशः सिंहधनुश्छागगायिनि दिनेशे ॥ ९१
तिथिषु तु कालाष्टम्यां भेषु विशाखाग्निमूलभाग्ये[गे]षु ।
वारेषु मन्दवाक्पतिवर्जाः सर्वे प्रशस्यन्ते तथा ॥ ९२
हस्तश्रवणमघासु प्राजापत्ये च कर्म कुर्वीत ।
द्वादशसहस्रसंख्यं प्रजपेद्गायत्रमपि यथा प्रोक्तम् ॥ ९३
मध्ये च मूलमनुना तदायुधैरष्टदिक्षु चक्राद्यैः ।
सकपालान्तैः पृथगपि संस्थापनकर्म निगदितं विधिवत् ॥ ९४
तास्ताश्च देवता अपि परिपूज्य यथाक्रमेण मन्त्रितमः ।
कुर्याद्बलिं दिनग्रहकरणेभ्यो लोकपालराशिभ्यः ॥ ९५
सिकताषोड़शकुड़वं ब्रह्मद्रुमभाजनेऽन्नगव्याक्तम् ।
निर्वपति यदि विधिना तं देशं ग्रामं करोति चतुरब्दात् ॥ ९६
अर्केऽजस्थेऽब्धिगायामपरिमितजलायां समादाय शुद्धाः
सम्यक् संशोषयित्वातपमनु सिकताः शूर्पकोणैर्विशोध्य ।
संशुद्धे पञ्चगव्ये सुमतिरथ विनिःक्षिप्य ताः कुम्भसंस्था
मन्त्राग्नौ मन्त्रजापी द्विजतरुसमिधा भर्जयेत् कार्यहेतोः ॥ ९७
एवं मृदुपलयोरधः संस्थाप्यन्ते सपञ्चगव्यास्ताः ।
वसुधाविप्रतिपत्तिक्षयश्च पुष्टिश्च कुर्वते क्रमशः ॥ ९८

यथाक्रमेण मन्त्रितम इति । चक्रादिमन्त्रैः पूजनं सूचितम् । ग्रहादि-बलिमन्त्राश्च सूचिताः ॥ ९५ ॥ ९६ ॥

सिकतोपादानशोधनसंस्कारक्रममाह —अर्केऽजस्थ इति । सुमतिरिति । अग्निमन्त्रदेवतासिकतानामैक्यञ्च इत्यर्थः ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥

रथचरणदरगदाम्बुजहस्ता निष्टप्तशातकुम्भनिभा ।
सघृतपयोऽम्बोहोमान्महतीं लक्ष्मीं समावहेद्दुर्गां ॥ ९९
व्रीहिभिरन्नैः क्षीरैः समिद्भिरपि दुग्धवीरुधामाज्यैः ।
मधुरत्रयमधुरैर्महतीमृद्धिं करोति हुतविधिना ॥ १००
यद्यद्वाञ्छति पुरुषस्तत्तदमुष्य प्रभावतः साध्यम् ।
सग्रहनक्षत्राढ्यां सगिरिपुरग्रामकाननां वसुधाम् ।
साब्धिऋषोपलमुदधिं दहति हि मतिमानयत्नमेतेन ॥ १०१
एवं प्रोत्थापयति च मन्त्रेणाऽनेन निशितधीर्मन्त्री ।
पुंसा केन कियद्वा मन्त्रस्याख्यायतेऽस्य सामर्थ्यम् ॥ १०२
तस्मादेनं मनुवरमभीष्टाप्तये संयतात्मा
जप्यान्नित्यं सहुतविधिमप्यादरादर्चयीत ।
भक्त्या कुर्यात् सुमतिरभिषेकादिकं कर्मजातं
कर्तुं वाऽन्यत् प्रवणमतिरत्रैव भक्तः सदा स्यात् ॥ १०३
इति श्रीप्रपञ्चसारे एकत्रिंशः पटलः ।

निशितधीर्मन्त्रीति । पूर्वोक्तास्त्रप्रयोगध्यानज्ञताऽस्त्रमन्त्रप्रयोगज्ञता चोक्ता । ॥ १०२ ॥ १०३ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
एकत्रिंशत्पटलः ।

द्वात्रिंशः पटलः ।

अथ लवणमनुं वदामि साङ्गं सजपं सप्रतिपत्तिकं सहोमम् ।
विधिवद्विहितेन येन सर्वां जगतीमात्मवशे करोति मन्त्री ॥ १

लवणाम्भसि चेत्याद्या द्वितीया लवणेति च ।
दहेति तृतीया स्यात्तं दग्ध्वेति च चतुर्थ्यपि ।
ऋक् पञ्चमी च या ते स्याद्यथा प्रोक्तमथर्वणि ॥ २
ऋग्भिराभिस्तु पञ्चाङ्गं पञ्चभिर्वा समीरितम् ।
विद्याक्षरैः षड्ङ्गं वा प्रणवाद्यैर्निगद्यते ॥ ३
पञ्चभिश्च त्रिभिरपि पञ्चभिः करणाक्षरैः ।
सपञ्चभिर्युगार्णेन जातियुक्तैः समीरितम् ॥ ४
अङ्गिराः स्याद्दृषिश्छन्दोऽनुष्टुप्त्रिष्टुप् च देवताः ।
अग्नीरावित्तथा दुर्गा भद्रकाली समीरिताः ॥ ५

अथाऽग्निदुर्गादिदैवत्यस्य लवणमन्त्रस्य विधानमाह—अथ लवणेति । करोति मन्त्रीति । चिटिमन्त्रवानित्यर्थः । तारपाशशक्त्यङ्कुश यं लं वं इति उक्त्वा लवणाम्भसि तीक्ष्णोऽसि उग्रोऽसि हृदयं तव लवणस्य पृथिवी माताऽन्ते लवणस्य वरुणः पिता । प्रथमा । लवणे ह्रियमाने तु पुनः कुतो निद्रा कुतो रतिः । लवणं पचति पाचयति । लवणं छिन्दति भिन्दति अमुकस्य दह गात्राणि दह मांसं दह त्वचम् । द्वितीया । दह त्वगस्रङ्मांसमेदोऽस्थिभ्यो मज्जिकां दह यदि वसति योजनशते नदीनां वा शतान्तरे । तृतीया । तं दग्ध्वा नय मे शीघ्रमग्ने लवणस्य तेजसा लोहप्राकारे नगरे कृष्णसर्पवृतार्गले अत्रैव वशमायातु । लवणमन्त्रपुरस्कृतः । चतुर्थी ।

या ते रात्रिः शल्यविद्धस्य शूलाग्रारोपितस्य च ।
या ते रात्रिर्महारात्रिः सा ते रात्रिर्महानिशा ॥ इति पञ्चमी ।

क्रों बीजम् । ह्रीं शक्तिः ।

ॐ आं क्रीं क्रों चिटि चिटि चण्डालि महाचण्डालि अमुकं मे वशमानय स्वाहा । इति चिटिमन्त्रः । लवणवदेव बीजादिकमस्यापि ॥ १ ॥ २ ॥ ३ ॥ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

अरुणोऽरुणपङ्कजसन्निभः स्रुवशक्तिवराभययुक्तकरः ।
अमितार्चिरजात्तगतिर्विलसन्नयनत्रितयोऽवतु वो दहनः ॥ ६
नीलतरांशुकवेशकलापा नीलतनुर्निविड़स्तनभारा ।
साङ्कुशपाशसशूलकपाला यामवती भवतोऽवतु नित्यम् ॥ ७
करकमलविराजच्चक्रशङ्खासिशूला
परिलसितकिरीटा पातितानेकदैत्या ।
त्रिनयनलसिताङ्गी तिग्मरश्मिप्रकाशा
पवनसखनिभाङ्गी पातु कात्यायनी वः ॥ ८
सुरौद्रसितदंष्ट्रिका त्रिनयनोर्ध्ववेशोल्वणा
कपालपरशूल्लसड्डमरुकत्रिशूलाकुला ।
घनाघननिभा रणद्रुचिरकिङ्किणीमालिका
भवद्विभवसिद्धये भवतु भद्रकाली चिरम् ॥ ९
अयुतं नियतो मन्त्री मन्त्रमृक्पञ्चकान्वितम् ।
प्रजपेत्त्रिसहस्रं वा सम्यगेनं समाहितः ॥ १०
दशांशेन हुनेत्सिद्ध्यै हविषा घृतसंयुजा ।
एवं कृते प्रयोगार्हो मन्त्री भूयान्न चाऽन्यथा ॥ ११
वह्निरात्री वरे स्यातां वश्याकर्षणकर्मणोः ।
दुर्गाभद्रे तथा देव्यौ शस्ते मारणकर्मणि ॥ १२
आरभ्य कर्मकृन्मन्त्री तृतीयां कृष्णपक्षजाम् ।
संदीक्षितो भवेत्पूते मन्दिरे मन्त्रजापवान् ॥ १३
निखन्यात्तत्र कुण्डञ्च दोर्मात्रं त्रासमेखलम् ।
चतुष्कं सुन्दराकारं पुत्तलीनाञ्च कारयेत् ॥ १४
एकां साध्यर्चवृक्षेण शालीपिष्टेन चाऽपराम् ।
चक्रिहस्तमृदा चाऽन्यां मधूच्छिष्टेन चाऽपराम् ॥ १५

अयुतं नियतो मन्त्रीति । प्रणवपाशाङ्कुशवायुपृथिव्यमृतयोग उक्तः । समन्वितं चिटिमन्त्रमिति शेषः ॥ १० ॥

मन्त्री भूयाच्च चाऽन्यथेति । मारणादिषु तदुचितबीजयोग उक्तः ॥ ११॥१२ ॥

आरभ्य कर्मकृन्मन्त्रीति । कर्म विशेषपूजादिकम् । मन्त्रीत्याग्नेये दीर्घे वा

तासु हृद्देशलिखितसाध्याख्यासु समाहितः ।
सम्यक् संस्थापयेत् प्राणान् साध्यादानीय साधकः ॥ १६
उत्तानां दारवीं कुण्डे खनेन्मन्त्राभिमन्त्रिताम् ।
पिष्टजां विष्टरस्याऽधः पादस्थाने च मृन्मयीम् ॥ १७
लम्बयेदम्बरे सिक्थमयीमूर्ध्वमधोमुखीम् ।
पुनः कृष्णाष्टमीरात्रौ पूर्वयामे गते सति ॥ १८
रक्तमाल्याम्बरो मन्त्री कृतरक्तानुलेपनः ।
सम्यक्कृतलिपिन्यासः प्राणायामादिकृच्छुचिः ॥ १९
कुड़वं पोतलवणं सुश्लक्ष्णं परिचूर्णितम् ।
दधिक्षौद्रघृतक्षीरैः प्रोक्षयित्वा सुशोधितम् ॥ २०
आलोड्य गुड़मध्वाज्यैर्विस्पष्टावयवामथ ।
तेन पुत्तलिकां मन्त्री चार्वङ्गीं कारयेद्बुधः ॥ २१
तस्याञ्च स्थापयेत्प्राणान् गुर्वादेशविधानतः ।
अष्टोर्ध्वशतसंख्यं वा तथाऽष्टोर्ध्वसहस्रकम् ॥ २२
ऋक्पञ्चकं पञ्चविंशत्संख्यं प्रतिकृतिं स्पृशन् ।
जपित्वाऽङ्गानि विन्यस्येत् स्वाङ्गे प्रतिकृतावपि ॥ २३
सतारैश्चिटिमन्त्राणैश्चतुर्विंशतिसंख्यकैः ।
शिरोललाटहृक्कर्णनासास्यचिबुकेष्वपि ॥ २४
सकण्ठहृदयोरोजनाभिकुक्षिकटीषु च ।
मेढ्रपायूरुजान्वग्रजङ्घाङ्घ्रिषु च विन्यसेत् ॥ २५
अधोगुह्यादभेदः स्यादूर्ध्वं भेदो द्विके सति ।
आत्मन्येवं प्रविन्यस्य पुनः प्रतिकृतौ न्यसेत् ॥ २६

उक्तपूजामन्त्रकलापग्रहणमुक्तम् ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

मन्त्री कृतरक्तानुलेपन इति न्यासादिभिः मन्त्रात्मत्वमुक्तम् ॥ १९ ॥ २० ॥

पुत्तलिकां मन्त्रीति । मन्त्रं जपता पुत्तलीका कार्येत्युक्तम् ॥ २१ ॥

गुर्वादेशविधानत इति । प्रतिकृतिहृदि प्राणप्रतिष्ठायन्त्रस्थापनपूर्वकमित्यर्थः । वक्ष्यमाणादौ प्राणप्रतिष्ठाप्रकारभेदश्चाऽनेन सूचितः ॥ २२ ॥

स्वाङ्गे प्रतिकृतावपीति । स्वाङ्गे कर्मोपक्रम एव न्यासः कार्यः ॥ २३—३१ ॥

अङ्गुष्ठसन्धिप्रपदजङ्घाजानूरुपायुषु ।
सलिङ्गनाभिजठरहृदयेषु स्तनद्वये ॥ २७
कम्बराचिबुकास्येषु घ्राणदृक्कर्णयुग्मके ।
ललाटशिरसोर्न्यस्येत् प्रतिमायाञ्च संघशः ॥ २८
उपलिप्तेऽथ कुण्डेऽन्तर्बहिर्गोमयवारिणा ।
साध्यसंमुखमासीन आदध्याद्धव्यवाहनम् ॥ २९
प्रज्वाल्य साध्याद्भुतरुकाष्ठैरभ्यर्च्य दिक्क्रमात् ।
राजीकुशौतपुष्पाद्भिश्चषके राजतादिके ॥ ३०
देवतां प्रति पाद्यार्घ्यं दत्त्वा कार्यार्थसिद्धये ।
उपतिष्ठेद्धुतस्यादावन्ते मन्त्रैरितीरितैः ॥ ३१
त्वमाननममित्रघ्न निशाया हव्यवाहन ।
हविषा मत्प्रदत्तेन तृप्तो भव तया सह ॥ ३२
जातवेदो महादेव तप्तजाम्बूनदप्रभ ।
स्वाहापते विश्वभच्च लवणं दह शत्रुहन् ॥ ३३
ईशे शर्वरि शर्वाणि ग्रस्तं मुक्तं त्वया जगत् ।
महादेवि नमस्तुभ्यं वरदे कामदा भव ॥ ३४
तमोमयि महादेवि महादेवस्य सुव्रते ।
वियामे पुरुषं हुत्वा वशमानय देव्यु[हि]मे ॥ ३५
दुर्गे सर्गादिरहिते दुर्गसंरोधनार्गले ।
चक्रशङ्खधरे देवि दुष्टशत्रु[सत्त्व]भयङ्करि ॥ ३६
नमस्ते दह शत्रून् मे वशमानय चण्डिके ।
शाकम्भरि महादेवि शरणं मे भवाऽनघे ॥ ३७
भद्रकालि भवाभीष्टे भद्रसिद्धिप्रदायिनि ।
सपत्नान् मे हन हन दह शोषय तापय ॥ ३८
शूलासिशक्तिवज्राद्यैरुत्कृत्योत्कृत्य मारय ।
महादेवि महाकालि रक्षाऽस्मानक्षतात्मिके ॥ ३९

[उपस्थानमन्त्रं दर्शयति—त्वमाननमित्यष्टभिः । इति सम्बन्धदीपिकायाम् ।
क्वचित् 'वियामे' इत्यत्र 'स्त्रिया मे पुरुषं गत्वा' इति पाठः ।

पुनः प्रतिकृतेरङ्गसप्तकं निशितायसा ।
दक्षपादादिकं छित्त्वा पञ्चर्चं प्रजपेन्मनुम् ॥ ४०
साध्यं संस्मृत्य शितधीर्जुहुयात् सप्तसंख्यया ।
दक्षिणं चरणं पूर्वं ततो दक्षार्धकं पुनः ॥ ४१
दक्षहस्तं तृतीयं स्याद्गलादूर्ध्वं चतुर्थकम् ।
पञ्चमं वामहस्तं स्यात् षष्ठं वामार्धमेव च ॥ ४२
सप्तमं वामपादं स्यादन्याऽपि स्याद्धुतक्रिया ।
सप्त सप्त विभागो वा क्रमादङ्गेषु सप्तसु ॥ ४३
एकादशांशभिन्नैर्वा तदङ्गैः सप्तभिर्हुनेत् ।
होमोऽन्यथा वा पूर्वन्तु दक्षिणं चरणं भवेत् ॥ ४४
द्वितीयो दक्षिणकरस्तृतीयं शिर उच्यते ।
वामबाहुश्चतुर्थन्तु मध्यादूर्ध्वन्तु पञ्चमम् ॥ ४५
अधोभागस्तु षष्ठः स्याद्वामपादस्तु सप्तमः ।
हुत्वैवं पूर्वसंप्रोक्तैरुपस्थाय च मन्त्रकैः ॥ ४६
अर्चयित्वा दण्डदीर्घं प्रणमेद्व्यवाहनम् ।
सस्वर्णाञ्च समुक्तां गां शोणां दद्यात् सतर्णकाम् ॥ ४७
दक्षिणां सप्तकर्षन्तु दद्यान्मारणकर्मणि ।
अंशुकं रुचकं धान्यं दत्त्वा संप्रीणयेद्गुरुम् ॥ ४८
एवं कृतेन मन्त्रीष्टं लभते होमकर्मणा ।
अथवा मारणाकाङ्क्षी साध्यवामाङ्घ्रिपांशुभिः ॥ ४९
सनिम्बतिलसिद्धार्थव्रणकृत्तैलसंयुतैः ।
हिङ्गुत्रिकटुकोपेतैर्महिषीमूत्रपेषितैः ॥ ५०
वराहपारावतयोः पुरीषेण समन्वितैः ।
एतैर्विमिश्रयित्वा तु लोणं पूर्वोक्तसंख्यकम् ॥ ५१
पूर्ववत् पुत्तलीं तेन लोणचूर्णेन कारयेत् ।
प्राणान् प्रतिष्ठापयेच्च तत्र पूर्वोक्तसंख्यया ॥ ५२

सस्वर्णाञ्च समुक्तामित्यत्र सकर्षस्वर्णयुक्तामिति क्वचित् । मूत्रपेषितैरित्यत्र मूत्रविड्विषैरिति क्वचित्] ॥ ३२—५६ ॥

पूर्वोक्ताभिः पुत्तलीभिः कुण्डे दक्षिणदिङ्मुखः ।
दुर्गां वा भद्रकालीं वा प्रणिपत्य यथोचितम् ॥ ५३
उपस्थितेऽर्धरात्रे तु सव्यपाणिस्थशस्त्रकः ।
वामपादं समारभ्य जुहुयात् पूर्वसंख्यया ॥ ५४
समापयेद्दक्षपादे विकारेणाऽयसो वशी ।
विसप्ताहप्रयोगेण मारयेद्रिपुमात्मनः ॥ ५५
तस्यां रात्रामुपोष्याऽथ परेऽहनि तु साधकः ।
प्राणायामादिभिरपि गायत्रीजपहोमकैः ॥ ५६
विमुक्तपातको भूत्वा स पुनर्विहरेद्वशी ।
यां कल्पयन्त्यपामार्गराजीघृतहवींषि च ॥ ५७
पृथगष्टोत्तरशताहुत्या हुत्वा बलिं हरेत् ।
दशस्वाशासु दिवि च मन्त्रैरेतैर्यथाक्रमम् ॥ ५८

यो मे पूर्वगतः पाप्मा पावकेनेह कर्मणा इन्द्रस्त्वं देवो राजा जम्भयतु स्तम्भयतु मोहयतु वशयतु मारयतु नाशयतु बलिं तस्मै प्रयच्छतु कृतं मम शुभं मम शिवं मम शान्तिः स्वस्त्ययनं मम ।

यो मेऽग्निगतः । यो मे यमगतः । यो मे निर्ऋतिगतः । यो मे वरुणगतः । यो मे वायुगतः । यो मे सोमगतः । यो मे ईशानगतः । यो मे अधोगतः । यो मे ऊर्ध्वगतः । यो मे पातालगतः ।

यो मे दिवि गतः पाप्मा पावकेनेह कर्मणा सूर्यस्त्वं देवो राजा जम्भयतु स्तम्भयतु मोहयतु वशयतु मारयतु नाशयतु बलिं

यां कल्पयन्तीत्यस्य ब्रह्मानुष्टुप्प्रत्यङ्गिरस ऋष्याद्याः । ॐ बीजम् । क्रीं शक्तिः । अष्टचतुश्चतुःषड्भिरक्षरैरङ्गानि । भ्रूमध्यनयनद्वयगलबाहुद्वय-कक्षाभिपार्श्वद्वयकटिद्वयाम्बुपादद्वयेषु न्यासः । खड्गचर्मधरा क्षामा मुक्तकेशी दिगम्बरा सदंष्ट्रा ससर्पा[र्वा]भरणा भक्षितारिर्ध्येया ।

यां कल्पयन्ति नोऽरयः क्रूरां कृत्यां वधूमिव ।
तां ब्रह्मणाऽपनिर्नुन्नः प्रत्यक्कर्तारमृच्छतु ॥ इति मन्त्रः ॥ ५७ ॥ ५८ ॥

[अनेन मन्त्रेणोक्तद्रव्यैरुक्तसंख्यं हुत्वा बलिं दद्यादित्याह—यो इति ।

तस्मै प्रयच्छतु कृतं मम शुभं मम शिवं मम शान्तिः स्वस्त्ययनं मम। यो मे सर्वगतः।

एवं दिशासु दशसु देवताभ्यो बलिं हरेत्।
बलावेवं कृते शत्रोराशु कृत्या प्रणश्यति ॥ ६०
प्रणवयुगलं भूयुग्मान्तस्थितं ठगतच्च
तद्वसुकुलिशगं तेषां मध्ये ध्रुवं भुवमन्तरा।
अमरपतिदिक्कोणे ग्लौं पाशाङ्कुशान्तरमायया
वलयितमथो जम्भाद्यष्टौ लिखेत् कुरुते जडम् ॥ ६१
जम्भयस्तम्भयौ वीक्ष्या तथा बन्धयमोहयौ।
इत्यनन्तास्तथा स्युस्ते जम्भाद्यष्टौ द्विठान्तिकाः ॥ ६२
अथवा लवणैः परागभूतैर्मधुराक्तैः पुनरष्टमीनिशाद्यम्।
जुहुयाच्च चतुर्दशीनिशान्तं कुड्वोन्मितमेभिरेव मन्त्रैः ॥ ६३

नारीं नरं वा नगरं नृपान् वा
ग्रामान् जनान् वा मनसोऽनुरूपम्।
वशीकरोत्येव हुतक्रियेयं
चिराय नैवाऽत्र विचारणीयम् ॥ ६४

इति लवणमनोर्विधानमेवं प्रणिगदितं विविधप्रभेदभिन्नम्।
विधिवदमुमादरेण संप्रयुञ्जन् व्रजति फलं निजवाञ्छितं चिराय ॥

इति श्रीप्रपञ्चसारे द्वात्रिंशः पटलः।

इत्यादिमन्त्रेष्वाद्यन्तौ मन्त्रौ पूर्णपुटितौ। इतरेऽपि तथैव ऊह्याः ॥ ५८ ॥ ५९ ॥

बलिप्रदानप्रकारमाह—दशस्विति ॥ ६० ॥ ६१ ॥ ६२ ॥

मधुरत्रयाक्तलवणचूर्णमुद्राभिः वश्याकर्षणादिषु जुहुयादित्यभिधत्ते—अथवेति ॥ ६२ ॥ ६३ ॥

अस्य मन्त्रस्याऽन्येऽपि विविधभेदाः सन्तीति सूचयन् उपसंहरति—इति लवणमनोरिति। इति सम्बन्धदीपिकायाम् ॥ ६४ ॥]

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
द्वात्रिंशत्पटलः।

त्रयस्त्रिंशः पटलः ।

अथाऽभिवच्ये महितस्य मन्त्रस्याऽनुष्टुभः संग्रहतो विधानम् ।
ऋष्यादिकैरङ्गपदैर्यथावद्दीक्षाजपार्चाहवनक्रमेण ॥ १
ऋषिरभिहितो वशिष्ठस्छन्दोऽनुष्टुप् च देवता रुद्रः ।
त्र्यम्बकपदादिकः स्यान्मनुनाऽमुनैव षड्ङ्गकृन्निरिह कथिता ॥ २
त्रिभिस्तु वर्णैर्हृदयं शिरश्च चतुर्भिरष्टाभिरथो शिखा च ।
उक्तं नवार्णैः कवचं तथाऽक्षि पञ्चार्णकं त्र्यम्बकमस्त्रमाहुः ॥ ३
प्राक्प्रत्यग्याम्यसौम्ये शिरसि च वदनोरोगलांसेषु नाभौ
हृद्देशे पृष्ठकुक्ष्योरथ शिवगुदयोरूरुमूलान्तयोश्च ।
जान्वोस्तद्वृत्तयुग्मस्तनतटयुगपार्श्वेषु पत्याणिनासा-
शीर्षेष्वप्यूर्ध्वतोऽर्णैर्न्यसतु पुनरधस्तोऽपि मन्त्री तथोर्ध्वम् ॥ ४
चरणाग्रसन्धिगुह्याधारोदरहृदयकन्धरासु पुनः ।
बाह्वोः सन्ध्यग्रास्यौष्ठघ्राणदृक्श्रुतिभ्रूशीर्षेषु ॥ ५
वर्णान् न्यस्य शिरोभ्रूदृग्वक्त्रगलहृदुदरगुह्येषु ।
ऊर्वोर्जान्वोः पदयोः पदैश्च मनुवित् क्रमेण विन्यस्येत् ॥ ६
वशिष्ठादिक्रमेणैव अङ्गन्यासं समाचरेत् ।
वशिष्ठस्त्र्यम्बकश्चैव त्रिनेत्रश्च तथैव च ।
अनुष्टुप्छन्दसे चेति जातियुक्तेन मन्त्रवित् ॥ ७
अच्छः स्वच्छारविन्दस्थितिरुभयकराङ्कस्थितं पूर्णकुम्भं
द्वाभ्यां वेदाक्षमाले निजकरकमलाभ्यां घटौ नित्यपूर्णौ ।
द्वाभ्यां तौ च स्रवन्तौ शिरसि शशिकलाबन्धुरे प्लावयन्तौ
देहं देवो दधानः प्रदिशतु विशदाकल्पजातः श्रियं वः ॥ ८

मारणवश्यादिकर्तुरायुःक्षयत्वसंभवादायुःप्रदं मन्त्रं वक्तुमारभते – अथाऽभिवच्य इति [मन्त्रोऽयं वैदिकत्वान्नोक्तः] ॥ १ ॥ २ ॥ ३ ॥

मन्त्री तथोर्ध्वमिति । प्रणवशक्तिप्रासादयोग उक्तः । ॐ बीजम् । ह्रीं शक्तिः ॥ ४ ॥ ५ ॥ ६ ॥

मन्त्रविदिति । पञ्चाक्षरप्रणवशक्तिबीजयोगः सूचितः ॥ ७ ॥ ८ ॥

प्रासादोक्ते च पीठे गव्यैर्वा दुग्धतरुकषायैर्वा ।
संपूर्य कलशमस्मिन् महेशमावाह्य पूजयेद्भक्त्या ॥ ९
अङ्गैराद्याऽर्काद्यैः पुनरावृतिरष्टभिर्द्वितीया स्यात् ।
मन्त्रार्णशक्तिभिः स्युः पुनश्चतस्रो दिशामवज्राद्यैः ॥ १०
अर्केन्दुधरणितोयानलेरवियदात्मसंज्ञकास्ते च ।
आनुष्टुभमित्यष्टावरणं प्रोक्तं विधानवरमेवम् ॥ ११
रमा राका प्रभा ज्योत्स्ना पूर्णीषा पूरणी सुधा ।
विश्वा विद्या सिता प्रज्ञा सारा सन्ध्या शिवा निशा ॥ १२
आर्द्रा प्रज्ञा प्रभा मेधा कान्तिः शान्तिर्धृतिर्मतिः ।
धरोमा पावनी पद्मा शान्ताऽमोघा जयाऽमला ॥ १३
द्वात्रिंशदिति निर्दिष्टाः शक्तयोऽनुष्टुभः क्रमात् ।
शिवानुभावतो नित्यं जगदाप्याययन्ति याः ॥ १४
इति परिपूज्य महेशं कलशजलैः समभिषेचयेच्छिष्यम् ।
कनकांशुकरत्नाद्यैर्गुरुमपि परिपूज्य मनुमतः सिद्ध्यै ॥ १५
प्रजपेल्लक्षावृत्त्या द्रव्यैर्जुहुयाज्जपावसाने च ।
बिल्वपलाशौ खदिरवटसिद्धार्थदौग्धदुग्धानि ॥ १६
दधि दूर्वेति दशैतान्याज्यसमेतानि होमवस्तूनि ।
एकैकशः सहस्रं दशभिर्हुत्वा प्रतर्प्य विप्रांश्च ॥ १७
भवति नरः सिद्धमनुर्मन्त्रेण च सर्वकर्मकर्ता स्यात् ।
बिल्वैरयुतं हुत्वा महतीं लक्ष्मीमवाप्नुयाद्विप्रः ॥ १८
तावद्भिर्द्विजवृक्षैर्द्विजः श्रियं पुष्कलामवाप्नोति ।
खदिरसमिदयुतहोमात्तेजोबलपुष्टिमाप्नुयादिष्टाम् ॥ १९
न्यग्रोधायुतहोमाद्धनधान्यसमृद्धिमेति न चिरेण ।
अयुतं तिलैः प्रजुह्वन्नपमृत्योः पाप्मनो विमुक्तः स्यात् ॥ २०
सिद्धार्थायुतहोमैर्वैरिणमपमृत्युमपि विनाशयति ।
पायसहुतेन परमां रमामथायुर्यशो लभेन्मर्त्यः ॥ २१

प्रासादोक्ते पीठे कलशमापूर्य तस्मिन् भगवन्तमावाह्य पूजयेदित्याह—प्रासादोक्त इति। अष्टमूर्तीराह—अर्केति। मन्त्रवर्णशक्तीराह—रमेति। ['प्रभा'

दुग्धहुताच्छान्तिः स्यात् परकृत्या नश्यति श्रियं लभते ।
दधिहोमतोऽन्नवान् स्यात् संवलनकरं च तद्वदन्ति बुधाः ॥ २२
दूर्वायुतेन जुह्वन् रोगान्निर्वास्य सर्वमपमृत्युम् ।
गर्वितधीरब्दानां विप्रवरः सर्वथा शतं जीवेत् ॥ २३
निजजन्मदिने पयोऽम्बसा वा शतवीर्यावितयैः पयोघृताक्तैः ।
जुहुयाच्च शतं च विंशतिं यः स लभेदायुररोगितां चिराय ॥ २४
काश्मर्यदारुसमिधां त्रिशतं समेत-
सर्पिः पयोऽन्नसहितं त्रिदिनं जुहोतु ।
विप्रान् प्रतर्प्य च गुरून् परिपूज्य सम्य-
ग्दीर्घं विमुक्तगदमायुरवाप्तुकामः ॥ २५
स्नात्वा चाऽर्कमुखोऽम्भसि स्थित इमं मन्त्रं सहस्रं जपे-
दायुष्यं प्रतिपर्व दुग्धहविषा होमो महाश्रीप्रदः ।
लाजाभिर्निजवाञ्छिताय हवनात् कन्याशु संदीयते
स्वाद्वक्तस्तनजद्रुहोमविधिना वर्णान् वशे स्थापयेत् ॥ २६
गायत्रिवर्णपरिपूर्णतनुश्च भानु-
स्त्रिष्टुब्विशिष्टमहिमा महितः कृशानुः ।
आनुष्टुभाक्षरसमग्ररुचिः शशाङ्को
ददुः समुद्यतममी परिवाञ्छितं वः ॥ २७
एभिस्त्रिभिर्मनुवरैस्तु शताक्षराख्यो
मन्त्रोऽभिकाङ्क्षितफलाप्तिदकामधेनुः ।
प्रोक्तो हिताय जगतां मुनिभिः कृपार्द्र-
चित्तैर्यथोक्तमथ संग्रहतो वदामि ॥ २८
ऋष्याद्याः पूर्वोक्तास्त्रिविधाः स्युर्हृत्त्रयोदशभिर्वर्णैः ।
शिर एकादशभिश्च द्वाविंशद्भिस्तथा शिखा कवचम् ॥ २९

इत्यत्र परेति 'कान्ति'रित्यत्र कीर्तिरिति क्वचित्] ॥ ९—२६ ॥

आयुःप्रधानमेव शताक्षरमाह—गायत्रिवर्णेति । अनेनैव गायत्रीध्यान-वदेवाऽस्य सकलस्य ध्यानमुक्तं भवति । त्रिष्टुबनुष्टुभौ तु तस्याः सामर्थ्यप्रकाश-रूपाविति च ॥ २७ ॥ २८ ॥

नयनं पञ्चदशार्णैः ससप्तभिर्दशभिरस्त्रमङ्गविधिः ।
विन्यासश्च मनूनां मन्त्रज्ञः पूर्ववत् क्रमात् कुर्यात् ॥ ३०
स्मर्तव्याखिललोकवर्ति सततं यज्जङ्गमं स्थावरं
व्याप्तं येन च यत्प्रपञ्चविहितं मुक्तिश्च यत्सिद्धितः ।
यद्वा स्यात् प्रणवत्रिभेदगहनं श्रुत्या च यद्गीयते
तद्वः काङ्क्षितसिद्धयेऽस्तु परमं ज्योतिस्त्रयीत्थं महः ॥ ३१
लक्षायतो जपविधिः शताक्षरस्याऽथ होमविधिरुक्तः ।
अयुतावधिको द्रव्यं दौग्धान्नं सर्पिषा समायुक्तम् ॥ ३२
सौरे पीठे पूजा प्रोक्तैरङ्गैः समावृतिः प्रथमा ।
प्रह्लादिन्याद्याभिस्तिस्रः प्रोक्ताः क्रमात् समावृतयः ॥ ३३
पञ्चम्यावृतिरुक्ता त्रैष्टुभ इव जागतादिभिस्तदनु ।
स्याच्च रमादिभिरावृतिचतुष्कमुक्तं दशम्यथेन्द्राद्यैः ॥ ३४
इति शताक्षरमन्त्रसमर्चना निगदितेह दशावरणायुधैः ।
प्रभजतामभिकाङ्क्षितसिद्धये निखिलसंसृतिमोक्षपदाप्तये ॥ ३५
दुग्धाक्तैर्जुहुयात् सहस्रममृताकाण्डैस्तु दीर्घायुषे
दूर्वाणां चितयैस्तथा घृतपयःसिक्तैर्घृतेनैव वा ।
लक्ष्म्यै कोकनदैश्च शोणरुचिभिस्त्रिस्वादुयुक्तैस्तथा
रक्तैरुत्पलकैस्तदङ्कि विकचैर्बैल्वैः प्रसूनैरपि ॥ ३६
अनुदिनमघशान्त्यै संयतात्मा सहस्रं
प्रतिजुहुतु तिलैर्वा मन्त्रविन्मासमेकम् ।
अपि दिनकरसंख्यान् भोजयीत द्विजातीन्
विविधरसविशिष्टैर्भक्तितो भोज्यजातैः ॥ ३७
शतं शतं प्रातरतन्द्रितोद्यतो जपेद्द्विजो मन्त्रममुं शताक्षरम् ।
आरोग्यजुष्टं बहुलेन्द्रियायुतं शतं प्रजीवेच्छरदां सुखेन सः ॥ ३८
सर्वान् कामानवाप्नोति मन्त्रमेनं जपेत् तु यः ।
सर्वं साधयते मन्त्री अस्त्रशस्त्रादिलक्षणम् ॥ ३९

मन्त्रज्ञः पूर्ववदिति । अजपापरमात्मयोग उक्तः ॥ २८—३५ ॥
मन्त्रवित् मासमिति । मृत्युञ्जययोग उक्तः ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

प्रणवव्याहृत्याद्या व्याहृतितारान्तिका च मन्त्रिवरैः ।
जप्या शताक्षरी स्यादिह परलोकप्रसिद्धये दिनशः ॥ ४०

मनुममुमथ शान्त्यै तत्पदाद्यं प्रजप्याद्-
गदगणरहितायाऽप्यायुषेऽनुष्टुबाद्यम् ।
विमलमतिररातिध्वंसने त्रिष्टुबाद्यं
दिनमनु दिनवक्त्रे वत्सरं संयतात्मा ॥ ४१

शताक्षरमनोरयं क्रम उदीरितः संग्रहा-
द्भजेदमुमतन्द्रितो दिनश एव मन्त्री रहः ।
अभीष्टफलसिद्धये सुयशसे च दीर्घायुषे-
ऽप्यशेषजनरञ्जनाय चिरमिन्दिरावाप्तये ॥ ४२

संवादसूक्तविहितं विधानमथ साङ्गदेवतारूपम् ।
वक्ष्यामि साधकानामनुदिनमभिवाञ्छितप्रदानकरम् ॥ ४३

ऋषिरपि संबलनोऽस्याऽनुष्टुप्सत्रिष्टुबुच्यते छन्दः ।
संवादाद्यः प्रोक्तः संज्ञानाद्यश्च देवता चाऽग्निः ॥ ४४

ब्रह्माख्यो हृदयमनुः शिरश्च विष्णू
रुद्रः स्यादिह तु शिखेश्वरश्च वर्म ।
नेत्रत्वे भवति सदाशिवस्तथाऽस्त्रं
सर्वात्मेत्यथ कथितं षड्ङ्गमेवम् ॥ ४५

धवलनलिनराजचन्द्रमध्ये निषण्णं
करविलसितपाशं साङ्कुशं साभयञ्च ।
सवरदममलेन्दुक्षीरगौरं त्रिनेत्रं
प्रणमत सुरवक्त्रं मङ्क्षु संवादयन्तम् ॥ ४६

मन्त्रिवरैरिति । व्याहृत्यनन्तरमजपामृत्युञ्जयपरमात्ममन्त्रयोग उक्तः ॥ ४० ॥

विमलमतिररातीति । तत्तन्मन्त्रादित्वे तत्तन्मन्त्रोक्तध्यानं सूचितम् ॥ ४१ ॥

मन्त्री रह इति । तत्तत्कार्यानुगुणबीजयोग उक्तः । गायत्र्यक्षराणि बीजानि । त्रिष्टुबक्षराणि शक्तयः ॥ ४२ ॥

सं समिद्युवस इत्याद्यृक्चतुष्टयात्मकसंवादसूक्तविधानं वक्तुम् उपक्रमते— संवादेति । संवादस्य तृतीया ऋग् बीजम् । द्वितीया शक्तिः । संवादाद्य

सहस्रकाणां दशकैश्चतुर्भिरथो सहस्रैश्च चतुर्भिरन्वितम् ।
जपेन्मनुं सम्यगथाऽभिदीक्षितः पयोऽम्बसाऽन्ते जुहुयाद्दशांशकम् ॥
यजेत् पुराऽङ्गैश्च तदर्चनाविधौ पुनर्द्वितीयावरणेऽग्निमूर्तिभिः ।
अनन्तरञ्च त्रिदशेश्वरादिभिः क्रमेण वह्निं विधिनेति पूजयेत् ॥
संवादसूक्ते विधिनेत्यनेन संसाधिते कर्म करोतु मन्त्री ।
चतुःशतञ्चापि दशोत्तरेण चतुश्चतुष्कं प्रजपेद्धुनेच्च ॥ ४९
पायसेन मधुरत्रयभाजा विप्रराजतरुजैः कुसुमैर्वा ।
सर्पिषा स्तनजवृक्षसमिद्भिर्वाञ्छितार्थविधये प्रजुहोतु ॥ ५०
जुहुयात् कलाचतुष्कैः प्रत्यृचमायोज्य कादिवर्गचतुष्कैः ।
तद्वच्च पयशलादौर्वर्गैः संयोज्य पूर्वसंख्यकं मतिमान् ॥ ५१
तद्वद्दृचं प्रतियोज्य त्रिष्टुप्पादांश्च पूर्वसंख्येन ।
जुहुयात् सर्पिःसिक्तं पायसमचिरेण कार्यसमवाप्तौ ॥ ५२

इति । संवादसंज्ञानाग्निः देवतेत्यर्थः ॥ ४३॥४४॥४५॥४६॥४७ ॥

आग्नेये पीठे पूजा ॥ ४८ ॥

कर्म करोतु मन्त्रीति । होमतर्पणजपकर्मसु प्रयुज्यमानमन्त्राणां प्रणवशक्तिपूर्वकत्वमुच्यते । चतुःशतं चापीति । त्रिष्टुप् (स्वत्रिष्टुब्क्स्वत्रिष्टुब्क्) स्वत्रिष्टुप् त्रिष्टुबनुष्टुब् गायत्री महागणपति पादमन्त्र व्याहृत्यनुकूलमन्त्रैः सह सूक्तं दशधाऽऽवर्त्य वैश्वानर जातवेद इहावह लोहिताच्च सर्वकर्माणि साधय स्वाहा । ॐ भूर्भुवःस्वः स्वाहा । ॐ भूर्भुवःस्वः अग्ने जातवेद इहावह सर्वकर्माणि साधय स्वाहा । उत्तिष्ठ पुरुष हरिपिङ्गल लोहिताच्च सर्वकर्माणि साधय स्वाहा । इत्यग्निमन्त्रान् सकृत् सकृदावर्तयेदित्यर्थः । प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय स्वाहा । इत्यनुकूलमन्त्रः । होमादिकमप्येवमेव कार्यम् ॥ ४९॥५० ॥

कलाचतुष्कैः प्रति ऋचमायोज्येति । ॐ क्लीं अं आं इं ईं इति उक्त्वा सं समिद्युवस इत्यस्या ऋचोऽन्ते स्वाहेति तर्पयामीति वा वदेत् । एवमेव ॐ क्लीं उं ऊं ऋं ॠं संगच्छध्वमित्यादिकमूहयेत् । एवं मातृकां सप्तत्रिंशद्वारमावर्तयेत् । एवं कृते संख्या पूर्णा भवति मिश्रहोमपक्षे । अमिश्रहोमपक्षे तु अष्टादशवारमेवमेव मातृकामावर्तयेत् । आदावन्ते च त्रिष्टुब्महागणपत्यग्निमन्त्रैः होमादिकमाचरेदित्यर्थः । एतत् सर्वं सूचितं मतिमानिति ॥ ५१ ॥

ऋचं प्रतियोज्य त्रिष्टुप्पादानिति । चतुष्पादा अष्टपादा वा त्रिष्टुप्पादाः ।

प्रतिपादमथर्क्पादं प्रतियोज्य जुहोतु पूर्ववन्मतिमान् ।
तेनाऽभीष्टावाप्तिर्न चिरेण नरस्य हस्तगता ॥ ५३
अक्षरपादत्रिष्टुब्युक्तैः सूक्तैस्तु पूर्वसंख्येन ।
जुहुयात् समाजरूपं संवादयितुं प्रतर्पयेद्वाऽद्भिः ॥ ५४

अत्रायं योगक्रमः । ॐ क्लीं जातवेदसे सुनवाम सोममिति उक्त्वा सं समिद्युवस इति ऋचम् अभिधाय होमादिकमाचरेत् । ॐ क्लीं अरातीयतो निदहाति वेदः इत्यादिपादत्रयेण सार्धं सूक्तं समापयेत् । एवमेकादशोत्तरशतवारं सूक्ते आवर्तिते सति संख्या पूर्णा भवति मिश्रहोमपक्षे । अमिश्रहोमपक्षे तु पञ्चपञ्चाशद्वारमावर्त्याऽन्ते अग्निमन्त्रचतुष्टयेन होमादिकं कर्तव्यमिति चतुष्पादपक्षः । अष्टपादपक्षेऽपि मिश्रहोमपक्षे चतुष्पादपक्षामिश्रहोमवत् क्रमः । अमिश्रहोमपक्षे तु सप्तविंशतिवारमावर्तनीयम् । आदावन्ते च त्रिष्टुब्महागणपत्यग्निमन्त्रैः होमादिकं कर्तव्यमित्यर्थः ॥ ५२ ॥

प्रतिपादमथ ऋक्पादमिति । पादं पादं प्रतिपादं प्रतिपादमन्त्रम् पादमन्त्रं प्रतीत्यर्थः । ऋचश्च तत्पादाश्च ऋक्पादम् एकैकपादमन्त्रेण सार्धमेकैकाम् ऋचं जपेत् । अथवा एकैकेनैव पादमन्त्रेण चतुर्वारमावर्तितेन सह ऋक्चतुष्टयं जपेत् । पुनरप्यपरेणाऽप्येवं जपेत् । इति पादमन्त्राणाम् ऋचां च संयोगक्रमः । पादमन्त्राणामृक्पादषोड़शकानां च संयोगक्रम एवमेव द्विधा विज्ञातव्यः । तत्र पादमन्त्राणामृचां च संयोगे पक्षद्वयेऽपि मिश्रहोमपक्षे सूक्तस्यैकादशोत्तरशतवारमावृत्तिः कार्या । अमिश्रहोमपक्षे तु पञ्चपञ्चाशद्वारमावृत्त्याऽन्तेऽग्निमन्त्रचतुष्टयेन होमादिकं कर्तव्यम् । पादमन्त्राणामृक्पादसंयोगपक्षद्वयेऽपि मिश्रहोमपक्षे सप्तविंशतिवारमावर्तनीयम् । आदावन्ते च त्रिष्टुब्महागणपत्यग्निमन्त्रैः होमादिकं कर्तव्यम् । अमिश्रपक्षे तु त्रयोदशवारमावर्तनीयम् । आद्यन्तयोः त्रिष्टबनुष्टुब् गायत्र्यग्निमन्त्रचतुष्टय गणपतिचतुर्मूर्ति प्रणवाजपापरमात्ममन्त्रैश्च होमादिकं कर्तव्यमित्यर्थः । भद्रं नो अपि वातय मनः । मरुतामोजसे स्वाहा । इन्द्रो विश्वस्य राजति । शन्नो भव द्विपदे शं चतुष्पदे । इति पादमन्त्राः । मतिमानिति । उक्तमन्त्रसंयोगश्च इत्यर्थः ॥ ५३ ॥

अक्षरपादत्रिष्टुब्युक्तैरिति । पञ्चपञ्चाशदक्षराण्यक्षरशब्दार्थः । पादशब्देन पादमन्त्रा उक्ताः । पादत्रिष्टुब्युक्तैरिति । त्रिष्टुभः पादचतुष्टयेन युक्तैरित्यर्थः ।

अयमत्र क्रमः । ॐ क्लीं भं भद्रं नो अपि वातय मनः । जातवेदसे सुनवाः

उद्दिश्य यद्यदिह मन्त्रितमो जुहोतु
सूक्तैरमा निगदितैस्त्रिविधैश्च मन्त्रैः ।
व्यस्तैर्यथाविभवतो विधिवत् समस्तै-
स्तत्तस्य सिध्यति समग्रमयत्नमेव ॥ ५५

सोममिति उक्त्वा सं समिद्युवसे इति ऋचमुक्त्वा तर्पणादिकं कुर्यात् । पुनः ॐ क्लीं आं मरुतामोजसे स्वाहा । अरातीयतो निदहाति वेदः । संगच्छध्वमित्यादुक्त्वा तर्पणादिकं कुर्यात् । ॐ क्लीं इं इन्द्रो विश्वस्य राजति । स नः पर्षदति दुर्गाणि विश्वा । समानो मन्त्र इत्यादि । पुनः ॐ क्लीं ईं शन्नो भव द्विपदे शं चतुष्पदे । नावेव सिन्धुं दुरितात्यग्निः । समानी वः इत्यादि । पुनरप्येवमेव मातृकासमाप्तिपर्यन्तमावर्तयेत् । अन्त्यपर्याये अपेक्षिताक्षरस्थाने जिह्वामूलीयं योजयेत् । पुनरप्येवमेवावर्तयन् द्वितीय तृतीय चतुर्थपर्यायेषु उपध्मानीयं दुस्पृष्टाक्षरद्वयं चाऽन्त्ये पर्याये अवशिष्टाक्षरस्थाने योजयेत् । पुनरप्येवमेव मातृकां चतुर्वारमावर्तयेत् । मिश्रहोमपक्षे आद्यन्तयोश्च त्रिष्टुबनुष्टुबादि चतुर्दशमन्त्रान् उक्तान् योजयेत् । अमिश्रपक्षे तु जिह्वामूलोयोपध्मानीयाभ्यामेव संयोज्य मातृका द्विवारमावर्तनीया । आद्यन्तयोश्च त्रिष्टुबनुष्टुबादि चतुर्दशमन्त्रान् योजयेत् इति । :क इति जिह्वामूलीयम् । :प इति उपध्मानीयम् । ल्भल्भइत्येतद्द्वयं दुस्पृष्टाक्षरम् ॥ ५४ ॥

मन्त्रितमो जुहोतु सूक्तैरमा निगदितैस्त्रिविधैश्च मन्त्रैरिति । सूक्तैः संसमिदाद्यैः अमा निगदितैः सह पठितैः त्रिविधैर्मन्त्रैः त्रिप्रकारैः मन्त्रैः त्रैपुरैर्मन्त्रैरित्यर्थः । कथं तेषां सूक्तैः सहोच्चारणं कर्तव्यमिति तत्राह—व्यस्तैः समस्तैरिति । व्यस्तानां वाग्भवादिबीजानामाद्येन सूक्तत्रयेण संयोगः समस्तानां चाऽन्त्यसूक्तेनेत्यर्थः । एवं शुद्धाद्येकादशमन्त्रैः सार्धं दशवारमावर्तयेत् । मिश्रहोमपक्षे । अमिश्रहोमपक्षे पञ्चवारं प्रथमतश्च महागणपतिमन्त्रेण सकृत् तर्पणादिकं कुर्यात् । अन्ते च शैवद्वादशाक्षराष्टाक्षरपञ्चाक्षरैः सकृत् सकृत् तर्पणादिकं कुर्यादित्यर्थः । यथाविभवत इति । प्रतिबन्धप्रावल्यानुसारेणेत्यर्थः । विधिवदिति । द्वादशाक्षरादिसंयोग उक्तः । आं ईं औं । ऐं ईं औं इति शुद्धा । ऐं क्लीं सौः इति बाला । ह्रैं ह्क्लीं ह्सौः । ह्सैं ह्स्क्लीं ह्स्सौः । ह्स्रैं ह्स्कलरीं ह्सौः । ह्सरडैं ह्सकलरडीं ह्सरडसौः । ह्सरडसैं ह्सकलरडसीं ह्सरडस्सौः । ह्सरडसह्रैं ह्सकलरडसह्रीं ह्सरडसह्सौः । ह्सरडसक्ष्रैं ह्सकलरडसक्ष्रीं ह्सरडसक्ष्सौः ।

ऋग्वारुणी ध्रुवास्वाद्या या सा त्रिष्टुब्निगद्यते ।
ऋषिर्वशिष्ठस्त्रिष्टुप् च छन्दो वारीट् च देवता ॥ ५६
अष्टभिः सप्तभिः षड्भिः पुनस्तावद्भिरक्षरैः ।
षड्ङ्गानि विधेयानि तन्मन्त्रसमुदीरितैः ॥ ५७
अङ्गुल्यग्रससन्धिमायुशिवसंज्ञाधारनाभिष्वथो
कुक्षौ पृष्ठहृदोरुरोजगलदोःसन्ध्यग्रवक्त्रेषु च ।
गण्डघ्राणविलोचनश्रवणयुग्भ्रूमध्यमस्तेषु वै
सर्वाङ्गेषु तथा न्यसेद्विशदधीर्वर्णैर्मनूत्थैः क्रमात् ॥ ५८
अच्छांशुकाभरणमाल्यविलेपनाढ्यः
पाशाङ्कुशाभयवरोद्यतदोःसरोजः ।
स्वच्छारविन्दवसतिः सुसितः प्रसन्नो
भूयाद्विभूतिविधये वरुणश्चिरं वः ॥ ५९
अङ्गैरष्टभिरष्टभिर्दिशाधिपैः समभिपूज्य वारीशम् ।
कलशजलैः पुनरभिषिञ्चेत् परमगुरुर्मन्त्रजापिनं शिष्यम् ॥ ६०
वसुभिः प्रसाद्य देशिकमथ शिष्यो मनुमिमं जपेल्लक्षम् ।
जुहुयाच्च दुग्धपक्वैरन्नैरयुतं घृताप्लुतैर्मतिमान् ॥ ६१
ऋणियमृणमोचनी स्याज्जपैर्हुतैस्तर्पणैश्च मन्त्रविदः ।
संप्राप्तदुर्गतेरपि सद्यो हृद्याश्च संवहेल्लक्ष्मीम् ॥ ६२
इक्षोः सितस्य शकलैर्घृतसिक्तैर्यश्चतुर्दिनं जुहुयात् ।
सकलोपद्रवशान्त्यै तथर्णमुक्त्यै च सम्पदे सुचिरम् ॥ ६३

हसरडसहरडैं हसकलरडसहरडीं हसरडसहरडसौः इति शुद्धाद्येकादशमन्त्राः । तद्वयुता तत्सयुता तद्रयुता तड्डयुता तत्सयुता तद्वयुता तद्रयुता तड्डयुता बालैवान्या विद्याविद्याः इत्युक्तत्वात् ॥ ५५ ॥

अथ वैदिकमेव ऋणमोचनफलदमनुं दर्शयति—ऋग्वारुणीति । [वैदिकत्वान्नोक्तः] । सुधा कुमुदिनी पूर्णा वारुणी विश्वतोमुखी तरङ्गिणी सुरसा सुशीता व्यापिन्यो वरुणनवशक्तयः ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥

तर्पणैश्च मन्त्रविद इति । व्यस्मदृणपाशं वरुण इति योगः सूचितः । ॥ ६२॥६३॥६४॥६५॥६६॥६७॥६८॥६९ ॥

वेतससमिदयुतहुताद्वृष्टिमकालेऽपि वितनुते वरुणः ।
गव्यक्षीरसमेताक्षिदिनकृताह्निमुखेषु मुदितमनाः ॥ ६४
शतभिषजि समुदितेऽर्के चतुःशतं पायसं हुनेत् सघृतम् ।
ऋणमोचनाय लक्ष्म्या जनसंवननाय शुक्रवारे च ॥ ६५
पाशनिबद्धं वैरिणमङ्कुशसंप्रोतमम्बुधेः पारे ।
ध्यायन् परे क्षिपन्तं वरुणं जुहुयाच्च तथा प्रजपेत् ॥ ६६
पाशनिबद्धं वैरिणमसिनाच्छिद्याशु नाशयन्तममुम् ।
ध्यायन् वेतससमिधो गोमूत्रयुता हुनेत्तदपहत्यै ॥ ६७
दौग्धान्नैर्भृगुवारे घृतसंसिक्तैः कृतश्च हवनविधिः ।
ऋणमोक्षदश्च विविधोपद्रवशमनक्रूद्रमाकरः प्रोक्तः ॥ ६८
पश्चिमसन्ध्यासमये पश्चिमवदनोऽनलं समाराध्य ।
ऋक्षमेनामभिजप्याक्षतुःशतं सकलदुःखशमनाय ॥ ६९
शालीर्घृतसंसिक्ताः सरिदन्तरितो जुहोतु परसेनाम् ।
संस्तम्भयितुं त्रिदिनं सुमना मन्त्री चतुःशताक्षत्या ॥ ७०
प्रत्यङ्मुखोऽथ मन्त्री प्रतर्पयेद्वा जलैः सुशुद्धतरैः ।
यः स ह्युपद्रवाणां रुन्ध्यान्निचयं श्रियं समृच्छति च ॥ ७१
बहुना किमनेन मन्त्रिमुख्यो मनुनाशु प्रसाधयेदभीष्टम् ।
हवनक्रिययाऽथ तर्पणैर्वा सजपैः पाशभृतो महामहिम्नः ॥ ७२

इति श्रीप्रपञ्चसारे त्रयस्त्रिंशः पटलः ।

सुमना मन्त्रीति । मध्ये समुद्रध्यानं मन्त्रे पृथिवीयोगश्चोक्तः ॥ ७० ॥
मन्त्री प्रतर्पयेदिति । उचितबीजयोग उक्तः ॥ ७१ ॥ ७२ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
त्रयस्त्रिंशत्पटलः ।

चतुस्त्रिंशः पटलः ।

अथ यन्त्रविरचनाभिर्मन्त्रविशेषान् बहुप्रकारयुतान् ।
कथयिष्ये मन्त्रविदामैहिकपारत्रिकाप्तये सुधियाम् ॥ १
त्रिगुणितसंज्ञे मायालङ्कृतकोणे तयाऽभिसंवीते च ।
या या विशेषकृन्निस्तां तामपि संग्रहेण समभिदधे ॥ २
कोणोल्लसितसुधाचरगलदमृतस्फुरितवह्निपरिवीतात् ।
बिन्दोर्मध्यगतबीजस्थितां सुधाधारया परिस्रुतया ॥ ३
पूर्णसुषुम्नारन्ध्रां साध्यतनुं संस्मरञ्छिरसि बध्यात् ।
तेनाऽरोगी पुरुषः प्रज्ञावान् दीर्घमायुराप्नोति ॥ ४
शीतांशुमण्डलस्थं कूर्मचतुर्थांत्तकोणलसितमिदम् ।
शीतप्रलिप्तजप्तं कथितं च शिरोरुजाज्वरार्तिहरम् ॥ ५
तद्यन्त्रयुगं विलिखेदभिलषितसाध्यसाधकाख्ययुतम् ।
साध्यमधस्तात् कृत्वा बद्ध्वाऽत्र स्थपितु साधको नित्यम् ॥
विधिनाऽनेन तु सद्यः साध्योऽस्य वशे भवेदयत्नेन ।
तत्तु खनित्वागारे तत्राऽन्नं सिद्धमत्तु वश्यकरम् ॥ ७

पूर्वोक्तानां त्रिगुणितादियन्त्राणां प्रयोगविशेषज्ञापनाय नानाविधमन्त्रविशेषज्ञापनाय नानाविधमन्त्रविशेषविधिप्रदर्शनाय च पटलान्तरमारभते—अथ यन्त्रेति। मन्त्रविदामिति। यन्त्रजीवादिविदामित्यर्थः। सुधियामिति। प्रयोगानुरूपध्यानविदामित्यर्थः ॥ १ ॥

अत्रोच्यमानविशेषेण पूर्वोक्तयन्त्राणां न बाधः किन्तु समुच्चय इत्याह—त्रिगुणितसंज्ञ इति ॥ २ ॥

कोणोल्लसितेति। त्रिगुणितस्य कोणेषु लिखितमायामध्ये उल्लसितसुधाचरात् वकारात् गलितामृतेन स्फुरितमध्यशक्तिवह्निना परिवीतात् बिन्दोः परिस्रुतया सुधाधारया पूर्णसुषुम्नारन्ध्रां साध्यतनुं स्मरन् शिरसि त्रिगुणितं बध्नीयादित्यर्थः। ॥ ३ ॥ ४ ॥

यन्त्रान्तरमाचष्टे—शीतांशुमण्डलस्थमिति ॥ ५ ॥

वश्यकरं यन्त्रमाह—तद्यन्त्रयुगमिति ॥ ६ ॥ ७ ॥

साध्याख्यां शक्तिवक्त्रौ नरहरिमपि रन्ध्रत्रये च त्रिशक्तौ
कर्मालिख्याऽथ लोष्टे सततगमपि संस्थाप्य जप्त्वा स्वशक्त्या ।
आगारे स्थापयित्वा नरमुदकनिधेश्चित्रपत्रे लिखित्वा
दीपाग्नौ तापयित्वा स्त्रियममलधियः सम्यगाकर्षयेयुः ॥ ८
त्रिगुणितविहिता विधयः षड्गुणिते च प्रयोजनीयाः स्युः ।
रक्षाकर्मणि विहितं तत्प्रायः प्रचुरमन्त्रयुक्ततया ॥ ९
पाशाष्टाक्षरवीतशक्तिदहनप्रोल्लासि साध्याह्वयं
शक्तिश्रीस्मरसंवृतं कुयुगरन्ध्राबद्धचिन्तामणि ।
इत्थं षड्गुणितं विलिख्य जपितं मन्त्री दधानोऽसकृ-
द्राज्ञां वामदृशां प्रियो भवति संग्रामे पुरे वा चिरम् ॥ १०
चिन्तारत्नाश्रितास्त्रिवियुगमथ नृसिंहावृतान्तःस्थबीजं
प्रादुः साध्याभिधानं बहिरपि लिपिभिः प्रानुलोमाभिवीतम् ।
क्ष्माबिम्बद्वन्द्वरन्ध्रप्रचितचतुरणं ग्रहोन्मादभूत-
व्याधिघ्नं यन्त्रमस्मिन् कृतकलशविधिर्गर्भरक्षादिकारी ॥ ११
द्वादशगुणितेऽखिलसन्नृसिंहाबीजं महेन्द्रपुरवीतम् ।
शीतालिप्तं पुरलघुधूपितमन्तःप्रबद्धकर्मयुतम् ॥ १२
चतसृषु दिक्षु निखन्यात् सीमायां द्वारतोरणाधो वा ।
देशाभिगुप्तिरेषा गुप्ततमा सूरिभिः पुरा प्रोक्ता ॥ १३
अलदलनिशाकुशीतैर्मसृणे पट्टे विलिख्य यन्त्रमिदम् ।
सेरस्थापनकर्म प्रतिजप्तं प्राङ्गणे खनेन्मन्त्री ॥ १४

आकर्षकरं यन्त्रमाह—साध्याख्यामिति । शक्तिवक्त्राविति । मध्यशक्तिवक्त्रावित्यर्थः । रन्ध्रत्रये कोणत्रय इत्यर्थः । त्रिशक्ताविति । वेष्टनशक्तिष्वित्यर्थः । अमलधिय इति । ध्यानसामर्थ्यमुक्तम् ॥ ८ ॥ ९ ॥

षड्गुणितप्रयोगमाह—पाशाष्टाक्षरेति । मन्त्री दधान इति । धारयितुः शक्तिमन्त्रज्ञता उक्ता । चतुरणं सूर्यचतुरक्षरम् ॥ १० ॥ ११ ॥

वास्तुरक्षाकरं द्वादशगुणितयन्त्रविशेषमाचष्टे—द्वादशगुणित इति ॥ १२॥१३ ॥

कुशीतैर्मन्त्रीति । लेखनद्रव्यस्य मूलेन पूजोक्ता । खनेन्मन्त्रीति । पूजावल्यादि मन्त्रज्ञ इत्यर्थः ॥ १४॥१५ ॥

तत्र विशन्ति न चौरा ग्रहकृत्याः स्यान्निकेतरक्षा च ।
अश्माभिपातवारणमभिवृद्धिः सम्पदाभवेदचिरात् ॥ १५
तद्वद्घटार्गलाख्यं यन्त्रं नीले विलिख्य पट्टवरे ।
मोचकसाध्यप्रतिकृतिहृदये गुलिकां विधाय निःक्षिप्य ॥ १६
क्षिमधुरयुक्ते पात्रे विन्यस्याऽभ्यर्च्य गन्धपुष्पाद्यैः ।
बलिमपि विकिरेद्राक्षिषु सप्ताहादानयेद्वधूमिष्टाम् ॥ १७
तामेवाथ प्रतिकृतिमग्नौ किञ्चित् प्रतापयेज्जपन् ।
शक्तिं पाशाङ्कुशमनुसाध्याह्नविदर्भितां समाहितधीः ॥ १८
विधिनाऽमुना विरावाद्गर्वितधियमपि सुराङ्गनां मन्त्री ।
आकर्षयेन्निजवाञ्छाप्रदायिनीं मदनबाणविह्वलिताम् ॥ १९
यन्त्रं तदेव लाक्षातामावीतं निधाय कलशजले ।
जप्त्वा भानुसहस्रकमभिषिञ्चेद्रजतकाञ्चनाभ्याञ्च ॥ २०
तद्वद्विधाय कलशं तद्यन्त्रं धारयेत् पुनर्नित्यम् ।
वाञ्छितसिद्धिं लभते भक्त्या प्रणमन्ति देवता अपि तम् ॥ २१
यन्त्रं तदेव मन्दिरभित्तावभिलिख्य पूजयेद्दिनशः ।
चौरादिभूतनागा अपि तं देशं न वीक्षितुं शक्ताः ॥ २२
आलिख्य वीरपट्टे यन्त्रमिदं स्वमस्तकार्पितं कृत्वा ।
युध्यन् प्रत्यर्थिनमपि हत्वा यात्यव्रणाङ्कितो योद्धा ॥ २३
गजमदविलिखितमेतद्यन्त्रं जप्तञ्च मस्तके न्यस्तम् ।
करिणीमपि मदयेत् द्राक् चण्डतरे का कथा करेणुवरे ॥ २४
बहुनेति भाषितेन किमेभ्यो मुख्यं न किमपि च यन्त्रेभ्यः ।
तस्मादमूनि सद्भिर्धार्याणि च विश्ववश्यमिच्छद्भिः ॥ २५
गजमृगमदकाश्मीरैर्मन्त्रितमः सुरभिरोचनायुक्तैः ।
विलिखेदलक्तकरसालुलितैर्यन्त्राणि सकलकार्यार्थी ॥ २६

मन्त्रजपादिसहितं घटार्गलयन्त्रमाकर्षणकरमित्याचष्टे—यद्वदिति ॥१६॥१७॥
सुराङ्गनां मन्त्रीति । घटार्गलोक्तषोड़शाक्षरस्यापि जप उक्तः ॥ १८॥१९ ॥
रजतकाञ्चनाभ्यां चावीतमिति अनुषज्यते । प्रयोगान्तरं चैतत् ॥ २०—२५ ॥
मन्त्रितम इति । यन्त्रसामान्यम्नः इत्यर्थः ॥ २६ ॥

राज्या पटुसंयुतया समाशशक्त्यङ्कुशेन मन्त्रेण ।
स्वाहक्तयाऽभिजुह्वन् निश्युर्वीशांस्तथोर्वशीं वशयेत् ॥ २७
हृल्लेखाग्निस्थसाध्याह्वयमथ बहिरांक्रोंवृतं वह्निगेह-
द्वन्द्वास्त्रिस्वस्तिकाढ्यं प्रतिलिखतु दले यन्त्रकं नागवल्ल्याः ।
जप्त्वा शक्तिं तु पाशाङ्कुशलिपिसहितां तापयेद्दीपवह्नौ
नक्तं भक्त्या नताङ्गी स्मरशरविवशा प्रेमलीलाऽभियाति ॥ २८
शक्तिस्थं निजनाम वह्निभवनद्वन्द्वोदरे मान्मथं
बीजं साध्यविदर्भया परिवृतं शक्त्या बहिः पार्थिवम् ।
तत्कोणे स्मरमन्यपुष्टनयनप्रोत्थैः पुनः कण्टकै-
स्ताम्बूले लिखिताभिजप्तमदयेद्योषिन्मनोमोहनम् ॥ २९
शक्त्यन्तःस्थितसाध्यनाम परितो बीजैश्चतुर्भिः समा-
बद्धं शक्तिमनोभवाङ्कुशलिपिप्रोक्तैः समावेष्टितम् ।
शाल्युत्थे प्रतिलिख्य पिष्टविकृतौ प्राणान् प्रतिष्ठाप्य च
विस्वादौ परिभर्ज्य तत्समदतः साध्यो वशे तिष्ठति ॥ ३०

सान्तं शिखीलवयुतं दहनांशसाध्यं
मायांशसाधकमथाऽभिवृतं कलाभिः ।
मध्योल्लसद्द्विमुखशूलमिदन्तु भर्त्तु-
र्यन्त्राह्वयं नरनताङ्गिवशीकरं स्यात् ॥ ३१

मृत्काराङ्गुलिकात्तया सकृकलासान्तर्वसायुक्तया
साध्यस्याऽङ्घ्रिरजोयुजा मृदुमृदा कृत्तस्य शक्तिं हृदि ।
रूपस्याऽभिविलिख्य तद्विवरके साध्यं तदीरान् प्रति-
ष्ठाप्याजप्य निखन्य तत्र दिनशो मेहेच्चिरं वश्यकृत् ॥ ३२

स्त्रीवश्यकृद्यन्त्रमाह—हृल्लेखेति । बहिरिति । मध्यशक्तेः बहिरित्यर्थः ॥२८॥

अन्यदप्याह—शक्तिस्थमिति ॥ २९ ॥

वश्यकृदपरं यन्त्रमाचष्टे—शक्त्यन्तरिति । समावेष्टितमिति । समावद्धमित्यस्य व्याख्या ॥ ३० ॥

वश्यकरं यन्त्रविशेषमाचष्टे—सान्तमिति । शिखीलवेति । शिखी ई लवेति पदच्छेदः । यन्त्रान्तरमाह—मृत्कारेति ॥ ३१ ॥ ३२ ॥

वामाच्याः प्रतिलिख्य नाम निशया वामोरुदेशे निशा-
मध्ये वामकरेण संशितमतिः संछादयंस्तन्मनाः ।
पूर्वं रुद्रपदं ततश्च दयिते योगीश्वरि त्विन्दुम-
न्मन्त्रं जप्यति चेदनङ्गविवशां सद्यः प्रियामानयेत् ॥ ३३
मायाहृदोरथाऽन्ते ब्रह्मश्रीराजितेऽक्षरान् प्रोक्त्वा ।
राजयुतपूजितेऽर्णान् जये सविजये सगौरि गान्धारि ॥ ३४
त्रिभुवनवशङ्करीति च सर्वलोकान्तिके वशङ्करि च ।
सर्वस्त्रीपुरुषवशङ्करि सुदुर्गे वाक्षरान् प्रवीक्ष्य ततः ॥ ३५
मायाद्विठान्तिको मनुरेकाधिकषष्टिवर्णकः प्रोक्तः ।
ऋषिरस्याऽजो निवृच्छन्दो गौरी च देवता प्रोक्ता ॥ ३६
सचतुर्दशभिर्दशभिस्तथाऽष्टभिश्चाऽष्टभिस्तथा दशभिः ।
एकादशभिर्मन्त्राक्षरैः क्रमादुच्यते षड्ङ्गविधिः ॥ ३७
असकलशशिराजन्मौलिराबद्धपाशा-
ङ्कुशरुचिरकराब्जा बन्धुजीवारुणाङ्गी ।
अमरनिकरवन्द्या त्रीक्षणा शोणलेपां-
शुककुसुमयुता स्यात् सम्पदे पार्वती वः ॥ ३८
अयुतं प्रजपेज्जुहुयाद्घृतप्लुतैः पायसैर्दशांशेन ।
आराधयेत्तदङ्गैर्माटभिराशाधिपैश्च निशितमनाः ॥ ३९
तिलतण्डुलकैर्लौणैस्त्रिमधुरसिक्तैः फलैश्च मधुरतरैः ।
आज्यैरुणकुवलयैस्त्रिदिनं हवनक्रियाशु वश्यकरी ॥ ४०
नित्यश्चादित्यगतां देवीं प्रविचिन्त्य तन्मुखो जप्यात् ।
अष्टोत्तरशतमङ्गामादौ भुवनं वशीकरोत्यचिरात् ॥ ४१
वार्णादर्वाङ्मन्त्री प्रयोजयेत् साध्यनामकर्मयुतम् ।
प्रजपेद्वा हवनविधौ वाञ्छितसिद्धिप्रदस्तथा मन्त्रः ॥ ४२

आकर्षकरं यन्त्रमाचष्टे—वामेति ॥ ३३ ॥

ब्रह्मश्रीमन्त्रमुद्धरति—मायेति । ब्रह्मश्रीमन्त्रस्य ह्रीं बीजम् । स्वाहा शक्तिः । शाक्ते पीठे पूजा । अङ्गब्रह्माणीन्द्रवज्रादिभिरावरणपूजा । वार्णादर्वाङ्मन्त्रीति । प्रणवशक्त्यादिकत्वमुक्तम् ॥ ३४॥३५॥३६॥३७॥३८॥३९॥४०॥४१॥४२ ॥

सतारराजमुख्यन्ते राजाभिमुखिवर्णकान् ।
आभाष्य वश्यमुखि च क्लीं श्रीं मारार्णकान् वदेत् ॥ ४३
वीम्ब्रा देवि महादेविपदं देवाधिदेवि च ।
प्रोक्त्वा सर्वजनस्येति मुखं मम वशं वदेत् ॥ ४४
कुरु कुर्विति ठद्वन्द्वान्तिकं मन्त्रं समुच्चरेत् ।
सप्ताधिकैः सदशभिस्तथा त्रिंशद्भिरक्षरैः ॥ ४५
दशभिः सप्तभिश्चैव चतुर्भिः करणाक्षरैः ।
पञ्चभिः सप्तदशभिर्वर्णैरङ्गक्रिया मनोः ॥ ४६
ब्रह्मश्रीमन्त्रसंप्रोक्ता प्रतिपत्तिरमुष्य च ।
मन्त्रस्य जपकृन्निश्च तथा होमविधिः स्मृतः ॥ ४७
मन्त्री सर्वजनस्थाने कुर्यात् साध्याह्वयं मनोः ।
प्रजपे हवने वाऽथ तथा तर्पणकर्मणि ॥ ४८
देवीध्माष्टशतं प्रसूनवदथ त्रिस्वादुयुक्तं हुनेत्
सप्ताहं भसितेन तेन विहितं पुण्ड्रादिकं वश्यकृत् ।
आज्यैस्तत्कृतहोमपातितसमाजप्तं घृतं प्राशयेत्
साध्यं निष्परिहारकञ्च तदिदं वश्यम्भवेद्देहिनाम् ॥ ४९
शक्तिं साध्यर्क्षवृक्षप्रतिकृतिहृदि संलिख्य संस्थाप्य जीवं
जप्त्वा खन्याऽङ्गणेऽस्मिन्विधिवदनलमाधाय पुष्पैर्जवायाः ।
देवीमन्त्रेण रात्रौ दशपरशतसंख्यैस्तु काचन्दनाक्तै-
र्हुत्वा तां सप्तरात्रं सरिति निखननादुत्तमं वश्यकर्म ॥ ५०
अन्नं मह्य[य्य]न्नं मे देह्यन्नाधिपतये ममेत्युक्त्वा ।
अन्नं प्रदापयेति च ठद्वयान्तोऽन्नप्रदायको मन्त्रः ॥ ५१

राजमुखीमन्त्रमुच्चरति—सतारेति । राजमुखीमन्त्रस्यापि ब्रह्मश्रीमन्त्रवदेव बीजादिकं सर्वम् । क्लीं बीजम् । क्रीं शक्तिरिति वा ॥ ४३॥४४॥४५॥४६॥४७ ॥

मन्त्री सर्वजनस्थान इति शक्त्यादित्वमुक्तम् ॥ ४८ ॥ ४९ ॥

वश्यकरं प्रयोगान्तरमाचष्टे—शक्तिमिति ॥ ५० ॥

अन्नाधिपतिमन्त्रं दर्शयति—अन्नमिति । अन्नमन्त्रस्य वैश्रवण ऋषिः । अनुष्टुप्छन्दः । भूश्रियौ देवते । ग्लौं बीजम् । श्रीं शक्तिः । ग्लां श्रामादि-

करणेन्द्रियरसधातुद्वयवर्णैरङ्गमस्य मन्त्रपदैः ।
द्वायुतजपावधिरेष द्विसहस्रहुतश्च सर्पिरन्नाभ्याम् ॥ ५२
दुग्धाब्धौ रूप्यवप्रावृतकनकमयद्वीपवर्ये सुराढ्ये
कल्पद्रुद्यानकाधो मणिमयलसिते वित्तपस्याऽग्रभागे ।
आसीने भूश्रियौ वाञ्छितवसुनिचयं मन्त्रिणे संसृजन्त्यौ
मन्त्री संचिन्तयानो जपतु दिनमुखे सम्पदेऽन्नस्य मन्त्रम् ॥ ५३
नत्यादिभगवत्यन्ते माहेश्वरिपदं वदेत् ।
अन्नपूर्णेऽग्निजायान्तो मन्त्रोऽन्नप्रदसंज्ञकः ॥ ५४
मायाविहितषड्ङ्गो दिनमुखे जप्यश्च षोड़शसहस्रम् ।
प्रोक्तो जपावसाने सघृतैरन्नैर्दशांशको होमः ॥ ५५
रुद्रताण्डवविलोकनलोलां भद्रवक्त्रनयनां भवकान्ताम् ।
अन्नदाननिरतां जननीं तां संस्मरन् जपतु चित्रदुकूलाम् ॥ ५६
वैश्रवणः पक्षाशः पिङ्गलविविधौ तथैव वित्तेशः ।
सकुबेरः स्वाहान्ताः सव्याहृतयः समीरिता मन्त्राः ॥ ५७
वित्तेशस्याऽन्तराले दशवटसमिधः सर्पिषाक्ता विविक्ता
होतव्या द्रव्यसिद्ध्यै कनकघटकरण्डात्तदोस्तुन्दिलोऽसौ ।
हेमाभो रत्नदीप्तो दरकमलनिधिद्योतितो रत्नपीठे
ध्येयो न्यग्रोधमूले हुतभुजि विदुषा वैश्वदेवावसाने ॥ ५८
मन्त्रैरेतैर्घृतयुतपायसहोमोऽपि मन्त्रिणां विहितः ।
लक्ष्म्यै सघृतैश्च तिलैर्बिल्वसमिद्धोमतस्तथैव फलम् ॥ ५९

युतैरक्षरैरङ्गानि । वैष्णवे पीठे पूजा । अङ्गपृथिव्यादिवलाक्यादीन्द्रवज्रादिभिरावरणपूजा ॥ ५१ ॥ ५२ ॥

मन्त्रमूर्तिं दर्शयति—दुग्धाब्धाविति । मन्त्री सञ्चिन्तयान इति । प्रणवश्रीपृथिव्यादित्वमुक्तम् ॥ ५३ ॥

अन्नपूर्णामन्त्रमुद्धरति—नत्यादीति । अन्नपूर्णाया ह्रीं बीजम् । स्वाहा शक्तिः । ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । माहेश्वरी देवता । शाक्ते पीठे पूजा । अङ्गब्रह्माणीन्द्रवज्रादिभिरावरणपूजा ॥ ५४ ॥ ५५ ॥ ५६ ॥

मन्त्रिणो विहित इति । वैश्रवणमन्त्राणां प्रणवशक्त्यादित्वमुक्तम् ॥५७॥५८॥५९॥

भया भारेन्दुयुक् सैव विबिन्दुर्हस्पताचरैः ।
बालिस्थयोनिनत्यन्तो वसुवर्णो मनुर्मतः ॥ ६०
वसुसाहस्रजापश्च तावच्छतहुतो मतः ।
होमः सर्पिष्मताऽन्नेन बीजेनाऽङ्गक्रिया मता ॥ ६१
रत्नस्वर्णांशुकादीन्निजकरकमलाद्दक्षिणादाकिरन्तं
वासोराशौ निधायाऽपरममरगुरुं पीतवस्त्रादिभूषम् ।
ध्यायन्नासीनमप्यामणभुवि शतसंख्यं सविंशत्कमेवं
भौतापुष्पैर्घृताक्तैस्त्रिदिनमथ हुनेत् स्वर्णवस्त्रादिसिद्ध्यै ॥ ६२
वययोरन्तरा स्त्रंमेदेहिशुक्राचरा द्विठः ।
मन्त्रोऽयुतजपः सर्पिःसहस्रहवनक्रियः ॥ ६३
शुक्रास्ये शुक्लपुष्पैर्हुतभुजि गुणशः सप्तशोऽप्येकविंश-
द्वारं होतव्यमेषोऽप्यतिसितकुसुमालेपनो वामदोष्णा ।
वासोरत्नानि कार्त्तस्वरमपि सततं साधकाय प्रयच्छन्
ध्यातो व्याख्यानमुद्राकलितवरकरस्त्वामणालिन्दसंस्थः ॥ ६४
राजेरस्थोऽहिपो दण्डी वेदान्तेऽसौ विदाहकः ।
सायान्ते नतिरप्यष्टवर्णो वैयासिको मनुः ॥ ६५

बृहस्पतिमन्त्रमाचष्टे—भयेति । बृहस्पतिमन्त्रस्य ब्रह्मानुष्टब्बृहस्पतय ऋष्यादयः । वृं बीजम् । नमः शक्तिः । बीजेनाऽङ्गानि । अङ्गेन्द्रवज्रादिभिरावरणपूजा ॥ ६० ॥ ६१ ॥ ६२ ॥

शुक्रमन्त्रमाह—वययोरिति । शुक्रमन्त्रस्य ब्रह्मविराट्शुक्राद्या ऋष्यादयः । श्रीं बीजम् । स्वाहा शक्तिः । बीजेनाऽङ्गानि मन्त्रपदैर्वा । अङ्गेन्द्रवज्रादिभिरावरणपूजा ।

गुणशः सप्तशोऽप्येकविंशद्वारमिति । तत्र गुणश एकविंशद्वारहोमः मालतीमल्लिकाजातिभिः । सप्तशः एकविंशद्वोमः पङ्कजकुमुदकह्लारकुन्दमन्दारनन्द्यावर्तसेवन्तिकाभिः । मिश्रहोमपक्षे द्विचत्वारिंशदाहुतिसंख्या । अमिश्रहोमपक्षे दशाधिकद्विशतसंख्या आहुतयः ॥ ६३ ॥ ६४ ॥

व्यासमन्त्रमाचष्टे—राजेरस्थ इति । व्यासमन्त्रस्य ब्रह्मानुष्टब्वेदव्यासाः ऋष्यादयः । व्यं बीजम् । नमः शक्तिः । बीजेनाङ्गानि ॥ ६५ ॥ ६६ ॥ ६७ ॥

मुनिव्रातावीतं विमलधियमम्भोदरुचिर-
द्युतिं व्याख्यामुद्राकलनविलसद्दक्षिणकरम् ।
परं जानौ कृत्वा दृढ़कलितकक्षैकविवरं
समासीनं व्यासं स्मरत निरतं पुण्यचरितम् ॥ ६६
प्रकृतिसहस्रजपोऽयं दशांशकृतपायसाज्यहवनविधिः ।
निरुपमकविताप्रज्ञाव्याख्याश्रीसम्पदावहो मन्त्रः ॥ ६७
करचरणपार्श्वमूलद्युलोंहरेबिन्दुदुंसरसनार्णाः ।
अलिकाद्यो वर्मास्त्रद्विठान्तिको मनुरयं ध्रुवादिः स्यात् ॥ ६८
अयुतं प्रजपेच्च षट्सहस्राधिकमन्ते जुहुयाद्दशांशमानैः ।
तिलसर्षपतण्डुलैः सशालीहविराज्यैः सुसमेधिते कृशानौ ॥ ६९
उत्तुङ्गाद्रिः प्रचेता अपि दहनसमीरौ धराव्योमसंज्ञे
प्राक्प्रत्यग्दक्षसौम्यास्वध उपरि च दिक्षु प्रबद्धप्रभाः स्युः ।
तन्मध्यस्थान्विपक्षादिकहरिरुरुदन्तीन्द्रनागान् सचोरान्
हन्त्येतैर्मन्त्रिमुख्यो मनुविहितबलव्याकुलान् सद्य एव ॥ ७०
निजरिपुमचलाद्यैस्तैः ससम्बाधवीतं
मनुविदथ हलोभ्यां रुद्धनिश्वासवेगम् ।
तदुपरिगतबीजैः साधुसंस्तूतवक्त्रं
दहतु सकवचास्त्रैर्द्वीन्दुभिः स्वेच्छयैव ॥ ७१
योनिर्वियत् सनेत्रं परमेवर्णास्तथाऽस्थिगं मेदः ।
रक्तस्थदृक् द्विठान्तस्ताराद्योऽयं मनुर्दशार्णयुतः ॥ ७२

शत्रुजयोपायमन्त्रमाह—करेति । महासङ्कोचकमन्त्रस्य दुं बीजं क्रीं शक्तिः । ब्रह्मानुष्टुप्पर्वतादय ऋष्यादयः । अकचटतपैर्हलोंङ्गामादियुक्तैरङ्गानि ॥ ६८ ॥ ६९ ॥

ध्यानमाह—उत्तुङ्गाद्रिरिति । मन्त्रिमुख्य इति प्रणवादित्वं मन्त्रस्योक्तम् ॥७०॥

मनुविदिति । साध्यादिपदयोग उक्तः ॥ ७१ ॥

अश्वारूढामन्त्रमुद्धरति—योनिरिति । अश्वारूढाया प्रणवानन्तरं पाशशक्त्यङ्कुशत्रयाक्षरं योज्यम् । तथाच त्रयोदशार्णा भवन्ति । द्वाभ्यां हृदयम् । शक्त्या शिरः । अङ्कुशेन शिखा । पुनर्द्वाभ्यां कवचम् । पञ्चभिर्नेत्रम् । द्वाभ्यामस्त्रम् ।

अयुतं जपेन्मनुमिमं सहस्रवारं हुनेत्तथाज्येन ।
ध्याताऽपि गिरिसुतेयं जगतीं विश्वां वशीकरोत्यनिशम् ॥ ७३
अश्वारूढा कराग्रे नवकनकमयीं वेत्रयष्टिं दधाना
दक्षेऽन्येनानयन्ती स्फुरिततनुलता पाशबद्धां स्वसाध्याम् ।
देवी नित्यं प्रसन्ना नवशशधरबिम्बा त्रिनेत्राभिरामा
दद्यादाद्याऽनवद्यां प्रवरफलसुखप्राप्तिहृद्यां श्रियं वः ॥ ७४
विद्ययाऽनुदिनहृद्ययाऽनया होमकर्म वरहेमदायि तत् ।
कामितां सपदि वामलोचनामानयेदपि च मारपीड़िताम् ॥ ७५
हवनक्रिया सपदि वश्यकरी मधुरावसेकपटुना पटुना ।
सदृशो न कश्चन जगत्यपरो मनुनाऽमुनाऽऽनयनकर्मविधौ ॥ ७६
वाणी स्यात्तारूपा शिरसि गिरिसुता शक्तिरूपा ललाटे
रव्यग्न्यक्षोस्तथात्मा विधुरपि वदनावेष्टने टान्तरूपः ।
श्रीर्जिह्वायां स्वरूपाऽप्यभिमतकरिरूपौ स्वहौ दीर्घयुक्ता-
वेवं न्यासो मुखे श्रीविभवसुखयशःकान्तिमेधाकरः स्यात् ॥ ७७

इति श्रीप्रपञ्चसारे चतुस्त्रिंशः पटलः ।

ॐ बीजम् । ह्रीं शक्तिः । स्वाहा वा शक्तिः । शाक्ते पीठे पूजा । पाशाङ्कुशत्रयचरविधानेन पूजा । षोड़शकोष्ठानि लिखित्वा मध्यचतुष्के प्रणवं ससाध्यं लिखेत् । अवशिष्टेष्ववशिष्टान् वर्णान् विलिखेत् । सर्ववश्यकरमिदं यन्त्रम् ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥

अथ न्यासमाह—वाणीति । लक्ष्मीनारायण उवती श्रिय ऋष्यादयः । श्रीं बीजम् । क्लीं शक्तिः ॥ ७७ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
चतुस्त्रिंशत्पटलः ।

पञ्चविंशः पटलः ।

प्राणप्रतिष्ठानमनोर्विधानं प्रवच्यते संप्रति सर्वसिद्धेः ।
यस्मादृतेऽमी कथिताः प्रयोगा व्यर्था भवेयुर्गतजीवकल्पाः ॥ १
प्रोक्त्वापूर्वममुष्यशब्दमथ च प्राणा इह प्राणका-
स्तद्वज्जीव इह स्थितेति च तथा सर्वेन्द्रियाणीति च ।
तद्वाङ्मनसी दृशं श्रुतिमथो घ्राणञ्च सप्राणकं
सेवेहागमथो त्ययुक् सुखचिरे तिष्ठन्तु ठद्वन्द्वयुक् ॥ २
मन्त्रस्याऽस्य विधिर्हरिश्च हर इत्येते मुनित्वे स्थिता-
श्छन्दश्चर्यजुषं ससामकमथोऽतिच्छन्दसं वा भवेत् ।
स्रष्टा या जगतामनादिनिधना सर्वस्य चेष्टाकरी
प्राणाख्या प्रकृतिः क्रियामयवपुर्देवी परा देवता ॥ ३
प्रत्येकं कादिवर्गैः प्रतिगतलिपिभिर्विन्दुयुक्तैर्धराद्यैः
शब्दाद्यैः श्रोत्रमुख्यैर्वदनकरमुखैस्तत्क्रियाभिः क्रमेण ।
बुद्ध्याद्यैश्चात्मनेऽन्तैरुपरि च विलसज्जातिभिः षड्भिरेवं
कुर्यादङ्गानि सम्यग्विशदमतिरथो विश्वरूपत्वसिद्धेः ॥ ४
नाभेर्देशादापदं पाशबीजं हृद्देशादानाभिदेशञ्च शक्तिम् ।
आहृद्देशं मस्तकादङ्कुशाख्यं न्यस्त्वा यादीन् धातुषु न्यस्य सप्त ॥
प्राणे जीवे चैव हंसद्वयाणं न्यस्येन्मूलं व्यापकं मस्तकादि ।
एवं न्यस्य प्राणशक्तिस्वरूपां विद्यां ध्यायेदात्मरूपाञ्च देवीम् ॥ ६

उक्तसर्वमन्त्रजीवभूतस्य प्राणप्रतिष्ठामन्त्रस्य विधानं वक्तुमारभते—प्राण-प्रतिष्ठानेति ॥ १ ॥

प्रोक्त्वापूर्वममुष्येति । प्रोक्त्वा आपूर्वमिति पदच्छेदः । ॐ आं क्रीं क्रों इति प्रोक्तेत्यर्थः । मूलमन्त्रस्यैवंरूपत्वात् । ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुः-सामाथर्वाणि अतिच्छन्दांसि । श्रीमूलप्रकृतिः प्राणशक्तिर्देवता । आं बीजम् । क्रों शक्तिः ॥ २ ॥ ३ ॥

सम्यग्विशदमतिरिति । अङ्गमन्त्राणां स्वरपुटितत्वं सूचितम् । अं कं घं

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमथ गुणमप्यङ्कुशं पञ्च बाणान् ।
बिभ्राणाऽसृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा वः ॥ ७

ध्यात्वा देवीमेवं प्रजपेल्लक्षं मनुं समाहितधीः ।
आज्येनाऽन्ते जुहुयाच्चरुणा वा तद्दशांशतो मन्त्री ॥ ८
शक्ते पीठे देवीं षट्कोणस्थैः प्रजेशहरिरुद्रैः ।
वाणीलक्ष्मीगिरिजासहितैरङ्गैश्च मातृलोकेशैः ॥ ९
प्रयजेच्चतुर्भिरेवं परिवारैर्नित्यमेव मन्त्रितमः ।
एवं संसिद्धमनुर्वश्याद्यान्यारभेत कर्माणि ॥ १०

पाशाङ्कुशान्तरितशक्तिमनोः परस्ता-
दुच्चार्य यादिवसुवर्णगुणं सहंसम् ।
पश्चादमुष्य पदमुच्चरतु प्रयोग-
मन्त्रोऽयमित्थमुदितो ग्रहसंख्यया वा ॥ ११

गं खं कं पृथिव्यप्तेजोवाय्वाकाशात्मने आं क्रौं हृदयाय नमः । इत्यादिमन्त्रेण अङ्गमन्त्रा द्रष्टव्याः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

तद्दशांशतो मन्त्रीति । ॐ आं स्वाहा ॐ ह्रीं स्वाहा ॐ क्रौं स्वाहा ॐ यं भूतायै स्वाहा । एवं राद्यक्षरयुताभिः वैवस्वताद्याभिः सकृत्सकृद्धुत्वा ॐ क्षं सं हं सः ह्रीं ॐ इत्यक्षरैरपि तथा हुत्वा मूलेनोक्तसंख्यं जुहुयादित्यर्थः ॥ ८ ॥

प्रजेशहरिरुद्राः ब्रह्मविष्णुरुद्राः । ते च षट्कोणस्य प्राङ्निर्ऋतिवायुकोणस्थाः । वाग्लक्ष्म्याद्याः ऐशानाग्निवरुणकोणस्थाः । मन्त्रितम इति । ब्रह्मादीनां स्वस्वबीजयोग इत्युक्तः ॥ ९ ॥ १० ॥

ग्रहसंख्यया वेति । प्राणप्रतिष्ठामन्त्रसंग्रह उक्तः । ग्रहशब्देन नवसंख्या लक्षिता । नवमन्त्रैर्वा प्राणप्रतिष्ठेत्यर्थः । यं रं लं वं शं षं सं हौं हंसः इत्येभिरित्यर्थः । गुणशब्देन ॐ तेन हौमिति । पाशादिक्षरयोगस्तु पदद्वयेऽपि समानः । अन्यथापूर्तेः । अथवा ग्रहसंख्यया वेत्यस्यायमर्थः । यादिवसुवर्णगुणं ग्रहसंख्यया सप्तसंख्यया युक्तं वेति । याद्यष्टकानन्तरं प्रणवं क्षं सं हं सः ह्रीं ॐ इति च संयोज्यमित्यर्थः [ग्रहसंख्ययैवेति राघवभट्टधृतपाठः] ॥ ११ ॥

मृता वैवस्वता चैव जीवहा प्राणहा तथा ।
आकृष्या ग्रथना चैव प्रमादा विस्फुलिङ्गिनी ।
चेचक्रप्रतिहारीति प्राणदूत्यश्च यादिकाः ॥ १२

बद्ध्वा साध्यं पाशबीजेन शक्त्या
गृह्णन्नाकृष्याऽङ्कुशेनाऽथ यादीन् ।
दूतीश्चोक्त्वा साध्यनामाऽथ धातू-
नेवं मन्त्रो यावदात्मा सवीर्यः ॥ १३

दूतीमन्त्रानुद्धरति—मृतेत्यादिना । आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ चं सं हं सः ह्रीं ॐ यं मृते अमुष्य मृतात्मकान् प्राणान् इहाहर । अमुष्य मृतात्मकाः प्राणा इह प्राणा इति वा । इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॐ चं सं हं सः ह्रीं ओं इत्यभिधाय आं ह्रोमित्यादि ओमन्तमुक्त्वा यं मृते अमुष्य मृतात्मकं जीवमिहाहर । अमुष्य मृतात्मकजीवः इह स्थित इति वा । इहैवेत्यादिकमभिधाय आं ह्रोमित्याद्योमन्तमुक्त्वा यं मृते अमुष्य मृतात्मकानि सर्वेन्द्रियाणि वाङ्मनश्चक्षुः श्रोत्र घ्राण प्राणानिहाहर । अमुष्य मृतात्मकानि सर्वेन्द्रियाणि वाङ्मनश्चक्षुः श्रोत्र घ्राण प्राणा इति वा । इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा । ॐ चं सं हं सः ह्रीं ओमिति वदेत् । एष मृतामन्त्रः । एवं वैवस्वतादिमन्त्रा जहनीयाः ॥ १२ ॥

प्राणप्रतिष्ठाप्रकारमाह—बद्ध्वेति । साध्यस्य शक्तिं पाशशक्तितेजोऽङ्कुशमहाभ्रमरकालदण्डरूपेण पञ्चधा निःसार्य पाशबीजमुच्चरन् साध्यं पाशेन गले बद्ध्वा शक्तिबीजतेजसा तं स्ववशे कृत्वा अङ्कुशेनाकृष्याऽग्रतः संस्थाप्य यादृष्टकमुच्चरन् साध्यस्य त्वगादीन् व्याप्याऽतिक्रम्य महाभृङ्गेण साध्यं कवलीकृत्य कालदण्डताडनेन सुप्तं तं संबोध्य चं इति सपरिवारं तमुन्मूलीकृत्य समिति स्वप्राणशक्तिरूपमहाभ्रमरेण बाधयित्वा हंस इति स्वैक्यं संभाव्य ह्रीं ओमिति वश्यादौ जीवनाय प्लावनं कृत्वा यं मृते इत्यादिना स्वमृतां संबोध्य अमुष्य मृतात्मकाः प्राणा इह प्राणा इत्यादिना स्वमृताप्राणानितरमृताप्राणैः संयोज्य रमिति साध्यमृतातन्तुच्छेदं विधाय सकीटयन्त्रहृदयायां पुत्तल्यामात्मनि वा साध्यमृताप्राणान् संस्थाप्य पूर्ववत् आं ह्रीं इत्यादि सप्रतिपत्तिकं जपन् साध्यहृदयं गत्वा तस्य मृताजीवादिकमप्येवमेवानयेदिति मृताप्राणप्रतिष्ठामन्त्रक्रमः । एवमेव वैवस्वतादिप्राणा अपि स्थापनीयाः । युगपदेव वा मृतादिप्राणान् संस्थापयेत् ।

सुप्तेऽशेषजने निशीथसमये साध्ये स्वपित्यादरा-
दारुह्य स्ववशं निधाय हृदये साध्याकृतेः कीटकम् ।
बद्ध्वा तच्च निपीड़मेव सहसा कालस्य यष्ट्या शिर-
स्याताड्य क्षुभिताखिलेन्द्रियगणं साध्यं स्मरेत् साधकः ॥ १४

वायव्याग्नेयैन्द्रवारीशमहेश-
क्रव्यात्सोमप्रेतराशमध्यगेषु ।
स्थानेष्वेतेष्वष्ट यादीन् सहंसान्
भृङ्गान् ध्यायेत् स्वीयबिन्दुप्रबद्धान् ॥ १५

अथ यादीनिति । अथाऽनन्तरं यादीन् होमन्तानुक्त्वा साध्यस्य धातून् जीवं च सपरिकरं स्वहृदयाम्बुजमध्ये वायुना स्वमण्डले संकोचितं कवलीकृत्य सयादिकदूतीश्च स्वस्य सम्बुद्ध्यन्ताः साध्यस्य चामुष्य मृतात्मकान् प्राणानित्यादिक्रमेणोक्त्वा चशब्देन क्रियां चोक्त्वा पुनरपि साध्यनामादिकम् अमुष्य मृतात्मकाः प्राणा इह प्राणा इत्यादिक्रमेणोक्त्वा अथानन्तरं पुनरपि धातून् मृतादींश्च एवं पूर्वोक्तक्रमेण जीवाद्याहरणार्थमुक्त्वा इत्यनुषज्यते । सवीर्यः सप्राणादिकः साध्यस्य जीवो यावत् साधकस्य आत्मा भवति साधकात्मना एकीभवति तावत् यादिके आवर्तिते सति प्रयोगमन्त्रो भवतीति यादीनां त्रयावृत्तिरभिहिता । प्राणजीवसर्वेन्द्रियाकर्षणार्थं केचिद् यादीनां चतुरावृत्तिं वर्णयन्ति । प्राणजीवेन्द्रियसामान्यतद्विशेषाणामाकर्षणार्थं केचित् पञ्चावृत्तिं वर्णयन्ति । प्राणसामान्य जीवेन्द्रियसामान्य तद्विशेष-प्राणविशेषाणामाकर्षणार्थं केचित्त्रयावृत्तिं वदन्ति ॥ १३ ॥

मन्त्रोक्तानां सर्वेषां प्रत्येकमाकर्षणार्थं प्राणप्रतिष्ठायाः कालमाह— सुप्त इति । आदरादिति । तात्पर्येणेत्यर्थः । आरभ्येति । साधकः स्वयं पाशादि-पञ्चात्मना निष्क्रम्य साध्यं पाशेन बद्ध्वा शक्त्या वशीकृत्य अङ्कुशेनाकृष्य तस्यान्तः प्रविश्य तस्य हृदयकमलमारुह्य महाभृङ्गेण तं कवलीकुर्वन् वशे निधायेत्यर्थः । साध्याकृतेः कीटकमिति । प्राणप्रतिष्ठारम्भात् प्रागेव साध्य-प्रतिकृतेः हृदये प्राणप्रतिष्ठायन्त्रं लिखित्वा संस्थाप्य वा तत्र किञ्चित् कीटादि सजीवं निक्षिप्याच्छाद्य प्रयोग आरभणीयः इत्युक्तम् । तं चेत्यादिना कालदण्डेन ताड़यित्वा तस्य बोधनमुक्तम् । अन्यथा प्राणप्रतिष्ठायोगात् ॥ १४ ॥

स्वहृदये साध्यहृदये पुत्तलीहृदये च मृतादिदूतीनां स्थानमाह— वायव्येति । यादीन् सहंसान् भृङ्गान् ध्यायेदिति । यादयक्षररूपमृतादिनवकं

स्वीयेऽप्येवं संस्मरेद्धृत्सरोजे
भृङ्गीरूपान्निर्गतान् श्वासमार्गैः ।
साध्याङ्गस्थान् चञ्चरीकान् गृहीत्वा
स्वीयं स्थानं पूर्ववत् संप्रविष्टः ॥ १६

बीजानि रक्तानि तु वश्यकर्मण्यम्भोधराभाण्यभिचारकाले ।
धूम्राणि विद्वेषविधौ सहोमे पीतानि संस्तम्भविधौ स्मरेच्च ॥ १७

अथवा साध्यप्राणान् मण्डूकाकारधारिणो ध्यायेत् ।
स्वीयान् भुजगाकारानभिचारादौ नृशंसकर्मविधौ ॥ १८

प्राणप्रतिष्ठाकर्मैवं विधायैकादशावरम् ।
पुत्तल्यादौ स्वचित्ते वा तांस्तु संस्तम्भयेद्भुवा ॥ १९

आकृष्टानां साध्यदेशादसूनां
पुत्तल्यादावप्ययं स्यात्प्रकारः ।
किन्तु स्वीये हृत्सरोजे प्रवेशो
वश्याकृष्ट्योरेव नात्राभिचारे ॥ २०

भृङ्गरूपेण साध्यहृदयकमलपत्रेषु कर्णिकायां चोक्तक्रमेण स्मरेदित्युक्तम् । स्वीयबिन्दुप्रबद्धानिति । भृङ्गमस्तकबिन्दुगततन्तुभिः परस्परबद्धानित्यर्थः ॥ १५ ॥

स्वहृदये विशेषमाह—स्वीय इति । निर्गतान् श्वासमार्गैरिति । तदानीं वह्न्यासापुटेन निर्गम्य ऋज्वा नाड्या साध्यहृदयं प्रविश्य पूर्ववत्तत्सर्वमादायान्यया तयैव वा नाड्या निर्गम्य पुत्तल्याम् ऋज्वा नाड्या प्रविश्य तद्धृदयपङ्कजे सर्वं संस्थाप्य ग्लौंबीजात्मना महाकीटेन संस्तभ्य यथागतं स्वदूतीभिः सह पुत्तल्या निर्गम्य निर्गमननाड्या साध्यहृदयं प्रविश्य प्रवेशनाड्या निर्गम्य निर्गमनाड्या स्वहृदयं प्रविश्य स्वदूतीं स्वहृदयपङ्कजे स्थापयित्वा मयि प्राणा इह प्राणाः मयि तद्जीव इह स्थितः इत्यादिमन्त्रं जपित्वा पुनरप्येवं कुर्यादित्यर्थः । साध्यहृदयाद् यथागतं चेन्निर्गच्छति तर्हि पुत्तल्या निर्गतस्य पुनः न साध्यहृदयप्रवेशः कर्तव्यः । किन्तु स्वहृदयमेव प्रवेष्टव्यम् ॥ १६ ॥ १७ ॥

मारणे विशेषप्रयोगमाह—अथवेति । भुवेति । ग्लौं बीजेनेत्यर्थः ॥१८॥१९॥

पुत्तलीस्वहृदादिष्वप्याकृष्टानां साध्यप्राणानां भुवा स्तम्भनं कार्यमित्याह—आकृष्टानामिति । आभिचारकर्मणि साध्यप्राणाः सर्वात्मना पुत्तल्यामेव स्थापनीयाः । वश्याकर्षणादौ एकमंशं पुत्तल्यां संस्थाप्य अंशान्तरं स्वदूतीभिः

पाशाद्यत्रिकयुक्तमूलहृदयभ्रूमध्यसूत्रायिता
साग्निः साध्यललाटरन्ध्रपथतोऽप्यामूलमाजग्मुषी ।
योन्यामात्महृदब्जमेवमनिशं भ्राम्यत्यसौ चिन्तिता
शक्तिर्जन्मशतान्यपीह वशयेत् साध्यं तथाकर्षयेत् ॥ २१

प्राणप्रतिष्ठाविधिरेवमुक्तः
साङ्ग. सयोगो विनियोगयुक्तः ।
अस्मिन् प्रवीणो गिरिकाननादीन्
प्रचालयेत् किं पुनरात्मयुक्तान् ॥ २२
इति श्रीप्रपञ्चसारे पञ्चत्रिंशः पटलः ।

सह स्वहृदये स्थापनीयमित्याह—किञ्चिति ॥ २० ॥

सर्वाकर्षादिकरं योगमाह—पाशाद्यत्रिकयुक्तेति । अष्टदलमध्यगतशक्तौ साध्यादिकं लिखित्वा पाशाङ्कुशाभ्यां तां संवेष्ट्य याद्यष्टकमष्टदलेषु लिखित्वाऽवशिष्टेन बहिः संवेष्ट्य भूपुरद्वये पाशाङ्कुशौ लिखेत् । इति यन्त्रविधिः ॥ २१ ॥
॥ २२ ॥

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
पञ्चत्रिंशत्पटलः ।

[अतीतपटलोक्तसकलमन्त्रयन्त्रादीनां प्राणप्रतिष्ठाविध्यन्तानां गुरूपदेशलब्धानामेव यथोक्तफलसाधनत्वं न लिखितपठितानामिति शिष्यदेशिकार्थमाह—प्राणाग्निहोत्रमिति । अनलास्त्रं त्रिष्टुप्पटलोक्तम् । अलिप्रयोगोऽस्मिन् पटल उक्तः । योगः प्रणवपटलादावुक्तः । इति उपान्त्यश्लोकव्याख्यानावसरे सम्बन्धदीपिकायाम् । एतन्मतेऽत्राधिकः श्लोको विद्यत इति प्रतीयते] ।

षट्त्रिंशः पटलः ।

अथ सन्तानसंसिद्धिसमाकुलितचेतसाम् ।
तदुत्पत्तिकरं योगं प्रवक्ष्ये गृहमेधिनाम् ॥ १
नचाऽपुत्रस्य लोकोऽस्ति पितरोऽधः पतन्ति च ।
तस्मात्तु सकलोपायैर्यतेताऽपत्यसिद्धये ॥ २
देवर्षिपितृपूजासु विरतानामभक्तितः ।
गुरुमातृपितृश्राद्धवञ्चकानाञ्च नित्यशः ॥ ३
अर्थिभ्योऽर्थमदातॄणां विद्यमानेऽर्थसञ्चये ।
अदत्त्वैवाऽतिथिभ्योऽन्नं भोक्तॄणां पापचेतसाम् ॥ ४
हरिशङ्करयोः पादपद्माचारहितात्मनाम् ।
स्वभार्यानिन्दकानाञ्च लोकवेदविरोधिनाम् ॥ ५
इत्यादिदोषदुष्टानां पापानां गृहमेधिनाम् ।
दुष्प्रतिग्रहदोषाद्वा जायते त्वनपत्यता ॥ ६
एवमादिकदोषापनोदिनी सुतसिद्धिदा ।
अशेषपापहन्त्री च वक्ष्यते यजनक्रिया ॥ ७
पुत्राप्तये गृहस्थो दीक्षाविधिना चतुर्दशीरात्रिम् ।
सह पत्न्या गमयित्वा कृत्वा पौर्वाह्णिकीः क्रियाः सकलाः ॥ ८
संयोज्य किञ्चन यथाविधि पञ्चगव्यं
संकोचकेन मनुना प्रतिमथ्य वार्णम् ।
संमन्त्र्य चाऽष्टशतकं समवद्यभूत-
मन्त्रैः पिबेत् स्वयमसावपि गर्भधात्री ॥ ९

उक्तमन्त्रानुष्ठानयोग्यं पुत्रोत्पत्तिकरं प्रयोगविशेषं वक्तुमारभते—अथ सन्तानेति । न केवलं पुत्रानुत्पत्तिहेतुदोषाणामेवाऽयं प्रयोगो नाशहेतुः किन्तु सर्वपापापनोदक इत्याह—अशेषपापेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

दीक्षाविधिनेति । ब्रह्मचर्याधःशय्यापयोव्रतादिनियमेनेत्यर्थः । कृत्वा पौर्वाह्णिकीः क्रियाः सकलाः पञ्चदश्यामिति शेषः ॥ ८ ॥

यथाविधि पञ्चगव्यमिति । आत्माष्टाक्षरस्थमन्त्रैरुक्तमानकृत्या संयोज्येत्यर्थः ।

तत्राऽग्निमाधाय चरुञ्च कृत्वा सङ्कल्प्य तद्दक्षिणमुत्तरञ्च ।
भागक्रमात् पैतृकदैविकं तत्प्रीत्यै तु पूर्वं जुहुयात् क्रमेण ॥ १०

स्मृत्वा निजं पितरमप्यधरान्निषण्णं
सान्नाय्यपिण्डयुगलं घृतसंप्लुतं तत् ।
हुत्वा स्रुवेण घृतसंपुटितं तथैव
मन्त्री पितामहमथ प्रपितामहञ्च ॥ ११

व्याहृतीभिरथ पक्वहोमतः सर्वशः प्रतिजुहोतु सर्पिषा ।
मातृवर्गगुरुतत्पितृद्वयं पूर्ववत्समवदाय साधकः ॥ १२

कलायुतैः षोड़शमूर्तिमन्त्रैर्व्यस्तैरथाऽष्टाक्षरजैश्च वर्णैः ।
अष्टौ समस्तेन च तेन पञ्चाक्षरेण चाऽष्टाक्षरवज्जुहोतु ॥ १३

संकोचकमनुरत्र भविष्यति । पात्रद्वयेऽवदानद्वयं कृत्वा प्रथमं स्वयमेकं हस्ते संगृह्य इतरं गर्भधात्र्या दद्यात् । अस्मिन् प्रयोगे आत्माष्टाक्षरोक्तविधानेनात्मानं सकलीकृत्य स्वयं परशुचक्रगदात्रिशूलधरः सिन्दूरकाञ्चनवर्णः शङ्करनारायणौ ध्येयः पूज्यश्च । अङ्गैः प्रथमावृत्तिः । ईशानादिभिर्द्वितीया । अष्टाक्षराक्षरमूर्तिभिः तृतीया केशवादिषोड़शमूर्तिभिश्चतुर्थी । इन्द्रादिभिरन्येत्यावरणक्रमः ॥९॥

तत्राऽग्निमाधायेति । देवस्योत्तरे भागे । दक्षिणे भाग इत्यन्ये । चरुं चोक्तप्रकारेण योग्यपरिमाणं कृत्वा देवपितृभागं विभजयन् पलाशसमिधा देवभागमधिकं कल्पयेत् ॥ १० ॥

निजं पितरमप्यधरान्निषण्णमिति । पित्रादीन् देवोपासत्कृतेन पीठसमीपे स्मृत्वेत्यर्थः । सान्नाय्यशब्देन चरुरुच्यते । घृतसंप्लुतमिति । हविषो घृतबहुलत्वमुक्तम् । घृतसंपुटितमिति । स्रुवेण जुह्वामुपस्तीर्याऽवदानद्वयं तत्र निधाय स्रुवेणाऽभिघार्य होतव्यमित्यर्थः । स्रुवेणेति । मन्त्राणां प्रणवादित्वमुक्तम् । अमुकगोत्राय अमुकनाम्ने अस्मत्पित्रे स्वाहेत्यादिमन्त्राः सूचिताः मन्त्रीति ॥११॥

पक्वहोमान्तरं सप्रणवव्याहृतीभिः होमः कर्तव्य इत्याह—व्याहृतीभिरिति । प्रथमस्तु सप्रणवव्याहृतिहोमः प्रसिद्ध एव । मातृपितामहीप्रपितामह्यः मातृवर्गः । तद्गुरुर्मातामहः । तत्पितृद्वयं मातुःपितामह मातुःप्रपितामह-लक्षणम् ॥ १२ ॥

एवं पितॄणां पक्वनवकं हुत्वा देवभागेन देवहोमः कर्तव्य इत्याह—कलायुतैरिति । षोड़शमूर्तयः केशवाद्याः । अष्टाक्षरवदिति । ओं नमः

पक्वाहुतीनामिति वर्णसंख्यं चतुर्गुणं चापि घृताहुतीनाम् ।
हुत्वाऽवदानद्वितयञ्च पुंस्त्रीभेदप्रभिन्नं हविषा करोतु ॥ १४

पञ्चाक्षरेण पुरुषात्मकमन्यदष्ट-
वर्णेन चाऽष्टशतयुग्ममथ प्रजप्य ।
संयोज्य तद्युगलमप्यभिजप्य विष्णु-
र्योन्यादिकेन मनुना च कपर्दिसंख्यम् ॥ १५

पुरुषः पुरुषात्मकं प्रकृत्यात्मकमन्याथ समाहितोपयुज्य ।
अवदानयुगं क्रमान्मनस्वी पुनराचम्य समर्चयेद्धुताशम् ॥ १६
गुरवेऽप्यथ दक्षिणां प्रदत्त्वाऽनलमुद्वास्य च भोजयेद्द्विजातीन् ।
प्रतिपर्वकमेवमेकवृद्ध्या मतिमान् वत्सरकं प्रपूरयीत ॥ १७
एकक्रासादन्यमब्दं द्विजातीन् संभोज्याऽन्नं पूरयेदेकवृद्ध्या ।
संपूर्यमाणादेवमेव त्रिकाब्दादर्वाक् पुत्रो जायते दैवशक्त्या ॥ १८

पितृदेवताप्रसादान्मेधायुःकान्तिसंयुतो विद्वान् ।
लक्ष्मीतेजोयुक्तो धर्मरुचिर्भवति सन्ततेः कर्त्ता ॥ १९

समुनिसुरपितृभ्यो ब्रह्मचर्येण यज्ञै-
स्त्रिविधमृणमपत्यैश्चैव संमोचयेद्यः ।
श्रुतिवचनकृदस्मिन्वाऽपि लोके परस्मि-
न्निति स तु गृहमेधी पूज्यते साधुलोकैः ॥ २०

वर्गादिको हलोमन्तः सङ्कोचाख्यो ध्रुवादिकः ।
मन्त्रः स्याद्भूतमनवः स्युश्च भूतात्मनामभिः ॥ २१

शिवाय स्वाहा इत्यादिक्रमेणाऽक्षरैः हुत्वा ॐ नमः शिवाय स्वाहेत्यपि पञ्चवारं जुहुयादित्यर्थः ॥ १३ ॥

हुताहुतिसंख्यामाह—पक्वाहुतीनामिति । वर्णसंख्यमिति । एकपञ्चाशत्-संख्यातमित्यर्थः । अवदानद्वितयमिति । भागद्वयादामलकप्रमाणं हविरादाय मिश्रीकृत्याऽवदानद्वयं स्त्रीपुंसयोर्विभागेन करोत्वित्यर्थः ॥ १४ ॥ १५ ॥ १६ ॥ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

भूतात्मनामभिरिति । भूतबीजैरात्मशब्देन नामभिश्च भूतमनवः स्युरित्यर्थः । लं पृथिव्यात्मने नमः । इत्यादयो भूतमन्त्राः ॥ २१ ॥

अतो हिताय जगतां प्रथितं शितचेतसाम् ।
अथ संक्षिप्य वक्ष्यामि लक्षणं गुरुशिष्ययोः ॥ २२
स्वच्छः स्वच्छन्दचरितोऽतुच्छधीस्त्यक्तकृच्छ्रयः ।
देशकालादिविद्देशे देशे देशिक उच्यते ॥ २३
अग्रगण्यः समग्रज्ञो निग्रहानुग्रहे क्षमः ।
षड्वर्गविजयव्यग्रोऽनुग्रो विगतविग्रहः ॥ २४
शुक्लः शुक्लांशुकोऽक्लिष्टकर्माऽविक्लवमानसः ।
वेदवेदाङ्गविद्यादिवेदिता विदितागमः ॥ २५
दुष्टदोऽनिष्टसंहर्ता दृष्टादृष्टसुखावहः ।
रतोऽविरतमर्चासु परं पुरमुरद्विषोः ॥ २६
दाता दान्तः शान्तमना नितान्तं कान्तविग्रहः ।
स्वदुःखकारणेनापि परं परसुखोद्यतः ॥ २७
ऊहापोहविदध्यात्मव्याकुलो मोहवर्जितः ।
अज्ञानुकम्पी विज्ञातज्ञानो ज्ञातपरेङ्गितः ॥ २८
निरंशः सांशवित् सर्वसंशयच्छिदसंशयः ।
नयविद्विनयोपेतो विनीतनीतिरात्मवान् ॥ २९
व्याधिरप्रामितव्याधिः समाधिविधिसंयुतः ।
श्रुतिशूरोऽतिधीरश्च वीरो वाक्यविशारदः ॥ ३०
वर्गोपेतसमारम्भो गभीरो दम्भवर्जितः ।
आदर्श इव विद्यानां न तु दर्शनदूषकः ॥ ३१
असौ मृग्यश्च दृश्यश्च सेव्यश्चाऽभीष्टमिच्छता ।
शिष्यस्तदावर्जनकृद्देहेन द्रविणेन च ॥ ३२
तस्य पादारविन्दोत्थरजःपटलभूषणः ।
स्नानमप्राप्य न प्राप्यं प्रायो बुद्धिमतेप्सितम् ॥ ३३

[गुरुशिष्यलक्षणं सफलमाह—अतो हितायेति ॥ २२ ॥]

[तत्र गुरुलक्षणमाह—स्वच्छ इति । कृच्छ्रयः रागः । शुक्लः शुचिः । आत्मवान् प्रशस्तबुद्धिः । व्याधिः विगतमानसव्यसनः । वीरः अध्यवसायान्तगामी । वर्गोपेतसमारम्भः पुरुषार्थसम्बन्धिव्यापारवानित्यर्थः ॥ २३—३१ ॥]

नित्यशः कायवाक्चित्तैस्त्रिद्व्येकाब्दाधिकावधि ।
परिचर्यापरः शिष्यः स्यात् सुसंयतमानसः ॥ ३४
तं तथाविधमालक्ष्य तथाऽवितथवादिनम् ।
मातृतः पितृतः शुद्धं बुद्धिमन्तमलोलुपम् ॥ ३५
अस्तेयवृत्तिमास्तिक्ययुक्तं मुक्तिकृतोद्यमम् ।
अकलङ्कं मृषाहीनमहीनद्रव्यमानसम् ॥ ३६
ब्रह्मचर्यरतं नित्यं परिचर्यापरं गुरोः ।
अल्पाशनिद्रं पूजायामनल्पकृतकल्पनम् ॥ ३७
अधीतवेदं स्वाधीनमनाधिं व्याधिवर्जितम् ।
तरुणं करुणावासं परितोषकरं गुरोः ॥ ३८
सुवेषमेषणातीतममलं विमलाशयम् ।
सुप्रसन्नमसन्नाङ्गं सदा सन्निहितं गुरोः ॥ ३९
परोपकारनिरतं विरतं परदूषणे ।
मातृवद्गुरुपत्नीञ्च भ्रातृवत्तत्सुतानपि ॥ ४०
स्मरन्तमस्मराबाधं स्मितोपेतमविस्मितम् ।
परिगृह्णीत् परीक्ष्यैवं शिष्यमेवंगुणं गुरुः ॥ ४१
अलसं मलसंक्लिन्नं क्लिष्टं कष्टान्ववायजम् ।
दम्भान्वितमगम्भीरं चण्डं पण्डितमानिनम् ॥ ४२
रागिणं रोगिणं भोगलालसं बालसम्मितम् ।
रौद्रं दरिद्रं निद्रालुमाद्यूनं क्षुद्रचेष्टितम् ॥ ४३
नृशंसमन्धं बधिरं पङ्गुं व्यङ्गममङ्गलम् ।
अतिदीर्घमतिह्रस्वमतिस्थूलं कृशात्मकम् ॥ ४४
परदारपरं भीरुं दारुणं वैरिणं सताम् ।
तुच्छं त्वलब्धवैराग्यं स्तब्धं लुब्धकबान्धवम् ॥ ४५
आदित्सुं कुत्सितं वत्सं बीभत्सं मत्सरात्मकम् ।
मुखिनं मुखरं दुष्टं दुर्मदं मूर्खमानसम् ॥ ४६

[शिष्यलक्षणमाह—शिष्यस्तदिति । एषणा पुत्रवित्तलोकेच्छा ॥३२—४१॥]

[शिष्यत्वेनाऽग्राह्यानाह—अलसमिति । चण्डो मूर्खः । आद्यूनं बह्वाशिनम् ।

प्रत्यग्रमुग्रं व्यग्रेहमग्रगण्यं दुरात्मनाम् ।
भ्रष्टव्रतं तमःस्पृष्टं क्लिष्टमिष्टापहं नृणाम् ॥ ४७
स्वार्थकृत्ये प्रसक्तार्थं निरर्थारम्भणं शठम् ।
ईदृग्विधं गुरुः शिष्यं न गृह्णीयात् कथञ्चन ॥ ४८
यदि गृह्णाति तद्दोषः प्रायो गुरुमपि स्पृशेत् ।
मन्त्रिदोषो यथा राज्ञि पत्यौ जायाकृतो यथा ॥ ४९
तथा शिष्यकृतो दोषो गुरुमेति न संशयः ।
स्नेहाद्वा लोभतो वापि योऽनुगृह्णाति दीक्षया ।
तस्मिन् गुरौ सशिष्ये तु देवताशाप आपतेत् ॥ ५०
मधुद्विषि महादेवे मातापित्रोर्महीभृति ।
भक्तिर्या सा पदाम्भोजे कार्या निजगुरोः सदा ॥ ५१
छायाच्छापादुकोपानद्दण्डांश्च शयनासने ।
यानं मनोगतं चाऽन्यदन्तेवासी न लङ्घयेत् ॥ ५२
व्याख्यां विवादं स्वातन्त्र्यं कामितां कामजृम्भिकाम् ।
निद्राकुतर्कक्रोधांश्च त्यजेद्गुरुगृहे सदा ॥ ५३
सद्यास्यधर्मविण्मूत्रोत्सर्गनिष्ठीवनादिकम् ।
परित्यजेत् परिच्छाता वमिञ्च गुरुमन्दिरे ॥ ५४
ग्राहोक्तिमनृतं निद्रामृणञ्च क्रयविक्रयम् ।
परित्याज्यं गुरौ तस्य सपत्नैश्च समागमम् ॥ ५५
दृष्टं वाऽनिष्टमादिष्टं गुरुणा यत्तु गुर्वपि ।
त्वरया परया कुर्याद्बुद्ध्या सम्यगजिह्मया ॥ ५६
कर्मणा मनसा वाचा सदा भक्तियुजा गुरुम् ।
निर्व्याजं पूजयेच्छिष्यो निजकार्यप्रसिद्धये ॥ ५७
लोकोद्वेगकरी या च या च मर्मनिकृन्तनी ।
स्थित्युच्छेदकरी या च तां गिरं नैव भाषयेत् ॥ ५८

वीभत्सं जुगुप्सितम् । दुर्मदं दुर्मानम् । प्रसक्तार्थं यथासिद्धप्रयोजनम् । ॥ ४२—५० ॥]

[दीक्षितशिष्यस्याचारमाह—मधुद्विषीति ॥ ५१—६१ ॥]

रम्यमप्युज्ज्वलमपि मनसोऽपि समीहितम् ।
लोकविद्वेषणं वेशं न गृह्णीयात् कदाचन ॥ ५९
इत्याचारयुतः सम्यगाचार्यं यः समर्चयेत् ।
कृतकृत्यः स वै शिष्यः परत्रेह च नन्दति ॥ ६०
देवान्ऋषीनपि पितॄनतिथींस्तथाऽग्नी-
न्नित्योद्यतेन मनसा दिनशोऽर्चयेद्यः ।
इष्टानवाप्य सकलानिह भोगजातान्
प्रेत्य प्रयाति परमं पदमादिपुंसः ॥ ६१
इत्थं मूलप्रकृत्यक्षरविकृतिलिपिव्रातजातग्रहर्क्ष-
क्षेत्राद्यावद्भूतेन्द्रियगुणरविचन्द्राग्निसंप्रोतरूपैः ।
मन्त्रैस्तद्देवताभिर्मुनिभिरपि जपध्यानहोमार्चनाभि-
स्तन्त्रेऽस्मिन् पञ्चभेदैरपि कमलज ते दर्शितोऽयं प्रपञ्चः ॥ ६२
यदाश्रया विप्रकृतिस्वभावतो
विभिन्नतारादिसमुत्थितौजसः ।
जगन्ति पुष्णन्ति रवीन्दुवह्नयो
नमोऽस्तु तस्मै परिपूर्णतेजसे ॥ ६३
इति श्रीप्रपञ्चसारे षट्त्रिंशः पटलः ।

* ॥ समाप्तोऽयं प्रपञ्चसारः ॥ *

[निगदितं सकलमप्यर्थमनूद्य उपसंहरति—इत्यमिति । मूलप्रकृतिश्चासौ अक्षरं चेति मूलप्रकृत्यक्षरं भुवनेशीबीजम् । लिपिव्रातं मातृका । क्षेत्राणि राशयः । आदिपदेन तिथिकरणग्रहः । गुणाः सत्त्वादयः । क्षेत्राद्यैरावद्धा ये भूतेन्द्रियादयः तैः संप्रोतं रूपं येषां मन्त्रादीनां तैः सह जगत्प्रपञ्चो विस्तारो विज्ञानप्रपञ्चो वा तन्त्रे दर्शित इति योजना । कमलज इति सम्बुद्धौ ॥ ६२ ॥]

[मङ्गलमाचरन् प्रारब्धग्रन्थमुपसंहरति—यदाश्रयेति ॥ ६३ ॥]

इति श्रीपद्मपादाचार्यकृते प्रपञ्चसारविवरणे
षट्त्रिंशत्पटलः ॥